Vedarsha Kosha

1935 Acc. No. 19554

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

* ओ३म् *

वेदार्षकोषः

ऋषेर्दयानन्दस्य वेदभाष्येऽन्यग्रन्थेषु चोपलभ्यमान-
वैदिकशब्दार्थानां संग्रहरूपः

तत्र तत्र निघण्टुनिरुक्तब्राह्मणोपनिषदामर्थोद्धृतिभिश्च संवलितः

काङ्गड़ीगुरुकुलाचार्यस्य पण्डितचमूपतेर्निरीक्षणे
संगृहीतः सम्पादितश्च

तस्यायं प्रथमो भागः

श्रीमत्या पञ्चनदप्रान्तीयाऽऽर्यप्रतिनिधिसभया प्रकाशितः

आर्य-संवत् १९७२९४९०३५

वैक्रमाब्दः १९९१ दयानन्दाब्दः ११० खीष्टाब्दः १९३४

प्रथमं संस्करणम् १००० मूल्यम् रु)

पञ्चनदप्रान्तीयार्यप्रतिनिधिसभाया मन्त्रिणा महाशयकृष्ण बी० ए० इत्यनेन प्रकाशितः ।

विहारीलालवर्मणा हिन्दीमुद्रणालये रेलवेपथे लवपुरे मुद्रितानि पृष्ठानि १-२४ ; गंगारामपाठकेन गुरुकुलमुद्रणालये गुरुकुलकांगड़ीपत्तने पृष्ठानि २५-१३६ ; भीमसेनविद्यालंकारेण नवयुगमुद्रणालये १७ मोहनलालपथे लवपुरे पृष्ठानि १३७-२४६ भूमिकाप्राक्कथनमुखपत्रपृष्ठानि च ।

VEDARSHA KOSHA

OR

A Dictionary of Vedic Words

CONTAINING

meanings culled from Rishi Dayananda's commentary on the Vedas and other writings,

WITH

notes from the Brāhmaṇas, Upaniṣads, Nighantu and Nirukta.

Chief Editor :

Pt. CHAMUPATI, M. A., PRINCIPAL,

Gurukula Kangri, Hardwar.

PUBLISHED BY

THE ARYA PRATINIDHI SABHA, PUNJAB

LAHORE.

1934

Published by Mahashya Krishna, B. A.,
Secretary of the Arya Pritinidhi Sabha Punjab, Lahore.

Printed by Bihari Lal Varma, at the Hindi Press, Railway Road, Lahore, pp. 1 to 24, by Ganga Ram Pathak, at the Gurukul Press, Gurukul Kangri, pp. 25 to 136 and by Bhim Sen Vidyalankar, at the Navyug Printing Press, 17, Mohanlal Road, Lahore, pp. 137 to 246, the Introduction, the Foreword and the Title pages.

प्राक्कथनम्

माध्यकालिकभाष्यकाराणां वेदार्थव्याख्यानैस्तत्रभवतामाचार्यपादानां दयानन्दर्षीणां वेदभाष्येण तुलनया काञ्चिदाभिनवामेव श्रुतिहृदयोद्भासिनीमर्थशैलीमाविश्चकुराचार्यपादा इति स्फुटमवभासते। अभिनवोपि सन् ऋषेर्व्याख्यानप्रकारो वस्तुतः पुरातनीमेव पद्धतिमधिश्रुणत्तीति नास्ति तिरोहितं यास्कस्य तत्पूर्वभाविनां ब्राह्मणकाराणाञ्च निर्वचनशैलीः सूक्ष्मेक्षिकयानुशीलयतां व्युत्पत्तिमताम्। वेदा हीमे मानवजातेरादिमधर्मग्रन्थरूपा नैकविधाधिभौतिकाधिदैविकाध्यात्मिकविज्ञानानां सत्यसिद्धान्तानुपदिशन्तीति दयानन्दस्य युगप्रवर्त्तकवेदभाष्यस्य प्रकाशनमन्वारभ्योत्तरोत्तरं प्रवर्द्धमानं वेदोदधेरवगाहनव्यसनिनां पण्डितानां मतमुपलभामहे। तथाहि—रेलेमहोदय इन्द्रादीन् वैदिकदेवान् शारीरसंस्थानविशेषापरपर्यायभूतान् प्रतिजानीते। पी० एन्० गौडमहोदयो वैदिकयज्ञा वैज्ञानिकप्रयोगशालायाः परीक्षणानीति घोषयति। पावगिमहोदयो भूगर्भविज्ञानस्याद्यप्रवचनानि वैदिकार्षिभिरेव कृतानीति समवतिष्ठते। अरविन्दघोषमहोदयस्तु पुनर्वेदस्याखिलविज्ञानानां बीजभूतसिद्धान्तप्रतिपादकतामुद्घोषयता दयानन्देन गौरवशालिनो वेदस्य महिमा न साकल्येन परिगीत इति समुज्जृम्भयति।

एवं दयानन्देनोपबृंहितस्य पक्षस्य प्रमुखमशं तज्ज्ञैः स्वीक्रियमाणं सम्पश्यामः। अपरेपि वेदव्याचिख्यासवस्तत्सरणिमनुसृत्य व्याख्यातुं प्रभवेयुरिति दयानन्दर्षेर्वेदभाष्येऽपरग्रन्थेषु चोपलभ्यमानवैदिकशब्दार्थानां कश्चित् कोषात्मकः संग्रहः प्रकाशनीय इति चिरकालादासीदभिलषितम्। ऋषिणा व्याकृतानां पदानां निघण्टुनिरुक्तब्राह्मणेषूपलभ्यमाना निरुक्तयोर्थविशेषाश्चापि तत्र तत्र कोषे सन्निवेशिता वेदार्थावगाहनेच्छूनां महत्तरमुपकारमावहेयुः। कोषोयं वेदार्थस्याभिनवामिमां सरणिमनुसृत्यार्थानुसंधाने यत्नमातिष्ठतां निर्भ्रमं साहाय्यमादध्यात्।

तमेवाभिलाषमनुरुध्याशीत्युत्तरैकोनविंशतौ वैक्रमाब्दे पञ्चनदप्रान्तीयार्यप्रतिनिधिसभया सन्निबद्धोस्य वेदार्थकोषस्य संग्रहोपक्रमः। सभाधीनं कार्यं कृतवतां कुर्वताञ्च बहूनां पण्डितानां दीर्घकालावस्थायिनाध्यवसायेन सम्प्रति परिसमाप्तिमधिगच्छतीदमभिधानम्। साम्प्रतमस्य मुद्रितः प्रथमो भागः कोषस्य पाठकानामुपहारीक्रियते। आशास्महे यत्सभायाअर्द्धशताब्दीमहोत्सवासरे द्विनवत्युत्तरैकोनविंशतिविक्रमवत्सरस्य मार्गशीर्षे मास्यवशिष्टोप्यस्यांशः प्रकाशमानीतो भविष्यति। कोषस्यास्य वेदार्थावबुभुत्सूनामुपा[illegible]येनानादिनिधनस्य भगवतो वेदपुरुषस्यान्तर्हृदयमृषीणामेव चक्षुर्भिरवलोकयितुन्ते क्षमिष्यन्तेऽर्द्धशताब्दीमहोत्सवोसौ द्विगुणं प्रतिपूजितो भविष्यति।

इति निवेदयति—

मन्त्री

पञ्चनदप्रान्तीयार्यप्रतिनिधिसभायाः

लवपुरम्,
मार्गशीर्षः, १९९१.

FOREWORD

In contradistinction with the interpretation of mediæval scholars, Ṛṣi Dayānanda's commentary struck out a new path in the exposition of the Vedas, though judged in the light of the exegetics of Yāska and his predecessors, the authors of the Brāhmaṇas, the Ṛṣi's method of handling Vedic terms and themes was as old as time itself. Ever since his epoch-making commentary was published, scholars of the Vedas have shown a progressive tendency towards finding scientific, moral and spiritual truths in this primeval scripture of humanity.

In the opinion of Rele the devatās of the Vedas are "figures in biology." To P. N. Gaur Vedic Yajñas appear to be scientific experiments. According to Pāvagi, the first lessons in geological science were taught by the Ṛṣis of the Veda. In the words of Arobindo Ghosh Ṛṣi Dayānanda under-estimated instead of over-estimatting the importance of the Vedas, when he attributed to them revelation of seeds of all sciences.

The point of view of Ṛṣi Dayānanda has thus in the main been accepted. In order that his guidance may be available in detailed exposition of the Vedas also, a dictionary containing meanings of Vedic words given in the commentary and other immortal works of Ṛṣi Dayānanda was a great desideratum. Derivations and explanations of words and phrases of the Vedas given in Nighantu, Nirukta and Brāhmaṇas, added thereto, would be an additional help in the same direction. In the path of Vedic research carried on in the light of this new epiphany such a dictionary would serve as an unerring guide.

With this object in view the Ārya pratinidhi Sabhā, Punjab, made arrangments for the compilation of the present work, viz. Vedārṣa Koṣa in 1923. After long collaboration of various scholars the book is now complete. Part I which has already gone through the press is being presented to the public. The rest of the book will, it is hoped, have been printed by November, 1935 when the Sabhā will celebrate its Golden Jubilee. That auspicious occasion will be made doubly happy by presentation to students of the Ved of a lexicon which will enable them to read this eternal scripture through the eyes of the Ṛṣis themselves.

Secretary,
Arya Pratinidhi Sabha, Punjab.

Lahore,
November, 1934.

भूमिका

आर्यसंस्कृतेरार्यधर्मस्य च मूलं स्रोतो ननु वेद एव। आत्माऽनात्मचेतनजडाऽऽद्यात्मकस्य समस्तसंसारस्य समुत्पत्त्याऽऽदि-संबन्धि-सिद्धान्तेषु यथाकामं विप्रतिपद्यमानान्यपि भारतीयशास्त्राणि वेदाय स्वश्रद्धाऽञ्जलिसमर्पणे खल्वेकमुखानि। भारतोपज्ञानि भौतिकान्याध्यात्मिकानि वा कृत्स्नान्येव ज्ञानविज्ञानानि विज्ञापयन्ति वेदमेव स्वप्रभवम्। ज्ञानविज्ञानयोर्नूतनविमर्शान् नवाऽऽविष्काराँश्च प्रति सहिष्णुत्वं वैदिकधर्मस्याऽनन्यसामान्यवैशिष्ट्यम्। भेषज-शल्यकर्मविज्ञानात्मक आयुर्वेदः, युद्धविज्ञानात्मको धनुर्वेदः, नृत्यगीतवाद्यविज्ञानमयश्च गान्धर्ववेदः, ऐहिकाऽभ्युदय समृद्ध्यादि-विज्ञानस्वरूपोऽर्थवेदश्च चतुर्णामपि खलूपवेदानामेषामन्तर्भूतानि प्रभूतानि नितान्तविकसितवैज्ञानिकप्रतिभाऽपेक्षिविस्तराण्यङ्गभूतानि विद्याप्रस्थानानि। शिक्षा-व्याकरण-निरुक्त-छन्दः-कल्प-ज्यौतिषाणि वेदाङ्गान्यपि नूनं तत्प्रकारकाण्येव, समुद्घोषयन्ति च मुक्तकण्ठमकुण्ठमहिम्नो भगवतो वेदस्य गुणगरिमाणमपरिमाणम्। इत्थं ज्ञानविज्ञानाभ्यां नोद्विज्यते वेदेन प्रत्युत निजानुजीवित्वधिया तेनाभिनन्द्येते एवैते।

इत्थं परीक्ष्यमाणः किलाऽऽर्याणां चतुर्धा व्यस्तो वेदः, सत्य-ज्ञानयोः सकलविभागोपविभागानां दुर्धर्षदुर्गपदमधिकुरुतेतमाम्। ऋषिदयानन्दोऽमुं "सर्वसत्यविद्यानां पुस्तकम्" इत्युपाधिनाऽलञ्चकार "अस्य पठनं पाठनं, श्रवणं श्रावणं च सर्वेषामार्याणां परमो धर्मः" इति प्रत्यपीपदत्।

आर्याणामनुश्रुतिर्वेदमीश्वरीयज्ञानस्य कोषमुद्घोषयति। आब्राह्मणग्रन्थयुगाद्वेदस्य निगूढरहस्यानां स्फोरणस्याऽऽवश्यकता सततमन्वभावि। वैदिकविधिविधानेषु तद्विनियोगप्रतिपादकानि ब्राह्मणान्येव मन्त्राणां स्वतन्त्रमहत्त्वं निर्दिशन्ति प्रयतन्ते च तेषामर्थान् विभिन्नविनियोगविषयेषु यागादिषु संगमयितुम्।

मन्त्राणां विनियोगपरकोऽर्थो न मुख्यः प्रत्युत गौण एवेति नाऽतिप्रयाससापेक्षप्रेक्षासंवेद्यो विषयः। भिन्नो हि मन्त्राणामभिधावृत्तिप्रतिपाद्योऽर्थो यज्ञादिषु विनियोगपरकाद्प्रधानात्। मुख्यार्थविनियोगपरकाऽर्थयोरन्योन्यविरोधोदाहरणानि नाऽधिकप्रयत्नंमृग्याणि

श्यतया विनियोगार्थकत्वे सति मन्त्राणां तत्क्रियाकलापाऽनुविधायित्वमनिवार्यमासीत्।
व तथोपलभामहे। याज्ञिकाऽनुष्ठानेषु बहुत्र मन्त्राऽर्थानां तैर्विप्रकृष्टतमसम्बन्धस्याऽप्यभा-
तत्र तत्र तन्मन्त्रोच्चारणे नियोगकर्तृणां कामचारं करणं जपति।

कतिचनोदाहरणान्याऽऽशयं नो विशकलयितुमलम्। यजुःषु प्रथमाऽध्याये त्रयो-
शो मन्त्रस्तावद् दृश्यताम्—

मा भेर्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात्

माध्यकालिका हि भाष्यकृतो वचनमिदं पुरोडाशप्रेरणाभिप्रायकत्वेन योजयन्ति।
हुतये स्पृश्यमानश्चरुरप्रकम्पनाय समादिश्यते। निष्पिष्टस्य निर्जीवस्य च द्रव्यस्यैवं प्रेरणं
रामालङ्कारिकम्। मन्त्रे पुरोडाशप्रतिपादकं किमपि पदं नास्तीति पाठकाः प्रमाणम्। ऋषि-
ानन्दमतानुसारं तु मन्त्रेणाऽनेन पुरुषः सम्बोध्यते। निष्कामकर्ममयं जीवनं भगवद्गीताऽनुसारं
ोत्कृष्टो यज्ञः। निष्कामभावनया जीवनं यापयतः पुंसः कुतो भयं कुतः प्रकम्पः? मन्त्र-
ऽस्य वास्तविकोऽर्थो नितरां प्राञ्जलः स्वाभाविकश्चाऽस्ति यं ह्यवबोद्धुं पुरोडाशाऽऽदि-
नामध्याहारस्य न काऽप्यपेक्षा।

यजुःषु द्वितीयाऽध्यायस्यैकविंशो मन्त्रः—

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः

यज्ञे हि 'वेद' पदं कुशमुष्टिवाचकम्। अस्य पदस्य चायमर्थो न मुख्यो न वा
तविक इत्यत्रत्यं प्रकरणं, टीकाकृद्भिराश्रितः प्रसह्य संकेतविधिरर्थस्य बलाद् दूराकृष्टि=नैया-
दोषो वा स्वयं बोधयितुमलम्। तथा हि—इह द्वितीयं 'वेद'पदं विवृण्वन् महीधरः
भाष्येऽलेखीत्—"वेदः=ऋग्वेदाऽऽद्यात्मकः" ततस्त्रिश्चतुर्वाऽऽवर्त्यमानं तदेव पदं परम्परया
पकः"=(ज्ञानसाधनमित्यर्थः) इति व्याख्यायि। कुशमुष्ट्यर्थकस्य 'वेद' पदस्य "ज्ञापक"
र्थे न कथंचित् बादरायणसम्बन्धोऽपि सम्बोभवीतीति सहृदया विवेचयन्तु। यत्सत्यं तु
द" प्रभृतीनि विशेषणानीह याज्ञिकाऽऽनुष्ठानौपायिकदर्भस्तवकविशेषाऽभिधानाऽपेक्षया
तुत एव किमपि ज्ञानसाधनमेव वस्तु सम्यक् प्रतिपादयन्तितराम्।

पुनश्च, यजुर्वेदषष्ठाऽध्याये पंचदशो मन्त्रः—

मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायताꣳ
त्रं त आप्यायताम्। यत्ते क्रूरं यदास्थितं तत्त आप्यायतां निष्ट्यायतां तत्ते शुध्यतु
होभ्यः। ओषधे त्रायस्व स्वधिते मैनꣳहिꣳसीः॥

अस्यार्थः—तव मनसो वाचः प्राणस्य चक्षुषः श्रोत्रस्य च पूर्णविकासो भूयात् यत्त्वयि किमपि वैधुर्यं क्षतं वा तत्प्ररोहतु दृढं भवतु शुध्यतु। माङ्गलिकानि भूयासुरहानि ओषधे! त्रायस्व, स्वधिते=हे शस्त्र मैनं हिंसीः। अध्वरे कृताऽऽलम्भनं पशुं प्रति मन्त्रोऽय मुच्यत इति यज्ञपरकव्याख्याकर्तृणामाकूतम्। मन्त्रस्य चरमपदोच्चारणक्षण एव तच्छुरु वराकस्य पशोः शरीरे व्यापार्यते। पशुविशसनव्यापृतं निशातशस्त्रं प्रति तदात्व एव तस्याऽ वधाद्यनुरोधः स्पष्ट एव पूर्वाऽपरविरोधः। अस्यैव मन्त्रस्य पुरुषोद्देश्यकत्वे सति तु सर्वम वंदातं सम्पद्यते किल। मन्त्रः पुरुषशरीरस्य तच्छक्तीनां च पूर्णविकासमनुनाथते। तत्प रिणामत्वेन च शत्रुप्रयुक्ताऽऽयुधाऽऽदिप्रहारप्रतिरोधकत्वं नाऽनाशास्यम्।

तस्यैवाऽध्यायस्याऽष्टादशो मन्त्रः पर्यवस्यत्येवम्—

"..........प्रयुतं द्वेषः" दूरीभूतो द्वेषभाव इत्यर्थः। याज्ञिकपक्षानुसारं मन्त्रोऽयं वसाऽऽज्ययोः संमिश्रणसमय उदीर्यते। अस्यानुष्ठानस्य मन्त्रेणाऽनेन सह कथं सम्बन्ध इत्य विषयोऽस्मत्सदृशानां मनीषायाः।

तदध्यायगतस्यैव विंशमन्त्रस्य चरमांऽशोऽयम्—

"....देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु"

देवान् प्रति गच्छन्तं त्वां तव सखायस्तव मातापितरश्चाऽभ्यनुजानन्त्वित्यर्थः। त्वच मुत्कृत्य कृतप्रोक्षणः पशुः स्वर्गं लोकं गन्तुं प्रस्तुतः। अयं विनियोगो मन्त्रस्याऽस्य व्याख्या माध्यकालिकटीकाकृतां पथप्रदर्शकः। स्वयं ब्राह्मणग्रन्थेष्वेव कतिचन संदर्भा लोचनगोचरी क्रियन्ते ये 'यज्ञपशु' पदस्याऽर्थं पुरोडाशं=यवतण्डुलादिमयं पिष्टद्रव्यमिति प्रतिपादयन्ति* एतेन यज्ञस्य साङ्केतिकत्वमलङ्कारमयत्वं वा निर्विवादम्। मानवप्रकृतेरंशभूतानां नैस र्गिकीणां पाशविकप्रवृत्तीनां संहार एव पशुवधस्य निष्कृष्टाऽऽशयः सम्भाव्यते यन्निदर्शनायै कतिचनाऽवयवानां बलिप्रदानस्याऽभिनयात्मकनिरूपणरूपा व्यवस्थाऽपि व्यवास्थायि आचार्यै र्यदन्तरा मानवस्वभावाऽन्तर्गतपाशविकप्रवृत्तिदमनप्रतिपादका मंत्रा उच्चार्यन्ते। पावन ऽनुष्ठानस्य नृशंसहिंसाराहित्याय "यज्ञियपशुः" पिष्टातकमयोऽगृह्यत। वेदाऽवभासनस्य प्रयोजनं मानवस्यात्मशुद्धिरासीत्, संस्काराश्च तत्कृते बहिरङ्गसाधनभूताः। आत्मोन्नयनस्य निरवच्छिन्नवर्त्मना महात्मानः प्रयेतिरे ऐन्द्रियिकीर्वासना दिव्यभावनासु परिणमयितुम्

* पशुर्ह वा एष आलभ्यते यत्पुरोडाशः। शतपथब्राह्मणम् १. २. ३. ५॥ स वा एष पशुरेवालभ्य यत् पुरोडाशः। ऐतरेयब्राह्मणम् २. १. ६॥

एष एवाऽध्यात्मयज्ञः। याज्ञिकाऽनुष्ठानद्वाराऽस्यैवाभिनयात्मकं निरूपणं ब्राह्मणग्रन्थानामभिप्रेतमभूत्। कालान्तरेऽनुष्ठानानीमान्याऽऽध्यात्मिकविधानस्य प्रतिनिधित्वं गौणत्वं च विहाय स्वतन्त्रत्वं मुख्यत्वं चाधिचक्रिरे जनैश्च तद्द्वारा यजमान-यज्ञियपश्वोरुभयोरेव स्वर्गप्राप्तिर्विशश्वसे। एतेषां पुण्यात्मनां निवासायाऽन्तरिक्षे भौतिकसुखभोगाऽधिष्ठानभूतः कश्चिल्लोकोऽप्यकल्पत।

सर्वमप्येतद् इतरमुख्यार्थसंकेतकृद् आध्यात्मिकविधानप्रतिनिधिरूपं चास्तीति नातिदुर्बोधोऽर्थः। इत्थं 'पुराकाले वेदस्याऽर्थो मानवप्रतिबोधनाऽभिप्रायको बभूव'—इदं तत्वम्-इमां वेदार्थव्याख्यानपद्धतिं ऋषिदयानन्दः पुनरुदजीवयत्।

माध्यकालिकवेदभाष्यकाराणां सायणमहीधरादीनां समक्षं वेदस्य स्वाभाविक-विनियोगपरकार्थयोः प्रधानगुणभावविपर्यास एव प्रमुखं काठिन्यमासीत्। विनियोगस्तावन्मुख्यस्तदाशयाऽनुरोधेन वेदपदानि परावर्तयितुमपि शक्यन्त इति तेषामभ्युपगम आसीत्।

एतेन च वेदार्थानां प्रसह्य दूराकर्षणं विपर्ययो मिथ्याभिलापनं चेत्यपरिहार्याणि दूषणानि प्रसक्तानि तेषां भाष्येषु। एतद्विपरीतं ऋषिदयानन्दकृतभाष्यस्य सुमहान् प्रकर्ष एष एव यदिदं दीर्घकालनीहारिकाऽन्धकारितं दुर्गमं चिराऽप्रयोगादक्षुण्णं च प्रत्नं नैसर्गिकं वेदव्याख्यामार्गं पुनरपि निराकुलमकार्षीत्। तत्कृते वेदमन्त्रा वैदिकाऽनुष्ठानेषु क्रियाविशेषसहोच्चारणमात्रप्रयोजनकाः, उच्चारणमात्रेणैव यजमानस्याऽदृष्टफलसाधकाः, अलौकिकशक्तियुक्ताः, ऐन्द्रजालिकप्रयुक्ता मन्त्रा इव निरर्थकवर्णसमुदया एव न प्रत्युत आध्यात्मिकाधिभौतिकाधिदैविकसामाजिकादिसत्यसमन्विता एतेषामनुसन्धानाय बुद्धिपूर्वकविमर्शो मनुष्यस्य मार्गदर्शकाश्च सन्ति। एतेषां मन्त्राणां क्रियासमभिहारेणाऽऽवृत्तिरुच्चारयितुरन्तःकरणे तदमहिमानमङ्कयितुं, तस्मिन्नन्यजनहृदयाऽऽवर्जिनीं रहस्यमयीं कामपि शक्तिमाधातुं, कस्यचित्सुमहत उद्देश्यस्य साधनाय पुंसः संकल्पशक्तिं द्रढयितुं च क्षमा। परमेतदादिसकलफलाऽवाप्तये वेदमन्त्राणां यथायथं पदार्थेषु परिच्छेदकारी बोधो नितरामावश्यकः।

वेदानां भाषाऽतितरां पुरातनी। अर्वाचीना सुरभारती साक्षात्तदुद्भूताऽपि भाषासम्बन्धीनि भूयांसि परिवर्त्तनान्यनुबभूव। प्राथमिकाऽवस्थायां तरलानि (अस्थिरस्वरूपाणि) पदानि क्रमशः कूटस्थतां (स्थिरस्वरूपतां) आपेदिरे। वेदे तान्यद्यापि स्वोद्भवधातुसन्निकृष्टान्येव विद्यन्ते निदधाति च स्वधात्वर्थम्। तेषां रूढाऽर्थमन्वेव यौगिकार्थोऽप्यामानं ध्वनति येन च प्रथमः कमपि विस्तारमावहति, तस्य व्यञ्जकता प्रवर्धते। लौकिकसाहित्ये संस्कृतभाषायाः पदानां यौगिक-रूढार्थयोरन्तरं सुदीर्घतामुपगतम्, येमाऽद्य शब्दाः

स्वपारम्परिकवंशानुक्रमाद्विच्छिन्नाः सन्तः कस्मिँश्चिदेकस्मिन्नेव धर्मे, कतिपयेष्वेव वा वाच्ये धर्मिषु निरूढाः संकुचितप्रयोगविषया जाताः। वैदिकशब्दानामर्था यौगिका एव ग्राह्या-इत्थं प्रायः सर्वेऽपि व्याख्याकृतः सहमताः। वैदिकपदानामस्य वैशिष्ट्यस्योपयोगोऽपि प्राये सर्वैरेव तैर्व्यधायि। अन्तरं तावदेतावदेव यद् इतरेषु सायणपुरोगमेषु टीकाकृत्सु विवि योगाऽनुरोधेन यौगिकार्थसरणिं क्वचिदेवोपयुञ्जानेषु ऋषिदयानन्दोऽस्याः सहाय्येनैव वे मन्त्राणां प्रज्ञाप्रसादकान् गभीरानर्थानाविश्चकार। स खलु मन्त्राणां यज्ञपरकाऽर्थदार्ढ्या यान् ब्राह्मणग्रन्थान् प्रमाणत्वेनोपन्यस्तवान् वेदैरुन्मीलयमानानां दार्शनिकानां वैज्ञानिकानामर्था वा समुपबृंहणायाऽपि तानेवाऽशिश्रियत्। इदंकरणेन स वेदानां स्वतःप्रामाण्यसिद्धान् सातिशयमुपाष्टम्भीत्। ऋषिणा स्वसिद्धान्तसौधो भारतीयसाहित्येऽनुवेदं प्राचीनतरा ब्राह्मणग्रन्थानामितरासां च परम्पराणां सुदृढप्रामाण्यमाधारीकृत्य निर्ममे।

ऋषिर्दयानन्दस्य वेदभाष्यं नाऽस्ति स्वस्मिन्नेव सम्पूर्णं स्वतन्त्रं च, न वा तथ चिकीर्षितमभूत्। तत्र हि प्रतिपदमनुगतो यौगिकाऽर्थव्यञ्जनाविस्तारः प्रत्येकं मन्त्रं वैज्ञा निकप्रकर्षपरिप्लुतमिव प्रदर्शयन् पाठकचेतसि नवनवं दृष्टिक्षेत्रमिव प्रसारयति। ऋषिस्त्वमीष मर्थानां कमप्येकमंशतो निर्दिश्य तद्शेषबोधाय स्वस्याऽन्येषां च टीकाकृतां टीका अनुशील यितुं पाठकान् स्ववशाँश्चकार। किमधिकं—केवलं तदीयं भाष्यमेव हृदयङ्गमीकर्त्तुं तद्ग्रन्थ यत्र तत्र विकीर्णानां निर्देशकसूत्राणामेकत्र संचयनं नितरामावश्यकम्। प्रतिमन्त्रमन्तर्निहित वैशिष्ट्यानामेकत्राऽवभासमानं पूर्णचित्रमुपस्थापयितुं प्रकरणभेदेनैकपदस्याऽनेकेषामर्थानां संग्रहोऽपेक्ष्यते।

प्रस्तुतो ग्रन्थोऽस्यां दिश्येकः पदन्यासः। अस्मिन् कोषे ऋषिदयानन्देन न केवलं स्वनिर्मितवेदभाष्ये प्रत्युत कृत्स्नेष्वेव तत्पुस्तक-लेख-पत्र-विज्ञप्तिप्रभृतिषु प्रयुक्तानां पदा तदर्थानां च संग्रहः संग्रहीतृभिर्विहितः। एतत्सर्वं "पैका" प्रकारे (Pica No I) मुद्रितम् तच्च पुनः "क्षुद्र-पैका" प्रकारे (Pica No II) मुद्रितैर्निघण्टुनिरुक्तावाचितैस्तदर्थैः समुद्धृ तम्। ततश्च ब्राह्मणानामुपनिषदां च प्रमाणान्युद्धृतानि। आशास्यते यत् सर्वमेतत् सम्पिण्डितं सद् ऋषिसाक्षात्कृतवेदार्थानां कुञ्चिकेव भविष्यतीति।

'अकार-औकार' कृतोपक्रमः कोषस्याऽस्य प्रथम एव भागः संप्रत्युपस्थाप्यते पाठकमहाभागानां करकमलयोः। यथासम्भवं प्रयतमानैरपि न पारितमस्माभिरिममेकमपि भागं मुद्रापयितुमेकस्मिन्नेव मुद्रणालये। एतज्जन्यं मुद्रणवैरूप्यमन्यांश्च कांश्चित् कोषत्वा ऽपकर्षकान् दोषानुपेक्षितुं प्रार्थ्यन्ते पौरोभाग्यपराचीनचेतसः प्रेक्षावन्तः पाठकप्रवराः।

विशिष्टपदानां तात्पर्यनिर्णये सहायका विभिन्नवैदिकसंदर्भाः, शाखान्तराणां पाठभे-
ा वैदिकशब्दार्थानामर्थनिश्चये नितरां सहायका इति तेषां संग्रहोऽप्येतदारम्भपरिसमाप्तौ
ोिर्ष्यते ।

मुद्रिते सत्यस्मिन्भागे, समस्तस्य चाऽस्य ग्रन्थस्य युगपदेव प्रकाशनावसरे सति—
नदृशा मन्त्रार्थद्रष्टॄणामृषीणां बुद्धिवैभवमात्रेणैव वेदमन्त्राऽऽशयमाविष्कुर्वतामनुसंधान-
णां विदुषां च दृष्टिकोणयोरन्तरं विशदयितुं विभिन्नटीकाकृत्पद्धतिप्राञ्जलसमीक्षारूपा
वेस्तृता भूमिकाऽप्येकाऽत्र समावेशयितुमिष्यते ।

अन्ते च—

वृथा स्वभावात्परदोषदर्शने
पराङ्मुखानां हि तदर्थमर्थना ।
वृथा स्वभावात्परदोषदर्शने-
ऽपराङ्मुखानां हि तदर्थमर्थना ॥ इत्यलमतिपल्लवितेनेति—

कुल काङ्गड़ी, हरिद्वार,
३० आषाढ़, १९९१ ।

इति निवेदयति विदुषां वशंवदः,

चमूपतिः

INTRODUCTION

The Vedas are the fountain-head of Aryan culture and religion. All systems of Indian Philosophy, whatever their speculations on the fundamental problems of being and thought, pay their homage unreservedly to the Vedas. Sciences, physical and mental, which developed on Indian soil, trace their origin to the same source. One great peculiarity of the Vedic religion is that it has invariably evinced a sympathetic attitude towards the discoveries and speculations of Science and Philosophy. The four Upavedas, *viz.* Ayurveda or the Science of Medicine and Surgery, Dhanurveda or the Science of Warfare, Arthaveda or the Science of Worldly Prosperity and Advancement, and Gandharvaveda or the Science of Music, cover within their scope a multitude of auxiliary systems of knowledge, the development of each of which requires scientific acumen of a most highly evolved character. The same thing is true of the Vedāṅgas, literally organs of the Vedas, *viz.* Śikṣā—Phonetics, Vyākaraṇa—Grammar, Nirukta—Exegetics, Chandas—Prosody, Kalpa—Rituals and Jyotiṣa—Astronomy. Next to these come the Darśanas or Philosophical Schools, to which the name Upāṅgas, *i. e.* minor organs was assigned. Thus Science and Philosophy, instead of being dreaded, were welcomed by the Vedas as their own twin wards.

Thus buttressed, the fourfold Scripture of the Aryans could well claim to be an invulnerable fortress of all departments of truth and wisdom. Ṛṣi Dayānanda gave it the appellation "Book of all knowledge, which it is the duty of the Aryans to read and teach, to hear being read and recite."

Aryan tradition has looked upon the Vedas as treasures eternal of divine wisdom. From the time of the Brāhmaṇas the necessity has been felt of exposition of their hidden meaning. In the Brāhmaṇas themselves, which prescribe the recitation of Vedic texts in accompaniment with the performance of rituals, the intrinsic significance of the m a n t r a s is pointed out and an attempt made to connect that significance with the varied ritual acts they accompany.

It requires no acute power of understanding to recognise that the application of the verses in the course of rituals—what technically is called their v i n i y o g a—is of subsidiary importance. The primary thing in the m a n t r a s is their literal meaning whereas the part they play in the course of y a j ñ a s is but a secondary growth. Examples of inconsistency of v i n i y o g a with the meaning of the text are many. Had the m a n t r a s been devised primarily for the purpose of v i n i y o g a, they should have followed the trend of the steps in the ritual. That sometimes they have not the remotest connection with the performance in the y a j ñ a shows that they have been in these cases arbitrarily laid hold of to be recited in accompaniment with the ritual act.

A few instances will give the reader an idea of what we mean. Yajurveda 1.23 runs as follows:—

मा भेर्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ॥

Fear not. Tremble not. Free from distress is y a j ñ a.
Free from distress may the offspring of the y a j a m ā n a be.

The mediæval commentators address this exhortation to P u r o ḍ ā ś a. While being touched, this matter for oblation is asked not to shudder—a highly figurative exhortation to a lifeless mass of ground-down matter. The reader will note that in the text there occurs no word to suggest the idea of P u r o ḍ ā ś a. According to Ṛṣi Dayananda this verse is addressed to man. Life led in the spirit of selfless service is, according to the teaching of the Gita, y a j ñ a par excellence. A man living in this spirit has no occasion either for fear or dejection. The meaning of the verse is quite natural, to understand which you have to make no arbitrary assumption as of P u r o ḍ ā ś a, etc.

Yajurveda II. 21 runs as under:—

वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदोऽभवस्तेन मह्यं वेदो भूयाः ॥

Veda art thou. As thou, O Veda Divine, hast for the godly ones, become Veda (source of knowledge), so do thou become Veda (source of knowledge) for me.

In Y a j ñ a the word Veda stands for a tuft of grass. But that the original meaning of this word was not this is clear from both the context and the forced symbolism to which the commentators have had to resort. The second term 'Veda' is for instance elucidated by Mahīdhara as Ṛ g-a d i-a t m a k a ḥ, *i. e.* consisting of Ṛgveda etc; while the same term repeated for the third and fourth times is renderd as J ñ a p a k a h, *i. e.* source of knowledge. These epithets would suit some real means of acquiring knowledge, such as the Samhitas, better than a tuft of grass, used in the course of a ritual.

In Yajurveda VI. 15 we read:—

मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त
आप्यायतां चक्षुस्त आप्यायताᳪ श्रोत्रं त आप्यायताम्।
यत्ते क्रूरं यदास्थितं तत्त आप्यायतां
निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः।
ओषधे त्रायस्व स्वधिते मैनᳪ हिᳪसीः॥

May thy mind grow full! May thy speech grow full! May thy breath grow full! May thy eye grow full! May thy ear grow full! Whatever is sore, whatever hurt in thee, may that fill up and grow firm, may that become pure in thee. Auspicious be the days! O plant, protect. Injure it not, O blade.

According to y a j ñ i k a commentators this whole verse is addressed to the animal already sacrificed. As the last part of the verse is chanted, the knife is actually applied to the dead victim. To ask a whetted weapon not to injure the animal which has been already killed is a manifest absurdity. Addressed to man, the verse commends full development of his body, as a result of which the capacity to resist the injuring power of knives and even swords is naturally expected.

The 18th verse ends as under:—

प्रयुतं द्वेषः॥

Driven away is hatred.

The Y a j ñ i k a School utters this formula in accompaniment with the mixture of gravy of two animals. How this ritual act is connected with the text is past our understanding.

The last part of verse 20 runs as follows:—

देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥

May thy friends, thy mother and fathers (elders) bless thee for thy welfare, while going to the gods.

The animal has now been flayed; sprinkled with water and prepared for heaven. This is the v i n i y o g a which determines for the mediæval commentators, the meaning of the verse. In the Brahmaṇas themselves we find passages in which the animal for the sacrifice has been pointed out to be P u r o ḍ a ś a*—a ground-down substance consisting of rice, barley, etc., whence it is quite clear that the sacrifice is simply symolical. Possibly the beast in man was meant to be sacrificed, and a dramatic representation of the mortification of its several organs was arranged, in the course of which formulæ, insisting on the suppression of the bestial part of human nature, were recited. The animal prepared for this purpose was made of flour of cereals, so that no brutal carnage was involved in the sacred act. The purpose of revelation was purifiction of the human soul, of which rituals were an outward means. By a continual process of sublimation the sensual element was sought to be transformed into godly tendencies. That was the spiritual y a j ñ *a*. The Brāhmaṇas planned a dramatic represetation of it in the form of rituals. In course of time, the latter were considered not to stand for any spiritual processes but to possess independent intrinsic merit of their own viz. that they carried the sacrificer and the victim both to heaven. A material abode of physical happiness situated in some higher region of the Universe was imagined to receive these meritorious souls.

That all these things were symbolic, standing for spirtual acts and conditions requires no stretch of imagination or intelligence to understand. The meaning of the Veda was thus in the beginning something addressed to the human intellect. It was this meaning—this method of vedic interpretation which Ṛṣi Dayānanda revived.

The difficulty with the mediæval commentators, such as Sāyaṇa, Mahīdhara and Uvvata is that they reverse the natural order of im-

*Śatapatha Brāhmaṇa I. 2. 3. 5., Aitareya Brāhmaṇa II. 1. 9.

portance of the inner meaning of the m a n t r a s and their v i n i y o g a. With them v i n i y o g a is the primary thing, to which the import of the text has to be adapted. This leads to unnecessary distortion and misinterpretation. Contrasted with this, one great merit of Ṛṣi Dayānanda's Commentary is that it restores that ancient natural order which the misty passage of time had somehow obscured and in the long run thrown into desuetude. With him the m a n t r a s are not simply formulas invented to be muttered along with the performance of the ritual. Nor are they incantations without meaning, possessing supernatural power to fulfill the wish of the reciter. In them, on the contrary, are contained truths, physical, psychical, spiritual and sociological, calculated to give the right lead to intellectual cogitations on these heads of the human mind. A repitition of these formulas may impress on the mind of the chanter the import of the Veda, and impart to his mind the esoteric power of influencing the minds of others. It may fortify his resolve to accomplish an object which he has before his mind. But for all these objects an intelligent grasp of the literal significance of the text is necessary.

The language of the Vedas is very old. Later Sanskrit, though a direct descendant of Vedic, has undergone great linguistic changes. The words which were originally in a fluid state have with the expiry of time petrified. In the Veda they still stand close to the roots from which they are derived. They preserve their derivative meanings. Connotation rings clear behind their denotation, whereby the scope of the latter is made infinitely broad. In classical Sanskrit the distance between the original derivation of words and their application to concrete ideas and objects has considerably lengthened, so that their old descent from roots is forgotten and they are pinned down either to a single significance or a very small number of concrete denotations. In owning that the meaning of the words of the Veda is Y a u g i k a , i. e. derivative, all commentators are agreed. All make free use of this peculiarity of the Vedic terms. The difference between Ṛṣi Dayānanda and his mediæval predecessors is that while the latter exploit this derivative character in the interests of the pro

esses of Y a j ñ a, the former finds with its aid an intellegent meaning n the verses. While referring to the Brāhmaṇas for their Y ā j ñ i c neaning, he quotes the authority of the self-same Brāhmaṇas also or the philosophico-scientific sense he assigns to them. By so doing e makes the position he has taken with regard to the original ignificance of Vedic verses impregnable. He has reared his edifice n the firm foundation of traditional authority, going as far back s the Brāhmaṇas, which next to the Vedas are the oldest books in ndian literature.

The commentary of Dayānanda neither is nor was meant to e exhaustive. The vastness of derivative connotation lying behind ach word opens to the reader vista after vista of scientific import vith which every verse appears to be pregnant. The Ṛṣi simply ints at one of these meanings, and leaves it to the reader to gather he rest from a study of his and other commentaries. For an intelligent perusal even of his own work alone it is necessary to weave hese stray threads together. The different denotations assigned to ne and the same word in different contexts have to be collected together in order to be able to place side by side the phantasmagoric anorama of significances contained in each verse of the Veda.

The present work is an attempt in this direction. It is a lictionary of the words of the four Vedas in which the meanings ssigned to them not only in the Bhashya but in all writings of Ṛṣi Dayānanda, including his booklets, tracts, letters and notices have een collected. These are printed in Pica No. 1 type. To them are ppended meanings culled from Nighaṇtu, Nirukta, Brahmaṇas and Jpaniṣads printed in Pica No. 2. All these taken together will, it s hoped, form an invaluable key to the meanings of the Vedas revealed to the Ṛṣis.

At present only Part I containing words beginning with अ—औ is eing presented to the public. It has not been possible to have even his part printed entirely at one press. This has led to variety in its

printing. The reader's indulgence is solicited for this and other defects, which, it is hoped, will not at all mar its utility as a k o ṣ a.

A collection of different passages of the Vedas shedding light on the different meanings of the words used in them as also of the different readings found in different Śākhās will help a great deal in understanding the meanings of Vedic words. This work may be taken up when the present volume is finished.

A detailed introduction embodying a comprehensive study of the methods of interpretation of various commentators, and thus bringing out in clear perspective the angle of vision of the Ṛṣis, *i. e.* Seers as distinguished from the point of view of scholars, may be looked for when this whole k o ṣ a has gone through the press, and the time comes to issue the whole book in one volume.

Gurukul Kangri,
Hardwar,
July 13, 1934.

Chamupati.

संकेतसूची

०	अष्टाध्यायी
थर्व०	अथर्ववेदः
र्य०; आर्याभि०	आर्याभिविनयः (लघ्वाकारः)
; उणादि०	उणादिकोषः
०	ऋग्वेदः
० वे० भा० भू०; पे०; भूमिका	ऋग्वेदादिभाष्यभूमिका
: ऐत०	ऐतरेयब्राह्मणम्
०	कौषीतकिब्राह्मणम्
० नि०	कौत्सव्यनिघण्टुः
(पू०=पूर्वभागः उ०=उत्तरभागः)	गोपथब्राह्मणम्
	छान्दोग्योपनिषद्
उ०	जैमिनीयोपनिषद्ब्राह्मणम्
	ताण्ड्यमहाब्राह्मणम्
	तैत्तिरीयब्राह्मणम्
० शि०	तैत्तिरीयोपनिषदि शिक्षाध्यायः
	देवताध्यायः
निरु०	निरुक्तम्
	निघण्टुः
	पञ्चमहायज्ञविधिः
रण्यक	बृहदारण्यकोपनिषद्
	मंत्रब्राह्मणम्
	मनुस्मृतिः
	यजुर्वेदः
	शतपथब्राह्मणम्
	षड्विंशब्राह्मणम्
०; वि०; विधि०	संस्कारविधिः
	सत्यार्थप्रकाशः

–यत्र ऋषेर्भाष्यान्तःपातिशब्दानाम् १।१।१ इत्येवं त्रिभिरङ्कैर्निर्देशस्तत्र प्रथमेन ऋग्वेदस्य मण्डलं द्वितीयेन सूक्तं तृतीयेन च मन्त्रो ज्ञेयः। यत्र च १।१ इत्येवं द्वाभ्यामङ्काभ्यां निर्देशस्तत्र प्रथमो यजुर्वेदस्याध्यायं द्वितीयश्च मन्त्रं बोधयति।

वेदार्षकोषः

VEDARSHA-KOSHA

॥ ओ३म् ॥

वेदार्षकोषः

(अ)

अंशः प्रेरकः । २. १. ४ । दुष्टानां सम्यग्घातकः । २. २७. १ । विभागः ५. ४२. ५ । भागः ७. ३२. १२ ॥ अंशम् सेवाविभागं भोजनाच्छादनधनयानशस्त्रकोषविभागम् १. १०२. ४ । प्राप्तम् २. १६. ५ ॥

अंशः अंशुना व्याख्यातः । नि. १२. ३६ ।

अꣳशुः संविभागः । ७. २६ । व्याप्तिमान सूर्यः । अत्राशूङ् व्याप्तावित्यस्माद् बाहुलकेनौणादिक उः प्रत्ययो नुगागमश्च १८. ६ । भागः २०. २७ । ओषधिसारः ३. ३६. ६ । प्रापकः ४. २२. ८ ॥ अꣳशुं विभक्तां सोमवल्लीम् १. १३७. ३ । सारम् ३. ३६. ७ । विज्ञानादिकं पदार्थम् ४. २६. ६ । प्राणप्रदम् ५ ३६. १ । वैद्यकविद्यारीत्या विभक्तम् ६. २०. ६ । विभक्तम् ६ १७. ११ ॥ अꣳशुना किरणसमूहेन १७. ८६ । सूर्येण ४. ५८. १ ॥ अꣳशुभिः किरणैः १२. ११४ । सूक्ष्मितत्वावयवैः १. ६१. १७ ॥ अꣳशुभ्याम् बाहुभ्यामिव ७. १ ॥ अꣳशवे पदार्थानां वेगाय १. ४६. १० ॥ अꣳशुरꣳशुः अवयवोऽवयवः ५. ७ ॥ अꣳशुषु विभक्तेषु सांसारिकेषु पदार्थेषु ८. ५७ ॥ अꣳशो । सूर्यवत् प्रकाशमान । ७. ३ ॥

अंशुः शमष्टमात्रो भवति । अननाय शं भवतीति वा । नि. २. ५ ॥ प्राण एवाꣳशुः... चक्षुरेवाꣳशुः । श. ११. ५. ९. २ । [illegible] । श. ११. ५. ९. ३ ॥

प्रजापतिर्वा एष यदꣳशुः । श. ४. ६. १. १ । अꣳशुर्वै ग्रहः प्रजापतिः । श. ४. १. १. २ । प्रजापतिर्वा एष यदꣳशुः सो अस्य (यजमानस्य) एषआत्मैव । श. ४. ६. १. १ । श. ११. ५. ९. १ ॥

अंसत्रा अंसान् गत्यादीन् रक्षतस्तौ ४. ३४. ६ ॥

अंसत्रम् अंहसस्त्राणम् धनुर्वा कवचं वा नि. ५. २६ ॥

अंसौ भुजमूले १. १५८. ५ । अंसेषु बलपराक्रमाधिकरणेषु भुजमूलेषु । १. १६६. १० ॥

अंस्याः अंसेषु स्कन्धेषु भवाः १. १६१. ७ ॥

अंहः अपराधः पापम् ६. ३. २ । पापात्मकं कर्म, कुपथ्यादिकं वा २. ३३. २ । अनिष्टाचरणम् ३. १५ ३ । दुःखदातारम् ४. २. ६ । दुःखरोगवेगम् (अत्र अमेर्हुक् च उणादि० ४ । २२० चादसुन् । अनेन वेगो गृह्यते) १. ४२. १ । पापजन्यं दुःखम् ५. ४५. ११ ॥ अंहसः मिथ्याचारात १६. १० । [विद्याध्ययननिरोधकात् विघ्नाख्यात्] पापात् १. ११७. ३ । [दुःखदारिद्र्याख्यात्] पापात् ७. १. १५ । [अविद्याज्वरादि-] रोगात् १. ९१. १५ । [क्षुज्ज्वरादि-] रोगात् १. ६३. ८ । दुष्टाद् व्यसनात् २०. १४. १६ ॥

अंहतिश्चांहश्चांहुश्च हन्तेर्निरूढोपधाद् विपरीताद । नि० ४. २५. ४ ॥

अंहःऽयुवः येऽंहोऽपराधं युवन्ति पृथक्कुर्वन्ति ते ५. १५. ३ ॥

अंहतिः दारिद्र्यम् १. ९४. २ ॥ अंहतिभ्यः "मारते हैं जिन अस्त्रों से" ५. ५५. १० ॥

अंहूरणा येऽंहयन्ति तेऽंहवो गन्तारस्तेषां रणः संग्रामो यस्यां सा । ६. ४७. २० ॥ अंहूरणात् अंहुरं पापं विद्यतेऽस्मिन् व्यवहारे ततः । १. १०५. १७ ॥

अंहूरणात् । अंहुरो अंहस्वान् अंहूरणमप्यस्य भवति । नि० ६. २७. २ ॥

अंहोः पापमाचरितुः २. २६. ४ । अपराधात् ५. ६७. ४ । दुष्टाचारात् ५. ६५. ४ । प्राप्तस्य प्राप्तव्यस्य वा [राज्यस्य] १. ६३. ७ । विज्ञानवत् (अत्राहिधातोरौणादिक उः प्रत्ययः) १. १०७. १ ॥

अꣳहसस्पतये वेगस्य पालकाय ७. ३० । श्लिष्टस्य । २२. ३१ ॥

अꣳहुभेद्याः अंहुमपराधं या भिनत्ति तस्याः [प्रजायाः] २३. २८ ॥

अꣳहोः अपराधिनः । ३३. ६८ । सुखप्रापकस्य गृहाश्रमस्याऽनुष्ठानस्य । ८. ४ ॥

अꣳहोमुचः दुःखमोचयित्र्यः । ४. १३ ॥

अकः कुर्य्याः ५. ८३. १० । कृतवान् [अत्र मन्त्रे घसह्वरणश० इति च्लेर्लुक्] १. २४. ८ । करोति १. १२३. ७ । कुरु ८. २३ । कुर्यात् ११. २२ ॥

अकनिष्ठासः अविद्यमानाः कनिष्ठा येषां ते ५ ५९. ५ । कनिष्ठभावमप्राप्ताः ५. ६०. ५ ॥

अकरम् करोमि १. ११४. ६ । कुर्याम् १२. ५८ ॥

अकर्त कुर्वन्ति [अत्र लडर्थे लुङ् । मन्त्रे घस० इति च्लेर्लुक् । वचनव्यत्ययेन झस्य स्थाने तः । छन्दस्युभयथेत्यार्धधातुकं मत्वा गुणादेशश्च] १. २०. ६ ॥

अकर्त कुर्यात् ४. ३५. ५ । कुरुत ४. ३५. ५ ॥

अकर्म कुर्याम ३. १४. ७ ॥

अकर्म अकार्ष्म कुर्याम [अत्र डुकृञ् धातोर्लुङि मन्त्रे घसेत्यादिना च्लेर्लुक्] ८. १८ ॥

अकल्पः कल्पैरन्यैः समर्थैरसदृशोऽन्येभ्योऽधिक इति १. १०२. ६ ॥

अकल्पयत् रचितवान् १०. १९०. ३ ॥

अकवऽअरिम् अविद्यमानशत्रुम् ३. ४७. ५ । कौति धर्ममुपदिशतीति कवो न कवोऽकवोऽधर्मात्मा तस्यारिः शत्रुस्तम् ७. ३६ ॥

अकवाः अशब्दायमानाः ५. ८५. ५ ॥ अकवेभिः असंख्यैः ६. ६०. ३ ॥ अकवैः अकुत्सितैः कर्मभिः २. ५४. १६ ॥

अकवाभिः प्रशंसिताभिः १. ५८. १ । अनिन्दितृभिः ६. ३३. ४ ॥

अकविषु अक्रान्तप्रज्ञेष्वविद्वत्सु ७. ४. ४ ॥

अकानिषं प्रदीपयेयम् ४. २४. ६ ॥

अकामऽकर्शनः योऽकामानलसान् कृशति तनूकरोति सः १. ५३. २ ॥

अकायम् स्थूलसूक्ष्मकारणशरीररहितम् ४०. ८ ॥

अकारि क्रियते [अत्र लडर्थे लुङ्] १. २०. १ । 'किये गए' ४ १६. २१ ॥

अकारि क्रियते १. १०४. १ ॥

अकारिषम् कुर्याम ४. ३६. ६ ॥

अकारीत् करोति ४. ३६. ३ ॥

अकितवम् अद्यूतकारिणम् ३०. ८ ॥

अकिरत् किरति विक्षिपति १. ३२. १३॥

अकुत्र अविषये १. १२०. ८ ॥

अकुमारः पञ्चविंशतिवर्षातीतः १. १५५.६॥

अकूपारस्य अकुत्सितः पारो यस्य तस्य ५. ३६. २। समुद्रस्य २४. ३५ ॥

अकूपारस्य...अकुपरणस्य । नि० ४. १८. १. । आदित्योऽप्यकूपार उच्यतेऽकूपारो भवति दूरपारः । समुद्रोऽप्यकूपार उच्यतेऽकूपारो भवति महापारः । कच्छपोऽप्यकूपार उच्यतेऽकूपारो न कूपमृच्छति । ४. १८. २ ॥

अकृणुत कुरुत १. ११०. ३ ॥

अकृणुतम् कुर्यातम् ६. ६६. ५ ॥

अकृणुतम् कुरुतम् १. ११६. १० ॥

अकृणुध्वं कुरुत ४. ३५. ६ ॥

अकृणोः कुरु २. १३. २ ॥ करोति २. १३. ३ ॥

अकृणोः करोति २. १३. ५ ॥ कुर्य्याः २ १७. ३ । कुरु १७. २४ ॥

अकृणोत् करोति २. १७. ६ । कुर्यात् ५. ४२. १३ ॥

अकृणोत् करोति [अत्र लडर्थे लङ्] १. १६४. २८ । कुर्य्यात् ३. ३०. १० ॥

अकृणोत्...अकरोत् । नि० ६. २ ।

अकृणोत कुरुत ४. ३५. ३ ॥

अकृणोतन कुरुत १. ११०. ८ ॥

अकृण्वत कुर्वन्ति कुर्वन्ति [अत्र लडर्थे लङ् व्यत्ययेनात्मनेपदञ्च] १. ३६. ५ । कुर्वन्तु १ १३२. ३ ॥

अकृण्वत...अकुर्वत । नि० ५. २५. १ ॥

अकृण्वत कुर्वन्तु ३. ११.४ ॥

अकृण्वन् कुर्वन्ति १. ७२. १० ॥

अकृण्वन् कुर्युः १. ३१. ११ ॥ कुर्वन्ति ४. ३३. ७ ॥

अकृत करोति ५. ३४. ८ ॥

अकृत करोति १. १२४. ४ । कुर्यात ३. २६. ८ ॥

अकृतः कृन्तसि १. ६३. ४ ॥

अकृतम् अक्रियमाणं कर्म ६. १८. १५ ॥ अकृता अकृता ४. १८. २॥ अकृते अनिष्पादिते १. १०४. ७ ॥

अकृथाः कुर्याः ५. ३०. ८ ॥

अकृप्रन् कल्पन्ते ४. २. १८ ॥

अकृष्टपच्याः या अकृष्टेषु जंगलादिषु पच्यन्ते ताः १८. १४ ॥

अकृष्णः अविद्यान्धकाररहितः २३. १३ ॥

अकेतवे अज्ञानान्धकारविनाशाय १. ६. ३॥ अविद्यमानप्रज्ञाय २९, ३७॥

अक्तः (शुभगुणैः) युक्तः ४. ३. १०। रात्रिः ६. ५. ६। अक्तौ आसक्तचित्तौ [यज्ञकर्ता यज्ञकारयिता च]। ६. ११॥ अक्तम् युक्तम्। २. ३. ४। प्रसिद्धम्। २०. ३१। सम्बद्धम्। ४. २७. ५। प्रकटं वस्तु सुखं वा। २. १६॥

अक्ता अनक्त्यञ्जनवत्पदार्थानाच्छादयति सा रात्रिः। १. ६२. ८॥

अक्तून् प्रसिद्धान् [पदार्थान्] ६. ४. ५। रात्रीः ६. ३९. ३। अन्धकारान् ११. ४३॥ अक्तुना रात्र्या। २. १०. ३॥ अक्तुभिः प्रसिद्धैः कर्मभिर्मार्गैः प्रसिद्धाभिः रात्रिभिर्वा १. ९४. ५। अञ्जन्ति मृत्युं नयन्ति यैस्तैः शस्त्रैः (अञ्जुधातोर्बाहुलकादौणादिकस्तुः प्रत्ययः) १. ३६. १६॥

अक्तोः...रात्र्याः। नि० ५. २८. १.॥ अक्तुभी रात्रिभिः। नि० १२. २३॥

अक्रः अन्यैरक्रान्तः [अत्र पृषोदरादिनेष्टसिद्धिः] १. १४३. ७। क्राम्यति १. १८९. ७। (केनापि प्रकारेण) क्रमितुमयोग्यः ३. १. १२। अक्रमिता ४. ६. ३॥

अक्र आक्रमणात्। नि० ६. १७. ५॥

अक्रत कुर्वन्ति [अत्र लडर्थे लुङ् मन्त्रे घसह्वरणश० अ० २। ४। ८ इति च्लेर्लुक् च] १. २०. ४। कारयन्ति [अत्र णिलोपः] १. ९२. १। कुर्वते ५. २१. ३। कुरुत ३५. ८॥

अक्रत...अकृपत। नि० ४. ९॥

अक्रतून् निर्बुद्धीन् ७. ६. ३॥

अक्रन् कुर्वन्ति १. ९२. २। कुर्वन्तु १२. ४५॥

अक्रन् कुर्वन्ति [मन्त्रे घस० इत्यादिना च्लेर्लुक्] १. ३३. १५। कुर्य्युः कुर्वन्ति वा २. ३९. ८। कुर्वन्तु ३४. १६॥

अक्रन्दः शब्दायसे १. १६३. १॥

अक्रन्दत् प्राप्नोति १२. ६। गमयति १२. २१। विजानाति १२. ३३॥

अक्रन्दयः आह्वय १. ५४. १॥

अक्रपिष्ट कल्पते ७. २०. ९॥

अक्रमीत् काम्यति [अत्र लडर्थे लुङ्] ३. ६। क्रामति ६. ५९. ६। क्रमते। ३३. ९३। उत्तमतयाक्रमणं कुर्य्यात् ११. २२॥

अक्रमु काम्यन्ति १२. ८४॥

अक्रविहस्ता अहिंसाहस्तौ दानशीलहस्तौ वा ५. ६२. ६॥

अक्रंस्त क्रमते २. २५। गच्छति २. २५॥

अक्रान् कुर्वन्ति २. ११. ८॥

अक्रामत व्याप्नोति ३१. ४॥

अक्रौ अकर्तरि [अत्र नञुपपदात् कृधातोः इक् कृष्यादिभ्य इति बहुलवचनात् कर्तरीक्] १. १२०. २॥

अक्षः पुरोभागः १. १६४. १३। इन्द्रियछिद्रम् ३. ५३. १७। रथ्यो भागः १. १६६. ९। धुरि (इतिभाषायाम्) ६. २४. ३॥ अक्षम्

धूः १. ३०. १४ । अश्यन्ते व्याप्यन्ते प्रशस्ता व्यवहारा येन तम् १. ३०. १५ । व्याप्तम् ७. ३३. ४. ॥ अक्ष व्याप्तविद्य ३. ५३. १६ ॥

अक्षा अश्नुवत एतानिति वाभ्यश्नुवत एभिरिति वा। नि. ९. ७. २ । अक्षाः अश्नोतेरित्येवमेके क्षियति निगमः...क्षरति निगमः... इत्येके। नि० ५. ३. १ ॥

अक्षण्ऽवान् विज्ञानी १. १६४. १६ ॥

अक्षण्वन्तः अक्षिमन्तः। नि. १. ९. १ ॥

अक्षतः क्षतवर्जितः ५. ७८. ६ ॥

अक्षन् अदन्ति १. १६१. १२ ॥

अक्षन् अदन्ति [अत्र लडर्थेलुङ्-मन्त्रे घस० इति च्लेर्लुक्, गमहनजन इत्युपधालोपः शासिवसिघ० इति षत्वम् खरिचेति चर्त्वम्] ३. ५१ ॥ अदन्तु [योऽदूधातोः स्थाने घस्लृ आदेशस्तस्य लुङि रूपम्] १६. ३६. प्राप्नुवन्तु १. ८२. २ ॥

अक्षऽभिः बाह्याभ्यन्तरैर्नेत्रैः [छन्दस्यपि दृश्यते अ. ७।१। ७६ अनेन सूत्रेणाक्षिशब्दस्यभिस्यनङादेशः] १. ८६ ८। चक्षुर्भिः २५. २१। इन्द्रियैः प्राणैर्वा १. १३६. २ ॥

अक्षरत् क्षरति १. ११२. ११ ॥

अक्षरन् सञ्चलन्ति [अत्र लडर्थे लङ्] १. ३३. ११। चालयन्ति १. ८४. ४। प्राप्नुवन्ति १. १८८. ५ ॥

अक्षरपंक्तिः असौ लोकः १५. ४ ॥

एष वै यज्ञोऽक्षरपंक्तिः । श० ८. ५. २. ४। असौ वै लोकोऽक्षरपंक्तिश्छन्दः। श० ८. ५. २. ४. ॥

अक्षरम् अक्षयस्वभावम् १. १६४. ४२ ॥ अक्षरा उदकानि अत्राकारादेशः ७ १. १४। अक्षरा अक्षराण्यकारादीनि ७. १५. ६ ॥ अक्षरे अविनाशिनि स्वरूपे कारणे जीवे वा १. १६. ३५ ॥

अक्षरं वाङ्नाम । निघ० १. ११. । उदकनाम। निघ. १. १२। नि. ११. ४१ । तद्यदक्षरत्तस्मादक्षरम्। श० ६. १. ३. ६ । यद्वेवाक्षं नाक्षीयत तस्मादक्षयम । अक्षयं ह वै नामतत् । तदक्षरमिति परोक्षमाचक्षते। जै० उ० १. १४. २.। कतमत्तदक्षरमिति यत्क्षरन्नाक्षीयतेति। इन्द्र इति। जै० उ० १. ४३.४। विराजो वा एतद्रूपं यदक्षरम्। ता० ८.६.१४.। अक्षरेणैव यज्ञस्य छिद्रमपिदधाति। ता० ८. ६. १३।

अक्षरा अविनाशिनी सकलविद्याव्यापिनी ७. ३६. ७ ॥

अक्षराजाय येऽक्षैः क्रीडन्ति तेषां राजा तस्मै ३०. १८ ॥

अक्षाणि इन्द्रियाणि ७. ५५. ६. ॥

अक्षिणाः क्षयति हन्ति ४. १८. १२ ॥

अक्षितऽऊतिः क्षयरहिता ऊतिर्ज्ञानं यस्य सः १. ५. ६ ॥

अक्षितम् यन्न कदाचित् क्षीयते सदैव वर्धमानं तत् १. ६. ७ ॥

अक्षिताम् अनुपक्षीणाम्। नि. ११. ११ ॥

अक्षित्यै 'परिपूर्ण होनेके लिये' ६. २८ ॥

श्रद्धैव सकृदिष्टस्याक्षितिः स यः श्रद्दधानो यजते तस्येष्टं न क्षीयते। कौ. ७. ४। पुरुषो वा ऽक्षितिः। श. १४. ४. ७। आपोऽक्षितिर्या इमा एषु लोकेषु याश्चेमा अध्यात्मन्। कौ० ७. ४ ॥

अक्षिति अविद्यमाना क्षितिः क्षयो यस्य तत् १. ४०. ४ ॥

अक्षिपत् क्षिपति ६. १६. १८ ॥

अक्षिभ्रुवः यदक्षिणि भवति प्रत्यक्षं तस्य २३. २६ ॥

अक्षियंतम् न निवसन्तम् ४. १७. १३ ॥

अक्षी अश्नुवते व्याप्नुवन्ति याभ्यां बाह्याभ्यन्तरविद्यायुक्ताभ्यान्ते १. ७२. १० । रूपप्रकाशके नेत्रे इव १. १२०. ६ ॥

अक्षि चष्टेः, अनक्तेरित्याग्रायणः । तस्मादेते व्यक्ततरे इव भवत इति विज्ञायते । नि. १. ९. १ ।

अक्षीयमाणम् विद्याविज्ञानागाधमक्षीणविद्यम् ३. २६ ६ ॥ अक्षीयमाणा क्षयरहितानि १. १५४. ४ ॥ अक्षीयमाणाः क्षेतुमनर्हाः १७. ३ ॥

अक्षुः व्याप्तुंशीलः १. १८०. ५ ॥

अक्षुत् क्षुधो राहित्यम् १८. १० ॥

अक्षेत्रवित् यः क्षेत्रं रेखागणितं न वेत्ति सः ५. ४०. ५ ॥

अक्षोदयत् सञ्चूर्णयति ४. १६. ४ ॥

अक्ष्णः दर्शनसाधकस्य ४. ३२ ॥

अक्ष्णयाऽध्रुक् कुटिलया रीत्या द्रुह्यति सः १. १२२. ६ ॥

अखनन् खनन्ति १२. ६८ ॥

अखर्वम् अनल्पं पूर्णम् ७. ३२. १३ ॥

अखिद्रयामऽभिः अच्छिन्नानि निरन्तराणि निगमनानि येषां तैः [स्फायितञ्चि उ० २, १४. इति रक् । सर्वधातुभ्यो मनिन्निति करणे मनिन्न] १. ३८. ११ ॥

अख्यः प्रकाशयति ७. १३. ३ ।

अख्यत् प्रकाशते ४. १४. १ ॥ ख्याति १२. २१ । धर्म्यानुपदेशान् प्रकथयेः १२. ३३ । प्रख्यापयेत् । ४. २४. ८ ॥

अख्यत् प्रख्यातो भवति ११. १७ । प्रसिद्धतया प्रकाशेत १. ४६. १० ॥

अख्यत प्रख्यापयत १. १६१. १३ ॥

अख्यन् ख्याता भवन्ति १. ३५. ५ । उपदिशन्तु ४. १. १८ ॥

अख्यम् अन्यान् प्रति कथयेयम् १. १०६. १ ॥

अख्यम् कथनीयम् ५. ४८. ४ ॥

अख्ये प्रकथयामि [अत्र व्यत्ययेनात्मनेपदम्, लड़र्थे लुङ् च] ४. २३ ॥

अगच्छत् गच्छति प्राप्नोति [अत्र वर्तमाने लङ्] १. ३२. १४ । प्राप्नुयात् ३. ३१. ७ ॥

अगच्छत आगच्छत १. ११०. २ । प्राप्नुत १. १६१. ६ ॥

अगच्छतम् प्राप्नुताम् १. ११६. ८ ॥

अगच्छतम् (आ+अगच्छतम्) आश्नो १. ११७. १६ । गच्छतम् ५. ७८. ४ ॥

अगच्छन्त प्राप्नुवन्ति १७. ३० ॥

अगथाः गच्छसि प्राप्नोषि वा [अत्र पक्षे व्यत्ययः वर्तमाने लुङ् मन्त्रे घसह्वरणश० अ० २ । ४ । ८० इति च्लेर्लुक्] ३. १६ ॥

अगदम् रोगरहितम् १२. ७६ ॥

अगन् समन्तात्प्राप्ताः १. १६४. ३७ । प्राप्नुवन्ति ३. ३७. १० । [अत्र लड़र्थे लुङ्] ८. ६० ॥

अगन् गतिकर्मसु । निघ० २. १४ ॥

अगन् गच्छति [अत्र लङि प्रथमैकवचने बहुलं छन्दसीतिशपो लुक् संयोगत्वेन त लोपे मोनोधातोरिति मस्य नकारादेशः] १. १२३. २ ।

आगच्छतु ४. ५३. ७। प्राप्नोतु ७. २०. ६। प्राप्नोति [अत्र लडर्थे लुङ् मन्त्रे घस० इति च्लेर्लुक्। मोनोधातोरिति मकारस्य नकारः] ४. १५। आगच्छति १. १७६. ४ ॥ गच्छन्तु प्राप्नुवन्तु [अत्र गमधातोर्लोडर्थे लुङ्। मन्त्रे घस० इति च्लेर्लुगनुनासिकलोपश्च] ८. ५६। प्राप्नुवन्ति [अत्र लडर्थे लुङ्] ८. ६० ॥

अगनीगन् प्राप्नुवन्ति २३. ७ ॥

अगन्म प्राप्नुयाम १. ५०. १० ॥ गच्छामः १. ११३. १६ ॥ गच्छेम १२. ७३ ॥ विजानीयाम ३५. १४ ॥ 'प्राप्त हुए' ४. ५. १२ ॥

अगन्म प्राप्नुयाम [अत्र लिङर्थे लुङ् मन्त्रे घस०इति च्लेर्लुक्। म्वोश्च अ० ८। २। ६५ इति मकारस्य नकारः] ३. ३१. १४ ॥

अगन्महि गच्छेम ६. ५१. १६ ॥

अगन्महि प्राप्नुमः [अत्र गम् धातोर्लुङि उत्तमबहुवचनेमन्त्रे घस० अ०। २। ४। ८०। अनेन च्लेर्लुक्, म्वोश्च० अ ८। २। ६५ अनेन मकारस्य नकारादेशः, अत्र लडर्थे लुङ्] २. २४। प्राप्नुयाम [अत्र गम्लृधातोर्लिङर्थे लुङ्] ८. १४ ॥

अगमन् प्राप्नुवन्तु २५. २० ॥

अगमम् प्राप्नुयाम् १. १६१. २ ॥

अगव्यूति क्रोशद्वयपरिमाणरहितम् ६. ४७. २० ॥

अगस्त्यः ये धर्मादन्यत्र न गच्छन्ति तेऽगस्तयस्तेषु साधुः १. १७६. ६। अगमपराधमस्यन्ति प्रक्षिपन्ति तेषु साधुः १. १८०. ८। अस्तदोषः ७. ३३. १० ॥ अगस्त्ये अगस्तिषु ज्ञातव्येषु व्यवहारेषु साधुनि कर्मणि [अत्रागधातोरौणादिकस्तिः प्रत्ययोऽसुडागमश्च] १. ११७. ११। अपराधरहिते मार्गे १. १८४. ५ ॥ अगस्त्य अगस्तौ विज्ञाने साधो १. १७०. ३ ॥

अगस्महि संगच्छामहे [अत्र लडर्थे लुङ्, मन्त्रे घस० इति च्लेर्लुक्, वर्णव्यत्ययेन मकारस्थाने सकारादेशश्च] १. २३. २३ ॥

अगाः गच्छेः ३. २१. ४। गच्छ ५. ३६ ॥

अगात् प्राप्नुयात् ३. ३०. १३ ॥

अगात् एति प्राप्नोति [अत्र लडर्थे लुङ् इणो गा लुङि अ० २। ४। ४५ इति गाऽऽदेशः] १. ३५. ८। प्राप्तमस्ति १. ११५. १। व्याप्नोति १. ५०. १३। व्याप्तोस्ति ४०. ८। गच्छति १. ११३. १६। गच्छन्ति १. १६३. १३। गच्छतु प्राप्नोतु १. १६२. ७। गच्छेत् १. १२६. ३। आगच्छति २. ३८. ४। आगच्छेत् ३. ८. ४। उदितोऽस्ति १३. ४६ ॥

अगाम् प्राप्नुयाम् ५. २. ८ ॥

अगाम् प्राप्नुयाम् ५. ४२ ॥

अगाम जानीयाम प्राप्नुयाम वा [अत्रेण धातोर्लिङर्थे लुङ्] १. ३१. १६ ॥

अगामि गम्यते ६. १६. १९ ॥

अगिराऽओकसः अविद्यमानया गिरा सहौको गृहं येषां ते [अत्र तृतीयायां अलुक्] १. १३५. ६ ॥

अगुः प्राप्तयन्तः १. ८८. ४। व्याप्नुवन्तु १. १८१. ६। आगच्छन्ति ३. ५६. २। अगमन ६. ७ ॥

अगूहत् संवृणोति २. २४. ३ ॥

अगृभीतऽशोचिषः न गृहीतं शोचिस्तेजो येस्ते ५. ५४. ५ ॥

अगृभीषत गृह्णन्तु २१. ६० ॥

अगृभ्णत गृह्णन्तु ३. ६. ६ ॥

अगृभ्णत अगृह्णत। नि० ७. २६. १ ॥

अगृभ्णन् गृह्णीत १०. १। गृह्णीयुः २२. २ ॥

अगृभ्णाः गृहाण ५. ३१. ७ ॥

अगृभ्णात् गृह्णीयात् १. १६३. २ ॥

अगृभ्रन् गृह्णन्ति ५. २ ४ ॥

अगोतायै इन्द्रियविकलतायै ३. १६. ५ ॥

अगोपाः पालकरहितः २. ४. ७ ॥

अगोह्य अरत्य १. १६१. १३। अगोह्यस्य असंवृतस्य ४. ३३. ७ ॥

अगोह्य आदित्योऽगूहनीयः। नि० ११. १६. ४ ॥

अग्नायी अग्नेः पावकवद्वर्तमानस्य पत्नी ५. ४६. ८ ॥ अग्नायीम् यथाऽग्नेरियं ज्वालास्ति तादृशीम् [वृषाकप्यग्नि० अ० ४ १ । ३७ अनेन ङीप् प्रत्यय एकारादेशश्च] १. २२. १२ ॥

अग्नायी अग्नेः पत्नी ॥ नि० १२. ४६. १। ९. ३३. २ ॥

अग्निः प्रसिद्धः पावकः १. ६५. ४। वन्हिः २१. ५८। भौतिको यज्ञसम्बन्धी शरीरस्थो वा १. २२। विद्युद्वा २. ३ ॥ प्रकाशादिगुणवान् ३. ४०, सूर्यः ५. ६। प्रसिद्धो रूपवान् दहनशीलः पृथिवीस्थः सूर्यलोकस्थश्च १. १२. ६। जठरस्थोऽग्निः २. ११। युद्धजन्यक्रोधाग्निः ६. १८। वाचकः, अभिधायकः ४.११।अग्निरिव ज्ञानप्रकाशकः १. ६९. २। अग्निरिव प्रकाशमानः ३. २७. १३। अग्निरिव विद्यादिसद्गुणैः प्रकाशमानः १ १४५. ५। पावक इव शुद्धस्वरूपः ३. ११. ६। अग्निरिव पवित्रः ५. १८. १। अग्निरिव पुरुषार्थी ४. ५५. ८। पावक इव विद्वान्। ५, १३. ३। पावक इव पवित्रोपचितो मुनिः ६. १४ ५। पावक इव शुद्धान्तःकरणः। ६. ५५. १०। पावक इव तेजस्वी ७. ३०. ३। पावक इव देदीप्यमानः ७. १४। पावक इव प्रदीप्तः २१. ४०। पावकवत् तेजस्वी तज्ज्ञो वा ३४. ९। विद्युदिव स्वप्रकाशः ३. ५५. १०। पावक इव स्वप्रकाश ईश्वरः ७. ५. २। पावक इव सेनापतिः। १५. ५२। पावक इव पवित्रः सभाध्यक्षः। १. ६६. ३। विज्ञानस्वरूपपरमात्मा १. ७७. २। विज्ञानस्वरूपो जगदीश्वरः १ ६६. १। अन्तःस्थो विज्ञानानन्दस्वरूपः परमेश्वरः। भू० पृ० २१३ ॥ शरीरस्था विद्युत् ११. २४। विद्युदादिस्वरूपः १. १३६. ७। विद्युदादिकार्य्यकारणस्वरूपः २. ६ १। विद्युत्सूर्यरूपः १. १२८. ३। सर्वसुखदात्री विद्युत् १. ७०. ३। विद्युदिव सभाध्यक्षो राजा, उत्तमैश्वर्य्यप्रदः, सर्वमित्रः, सर्वाभिरक्षकः ६. ३६. १७। विद्युदिव नियन्त्री १. ५६. २। विद्युदिव पवित्रः ६. १४. २। विज्ञानवान् पतिः १३. १६। विज्ञानवान् १३. २४। विज्ञानप्रकाशमयः ३. २५। सर्वविद्याप्राप्तो विद्वान् ६. १६। न्यायमार्गे गमयिता १. १०७. २। शत्रुदाहको विद्वान् १२. ३३। पावक इव गृहस्थो विद्वान् १८.६४। विज्ञानस्वरूपः परमेश्वरः ३.२७. १ अथर्व(पञ्च० पृ० १८) सर्वविद्योपदेष्टा ३. ६। सद्विद्याया वेत्ता विज्ञापयिता वा १. १०५ १४। स्वयं प्रकाशमानोऽग्निरिव पापिनां दग्धा ५. ३७। वोढा ३. ५ १। सूर्य्य इव स्वप्रकाशः १. ५९. ७। सूर्य्य इव सुशीलप्रकाशकः १. १४१. २३ ॥

अग्नी वायुविद्युतौ . ५६. ३ । इन्द्राग्नी वायुविद्युतौ ६. ६०. १ ॥ अग्नयः नेतारो नयन्ति श्रेष्ठान्पदार्थान् ५. ३४ । मनुष्यशरीरं धारयित्वाऽऽहवनीयाद्यग्न्याधानकरणम् ७. ६७. १ अथर्व (ऋ० वे० भा० भू० पृ० २१३) । श्वैत्येन युक्ताः पावकाः १४. २७ । आहवनीयादयः पावकाः १८. ६७ । पावक इव कालविदो विद्वांसः १३. २५ ॥ अग्निम् परमेश्वरं भौतिकं वा । [इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः । ऋ. १. १६४. ४६ । अनेनैकस्य सतः परब्रह्मण इन्द्रादीनि बहुधा नामानि सन्तीति वेदितव्यम्। तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः । य० ३२. १ । यत्सच्चिदानन्दादिलक्षणं ब्रह्म तदेवात्राग्न्यादिनामवाच्यमिति बोध्यम् । ब्रह्म ह्यग्निः श० १. ४. ५. ११ । आत्मा वा अग्निः श० १ २. ३. २ । अत्राग्निर्ब्रह्मात्मनोर्वाचकोऽस्ति । अयं वा अग्निः प्रजाश्च प्रजापतिश्च श० ६. १. २. ४२ । अत्र प्रजाशब्देन भौतिकः प्रजापतिशब्देनेश्वरश्चाग्निर्ग्राह्यः । अग्निर्वै देवानां व्रतपतिः । एतद्ध वै देवा व्रतं चरन्ति यत्सत्यम् श० १. १. १. २—५ । सत्याचारनियमपालनं व्रतं तत्पतिरीश्वरः । त्रिभिः पवित्रैरपुपोद्ध्य १ र्कं हृदा मतिं ज्योतिरनु प्रजानन् । वर्षिष्ठं रत्नमकृत स्वधाभिरादिद्यावापृथिवी पर्य्यपश्यत । ऋ० ३. २६. ८। अत्राग्निशब्दस्यानुवृत्तेः प्रजानन्निति ज्ञानवत्वात् पर्य्यपश्यदिति सर्वज्ञत्वादीश्वरो ग्राह्यः। यास्कमुनिरत्रोभयार्थकरणायाग्निशब्दपुरः सरमेतन्मन्त्रमेवं व्याचष्टे । अग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयते ऽङ्गं नयति सन्नममानो ऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति । त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात् स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवतीति । अग्रणीः सर्वोत्तमः सर्वेषु यज्ञेषु पूर्वमीश्वरस्यैव प्रतिपादनात्तस्यात्र ग्रहणम् । दग्धादिति विशेषणाद्भौतिकस्यापि च । प्रशासितारं सर्वेषामणीयांसमणोरपि । रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् । एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम् । मनु० अ० १२ श्लोक १२२, १२३ । अत्राप्यग्न्यादीनि परमेश्वरस्य नामानि सन्तीति । ईळे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् । ऋ० ३. २७. २ । विपश्चितमीळ इति विशेषणादग्निशब्देनात्रेश्वरो गृह्यते, अनन्तविद्यावत्वाच्चेतनस्वरूपत्वाच्च । अथ केवलभौतिकार्थग्रहणाय प्रमाणानि । यदश्वं तं पुरस्तादुदश्रयंस्तस्याभयेऽनाष्ट्रे निवाते ऽग्निरजायत तस्माद्यत्राग्निं मन्थिष्यन्त्स्यात्तदश्वमानेतवै ब्रूयात् । स पूर्वेणोपतिष्ठते वज्रमेवैतदुच्छ्रयंति तस्याभयेऽनाष्ट्रे निवाते ऽग्निर्जायते । श० २. १. ४. १६ । वृषो अग्निः । अश्वो ह वा एष भूत्वा देवेभ्यो यज्ञं वहति श० १. ३. ३. २९—३० । वृषवद्यानानां वोढृत्वाद्वृषोऽग्निः । तथा ऽयमग्निराशुगमयितृत्वेनाश्वो भूत्वा कलायन्त्रैः प्रेरितः सन् देवेभ्यो विद्वद्भ्यः शिल्पविद्याविद्भ्यो मनुष्येभ्यो विमानादियानसाधनसंगतं यानं वहति प्रापयति । तूर्णिर्हव्यवाडिति श० १. ३. ४. १२ । अयमग्निर्हव्यानां यानानां प्रापकत्वेन शीघ्रतया गमकत्वाद्धव्यवाट् तूर्णिश्चेति । अग्निर्वै योनिर्यज्ञस्य । श० १. ४. ३. ११ । इत्याद्यनेकप्रमाणैरश्वनाम्ना भौतिको ऽग्निर्वात्र गृह्यते, आशुगमनहेतुत्वादश्वो ऽग्निर्विज्ञेयः । वृषो अग्निः समिध्यतेश्वो न देववाहनः । तं हविष्मंत ईळते । ऋ० ३. २७. १४ । यदा शिल्पिभिरयमग्निर्यन्त्रकलाभिर्यानेषु प्रदीप्यते

तदा देववाहनो देवान् यानस्थान् विदुषः शीघ्रं देशान्तरे ऽश्व इव वृष इव च प्रापयति ते ह-विष्मन्तो मनुष्या वेगादिगुणवन्तमश्वमग्नि-मीडते कार्य्यार्थमधीच्छन्तीति वेद्यम्] १. १. १ः दाहगुणविशिष्टं सर्वपदार्थच्छेदकञ्च सर्वत्र व्यापकम् १. ३६. ११। अग्निमिव वर्तमानम् ३. १३. ५। अग्नि केतुल्य तेजस्वी उपदेशको ७. १६. १। अग्निविद्याम् ११. १६। अग्नि-होत्रको १४. २. १८ अथर्व स० प्र० पृ० १२१)। अग्निमिव शत्रुदाहकम् ६. २६। अग्निमिव वर्तमानं वीर्य्यम् ११. ५७। अग्निमिवान्यान-परितापकम् ३५. १६। पावकमिव विज्ञानम् १. १७०. ४। प्रकाशमानम् ५. ११ २। योगा-भ्यासजनितं विद्युतम् ११. ६६। पावकवच्छत्रु-दाहकं योद्धारम् १६. ३३। पावक इव दुष्टानां दाहकम् ३. १२. ३। सर्वव्याप्तं परमात्मरूपं, सर्वव्यापकं विद्युदादिलक्षणं वा १. १६४. ४६। ब्रह्मवर्चस्विनम् १. ३८. १३। रूपगुणम् १. ३५. १। विद्यादिरूपम् ६. १. ३। भूमिस्थं विद्युतं, अन्तरिक्षे वाय्वादिस्थं वा ११. १६। विद्युद्वद्वर्तमानम् ११. ७६। विद्युतमिवसु-प्रकाशम् १२. ६१। विद्युद्विद्याम् ७ १०. ३। परमविद्वांसम् १३. १। उपदेशकं विद्वांसम् १२. ३०। तेजस्विनं विद्वांसम् १७. ६६॥ अग्निना पावकेनेव ब्रह्मचर्य्येण ५. ४३. ७। अन्तःकरण-रूपेण तेजसा २६. १०॥ अग्निभिः अग्निवद्वर्त-मानैर्वीरैः ६. ११. ६॥ अग्नये अग्निरिव वर्तमानाय सुपात्राय ६. ३. २। पावके होमाय ७. ३. १। विज्ञानस्वरूपायान्तर्यामिने जगदीश्वराय ३. ११। विज्ञानमयाय न्यायव्यवहाराय ८. ३८। विज्ञानादिगुणप्रकाशकाय ६. ५६। अग्निविद्या-प्राप्तये ४. ८. ५। अंगति सर्वान्पदार्थान्दग्ध्वा देशान्तरे प्रापयति तस्मै २. २६। पावकवर्धनाय ५. १। विज्ञापकाय १. ७७. १। विज्ञानवते १. ७६. १०। विज्ञानरूपाय ११. ६६। अग्न्यादि-पदार्थविज्ञानाय ८. ४७। धर्मविज्ञानाढ्याय १०. २३। अग्निसम्बन्धे स्थापनाय ११. ५६। अग्निप्रदीपनाय विद्युद्विद्याग्रहणाय कारणरूपाय जाठराग्निशोधनाय वा ४. ७। हवनार्थाय २. १॥ अग्निभ्यः पावकपरमाणुभ्यः ७. १. ४॥ अग्नेः उष्मणः १४. १५। उष्णत्वनिमित्तस्य १३. २५। आग्नेयास्त्रादेः सिद्धिकरस्य पावकस्य ५. २। आग्नेयास्त्रादियोगात् १७. ६६॥ अग्निषु कलायन्त्रेषु १. १०८. ४। अग्न्यादि-पदार्थेषु ५. ६. ६॥ अग्ने सर्वस्वामिन् विद्या-प्राप्तिसाधक वा २. २७। सर्वविद्यामयेश्वर विद्याहेतो वा कामानां प्रपूरकेश्वर कामपूर्ति-हेतो वा ३. १७। सर्वोपास्येश्वर १. १. ७। प्रज्ञेश्वर १. ३१. ५। मोक्षादिसुखकृदीश्वर १. ३१. ७। सर्वधारकेश्वर १. ५६. १। जीवनै-श्वर्य्यप्रदपरमेश्वर रोगनिवारणायौषधप्रद वा १. ६४. १६। सर्वमंगलकारकपरमेश्वर १. ६६. ६। पावकेश्वर ६. ९. ७। सर्वदुःखदाहक परमेश्वर ६. १५. ६। परमेश्वर धनुर्वेदविद्वा १. १७। जगदीश्वर ३. १४। विज्ञान-स्वरूप दयालो जगदीश्वर ४. २८। इच्छादिगुण-प्रकाशित १२. ३६। कृतब्रह्मचर्य्यगृहाश्रमिन् ५. ८. १। कीर्त्युत्साहप्रापक १. ३१. ८। कृत-विद्याभ्यास ५. ३. १। तेजस्विन सभापते ६. ३१। अध्यापक १. ७२. ७। आप्तानूचानाध्यापक १. ६१. ४। अध्यापकोपदेशक ५. १०. २। अध्यापकाध्येतर्वा १८. ६२। अविद्यान्धकार-विनाशक ६. ५५. ११। पावकवद्वर्तमान राजन् ३३. १५। पावकवत्प्रतापिन् विद्वन् ६. ७. ३। पावकवत्प्रकाशात्मन् ६. ७. ५। पावक इव सभ्यजन ६. ६०. ३। पावक इव प्रकाशितप्रज्ञ ७. १. ३। पावक इव विद्याप्रकाशितातिथे ७. ४२. ५। पावक इव मनुष्यजन्मप्राप्त १३. ४७। न्याय-

प्रकाशक विद्याविनयप्रकाशक वा २७. ५। अग्निरिव कार्य्यसाधक ६. १६. २२ । प्रदातः १. ७६. ८। प्राप्तशिल्पविद्य १. १३०. १२ । अग्निरिव वर्तमान सन्यासिन् ७. १३. २ । अग्निरिव स्वच्छात्मन् १२. ५२। अग्निवत्प्राप्त-पुरुषार्थ १२. १०६ । अग्निरिव दुःखदाहक योगिन् १७. ७६। अग्निरिव दाहकृत् २. १. ६। अग्निवद्धर्धमान २. ६. ५। यथायोग्यरचनस्य वेदितः १. ३१. १० । योगसंस्कारेण दुष्टकर्मदाहक १७. ७५ । विज्ञानान्वित १. ३१. ११ । विज्ञानादियुक्त १. ५८. ६ । विज्ञानसुखद १. ७६. ६ । विद्युदिव बलिष्ठ २. १. १२। विद्युद्वद्धनवर्धक ३ १८. ५। विद्यां जिघृक्षो ५. ११. ६। आप्तविद्वन् ७. १. १७! पदार्थविद्यावेत्तर्विद्वन् १. २२. १० । विद्यासुशिक्षायुक्तविद्वन् १. २६. १० । सर्व-विद्याभिव्याप्तविद्वन् १. ७१. १० । शूरवीर-विद्वन् १. १२७. ६ । भूगर्भादिविद्याविद्विद्वन् ११. २८ । मातः पितः १२. ४० । विद्वन् विदुषि वा १५. ५५. ५६ । विद्वन्पुरोहित १७. ५२। अग्निरिव वर्तमानपुरुष १८. ६१। शान्तिप्रद १. ७६. १ । श्रोतः १२. ४२ । पावकवद्वर्तमान वैद्यराज विद्वन् ३. १८. ४ । स्वबलतेजसा प्रकाशमान १. २७. ७। सर्व-दुःखप्रणाशक सर्वशत्रुप्रदाहक वा १. ३१. २। सत्यन्यायप्रकाशमान १. ३१. १५ । सर्वाभि-गन्तः सभेश १. ३१. १७। सुखप्रदातः १. ३६. ६। धर्मविद्याश्रेष्ठगुणैः प्रकाशमान सभापते १. ३६. ६। सर्वाग्रणीः १. ३६. १५ । बहुश्रुत-सज्जन १. ४५. ७ । दुष्टप्रशासक समाध्यक्ष १. ७६. ३। सूर्य्य इव प्रकाशात्मन् १. १४२. ४। सूर्य्यवत्सर्वार्थप्रकाशक २. १. ४। सर्वशास्त्र-पारंगत प्रतापवन्वा राजन् २. १. १०। विद्यया सुप्रकाशित स्त्रि पुरुष वा १५. ५४। सर्वस्वामिन् विद्याप्राप्तिसाधक वा २. २७ । सर्वगुणवन् ६. २६ । सम्पादितक्रियाकौशल ११. ३२। सुसंगृहीतराजनीते २७. ७। शिल्पविद्याविद्वि-द्वन् ६. १०. ४३। विद्वन् पितः पितामह प्रपि-तामह १९. ३८। राजविद्याविचक्षण १. ४४. २। अग्निः प्रत्यक्षाप्रत्यक्षः १. १४. १०। अग्नि-रिव यशसा प्रकाशमान ३. १३. ६। अग्निरिव दर्शक ३. २३. २। वन्हिवद्दुष्टानां दाहक ३. २४. १। अग्निरिव परोपकारिन् ६. ११. २। अग्नि-रिव गृहस्थ ६. १० ३६ । वन्हिरिव तीव्रप्रज्ञ ७. १७. ३। पावक इव दोषदाहक ७. १४. ३। अग्निरिव न्यायेन प्रकाशित राजन् ७. १६. ६। सर्वनेतः परमात्मन ५. ३६ । सर्वज्ञ ८. ११. २. (आर्याभि०पृ० ८६)। सर्वप्रापक प्राप्तिहेतो वा १. १२. १२। उपदेशकाचार्य्य १२.४८। अध्यापका-ध्यापिके वा २६. २० । विद्याप्रकाशक ३३. ४८। सत्यासत्यविभाजक १७. ६। स्तोतुमर्हेश्वर १. १२. ३। हे सत्योपदेशकेश्वर १.५ । अनन्त-विद्यामय जगदीश्वर १. २७. ५। अविद्यादोष-प्रदाहक परमात्मन् ३. १०. २ । शक्तिस्वरूपे-श्वर २. २८ । करुणामय विज्ञानस्वरूप सर्व-पितः ३. २. ४ । शरीरबलेन देदीप्यमान १. ३६. ५। देहान्तरप्रापक जीव १२. ३७। वेद-विद्ध्यापकोपदेशक २५. ३७। अत्यन्तविद्या-योगेनानूचान १. ७५. ४। सर्वप्रजापीडानि-वारक ६. १५. १४ । विद्याप्रकाशकोपदेशक १७. ८। पूजनीयतम १. १४. ११ । विद्युदिव बलिष्ठ ३. २८. ५। विद्युद्वद्व्यतिरिक्त २.१.१५। विद्युदिव सकलविद्यासु व्यापिन् ३. १६. ४ । योगाभ्यासेन प्रकाशितात्मन् १७.७३। अविद्या-दोषप्रदाहक परमात्मन् ३. १०. २॥ अग्ना३इ सर्वसुखप्रापक ८. १०॥

अग्निः कस्मादग्रणीर्भवति । अग्रं यज्ञेषु प्रणीयते अंगं नयति सन्नममानः। अक्रोपनो भवतीति स्थौलाष्ठी-विर्न क्रोपयति न स्नेहयति । त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः । इतादक्ताद्दग्धाद्वा नीतात्

स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेवा नीः परः। नि० ७. १४. ४–६। अग्निरप्यदितिरुच्यते। ११. २३. ५ ॥ विराडग्निः। श. ६. २. २. ३४। ६. ३. १. २१। ६. ८. २. १२। ९. १. १. २१। स यदस्य सर्वस्याग्रमसृज्यत तस्मादग्निरग्रिर्ह वै तमग्निरित्याचक्षते परोऽक्षम्। श० ६. १. १. ११। तद्वाऽ एनमेतदग्रे देवानां (प्रजापतिः) अजनयत। तस्मादग्निरग्रिर्ह वै नामैतद्यदग्निरितियो...वै पूर्वं एत्यग्र ऽएतीति वैतमाहुः सो एवास्याग्निता। श० २. २. ४. २। एतानि (स्वर्णघर्मः, स्वर्णार्कः, स्वर्णशुक्रः, स्वर्णज्योतिः, स्वर्णसूर्यः) अग्नेर्नामानि। श०९.४. २.२५। तान्येतान्यष्टौ (रुद्रः, सर्वः पशुपतिः, उग्रः, अशनिः, भवः, महान्देवः, ईशानः) अग्निरूपाणि। कुमारो नवमः। श० ६. १. ३. १८। अग्निर्वै स देवस्तस्यैतानि नामानि, शर्व इति यथा प्राच्या आचक्षते भव इति यथा वाहीकाः पशूनां पती रुद्रोऽग्निरिति। तान्यस्याशान्तान्येवेतराणि नामान्यग्निरित्येव शान्ततमम्। श० १. ७. ३. ८। यो वै रुद्रः सोऽग्निः। श० ५. २. ४. १३। अग्निर्वाऽअर्कः। श० २. ५. १. ४। १०. ६. २. ५। अयं वाऽग्निरर्कः। श० ८. ६. २. १९। ९. ४. २. १८। अग्निर्वा अरुपः। तै० ३. ९. ४. १। तऽएते सर्वे पशवो यदग्निः। श० ६. २. १. १२। अग्निर्ह्येष यत्पशवः। श० ६. २. १. १२। अग्निरेष यत्पशवः। श० ६. ३. २. ६। पशुरेष यदग्निः। श० ६. ४. १. २। ७. २. ४. ३०। ७. ३. २. १७। अग्निर्हि देवानां पशुः। ऐ० १. १५। पशुर्वाऽअग्निः। श० ६. ३. १. २२। अग्निर्वै देवानामवमो विष्णुः परमः। ऐ० १. १। अग्निर्वै देवानामवरार्ध्यो विष्णुः परार्ध्यः। कौ० ७. १। अग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः परार्ध्यः। श० ३. १. ३. १। ५. २. ३. ६। एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च। ऐ० १. १। अग्निर्वै देवानां वसिष्ठः। ऐ० १. २८। शिर एवाग्निः। श० १०. १. २. ५। शिर एतद्यज्ञस्य यदग्निः। श० ९. २. ३. ३१। अग्निर्वै योनिर्यज्ञस्य। श० १.५. २. ११. १४। ३. १. ३. २८। ११. १. २. २। अग्निर्वै यज्ञमुखम्। तै० १. ६. १. ८। अग्निः सर्वा देवताः। ऐ० २. ३। तै० १. ४. ४. १०। अग्निर्वै सर्वा देवताः। ऐ० १. १। श० १. ६. २. ८। ३. १. ३. १। ता० ९. ४. ५। १८. १. ८। ष० १. ७। गो० उ० १. १२, १६। सर्वदेवत्योऽग्निः। श० ६. १. २. २८। अग्नेर्वा एताः सर्वास्तन्वो यदेता देवताः। ऐ० ३. ४। अग्निर्वै सर्वेषां देवानामात्मा। श० १४. ३. २. ५।

सर्वेषामु हैष देवानामात्मा यदग्निः। श० ७. ४. १. २५। ९. ५. १. ७। आत्मैवाग्निः। श० ६. ७. १. २०। १०. १. २. ४। आत्मा वाऽअग्निः। श० ७. ३. १. २। अग्निमेव देवतानां प्रथममसृजत। तै० २. १. ६. ४ सः (प्रजापतिः) अग्निमब्रवीत्त्वं वै मे ज्येष्ठः पुत्राणामसि। अग्निर्वै देवानां मुखम्। कौ० ३. ६। ५. ५। ता० ६. १. ६। गो० उ० १. २३। अग्निर्वै देवानां मुखं सुहृदयतमः। ऐ० ७. १६। अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिः। श० ३. ९. १. ६। अग्निर्वै देवयोनिः। ऐ० १. २२। २. ३। अग्निर्वै देवानां सुदुहृदयतमः। श० १. ६. २. १०। अग्निर्वै देवानामन्नादः। तै० ३. १. ४. १। अन्नादोऽग्निः। श० २. १. ४. २८। २. २. ४. १। अग्निर्देवानां जठरम्। तै० २. ७. १२. ३। अग्निर्वै सर्वमाद्यम्। ता० २५. ९. ३। अग्निरन्नादोऽन्नपतिः। तै० २. ५. ७. ३। अन्नादो वा एषोऽन्नपतिर्यदग्निः। ऐ० १. ८। एष (अग्निः) हि वाजानां पतिः। ऐ० २. ५। अग्निर्वा अन्नानां शमयिता। कौ०६.१४। अग्निः प्रजानां प्रजनयिता। तै० १. ७. २. ३। अग्निर्वै मिथुनस्य कर्त्ता प्रजनयिता। श० ३. ४. ३. ४। अग्निर्वै रेतोधा। तै० २. १. २. ११। ३. ७. ३. ७। प्रजननं वा अग्निः। तै० १. ३. १. ४। इयं (पृथिवी) ह्यग्निः। श० ६. १. १. १४। ६. १. २. २९। इयं (पृथिवी) वाऽअग्निः। श० ७. ३. १. २१। अयं वै लोकोऽग्निः। श० १४. ९. १. १४। अयं वा ऽग्निर्लोकः। श० १. ९. २. १३। संवत्सर एषोऽग्निः। श० ६. ७. १. १८। संवत्सरोऽग्निः। श० ६. ३. १. २५। संवत्सर एवाग्निः। श० १०. ४. ५. २। वागेवाग्निः। श० ३. २. २. १३। सा या सा वागासीत्सोऽग्निरभवत्। जै० उ०. २. २. १। तेजो वाऽअग्निः। श० २. ५. ४. ८। ३. ९. १. १९। तै० ३. ३. ४. ३। ३. ९. ५. २। सा या सा वागग्निस्सः। जै० उ० १. २८. ३। वाग्वा अग्निः। श० ६. १. २. २८। जै० उ० ३. २. ५। या वाक् सो अग्निः। गो० उ० ४. ११। अग्निर्वै ज्योती रक्षोहा। श० ७. ४. १. ३४। अग्निर्हि रक्षसामपहन्ता। श० १. २. १. ६. ९। १. २. २. १३। अग्निर्वै रक्षसामपहन्ता। कौ० ८. ४। १०. ३। अग्निरु सर्वेषां पाप्मनामपहन्ता। श० ७. ३. २. १६। अग्निर्वै पाप्मनोऽपहन्ता। श० २. ३. ३. १३। तपो वाऽअग्निः। श० ३. ४. ३. २। अग्निर्वै होता तस्यैष स्वो लोको यत्कृष्णाजिनम्। श० १. ४. २. ६। अग्निर्वै देवानां व्रतपतिः। श० १. १. १. २। ३. ३. ३. २३। गो० उ० १. १२। अग्निर्वै देवानां [illegible]। तै०

३. ३. ७. ६। अग्निर्वै देवानां होता। ऐ० १. २८। ३. १४। अग्निर्वै होतायं लोको बर्हिः। श० १. ४. १. २४। अग्निर्वै होता। गो० पू० २. २४। अग्निर्वै होता वेदिषत्। श० ६. ७. ३. ११। अग्निर्वै होता ऽधिदैवं वागध्यात्मम्। श० १२ १. १. ४। गो० पू० ४. ४। अग्निर्होता पञ्चहोतॄणाम्। तै० ३. १२. ५. २। अग्निः पञ्चहोतॄणां होता। तै० २. ३. ५. ६। उभयं वाऽएतदग्निर्देवानाᳬ होता च दूतश्च। श० १.४.५.४। अग्निरेव देवानां दूत आस। श० ३. ५. १. २१। स हि देवानां दूत आसीत्। श० १. ४. १. ६४। अथ योऽग्निर्मृत्युस्सः सोऽपामन्नम्। जै० उ० १. २५. ८। २. १३. २। अग्निर्वैमृत्युः। श० १४. ६. २. १०। अग्निर्वैमृत्युः। कौ० १३. ३। पुरुषोऽग्निः। श०१०.४.१.६। पुरुषो वाऽअग्निः। श० १४. ९. १. १५। योषा वा ऽग्निः। श० १४. ९. १. १६। योषा वाऽआपो वृषाग्निः। श० १. १. १. १८। श० २. १. १. ४। योषा वै वेदिर्वृषाग्निः। श० १. २. ५. १५। अग्निरु सर्वे कामाः। श० १०. २. ४. १। मन एवाग्निः। श० १०. १. २. ३। प्राणो वा अग्निः। श० ९. ५. १. ६८। वीर्य्यं वा अग्निः। तै० १. ७. २. २। गो० उ० ६. ७। अग्निर्हे...गायत्रीमुखम्। जै० उ० ४. ८. २। अग्निर्वै गायत्री। श० ३. ४. १. ९। ३. ९. ४. १०। ६. ६. २. ७। गायत्री वा अग्निः। श० १. ८. २. १३। यो वा अत्राग्निर्गायत्री स निदानेन। श० १. ८. २. १५। एष उ ह वाव देवानां नेदिष्ठमुपचर्यो यदग्निः। जै० उ० २. १४. १। अग्निर्वै देवानां नेदिष्ठम्। श० १. ६. २. ११। अग्निर्ब्रह्माग्निर्यज्ञः। श० ३.२.२.७। अयं वाऽअग्निर्ब्रह्म च क्षत्रं च। श० ६. ६. ३ १५। अग्निरेव ब्रह्म। श० १०. ४. १. ५। ब्रह्म वा अग्निः। कौ० ९. १. ५। १२. ८। श० २. ५. ४. ८। ५. ३. ५. ३२। तै० ३. ९. १६. ३। ब्रह्माग्निः। श० १. ३. ३. १९। ब्रह्म वा अग्निः क्षत्रं सोमः। कौ० ९. ५। अयमग्निर्ब्रह्म। श० ९. २. १. १५। अग्निरु वै ब्रह्म। श० ८. ५. १. १२। ब्रह्म ह्यग्निः। श० १. ५. १. ११। पर्जन्यो वाऽअग्निः। श० १४.९. १. १३। अग्निर्वा ऽअहः। श० ३. ४.४. १५। अशिष्टो ह्यग्निस्तस्मादाहाशीतमेति। श० १. ९. २. २०। दिशोऽग्निः। श० ६. २. २. ३४। अग्निह वै ब्रह्मणो वत्सः। जै० उ० २. १३. १। अग्निर्वै स्वर्गस्य लोकस्याधिपतिः। ऐ० ३. ४२। अग्निर्देवतानां (सत्)। ता० ४. ८. १०। आयुर्वाऽअग्निः। श० ६. ७. ३. ७। अग्निर्नभोनामाग्ने ऽअंगिर आयुना नाम्नेहीति।

४. ८। अग्निमतिथिं जनानाम्। तै० २. ४. ३. ६। सर्वेषां वा एष (अग्निः) भूतानामतिथिः। श० ६. ७. ३. ११। अग्निर्वै पयोऽतिवोढा। श० १३. ८. ४. ६। अग्निर्वाव पवित्रम्। तै० ३. ३. ७. १०। अग्निर्वै देवतानामनीकम्। श० ५. ३. १. १। अग्निर्वै देवानां गोपाः। ऐ० १. २८। अग्निर्वसुभिरुदक्रामत्। ऐ० १. २४। त्रिवृदग्निः। श० ६. ३. १. २५। त्रिवृद्वा अग्निरंगारा अर्चिर्धूम इति। कौ० २८.५। अग्निर्वै दाता। श० ५. २. ५. २। अग्निरन्नाद्यस्य प्रदाता। ता० १७. ९. २। स्वाहाग्नये कव्यवाहनाय। म० २. ३. २। अग्निर्वै हिमस्य भेषजम्। तै० ३. ९. ५. ४। अग्निर्वा अश्वमेधस्य योनिरायतनम्। तै० ३.९.२१. २. ३। सर्वाणि हि चित्राण्यग्निः। श० ६. १. ३. २०। अग्ने महाँ असि ब्राह्मण भारत। कौ० ३. २। श० १. ४. २. २। तै० ३. ५. ३. १। ब्रह्मह्यग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो हव्यं भरति तस्माद् भरतोऽग्निरित्याहुरेष उ वाऽइमाः प्रजाः प्राणोभूत्वा बिभर्त्ति तस्माद्वेवाह भारतेति। श० १. ४. २. २। एष—भरतवदिति। १. ५. १. ८। अग्निर्हं वा अबन्धुः। जै० उ० ३. ६. ७। एष वै देवाननुविद्वान्यदग्निः। श० १. ५. १. ६। अग्नेर्वा एषा तनूः। यदोषधयः। तै० ३. २. ५. ७। अमृतो ह्यग्निः। श० १. ९. २. २०। असौ वा आदित्य एषोऽग्निः। श० ३. ४. १. १। ६. ४. ३. ९, १०। इमे वै लोका एषोऽग्निः। श० ६. ७. १. १६। ७. ३. १. १३। अग्ने पृथिवीपते। तै० ३. ११. ४. १। अयं वाव लोकोऽग्निश्चितः। श० १०. १. २. २। अग्निरसि पृथिव्याᳬ श्रितः। अन्तरिक्षस्य प्रतिष्ठा। तै० ३. ११. १. ७। अग्निर्ज्योतिर्ज्योतिरग्निः। कौ० १४. १। अग्निर्वैश्वानरः। ता० १३. ११. २३। स (अग्निः) एताः (पवमानपावकशुच्याख्याः) तिस्रः तनूरेषु लोकेषु विन्यधत्त। श० २. २. १. १४। अग्निर्वा अर्वा। तै० १. ३. ६. ४। अनूचानमाहुरग्निकल्प इति मुखं ह्येतदग्नेर्यद्ब्रह्म। श० ६.१.१.१०। अग्निर्वै कामो देवानामीश्वरः। कौ० १९. २। पशवो वा अग्निः पवमानः। तै० १. १. ६. २। आपो वा अग्निः पावकः। तै० १. १. ६. २। असौ वा आदित्योऽग्निः शुचिः। तै० १. १. ६. २। वायुर्वा अग्निः सुषमित्। ऐ० २. ३४। रुद्रोऽग्निः स्विष्टकृत्। तै० ३. ९. ११. ३. ४। अग्निर्वै भर्गः। श० १२. ३. ४. ८। जै० उ० ४. २८. २। अग्निरेव भर्गः। गो० पू० ५. १५। अग्निर्वै घर्मः। श० ११. ६. २. २। अग्निर्वा ऋतम्। तै० ... सत्यं

यद्दिवासावृतमयᳪ सत्यमुभयमेवैतदयमग्निः। श० ६. ४. ४. १०। अग्निर्वै द्रष्टा। गो० उ० २. १९। अग्निर्वा उपद्रष्टा। गो० उ० ४. ९। तै० ३. ७. ५. ४। अग्निर्हि स्विष्टकृत्। श० १. ५. ३. २३। अग्निर्वै स्विष्टकृत्। कौ० १०.५। अग्नयेऽइतिक्रियते स्विष्टकृतऽइति। श० १. ७. ३. ९। शर्वोऽग्निः। कौ० ६. ३। रुद्रोऽग्निः। ता० १२. ४. २४। अग्निर्वै रुद्रः। श० ५. ३. १. १०। ६. १. ३. १० । एष रुद्रः। यदग्निः। तै० १. १. ५. ८, ९। १. १. ६. ६। रुद्रो वा एषः। यदग्निः। १. १. ८. ४। रुद्रः खलु वा एषः। यदग्निः १. ४. ३. ६। धूप्यतऽ एव तर्हि हैष (अग्निः) भवति रुद्रः। श० २. ३. २. ९। अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिः। श० २. ५. १. ८। संवत्सर एवाग्निः। श० १०. ४. ५. २। संवत्सरोऽग्निः। श० ६. ३. १. २५। ६. ३. २. १०। ६. ६. १. १४। ता० १०. १२. ७। प्रजापतिरेषोऽग्निः। श० ६. ५, ३. ७। ६ ८. १. ४। प्रजापतिरग्निः। श० ६. २. १. २३, ३०। ६. ५. ३. ९। ७. २. २. १७। अग्निः प्रजननम्। गो० पू० २. १५। विश्वकर्मायमग्निः। श० ९. २. २. २। ९. ५. १. ४२। अग्निर्वै धाता। तै० ३. ३. १०. २। [अग्ने!] त्वं पूषा। तै० ३. ११. २. १। यो वै वरुणः सोऽग्निः। श० ५. २. ४. १३। यो वा अग्निः स वरुणः। ऐ० ६. २६। अथ यत्रैतत्प्रदीप्ततरो भवति। तर्हि हैष [अग्निः] भवति वरुणः। श० २. ३. २. १०। यदग्निर्घोरसंस्पर्शस्तदस्य वारुणं रूपम्। ऐ० ३. ४। अथ [अग्निः] यदुच्च हृष्यति नि च हृष्यति तदस्य मैत्रावरुणं रूपम्। ऐत० ३. ४। अग्निरेव सविता। गो० पू० १. ३३। जै० उ० ४. २७. १। स एषो (अग्निः) ऽत्र वसुः। श० ९. ३. २. १। अग्निर्वै वसुवनिः। श० १. ८. २. १६। अग्निर्वाव यमः गो० उ० ४. ८। अग्निर्वै यमः। इयं (पृथिवी) यम्याभ्याᳪ हीदᳪ सर्वं यतम्। श० ७. २. १. १०। अग्निर्वै नभसस्पतिः। गो० उ० ४. ९। अग्निर्वै वनस्पतिः। कौ० १०. ६। अंगिरसां वा एकोऽग्निः। ऐ० ६. ३४। अग्निर्वै भरतः स वै देवेभ्यो हव्यं भरति। कौ० ३.२। अग्निर्वै ब्रह्मा। प० १.१। अग्निर्वै परिक्षित्। ऐ० ६. ३२। गो० उ० ६.१२। अयमग्निः सतां पतिश्चेतयमान इत्येतत्। श० ८. ६. ३.२०। अयमग्निः स्वर्विद्। श० ९. २. १. ८। अग्निर्वै वयस्कृच्छन्दः। श० ८. ५. २. ६। अग्निर्वै भ्रजच्छन्दः। श० ८. ५. २. ५। अग्निर्वै पथिकृत्। कौ० ४. ३। अग्निर्वै पथः कर्ता। श० ११. १. ५. ६। अग्निर्वै रुरस्तस्यैतद्रौरवम्। ता० ७. ५. १०। १२. ४. २४। अग्निर्वै महान्। जै० उ० ३. ४. ७। एष (अग्निः) एव महान्। श० १०. ४. १. ४। अग्निर्वै महिषः। श० ७. ३. १. २३. ३४। अग्निर्वाऽ आयुः। श० ६. ७. ३. ७। ७. २. १. १५। अग्निर्वै भुवो ऽग्नेर्हीदᳪ सर्वं भवति। श० ८. १. १. ४। एतानि वै तेषामग्नीनां नामानि यद्भुवपतिर्भुवनपतिर्भूतानां पतिः। श० १. ३. ३. १७। अग्निर्हि वै धूः। श० १. १. २. ९। एष वै धुर्यो ऽग्निः। तै० ३. २.४. ३। अग्निर्वाऽ एष धुर्यः। श० १. १. २. १०। अग्निर्वै दाता स एवास्मै यज्ञं ददाति। कौ० ४. २। अग्निर्वाव पुरोहितः। ऐ० ८. २७। अग्निर्वै वरेण्यम्। जै० उ० ४. २८. १। अयमग्निः सहस्रयोजनम्। श० ९. १. १. २९। अग्निर्वै रथन्तरम्। ऐ० ५. ३०। एष हि यज्ञस्य सुक्रतुर्यदग्निः। श० १. ४. १. ३५। अग्निः प्रस्तावः। जै० उ० १. ३३. ५। अयं वाऽ अग्निरुक्थ्यः। श० ८. २. १. ४। अग्निः पञ्चहोता। तै० २. ३. १. १। एष हि हव्यवाहनो यदग्निः। श० १. ४. १. ३९। (अग्निः) हव्यवाहनो वै देवानाम्। श० २. ६. १. ३०। एष हि हव्यवाड्यदग्निः। श० १. ४. १. ३९। अग्निर्वै देवानां व्रतभृत्। गो० उ० १.१५। अग्निरु देवानां प्राणः। श० १०.१.४.१२। तदग्निर्वै प्राणः। जै० उ० ४. २२. ११। प्राणा अग्निः। श० ६. ३. १. २१। ६. ८. २. १०। ते वा एते प्राणा एव यदग्नयः। श० २. २. २. १८। अग्निर्वै देवानां मनोता। ऐ० २. १०। कौ. १०. ६। देवपात्रं वाऽ एष यदग्निः। श० १. ४. २. १३। देवरथो वा अग्नयः। कौ० ५. १०। अग्निः सर्वा देवताः। श० १. ६. ३. २०। एष वै यज्ञो यदग्निः। श० २. १. ४. १९। अग्निरु वै यज्ञः। श० ५. २. ३. ६। अग्निर्वै यज्ञः। श० ३. ४. ३. १९। ता० ११. ५. २। यजमानो ऽग्निः। श० ६. ३. ३. २१। ६. ५. १. ८। ७. ४. १. २१। ९. २. ३. ३३। वृषो ऽग्निः समिध्यते। श० १. ४. १. २९। समग्निरिध्यते वृषा। श० १. ४. १. २९॥ अथाधिज्यौतिगम्। अग्निःपूर्वरूपम्। आदित्य उत्तररूपम्। आपः संधिः। वैद्युतः संधानम्। तै० उ० शि० ३. २। भूरिति वा अग्निः। तै० उ० शि० ५. २। अग्निः साम। छा० १. ६. १। अथ योऽस्य प्रत्यङ् सुषिः सोऽपानः सा वाक् सो ऽग्निः। छा० ३. १३. ३। अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते। बृहदारण्यक ५. ९. १। असौ वाव लोको गौतमाग्निः...तस्या आहुतेः सोमो राजा संभवति छा० ५. ४, १। पर्जन्यो वाव गौतमाग्निः...तस्या

आहुतेर्वर्षं संभवति। छा० ५. ५. १। पृथिवी वाव गौतमाग्निः...तस्या आहुतेरन्नं संभवति। छा० ५. ६. १। पुरुषोवाव गौतमाग्निः...तस्या आहुते रेतः संभवति। छा० ५. ७. १। योषा वाव गौतमाग्निः... तस्या आहुतेर्गर्भः संभवति। छा० ५. ८. १॥

अग्निनेत्राः अग्नौ विद्युदादौ नेत्रं नयनं विज्ञानं येषान्ते ६. ३६॥ अग्निनेत्रेभ्यः अग्नेः प्रकाश इव नेत्रं नयनं येषान्तेभ्यः ६. ३५॥

अग्निऽभ्राजसः अग्निरिव प्रकाशमानाः ५. ५४. ११॥

अग्निऽजिह्वाः अग्निवद्विद्याशब्दप्रकाशिका जिह्वा येषान्ते १. ४४. १४। अग्निर्जिह्वा हूयमानो येषान्ते १. ८६. ७। अग्निरिव प्रकाशमानः सत्योपदेशो जिह्वा येषान्ते ६. २२. ११। अग्निरिव सत्यविद्यया [अग्निना सत्येन० ६.५२.१३] सुप्रकाशिता जिह्वा येषान्ते ६. ५०. २। [जिह्वेतिवाङ्नाम निघ० १. ११.] २५. २०। अग्निर्जिह्वावद्येषान्ते ३३. ५३॥

अग्नित् पावकप्रदीप्तकरः २. १. २॥

अग्निऽतपः येऽग्निना तापयन्ति ते ५.६१.४॥

अग्निऽइन्धः अग्निप्रदीपकः १. १६२. ५॥

अग्निमिन्धः अग्निप्रदीपकः २५. २८॥

अग्निशालम् अग्निहोत्रस्य स्थानम् ६. ३. ७. अथर्व (सं० वि० पृ० २०२)।

अग्निऽश्रियः अग्निना श्रीः शोभा धनं येषान्ते ३. २६. ५।

अग्नीषोमा अध्यापकसुपरीक्षकौ (अत्र सुपां सुलुगित्याकारादेशः) १. ६३. २। वायुविद्युतौ १. ९२. ४। कारणाख्यौ वायुविद्युतौ १. ९२. ६। अग्नीषोमौ प्रसिद्धौ वाय्वग्नी १. ९२. ७। यज्ञफलसाधकौ १. ९२. ९। पालनहेतू अग्निवायू इव १. ९२. १२॥

अग्नीषोमा वाय्वग्नी १. ९३. ८॥

अग्नीषोमौ विद्यया सम्यक् संयोजितौ २. १५॥

अग्नीषोमौ प्राणापानावग्नीषोमौ। ऐ० १.८। चक्षुषी अग्नीषोमौ। ऐ०१.८। यच्छुक्लं तदाग्नेयं यत्कृष्णं तत्सौम्यं यदि वेतरथा यदेव कृष्णं तदाग्नेयं यच्छुक्लं तत्सौम्यं (रूपं) यदेव वीक्षते तदाग्नेयं रूपं शुष्केऽइव हि वीक्षमाणस्याक्षिणी भवतः शुष्कमिव ह्याग्नेयं यदेव स्वपिति तत्सौम्यं रूपमार्द्रेऽइव हि सुषुपुषो ऽक्षिणी भवत आर्द्र इव हि सोमः। श० १. ६. ३. ४१। यच्छुष्कं तदाग्नेयं यदार्द्रं तत्सौम्यम्। श० १. ६. ३. २३। सूर्य्य एवाग्नेयः। चन्द्रमाः सौम्योऽ हरेवाग्नेयं रात्रिः सौम्या य एवापूर्य्यतेऽर्द्धमासः स आग्नेयो योऽपक्षीयते स सौम्यः। श० १. ६. ३. २४। अहोरात्रे वा अग्नीषोमौ। कौ० १०.३। दार्शपौर्णमासिके वा एते देवते। कौ०५.२॥

अग्निषोमीयाः सोमाग्निदेवताकाः २४.८॥

अग्नीषोमौ तेजश्चन्द्राविव विज्ञानसौम्यगुणावध्यापकपरीक्षकौ १. ९३. १। विद्युत्पवनौ १. ९३. १०। सर्वमूर्तद्रव्यसंयोगिनौ १. ९३. ११॥

अग्नीषोमाभ्याम् अग्निश्च सोमश्च ताभ्यामग्निजलविद्याभ्याम् १. १०। एतयोस्तेजःशान्तिगुणाभ्याम् ६. ९॥

अग्नीषोमयोः अग्निश्च सोमश्च तयोर्मध्ये १. २२। अग्निश्च सोमश्च तयोः प्रसिद्धाग्निचन्द्रलोकयोः [अत्र ईदग्नेः सोमवरुणयोः अ० ६. ३. २७ अनेन देवताद्वन्द्वसमासे ऽग्नेरीकारादेशः] २. १३८। शीतोष्णकारकयोर्जलाग्न्योः २५. ५॥

अग्निष्वात्ताः सम्यग्गृहीताग्निविद्याः १९॥

अग्निष्वात्तानाम् अग्निना जाठराग्निना सुगृहीतान्नानाम् २१. ४५ ॥

अग्निहुतः अग्नौ हुतं प्रक्षिप्तं येन सः ३८. २८ ॥

अग्नीत् संप्रेषितः ७. १५ ॥

अग्नीन्द्राभ्याम् सकलराज्यकर्मविचारविचक्षणाभ्यामग्नीन्द्रगुणयुक्ताभ्याम् ७ ३२ ॥

अग्न्येधम् अग्निश्चैधश्च तत् ३०. १२ ॥

अग्मंत गच्छत १. ११६. ३ । प्राप्नुवन्तु ४. ३४. २ ॥

अग्मत प्राप्नुवन्ति (अत्र लडर्थेलुङ् मन्त्रेघसह्वर० इति च्लेर्लुक् गमहनजनखन० अ० ६. ४. ९८ इत्युपधालोपः समो गम्यृच्छाभ्याम् अ० १. ३. २९ इत्यात्मनेपदश्च) १. २०. ५ ॥

अग्मन् प्राप्नुत ४. २४. ३ । प्राप्नुवन्तु ४. ४१. ६ । प्राप्नुवन्ति ६. ६३. ८ ॥

अग्मन् आगच्छन्ति ६. २८. १ । गच्छन्ति ४. २. १७ । गच्छेयुः १. १२७. ३ । प्राप्नुवन्ति २. ११. १६ । प्राप्नुवन्तु ६. ६६. ७ ॥

अग्रंऽअद्वाना ये मदन्ति तद्विभाजकौ ६. ६६. ६ ॥

अग्रजिह्वम् जिह्वायाऽग्रम् २५. १ ॥

अग्रतः सृष्टेः प्राक् ३१. ६ ॥

अग्रनीतिम् अग्रा श्रेष्ठा चासौ नीतिश्च ताम् २. ११. ५ ॥

अग्रभणे न विद्यते ग्रहणं यस्मिन्तस्मिन् (अत्रहस्यभः) १. ११६. ५ । हस्तालम्बनाविद्यमाने अ० वे० भा० भू० पृ० २०२ ॥

अग्रभम् गृह्णीयाम् १. १९१. १३ । गृहीतवानस्मि ६. ४ ॥

अग्रभीत् गृह्णाति १. १४५. २ ॥

अग्रभीत् गृह्णीयात् १७. ६३ । ग्रहण करता हूं, ग्रहण कर चुका हूं, १४. १. ५१ अथर्वे (सं० वि० पृ० १४०) ॥

अग्रभीष्म गृह्णीयाम् ५. ३०. १२ । प्रतिगृह्णीयाम् ५ ३०. १५ ॥

अग्रम् अग्रभागम् ३. ३०. १७ । उपरिभागम् १. २८. ६ । सर्वेषां मध्यं केन्द्रं स्थानमुपरिस्थम् ३. ५५. ७ । उपरिभावम् ४ १३ १। उत्तमंसुखम् । उत्तमविजयम् १.११२.२८ । उत्तमं भागम् २७. ३० । प्रथमम् ४. २७. ५ । पूर्वम् ११. १७ । पुरः ३३. ५६ । मुख्यश्रियम् २३. २४ । उत्तमम् ४. ४६. १ । अग्रंऽअग्रम् पुरः पुरः १. १२३. ४ ॥ अग्रे आदौ २. १७. ३ । पूर्वम् ३. ५८. ४ । पुरतः ५. ८०. २ । पुरस्तात् पुरस्सरत्वे क्रियासम्बन्धे वा १. १२ । पुरस्सरम् ७. ४४. ४ । प्रथमतः १. १२७. १० । विद्याराजलक्ष्म्याम् २३. २५ । प्रातः समग्रे २६. २६ । प्राक् ३१. १७ । सन्मुखे १२. २२ । सृष्टेः प्राक् १. १६४. ८ ॥

अग्रुवः उत्तम स्त्री पुरुष १४. २. ७२ अथर्वे (सं० वि० पृ० १७२) ॥

अग्रिमा अतिश्रेष्ठः ५. ४४. ६ ॥

अग्रियः अग्रेभवो अत्युत्तमः (घच्छौ च अ० ४. ४. ११७ अनेनाग्रशब्दात् घप्रत्ययः) १. १६. ७ ।

अग्रियम् अग्रेभवम् सुखम् ४. ३०. ४ । सर्वेषां वस्तूनां साधनानामग्रे भवम् (घच्छौ च

अ० ४. ४. ११७ इति सूत्रेण भवार्थे घप्रत्ययः) १. १३. १० ॥

अग्रिया.... अग्रगमनेनेति वा ऽग्रगरणेनेति वा ऽग्रसम्पादिन इति वा। अपि वाग्रमित्येतदनर्थकमुपबन्धमाददीत। नि० ६. १६. १ ॥

अग्रुः अग्रगन्ता ५. ४४. ७ ॥

अग्रुवः अग्रगण्यः १. १४०. ८। अग्रगामिन्यो नद्यः (अग्रुव इति नदीनाम निघ० १. १३) १. १९१. १४। या ऽग्रे गच्छन्ति ताः ३. २९. १३। नद्यः ४. १९. ७। अग्रं गच्छन्त्यः सेनाः ७.२.५ ॥

अग्रेगाः योऽग्रे गच्छति सः २७. ३१ ॥

अग्रेगुवः अग्रे समुद्रे ऽन्तरिक्षे गच्छन्तीति ताः १. १२ ॥

ताः (आपः) यत्समुद्रं गच्छन्ति तेनाग्रेगुवः। श० १. १. ३. ७ ॥

अग्रेणीः यथाध्यापकः शिष्यान् पिता स्वसन्तानान् वा पुरस्तादेव सुशिक्षया विद्यां प्रापयति तथा ६. २ ॥

अग्रेपाः पुरस्ताद्रक्षकाः ४. ३४. १०॥ अग्रेपाभिः ये ऽग्रे पान्ति रक्षन्ति तैः ४. ३४. ७॥

अग्रेपुवः प्रथमां पृथिवीस्थसोमौषधि सेविकाः १. १२ ॥

ताः (आपः) यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवः। श० १. १. ३. ७ ॥

अग्रेवधाय योऽग्रे पुरः शत्रून् बध्नाति हन्ति वा तस्मै १६. ४० ॥

अग्र्याय अग्रेभवाय सत्कर्मसु पुरस्सराय १६. ३० ॥

अघः अहन्तव्यः ५. २९. ८ ॥

अघः अघं पापं विद्यते यस्मिन् सः १. ४२. २ ॥ अघम् रोगालस्यपापं, शरीरजन्यं पापं वा १. ९७.१। पापम् २.४१.११। किल्बिषम् ५. ३. ७। अपराधम् ६. ६. २. ८॥

अघं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति। नि० ६.११.॥

अघत्तम् भुञ्जीयाताम् २८. ४६ ॥

अघायतः आत्मनोघमिच्छतो दोषकारिणः १. ९१. ८। आत्मनो ऽघमाचरतः ५. २४. ३॥ आत्मनोऽघमिच्छतः संगात् ७. १५. १५। अघायतः यः परस्याघमिच्छत्यघायति ततः (आचार्य्यप्रवृत्तिर्ज्ञापयति भवत्यघशब्दाच्छन्दसि परेच्छायां क्यजिति यदयमश्वाघस्यादिति क्यचि प्रकृत ईत्वबाधनार्थमाकारं शास्ति अ ३. १. ८। अस्मिन्सूत्रे भाष्यकारस्य व्याख्यानाशयेनेदं सिध्यतीति बोध्यम्) ३.२६। अघायते आत्मनोऽघमिच्छते ६. ५१. ६ ॥

अघायति आत्मनोऽघमिच्छति १.१३१.७॥

अघायुः आत्मनोऽघमिच्छुः १. १४७. ४॥ अघायवः आत्मनोऽघेन पापेनायुरिच्छवः ११. ७९ ॥ अघायोः आत्मनोऽघमिच्छतः शत्रोः १. २७. ३। आत्मनो ऽन्यायाचरणेनाघमिच्छतः १. १२०. ७। पापिनः ४. २. ९ ॥

अघऽशंसः योऽघं पापं शंसति सः १. १। योऽघानि पापानि कर्माणि शंसति सः ३. २२। यो ऽघं पापं कर्तुं शंसति स स्तेनः १३. ११। दुष्टः स्तेनः ३३. ८४ ॥

अघशंसस्य अघस्य शंसितारम्। नि० ६. ११. ११ अघशंस इति स्तेननाम निघ० ३. २४ ॥

अघा अन्धकाररूपा २८. १५ ॥

अघाः हन्याः ६. ४८. १६। हिंस्याः ६. ५६. ८ ॥

अघुक्षत् अपशब्दयेत् ५. ४०. ८॥

अघोरऽचक्षुः प्रियदृष्टिः १०. ८५. ४४॥

अघोरा अविद्यमानो घोर उपद्रवो यया सा १६. २॥

अघ्नतः अहिंसकस्य ७. २०. ८॥

अघ्नत नित्यं घ्नन्ति ११. ५. १६ अथर्व (ऋ. वे. भा० भू० पृ० १२१)॥

अघ्नता अहिंसकेन ५. ५१. १५।

अघ्न्यम् हन्तुमयोग्यमघ्न्याभ्यो गोभ्यो हितं वा (अघ्न्यादयश्च उ० ४. ११६ अनेनायं सिद्धः। अघ्न्येति गोनामसु पठितम् निघ० २. ११) १. ३७. ५॥

अघ्न्यस्य हन्तुं विनाशयितुमनर्हस्य यानस्य १. ३. १६॥

अघ्न्या हन्तुमयोग्या १. १६४. २७। हनन न करने योग्य गाय ३. ३०. १ अथर्व (सं० वि० पृ० १७२)॥ अघ्न्याः वर्धयितुमर्हा गाव इन्द्रियाणि पृथिव्यादयः पशवश्च १. १॥

अघ्न्या इति गोनाम। निघ० २. ११। अघ्न्या अहन्तव्या भवति। नि० ११. ४३ ॥ अघघ्नीति। ११.४३.२॥

अघ्न्ये गौरिव वर्तमाने १. १६४। हन्तुं तिरस्कर्तुमयोग्ये ८. ४३॥

अंकसम् लक्षणम् ४०. ३। लक्षणान्वितं मार्गम् ६. १५॥

अङ्काः लक्षिताः २५. ३६। लक्षणानि १. १२६. १३॥

अङ्कांसि लक्षणानि चिन्हानि ४. ४०. ४॥

अंकांसि कुटिलानि। अंको ऽञ्चतेः। नि० २.२२.१॥

अङ्काङ्कम् गणितविद्या १५. ५॥

आपो वा अंकांकं छन्दः। श० ८. ५. २. ६॥

अंकीऽइव यथा अंकुशी तथा ३. ४५. ४॥

अङ्कुपम् अंकूनि कुटिलानि गमनानि पाति रक्षति तज्जलम् १५. ४॥

आपो वाऽ अंकुपं छन्दः। श० ८. ५. २. ६॥

अंकुयंतम् यस्मिन्नङ्कूनि प्रसिद्धानि चिन्हानि प्राप्नुवन्ति तम् ६. १५. ७॥

अङ्क्षाम् संयोजयितु प्रकटं संयोजयतीति वा २. २२॥

अंक्ते प्रकाशयति १. १२४. ८। प्रसिद्धो भवति ५. १. ३॥

अंग अंगवद्वर्तमान ६. ४४. १०। मित्र १. ८४. ७। सर्वमित्र १. १. ६। सखे ७. २०. ६। सुहृत ७. ५६. २। प्रिय १. १६४. ७। विद्वन् पुरुष २. ४१. १०। क्षिप्रकारिन् सर्वसुहृत १. ८४. ६। योऽङ्गति जानाति तत्सम्बुद्धौ १०.३२॥

अंगेति क्षिप्रनामांकितमेवाञ्चितं भवति। नि० ५. १७॥

अङ्गानि अङ्गानि १८. ३। शिर आदीनि ६. १०। श्रोत्रादीनि १२. ४। अङ्कितानि व्यञ्जकानि वा। (अङ्गेति क्षिप्रनामाञ्चितमेवाङ्कितम्भवति निरु० ५. १७) ८. २६। योगाङ्गानि १९. ९३। सेनावयवान् १७.४४॥ अङ्गमङ्गम् प्रत्यवयवम् १२. ८६॥ अंगादंगात प्रत्यंगात् २१. ४३॥ अंगेन कमनीयेन २३. ६०॥ अंगेभिः अंगैः १. १४१. ८। विविधांगैः ३. ७. ४। शिर आदिभिर्ब्रह्मचर्यादिभिर्वा १. ८६. ८॥ अंगेषु राज्याऽवयवेषु २०. १०॥

अंगमंगनादञ्चनाद्वा। नि० ४. ३. २॥ अंगानि होत्रकाः। ऐ० ६. ८। गो० उ० ५. १४। अंगानि वै होत्रा वाव होत्राः। गो० उ० ६. ६। अंगानि वै होत्रा शंसिनः। कौ० १७. ७। २९. ८। गो० उ० ५. ४। अंगानि वै विश्वानि धामानि। श० ३. ३. ४. १४। वैश्वदेवानि ह्यंगानि। ऐ० ३. २॥

अंगिरः अंगानां रसरूपः १. ७४. ५ । अंगेषु रममाणः ५. ८. ४ ॥ अंगति प्रापयति यः सोऽगिरः ३. ३ । अंगानां रसः, अंगारस्थः, अग्निचरा ५. ६ ॥

अंगिरे प्राणवत्प्रिये पत्यौ ४. ५१. ४ ॥

अंगिरस्तमः अतिशयेनांगिराअंगिरस्तमः जीवात् प्राणादन्यमनुष्यादत्यन्तोत्कृष्टः १. ३१. २। अतिशयेन प्राणवद्वर्तमानः १. १००. ४। अतिप्रशस्तः १. १३०. ३ ॥ अंगिरस्तम अंगति गच्छति जानाति सोऽतिशयितस्तत्सम्बुद्धौ १. ७५. २ ॥

अंगिरसः प्राणाः १०. ६२. १॥ अंगिरस्तम अतिशयेन सारग्राहिन् १२. ११६ ॥

अंगिरस्वत् अंगिरसा प्राणेन तुल्यम् २. २७. १ । अंगिरसा सूर्य्येण तुल्यम् ११. १६ । अंगिरोभिरंगारैस्तुल्यं, अंगिरोभिरंगैस्तुल्यं वा ११. ६ । अंगिरसो विद्वांसो विद्यन्ते यस्य तत्सम्बुद्धौ ३. ३१. १६ । अंगानां रसः कारणं तद्वत् १४. ६ । अग्निवत्, प्राणवत्, विद्युद्वत्, ओषधिरसवत् वा ११. ६१ । अग्निवत्, प्राणवत्, सूर्य्यवत्, समस्तौषधिरसवद्वा ११. ६५ । कारणवत् १३. १६ । धनञ्जयप्राणवत्, आकाशवत्, सूत्रात्मप्राणवत् ११. ५८ । प्राणानां बलमिव १. ६२. १ । आकाशवत् १४. १६। प्रशस्तप्राणवत् १. ७८. ३ । प्रशस्ता अंगिरसो वायवस्तद्वत् ६. ४९. ११ । विज्ञानवत् ११. ६० । हिरण्यगर्भवत् १२. ५३ ।

अंगिरस्वत्.....अग्निवत्। श० ६. ३. ३. ३ ॥

अंगिरस्वान् अंगिरसो वायोः सम्बन्धो विद्यते यस्य सः २. ११. २० । अंगिरसो बहुधाः प्राणा विद्यन्ते यस्मिन् सः ६. १७. ६ ॥

अंगिरस्वते विद्युदादिविद्या यस्मिन् वि... तस्मै ३८. ६ ॥

अंगिराः अंगेषु रसवद्वर्तमानः ३. ३१. ७। अंगानां रसरूपः प्राण इव ५.४५ ७। अंगानां रस इव वर्तमानो यद्वाऽङ्गिभ्यो जीवात्मभ्यः सुखं राति ददाति सः ३४. २२ । प्राणविद्यावित् १. १३६.६। पृथिव्यादीनां ब्रह्माण्डस्य शिर आदीनां शरीरस्य रसोऽन्तर्यामिरूपेणावस्थितः (अंगिरसं मन्यन्तेऽङ्गानां यद् रसः छा० १. २. १०) १. ३१. १ । प्राण इव प्रियो वत्सः (अत्र जसः स्थाने सुः। अंगिरस इति पदनाम निघ०५.५)॥ अंगिरसः प्राणादिविद्याविदः १. ६२. २ । प्राणा इव बलिष्ठाः ३. ५३. ७ । प्राणा इव विद्यासु व्याप्ता जनाः ५. ११. ६ । प्राणा इव सद्विद्यासु व्याप्ताः ७. ४२. १ । सर्वविद्यासिद्धान्तविदः १६. ५० । सर्वस्याः सृष्टेर्विद्याङ्गविदः ३४. १७ ॥ अंगिरोभिः अंगसदृशैः किरणैः २. १५. ८ । प्राणैर्बलैः १. ६२. ५ । वायुभिः ४. १६. ८ ॥ अंगिरोभ्यः प्राणरूपेभ्यो वायुभ्यः (प्राणो वा अङ्गिराः श० ६. १. २. २८) १. ५१. ३ । प्राणेभ्य इव विद्वद्भ्यः १. १३२. ४ । प्राणविद्याविद्भ्यः १. १३६. ७॥ अङ्गिरसाम् अङ्गानां रसप्राणवत्प्रियाणाम् १. १२१.३ । प्राप्तविद्यासिद्धान्तरसानाम् १. १२१. १ । प्राणानामिव विदुषाम् ६. ११. ३ । प्राणिनाम् १. १२७. २ । विद्याधर्मराज्यप्राप्तिमतां विदुषाम् (अंगिरस इति पदना० निघ० ५. ५) १. ६२. ३ ॥ अंगिरः अंगति जानाति यो विद्वांस्तत् सम्बुद्धौ १. ११२. १८। पृथिव्यादीनां ब्रह्माण्डस्याङ्गानां प्राणरूपेण शरीरावयवानां चान्तर्यामिरूपेण रसरूपो ऽङ्गिरास्तत्सम्बुद्धौ । प्राणो वा ऽङ्गिराः श० ६. ५. २. ३-४ । अङ्गारेष्वङ्गिरा

अगि

हा अङ्गना अञ्चनाः। निरु० ३. १०। प्राप्युत्तमानामङ्गानां मध्ये ऽन्तर्यामी प्राण-स्यार्थो गृह्यते १. १. ६। पृथिव्यादीनामङ्गानां प्राणवद्धारक १. ३१. १७। प्राणप्रिय २. २३. १८। प्राण इव वर्तमान ४. ३. १५। प्राण इव प्रिय ४. ६. ७। अंगानां मध्ये रसरूप ६. २. १०। विद्युदिव वर्तमान ६. ६. ११। विद्यारसयुक्त १२. ८॥

अंगारेष्वंगिराः (संबभूव)। नि० ३. १७. १॥ ये अंगारा आसंस्ते ऽगिरसो ऽभवन्। ऐ० ३. ३४। अंगारे-भ्यो ऽगिरसः (समभवन्) श० ४. ५. १. ८। ये अंगिरसः स रसः। गो० पू० ३. ४। तस्मादंगिरसोऽधीयान ऊर्ध्वस्तिष्ठति। गो० पू० १. ९। तं वरुणं मृत्युमभ्यश्रा-म्यदभ्यतपत्समतपत्तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वे-भ्यो अंगेभ्यो रसो ऽक्षरत् सो अंगरसोऽभवत्तं वा एतमंग-रसं सन्तमंगिरा इत्याचक्षते परोक्षेण। गो० पू० १. ७। अंगिरा उ ह्यग्निः। श० १. ४. १. २५। अंगिरा वाऽअग्निः। श० ६. ४. ४. ४। प्राणो वा अंगिराः। श० ६. १. २. २८। ६. ५. २. ३-४। द्वय्यो ह वा इदमग्रे प्रजा आसुः। आ-दित्याश्चैवांगिरसश्च श० ३. ५. १. १३। आदित्याश्चांगि-रसश्चैतत् सत्रं समदधतादित्यानामेकविंशतिरंगि-रसां द्वादशाहः। ता० २४. २. २। ते हादित्याः पूर्वे स्वर्गं लोकं जग्मुः पश्चेवांगिरसः षष्ट्यां वा वर्षेषु। ऐ० ४. २७। (आदित्याः) स्वर्गं लोकमायन्नहीयन्तांगिरसः। ता० १६. १२. १। अन्वञ्च इवांगिरसः सर्वैः स्तोमैः सर्वैः पृष्ठैर्गुरुभिः सामभिः स्वर्गं लोकमस्पृशन्। श० १२. २. २. ११। अंगिरसः स्वर्गं लोकं यतो रक्षांस्यन्वसचन्त। ता० ८. ९. ५। त एतेन सद्यः क्रियांगिरस आदित्या-नयाजयन्। श० ३. ५. १. १७। तान् हादित्यानंगिरसो याजयाञ्चक्रुः। गो० उ० ६. १४। अंगिरसां वा एको ऽग्निः। ऐ० ६. ३४। अग्निर्नभो नामाग्नेऽअंगिर आयुना नाम्नेहि। श० ३. ५. १. ३२॥ तं ह्यांगिरा उद्गीथ-मुपासांचक्रिरे। अंगिरसं मन्यन्ते अंगानां यद्रसः। छा० १. २. १०॥

अङ्गुलयः अङ्गन्ति प्राप्नुवन्ति याभिस्ताः १८. २२॥ अङ्गुलीः करचरणाऽवयवाः २०. ६॥

अङ्गिघ शोधय १३. ४१॥

अंग्याः अंगेषु भवाः १. १६१. ७॥

अघारिः अघस्य कुटिलगामिनो जीवस्यारिः शत्रुः ५. ३२॥ अघारे अघस्य कुलस्यारिः, तत्संबुद्धौ ४. २७॥

अघ्रिणा गमनसाधनेनाग्निना २. ८॥

अच ऊर्ध्वं गच्छति ५. ८३. ८॥

अचक्रत् करोति ४. १८. १२॥

अचक्रया अविद्यमानचक्राकारया ४. २६. ४॥

अचक्रे अप्रतिहते। [चक्रं चकतेर्वा निरु० ४. २७] १. १२१. ४॥

अचक्षयत् दर्शयति २. २४. ३॥

अचचक्षम् कथयेयम् ५. ३०. २॥

अचथः गच्छथः ५. ७८. ६॥

अचरत् चरति १. १०३. ३। आचरेत् ३. ४८. ३॥

अचरत् चरति ६. ६॥

अचरती इतस्ततः स्वकक्षां विहाय गति-रहिते १. १८५. २॥

अचरमाः नान्त्यावयवाः ५. ५८. ५॥

अचष्ट उपदिशति। प्रकाशितवान्। व्या-पयेत् ४. १८. ३॥

अचारिषम् अनुतिष्ठामि (अत्र लडर्थे लुङ्) १. २३. २३। चरितवान् २. २८। चरेयम् २०. २२॥

अचिकित्वान् अविद्वान् १. १६४. ६॥

अचिक्रदत् भृशमाक्रन्दति ४. २५. ८। आह्वयति ७. ३६. ३। शब्दं कुर्वन् ३८. २२॥

अचिक्रदत् विकलयति १. ५८. २। आह्वयेत् ७. २०. ६॥

अचित्तम् चेतनतारहितम् १. १५२. ५। चेतनरहितम् ६. ४६. १२॥ अचित्तान् प्राप्तदरिद्रावस्थान् ३.१८.२॥ अचित्तात् अविद्यमानं चित्तं यत्र तस्मात् ४. ३. १।

अचित्तिम् अकृतचयनाम् ४. २. ११। अज्ञानम् २७. ६॥ अचित्ती अचित्याऽविद्यया ४. ५४. ३॥ अचित्तिऽभिः अचेतनाभिः ४. १२. ४॥

अचित्रम् अनद्भुतम् ६. ४६. ११। अचित्रे अनाश्चर्ये ४. ५१, ३॥

अचिध्वम् संचिनुत १. ८७. २। प्राप्नुत गच्छथ ५. ५५. ७॥

अचिष्टुः गमन कर्ता २०. ४४॥

अचुक्रुधत् भृशं क्रोधयति ५. ३४. ७॥

अचुच्यवीतन् प्रेरयन्ति [अत्र लडर्थे लुङ् बहुलंछन्दसीतिशपःश्लुः। बहुलंछन्दसीतीडागमः। तप्तनप्तनथनाश्चेति तनबादेशः। पुरुषव्यत्ययः। सायणाचार्येणेदंभ्रान्त्या लुङन्तं व्याख्याय बहुलं छन्दसीति शपः श्लुरिति सूत्रं योजितम्, तत्र च्लेरपवादत्वाच्छपेव नास्ति, कुतः श्लुः, कस्य लुक्, तस्मादशुद्धमेव] प्राप्नुवन्ति वा १. ३७. १२॥

अचुच्यवुः प्राप्नुवन्ति १. १६५. ५। च्यावयेयुः ५. ५३. ६॥

अचुच्यवुः च्यवन्तां प्राप्नुवन्तु १. ४५.८। प्राप्नुवन्ति (अत्र व्यत्ययेन परस्मैपदम्) १. १६८. ४। च्यावयेयुः ५. ५६. ७। च्यावयन्ति नाशयन्ति १२. ८४॥

अच्युतः नाशरहितः २०. २७॥ ८तानाम् कारणजीवानाम् ७. २५॥

अच्युतक्षित् योऽच्युतान् नाशरहितान् पदार्थान् क्षियति निवासयति सः ५. १३॥ अच्युतक्षित्तमः अच्युतं क्षियति निवासयति सोऽतिशयितः ७. २५॥

अचेत् चेतयति ४. २४. ८॥

अचेतयत् चेतयेत् संज्ञापयेत् ३. ३४. ५॥

अचेतसम् अज्ञानिनम् ७. ६०. ६। जडबुद्धिम् ७. ६०. ७॥

अचेताः ज्ञानरहिताः १. १२०. २॥

अचेतानस्य चेतनारहितस्य मूर्खस्य ७. ४. ७॥

अचेतानस्य अचेतयमानस्य तत्प्रमत्तस्य भवति। नि० ३. २. १॥

अचेति सम्यग् विज्ञायताम् १. ११३. ४। संज्ञायते। १. १३६. ४॥

अचेति संज्ञाप्यते [चिति संज्ञाने लुङि कर्मणि चिण्] १. ८८. ५। चेतयति ६.२७.४॥

अचैत् चिनुयात् ६. ४४. ७॥

अचोदते अप्रेरकाय ५. ४४. २॥

अचोदयःधर्मे प्रेरयेः [अत्र लिङर्थे लङ्] १. ४२. ५॥

अचोदयत् प्रेरयति ५. ३१. ३॥

अच्छ उत्तमरीत्या १. ६. ६। उत्तमेन प्रकारेण १. ४४. ४। निश्शेषार्थे १. १३०. १। यथाक्रमम्, २. १६३। शोभने १. १२६. ५। श्रेष्ठार्थे १. ३१. ३७। सुष्ठु ३. १५. ५। सम्यग्रीत्या १. ३८. १३।

अभि प्रकारेण १. ४१. ६ । सम्यक् ३. १. १ ।
ात् अच्छा १. २. २ ॥
अच्छाभेराप्तमिति शाकपूणिः । नि० ५. २८. २ ॥

अच्छऽउक्तौ सत्योक्तौ सम्यग्वचने वा ४१. १६ ॥

अच्छान् यच्छन्तु प्रददतु [अत्र छान्दसो ोलोपो वेति यलोपः] ६. २८. ५ ॥

अच्छान् .....अचच्छदत् । नि० ९. ८. १ ॥

अच्छान्त विद्ययाऽऽच्छादयन्तः १.१६५ १२॥

अच्छिद्यमानया छेत्तुमनर्हया २. ३२. ४ ॥

अच्छिद्रऽऊतिः अच्छिद्राऽप्रच्छिन्नाऽद्वैभूतोती रक्षणादिक्रिया यस्मात् सः १. ४५. ३ ॥

यद्वा एतस्य (अष्टमस्य) अह्नश्छिद्रमासीत्तद्देवा अच्छिाप्यौह १स्तदच्छिद्रस्याछिद्रत्वम् । ता० १४. ९. ३६ ॥

अच्छिद्रम् छिद्रवर्जितम् २. ३. ८ । छिद्रहितम् ५. ६२. ६ ॥ अच्छिद्रस्य अखण्डितस्य . ४८. १८ ॥ अच्छिद्रा द्विधाभावरहितानि । . १६२. १८ । अच्छिन्ना १३. १५. ५ ॥ अच्छिद्रे दोषे ११. ३० ॥ अच्छिद्रेण अविनाशिना वज्ञानेन ४. ४ । न विद्यते छिद्रं छेदनं यस्मिंस्तेन नरन्तरेण वा १. ३१ । छिद्ररहितेनैकरसेन १. १६ । छिद्ररहितैः किरणैः १. १२ । निरन्तरेण ्यापनेन प्रकाशेनवा १. २० ॥

अच्छिन्नऽपत्राः अविच्छिन्नानि पत्राणि कर्मसाधनानि यासां ताः १. २२. ११ । अखण्डितानि पत्राणि वस्त्राणि यानानि यासां ताः ११.६१

अच्छिन्नम् छेदभेदरहितम् २०. ४३ ॥ अच्छिन्नस्य अखण्डितस्य ७. १४ ॥

अच्छेतः अच्छं निर्मलं स्वरूपमितः प्राप्तः ८. ५४ ॥

अच्छोदि छिद्येत १. ११६. १५ ॥

अच्छोक्तिऽभिः अच्छ श्रेष्ठा उक्तयो वचनानि यासु स्तुतिषु ताभिः १.६१.३ । शोभनैर्वचोभिः १. १८४. २ ॥

अच्यत सम्यक् प्राप्नुत ५. ५४. १२ ॥

अच्यवयत् निशातयति २. ४४. २ ॥

अच्युतः अक्षयः १. ५२. २ ॥ अच्युतम् कारणरूपेण प्रवाहरूपेण वा ऽविनाशि (पृथिव्यादिलोकजातम्) १. ५६. ५ । अविनाशिनम् २. ३. ३ ॥

अच्युतऽच्युत् योऽच्युतेषु च्यवते तांश्च्यावयति २.१२.६ । योऽच्युतमचलन्तं च्यावयति ६. १८. ५ ॥

अच्युता अविनाशिना ६. २२. ६ । छेत्तुमशक्येन १. ८५. ४ ॥ विनाशरहितानि १. १६७. ८ । क्षयरहितानि (जन्तुविशेषाणि) ६. ३१. २ ॥ अच्युतानि-अक्षीणानि [सैन्यानि] ३. ३०४ ॥

अग्निरच्युतः । श० १. ६. १. ६ ॥

अज जानीहि १. १७४. ३ । छागः ६. ४६. १२ ॥

अज अजति प्रकाशं प्रक्षिप्य द्योतयति (अत्र व्यत्ययो लडर्थे लोडन्तर्गतोण्यर्थश्च) १. २३. १३ । प्रक्षिप १. ४२. ३ । समन्ताद्दूरे प्रक्षिप ६. ४७. ३१ । विज्ञापय ६. २५. ६ ॥

अजऽअश्व अजा अश्वाश्च विद्यन्ते यस्य तत्सम्बुद्धौ १. १३८. ४ । अजो ऽनुत्पन्नो विद्युदश्वो यस्य तत्सम्बुद्धौ ६. ५५. ३ ॥

पूषणमाहाजाश्व । नि० ४. २५. ८ ॥

अजऽअश्वः अजा अश्वाश्च यस्य सः ६. ५८. २ ॥ अजाश्वम् अजाश्चाश्वाश्चास्मिँस्तम्। ६ ५५. ४ ॥

अजः अजः पशुविशेषः। २५. ५६। छागः १३. ५१। छागजाति विशेषः २४. ३२। प्राप्तव्यश्छागः १. १६२. ४। प्राप्तव्योमेषः २१. २६। जन्मादिरहितः २५. २५। यः कदाचिन्न जायते ५. ३३। यः कदाचिन्न जायते स ईश्वरः। ६. ५०. १४। प्रेरकः क्षेपणशीलः ५. २५। स्वकीयमात्मानमजरामरगुणविशिष्टं....जानीहि अथर्व० ६. ५. १ (सं०चि० पृ० २३०)॥ अजाः नित्याः ६. ५७. ३ ॥ अजस्य प्रकृतेर्जीवस्य वा १. १६४ ६। अनुत्पन्नस्यानादेर्जीवस्याव्यक्तस्य च १७. ३०॥

अजः पूष्णः। निघ० १.१५। अजा अजननाः। नि० ४. २५. ८। अज एकपादजन एकः पादः। नि० १२. २९॥ तस्याक्षिभ्यामेव तेजोऽस्रवत्। सो ऽजः पशुरभवद्धूम्रः श० १२. ७. १. २। वाचो ऽजम् (निरमिमीत)। श० ७. ५. २. ६। वाग्वाऽअजः। श० ७. ५. २. २१। आग्नेयो वाऽअजः। श० ६. ४. ४. १५। गो० उ० ३. १९। ब्रह्म वाऽअजः। श० ६. ४. ४, १५। अजोऽग्नीषोमीयः। ता० २१. १४. ११। अजेहि-सर्वेषां पशूनां रूपम्। श० ६. ४. १. ४। प्रजापतिर्वा ऽएष यदजर्षभः। श० ५. २. १. २४। सूर्यं देवमजमेकपादम्। तै० ३. १. २. ८। एकपदा ह वाजा उबक्रमुः। श० ८. २. ४. १॥

अजकावम् या ऽजान् जीवान् कावयति पीडयति तम् ७. ५० १॥

अजगन् गच्छेत (अत्र लङि तिपि बहुलं छन्दसीति शपः श्लुर्मोनोधातोरिति मस्य नः) १. १३०. ६। गच्छन्ति. १. १८७. ७। पुनः पुनः प्राप्नोति १. १६१. ४। प्राप्नुयाः ... ६. २॥

अजगन् गतिकर्मा। निघ० २. १४॥

अजगन् गमयेयुः ५. ३१. १०। गच्छन्तु ७. १८. ७। पुनः पुनः प्राप्नोति १. १६१. १॥

अजगरः महान् सर्पः २४. ३८॥

अजतम् प्रापयतः २. ३६. ७॥

अजति गच्छति ५. ३७. ४। प्रक्षिपति ६. ६६. ७॥

अजति प्राप्य रक्षति १. ३३. ३। प्राप्नोति ५. ३४. ७। जानाति प्रक्षिपति वा १. १६१. १०॥

अजतु ददातु प्राप्नोतु वा ६. ५४. १०॥

अजते क्षिपति [व्यत्ययेनात्रात्मनेपदम्] १. ६५ ७॥

अजथ गच्छथ ५. ५४. ४॥

अजध्वम् प्राप्नुत ६. ४८. ११॥

अजनः जनयति २. १३. ७॥

अजनत् जनयति २. २३. १७॥

अजनत् जनयेत ३. ३१. १५। प्रकटयेत् १७. २५॥

अजनत जनयन्ति ४. ५ ५॥

अजनन् जनयन्ति २. १३. ५॥

अजनयः अजायमानाः १. १३४. ४॥

अजनयः जनयसि [अत्र लडर्थे लङ्] १. ६१. २२। जनयेः ३४. २२॥

अजनयत् जनयति २. १६. ३॥

अजनयत् जनयति १. ६६. २॥

अजनयन् अप्रकटयन् २. १०. ३॥

अजनयन् उत्पादयन्तु २०. ३०॥

अजनयन्त प्रकटयन्ति १. ५६. २। उत्पादयन्ति १. १६८. ६। जनयन्ति ४. १. १२॥

अजनि जायते २. ५. ४। जनयेत् २.३४.२॥

अजनि जनयति १. ७४. ३। जायते १. ८३. ५। जायेत १. १४४. ४॥

अजनिष्ट जायते ५. २. ४। जनयति ५. ३१. ३। जनितवान्। १७. ३२॥

अजनिष्ठ जायते १. ११३. १। जनयेत् २. ५. १। जनयति ५. ३२. ३। जातः १५ २७॥

अजभर्त्तन धारण करो १०. ७२. ७ (सं० वि० पृ० २४०)॥

अजयः जयति १. ३२. १२॥

अजपालम् अजानां रक्षकम् ३०. ११॥

अजयः जय १६. ७१॥

अजयत् जयति २. ३०. ३। जयेत् ४. ७. ११। जयेदुत्कर्षेत्। ६. ३१॥

अजयताम् उत्तम करो ६. ३१॥

अजयत् बढाते हो ६. ३२॥

अजर जरारोगरहित ६. २. ६। जरादोषरहित ६. ८. ५। ६. १६. ४५। योऽजे जन्मरहितेश्वरे रमते तत्सम्बुद्धौ (अत्र वा छन्दसीत्यविहितो डः) १. १२७. ६॥

अजरः अवृद्धः।५. ४. २। जरारोगरहितः १. १४४. ४। स्वस्वरूपेण जीर्णावस्थारहितः १. ५८. २। वृद्धावस्थारहितः ५. ४४. ३। जरादिरोगरहितः ६. २२. ३। जरारोगरहितः सूर्य्यो जीवात्मा परमात्मा वा ६. ६८. ६॥ अजराः जन्मजरामृत्युधर्मादि रहितत्वात् कारणरूपेण नित्याः १. ६४. ३.। वयोहानिविरहाः १. १२७. ५। व्ययरहिताः ७. ३. ३॥

अजरेभिः अजरैर्हानिरहितैः [प्रबन्धैः] १-१६०. ४॥

अजरमजरणधर्म्माणम्। नि० ४. २७. १॥

अजरन्तीम् वयोहानि रहिताम् २१. ५॥

अजरयू जरादिदोषरहितौ १. ११६. २०॥

अजवसः वेगरहितः २ १५. ६॥

अजस्रः निरन्तरं गन्ता ३. २६. ७। निरन्तरः ७. १. १८। अजस्रं गमनं विद्यते यस्य सः (अत्र अर्श आदिभ्यो ऽजित्यच्) १८. ६६॥ अजस्राः अहिंसकाः ४. ५५. २॥ अजस्रम् सततम् १. १००. १४। निरन्तर व्यापक ६. ११३. ७ (सं० वि० पृ० २३८)॥

अग्निरजस्रः। श ६. ७. ४. ३॥

अजस्रया अनुपक्षीणया १७. ७६॥

अजहात् जहाति त्यजति ४. २६. ७। जह्यात् १६. ७२॥

अजा इव यथा ऽजौ २. ३६. २॥

अजा पशु विशेषः बकरी इति भाषायाम् १४. १९.। जन्म रहिता प्रकृतिः २३. ५६॥

आजा ह वै नामैषा यदजैतया ह्येनं (सोमं) अन्तत आजति तामेतत्परो ऽक्षमजेत्याचक्षते। श० ३. ३. ३. ९। प्रजापतेर्वै शोकादजा समभवन्। श० ६. ५. ४. १६। यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्ततो ऽजा समभवत्। श० १४. १. २. १३। तपसो ह वा एषा प्रजापतेः सम्भूता यदजा तस्मादाह तपसस्तनूरसीति। श० ३. ३. ३. ८। आग्नेयी वा एषा यदजा। तै० ३. ७. ३. १। अजा ह सर्वा ओषधीरत्ति। श० ६. ५. ४. १६। सा (अजा) यत् त्रिः संवत्सरस्य विजायते तेन परमः पशुः। श० ३. ३. ३. ८। सा (अजा) यत्त्रिः संवत्सरस्य विजायते तेन प्रजापतेर्वर्णः। श० ३. ३. ३. ८॥

अजातऽशत्रुम् न जाताःशत्रवो यस्य तम् ५. ३४. १ ॥

अजातान् न उत्पन्न हुआ ५. १५. २ । अप्रकटान् १५. १ । युद्धेऽप्रकटान्, शत्रुसेविनोऽमित्रान् १५. २ ॥

अजाति समन्ताज्जातिर्जननं यस्मिन् कुले तत् ५. २. ५ ॥

अजाति प्राप्नुयात् ५. २. १२ ॥

अजानन् जानन्ति १. ७२. ८ । जानीयुः १. ७२. १० ॥

अजानाम् जानीयाम् १. १६३. ६ । जानामि २६. १७ ॥

अजानि जानीयाम् २३. १६ ॥

अजामयः सपत्न्य इव शत्रवः ६. २५. ३ ॥ अजामिम् अप्रसिद्धवैरिणम् १. १११. ३ । अभार्य्याम् १. १२४. ६ । अभोगम् ४. ४. ५ । अन्यामसम्बन्धाम् ६. ४४. १७ । भोजनरहितं स्थानम् [अत्र जमुधातोर्वपादिभ्य इतीञ्] १३. १३ ॥ अजामीन् असम्बन्धिनो दुष्टान् ६. १९. ८ ॥ अजामिभिः अबन्धुवर्गैः शत्रुभिः १. १००. ११ ॥

अजामि प्राप्नोमि ५. १६. ४ ॥

अजायत [अजायत] उत्पन्नोस्ति १. ११. ४ । जायेत १. १२८. ४ । जायते ३. ३. ११ । उत्पन्नम् (पंत्र० १०) १०. १९०. १ ॥

अजायथाः [अजायथाः] प्रादुर्भूतो भव १. ५. ६ । जायेथाः १. १४१. ६ । प्रसिद्ध हूजिये २६. ३७ ॥

अजायन्त [अजायन्त] जायन्ते [अत्र लडर्थे लङ्] १. ३१. १ । प्रादुर्भवन्ति १. ३७. २ । उत्पन्नाः ३१. ८ ॥

अजायमानः स्वस्वरूपेणानुत्पन्नः सन् ३१. १९ ॥

अजाव प्राप्नुयाव १. १७९. ३ ॥

अजावयः अजाश्चावयश्च ते ३. ४३ ॥

अजासः पुष्टिकर्तुरश्वाः ६. ५५. ६ । शस्त्रा-स्त्रप्रक्षेपकाः ७. १८. १६ ॥

अजासि प्राप्नुयाः २३. १६ ॥

अजिगात् प्राप्नोति [अत्र सर्वत्र लडर्थे लङ् । जिगातीति गतिकर्मसु पठितम् । निघ० २. १४] १. ३३. १३ ॥

अजिघांसत् हन्तुमिच्छति ४. १८. १२ ॥

अजिन्वत् जिन्वेत् १. १५६. ५ ॥

अजिन्वतम् प्रीणीतम् १. ११२. ६ ॥

अजिनसन्धम् जेतुमयोग्यान् संदधाति तम् [अत्र जिधातोः कर्मणि नक् । उ० ३. २] ३०. १५ ॥

अजिरः यः शीघ्रं न गच्छति सः ६. ६४. ३ ॥ अजिरा यानानां प्रक्षेप्तारौ ३. ३५.

२ ॥ अजिराः अजिराणि क्षेप्तुं गमयितुमनर्हाणि १. १३४.३ ॥ अजिरासः प्राप्तिशीलाः १. १४०. ४ । वेगवन्तः ५. ४७. २ ॥ अजिरम् ज्ञानवन्तम् १. १३८. २ । प्राप्तव्यं प्रक्षेपकम्वा ४. ४३. ६ । विषयादिषु प्रक्षेपकं जराद्यवस्थारहितम्वा ३४. ६ ॥ अजिराय अश्ववारं प्रक्षेप्त्रे १६. ३१ ॥

अजिरम् इति क्षिप्रनाम । निघ० २. १५ । कौ० नि० १०६ ॥ अजिराः इति नदीनाम । निघ० १. १३ । कौ० नि० ७६ ॥

अजिहीत प्राप्नोति २. २३. १८ ॥

अजीगः [अजीगः] अन्धकारं निगलति [गॄ निगरण इत्यस्मात् बहुलं छन्दसीति शपः स्थाने श्लुः । तुजादीनामिति दीर्घश्च] १. ६२. ६ । स्वव्याप्त्या निगलति १. ११३. ४ । प्रसन्नान् करोति १. ११३. ६ । भृशं प्राप्नुयात् १. १६३. ७ । प्राप्नोति ३. ५८. १ । भृशं गिरति ५. १. ३ । गच्छति ६. ४७. ३ । जागरयति ६. ६५. १ । निगलसि २६. १८ ॥

अजीगः—अगारोः । जिगर्तिर्गिरतिकर्मा वा गृणातिकर्मा वा गृह्णातिकर्मा वा । नि० ६. ८ ॥

अजीगमम् सम्यक् प्राप्नुयाम् ८. २६ ॥

अजीजनः जनय ५. ८३. १० । जनयति २३. १८ ॥

अजीजनत् जनयति ४. ५३. २ ॥

अजीजनन् [अजीजनन्] जनयन्ति ३. २६. १३ ॥

अजीजनन् अजनयन् नि० ७. २८ ॥

अजीजपत उत्कर्षयत, जापयत, सम्यक् प्रापयत ६. १२ ॥

अजुर्यः अजीर्णेषु भवः २. ८. २ । अजीर्णो युवा ६. ३०. १ ॥ अजुर्य अजीर्ण ६. २२. ६ ॥ अजुर्या अजीर्णौ २. ३६. ५ ॥ अजुर्य्याः अजीर्णाः ४. ५१. ६ ॥ अजुर्यम् युद्धविद्यासंगतम् १. ६७. १ । अजीर्णम् २. १६. १ । हानिरहितम् ३. ५३. १५ ॥

अजुर्यम् यदृजूषु हानिरहितेषु साधु तत् १. १४६. ४ ॥

अजुर्यमुः प्रक्षिपेयुर्नियच्छेयुश्च ५.६.१० ॥

अजुर्याः ज्वररहितेषु साध्वीः २. ३. ५ । शरीरात्मजीर्णावस्थारहिताः ३. ७. ७ ॥

अजुषत प्रसन्न हो २. ३७. ४ ॥

अजुषन्त प्रीतवन्तः, सेवितवन्तः ४. १ ॥

अजुष्टम् सेवेध्वम् ५. ७७. २ ॥

अजुष्टा असेवितौ २. ४०. २ ॥ अजुष्टात् धर्ममसेवमानात् ७. १. १३ ॥

अजुष्टिः असेवनम् ६. ३. २ ॥ अजुष्टौ अप्रतीतावसेवने १. ६३. ५ ॥

अजुषन् सेवन्ते [अत्र बहुलं छन्दसीति रुडागमः] १. ७१. १ ॥

अजुह्वत स्पर्धन्ते १. ५१ ५ ॥

अजूर्यतः अजीर्णस्य ३. ४६. १ । अप्राप्तजीर्णत्वस्यास्य ५. ४२. ६ ॥

अजूर्यन् वृद्धा जायन्ते १. १५२. २ ॥

अजेत प्रक्षिपेत [अत्र व्यत्ययेनात्मनेपदम्] १. १२६. ६ ॥

अजोषाः जुषसे [अत्र छन्दस्युभयथेत्यार्धधातुकसंज्ञाश्रयाल्लघूपधगुणः । छान्दसो वर्णलोपो वेति थासस्थकारस्य लोपे-नेदं सिध्यति] १. ६. ४ ॥

अजोष्यः असेवनीयः १. ३८. ५ ॥

अजोह्वीत् भृशं गृह्णीयात् १. ११६. १३ । पुनः पुनः स्पर्धेत १. ११७. १५ । भृशं आह्वयेत् १. ११७. १६ । भृशमाह्वयति ५. ७८. ४ ॥

अजोह्वीत् आह्वयत् नि० ५. २१ ॥

अज्ञातऽकेताः अज्ञातः केतः प्रज्ञा यैस्ते मूढाः ५. ३. ११ ॥

अज्ञाताः न ज्ञाताः ४. २३. ७ ॥

अज्ञायि ज्ञायते ६. ६५. १ ॥

अज्म बलम् १. १५८. ३ । अजन्ति प्रक्षिपन्ति शत्रून् येन यस्मिन्वा [अत्र सुपां सुलुगिति विभक्तेर्लुक्] १७. ३८ ॥ अज्मन् अजन्ति प्रक्षिपन्ति शत्रून् यस्मिंस्तत्र १. ११२. १७ । अज्मनि पथि १. १६६. ५ ॥

अज्म इति संग्रामनाम निघ० २. १७ ॥

अज्मम् अजन्ति गच्छन्ति यस्मिन् तं मार्गम् २६. २१ ॥ अज्मस्य अन्तरिक्षे प्रक्षिप्तस्य ४. ५३. ४ ॥ अज्मेषु प्रापकक्षेपकादिगुणेषु सत्सु १. ३७. ८ । गमनाधिकरणेषु मार्गेषु १. ३७. १० । अजन्ति गच्छन्ति येषु संग्रामेषु ५. ८७. ७ ॥

अज्म इति गृहनाम निघ० ३. ४ । कौ० नि० ८९ ॥ अज्मम् अजिनमाजिम् नि० ४. १३ ॥

अज्यताम् संयुज्यताम् १२. ७० ॥

अज्यते व्यज्यते १. १८८. २ । प्रक्षिप्यते ३. १७. १ । प्राप्यते ३३. ८२. ॥

अज्यमानः चाल्यमानः ५. ३०. १४ ॥

अज्यसे [अज्यसे] प्राप्यसे ३. ४०. ६ । गम्यसे ६. २. ८ ॥

अज्येष्ठाः अविद्यमानो ज्येष्ठो येषां ते ५. ५९. ६ । अज्येष्ठासः ज्येष्ठभावरहिताः ५. ६०. ५ ॥

अज्राः प्रक्षेप्तारः ६. २४. ८ ॥ अज्रान् जगति प्रक्षिप्तान् ४. १. १७ । येऽजन्ति नित्यं गच्छन्ति तान् ४. १९. ७ । सततगामिनः ५. ५४. ४ ॥ अज्राणाम् प्राप्तव्यानाम् २१. ४३ । कमनीयानाम् २१. ४४ ॥

अज्राः इति क्षिप्रनाम निघ० २. १५ । कौ० नि० १०६ ॥

अञ्ज प्राप्नुहि २७. ४५ ॥

अञ्जः व्यक्तागमनशीलः [अञ्जू व्यक्तिकरण इत्यस्य प्रयोगः] १. ३२. २ । सर्वैः कमनीयः १. १६०. २ ॥ अञ्जसा शीघ्रम् १. १३६. ४. । स्वच्छन्देन वेगवत्त्वेन ६. १६. ३ । साक्षात् ६. ५४. १ । व्यक्तेन, शत्रूणां म्लेच्छनेन, कान्त्या ज्ञापनेन वा ५. ५ ॥ अञ्जसि प्रकटे, कामयमाने च १. ३२. ३ ॥

अञ्जतः कामयेथाम् २. ३. ७ ॥

अञ्जते गच्छन्ति १. ६४. ४ । प्रापयन्ति १. ६२. १ । कामयन्ते १. १५१. ८ । गच्छन्ति व्यक्तिं कुर्वन्ति ७. ५७. ३ ॥

अञ्जन् [अञ्जन्] अञ्जन्ति गच्छन्ति १. ६२. ५ । प्रकटीकुर्वन् २. ३. २ । प्रकटीकुर्युः ३. ३८. ३ । व्यक्तो भवन् २६. १ ॥

अञ्जन्ति कामयन्ते १. ६५. ६ । प्रकटयन्ति ३. १४. ३ । व्यक्तीकुर्वन्ति ५.३.२॥

अञ्जन्ति अनुवन्ति नि० ६. ३४ ॥

अञ्जन्तु प्रकटीकुर्वन्तु ६. ६६. ३ । कामयन्ताम् २३. ८ ॥

अञ्जयः प्रसिद्धप्रशंसाः १. १६६. १० ॥ अञ्जिम् प्रसिद्धन्यायम् २३, २१ ॥

अञ्जसी प्रसिद्धा १. १०४. ४ ॥

अञ्जाते प्रसिध्यतः २०. ६१ । प्रकाशयतः २१. ३५ ॥

अञ्जाथे प्रकट करो ३३. ३३ ॥

अञ्जानः प्रकटीकुर्वन् २. ८. ४ । प्रसिद्धौ दिव्यान् गुणान् प्रकटीकुर्वन् ३. १०. ४ ॥ अञ्जानाः प्रकटयन्तः ४. ५८. ६ । ज्ञापयन्तः १७. ६७ ॥

अञ्जि व्यक्तं रूपम् १. १२४. ८ । व्यक्तं सुलक्षणम् ४. ५८. ६ । गमनम् ७.५७. ३ ॥ अञ्जिभिः साधनानि प्रकटयद्भिः [सर्वधातुभ्य इन् । उ० ४. १२३ । इति कर्तरीन् प्रत्ययः] १. ३६. १३ । अञ्जन्ति व्यक्तीकुर्वन्ति पदार्थगुणान्याभिः क्रियाभिः १. ३७. २ । व्यक्तीकरणादिधर्मैः १. ६४. ४ । व्यक्तैर्विज्ञानादिगुणनिमित्तैः १. ८५. ३ । व्यक्तैरक्षणविज्ञानादिभिः १. ८७. १ । प्रकटीकरणैर्गुणैः १. ११३. १४ । प्रकटैः २. ३४. १३ । विद्याशुभगुणप्रकटकारकैः ५. ५२. १५ । कमनीयैः ५. ५६. १ । व्यक्तिकारकैः किरणैः ११. ४२. ॥ अञ्जिषु कामयमानेषु २. ३६. २ । प्रकटेषु व्यवहारेषु ५. ५३. ४ ॥

अञ्जिऽपन्तः प्रकृष्टा अञ्जयः कामना विद्यन्ते येषां ते ५. ५७. ५ ॥

अञ्जिसक्थः अञ्जीनि प्रसिद्धानि सक्थीनि

यस्य सः २४. ४ ॥

अञ्जे कामये [अत्र विकरणालुक्, व्यत्ययेनात्मनेपदञ्च] १. ६१. ५ । स्वेच्छया गृह्णामि १. ६४. १ ॥

अरणवः सूक्ष्मतण्डुलाः १८. १२ ॥

अणु सुस्त्रशीर्षेयम् , उपसर्गो सुमनामकारणो यथा सस्त्येति ॥ नि० ६. २२ ॥

अरवीभिः [अण्वीभिः] प्रकाशावयवैः किरणैरंगुलिभिर्वा [वोतोगुणवचनात् । अ० ४. १. ४४ अनेन ङीषि प्राप्ते व्यत्ययेन ङीन्] १. ३. ४ ॥

अण्व्य इत्यङ्गुलिनाम नि० २. ५ ॥ कौ० नि० ८२ ॥

अतर्थ्य सगत् तंसयत्यलंकरोति २३. २४ ॥

अतः अस्मात् स्थानात् १.६. ६ । हेत्वर्थे १. २३. १२ । अस्मात् ३१.३ ॥

अतक्षत् तनूकरोति १. ६२. १३ ॥

अतक्षत [अतक्षत] अतिसूक्ष्मां धियं कुर्वन्ति १. ८६. ३ । अवस्तृणीत १. १६१. ७ ॥

अतक्षन् तनूकुर्वन्ति २. ३१. ७ । कुर्वन्ति ७. ७. ६ ॥

अतक्षम् तनूकुर्याम् १. १०६. १ । निर्ममे ५. २. ११ । प्राप्नुयाम् ५.२६.१५॥

अतक्षिषुः संवृणुयुः [तक्षत्वचने, त्वचनं संवरणमिति] सूक्ष्मधियं सम्पादयन्तु च १. १२०. ६ ॥

अतथाःऽइव प्रतिकूल इव [अत्राऽऽचारे क्विप्

तदन्ताच्च प्रत्ययः] १. ८२. १ ॥

अतन् व्याप्नुवन् ६. ६१. ६ ॥

अतनोत् विस्तृणाति २. १७. ४ ॥

अतन्द्रः अनलसः १. ७२. ७ ॥ अतन्द्रासः नियतरूपत्वादनालस्यादियुक्ताः १.६५. २ ॥

अतन्वत [अतन्वत] विस्तृतं कुरुत १६. १२। तन्वते, विस्तृणन्ति ३१. १४ ॥

अतपत् तपति ३. ३१. १० ॥

अतप्यमाने सन्तापरहिते १. १८५. ४ ॥

अतमानाः अतन्तः [अत्र व्यत्ययेनात्मनेपदम्] ६. ६. २ ॥ अतमानम् अततं सततं प्राप्तम् [अत्र व्यत्ययेनात्मनेपदम्] २. ३८. ३ ॥

अतमेरुः न ताम्यति यः स यज्ञकर्ता मनुष्यः १. २३ । न ताम्यति येन यज्ञेन सः । [तमुधातोर्बाहुलकादेरुः प्रत्ययः] १. २३ ॥

अतरः तरति १. ३२. १४ ॥

अतरत् तरेत् ४. २७. २ । तरति ७. १८. ६ ॥

अतरन् [अतरन्] प्लावयन्ति [अत्र लडर्थे लङ्] १. ३६. ८ । तरन्ति ५. ४५. ११ ॥

अतर्पयः तर्पय ४. १६. ५ ॥

अतस्यान् यतमानः ५. ३३. १ ॥

अतष्ट तक्षेरन् १. १६३. २ । तनूकुरुत

३. ५४. १२। निष्पादयत ४.३५.५। तद्दणोति तनूकरोति २६. १३॥

अतसम् कूपम् ४.४. ४। काष्ठम् १३.१२॥ अतसानि नैरन्तर्येण गन्त्रीणि त्रसरेणवादीनि २. ४. ७॥ अतसस्य व्याप्तस्य ३. ७. ३॥ अतसे निरन्तर आकाशे १. १६६. ३॥ अतसेषु विस्तृतेष्वाकाशपवनादिषु पदार्थेषु १. ५८. २। व्याप्तव्येषु तृणकाष्ठभूमिजलादिषु १. ५८. ४। वृक्षादिषु ४. ७. १०॥

अतसा अतसानि नि० ५. १२॥

अतसाय्यः परोपकारे निरन्तरं वर्तमानः २. १६. ४॥

अतसाय्या अतन्ति निरन्तरं सुखानि गच्छन्ति यया सा। [अत्रातधातोर्बाहुलकादौणादिक आय्यप्रत्ययोऽसुगागमश्च। सायणाचार्येणेदं पदमतधातोराय्यप्रत्ययं वर्जयित्वा साय्यप्रत्ययान्तरं कल्पित्वाऽडागमेन व्याख्यातं तदशुद्धम्] १.६३.६॥

अतसि निरन्तरं गच्छति प्रापयति [अत्र व्यत्ययः] १. ३०. ४॥

अतान् समन्तादतेयुः प्रकाशयेयुः ६. ६७. ६॥

अतारिषुः तरन्तु ३. ३३. १२॥

अतारिष्म संतरेम, प्लवेमहि वा १. ६२. ६।

अतारीत् [अतारीत्] तरत्युल्लंघयति वा [अत्र वर्तमाने लुङ्] १. ३२. ६। तारयति ७. ४. ५॥

अति अतिशयार्थे १. ३२. ८। उल्लंघने १. ६७.७। अंतिके २. २७. १६। व्याप्तिम् ६. ४. ५॥

अति इत्यभिपूजितार्थे नि० १. ३॥

अतिऽआयातम् देशानतिक्रम्याऽऽगच्छतम् ५. ७५. २॥

अतिऽआयाहि अतिवेगेनागच्छोल्लंघय वा ३. ३५. ५॥

अतिऽएतवे एतुं प्राप्तुम् ५. ८३. १०॥

अतिकुल्वम् लोमरहितम् ३०. २२॥

अतिकृशम् बहुत पतले ३०. २२॥

अतिकृष्णम् बहुत काले ३०. २२॥

अतिऽक्रमे अतिक्रमितुमुल्लंघयितुम् १. १०५. १६॥

अतिच्छन्दसम् अतिजगत्यादिप्रतिपादितम् २८. ३४॥ अतिच्छन्दसा अतिजगत्यादिना २८. ४५॥ अतिच्छन्दसे अति जगत्यादिछन्दोऽर्थाय २४. १३॥

अतित्विषन्त प्रदीपयत, प्रकाशिता भवत ५. ५४. १२॥

अतितृणम् अतिहिंसितं, व्याकुलत्वम् ३६. २॥

अतिथिः महाविद्वान् भ्रमणशील उपदेष्टा परोपकारी मनुष्यः १. ७३. १। पूजनीयोऽविद्यमानतिथिः १. १२८. ४। सततं गन्ता ३. २. २। अभ्यागत इव वर्तमानः ४. १. २०। अनियततिथिः

४. ४०. ५ । अविद्यमाननियततिथिः ५. १. ८. । सर्वत्र भ्रमणकर्ता ५. १. ६ । अकस्मादागतः ५. ४. ५ । पूजनीयः आप्तो विद्वान् ५. १८. १ । अविद्यमाना तिथिर्गमनागमनयोर्यस्य ७. ८. ४ । आप्तो विद्वानिव ७. ६. ३. । सत्योपदेशकः ७. ४२. ४ । अविद्यमाना तिथिर्यस्य तद्वन्मान्यः १०. २४. । अविद्यमाना तिथिर्यस्य स राज्यरक्षणाय यथासमयं भ्रमणकर्ता १२. १४ । नित्यं भ्रमणकर्ता विद्वान् १२. ३४ । पूजनीयः ३३. १६ ॥ अतिथिम् नित्यं भ्रमणशीलं सेवितुमर्हम् १. ४४. ४ । न विद्यते नियता तिथिर्यस्य तम् १. ५८. ६ । अतिथिमिव पूजनीयम् १. १२७. ८. । अतिथिवद्वर्त्तमानम् । १. १८६. ३ । अतिथिवत्सत्कर्तव्यम् ३. ३. ८ । पूजनीयमनित्यस्थितिं विद्वांसम् ३. २६. २ । सत्योपदेशकम् ४. २. ७ । सर्वदोपदेशाय भ्रमन्तम् ५. ८. २ । अतिथिमिव ६. १५. ४ । अतिथिमिव सेवनीयम् ७. ३. ५ । अविद्यमाना तिथिर्यस्य तम् ३. १ । अनियततिथिमुपदेशकम् १२. ३० ॥ अतिथीन् अनियततिथीन् ५. ५०. ३ ॥ अतिथेः अविद्यमानतिथेर्विदुषः ५. १ ॥

अतिथिरभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा, परगृहाणीति वा नि० ४.५ ॥

अतिथिऽग्वम् योऽतिथीन् गच्छति गमयति वा तम् १. ५३. १० ॥ अतिथिग्वाय अतिथीनां गमनाय [अत्रातिथ्युपपदाद् गम्धातोर्बाहुलकादौणादिको ड्वः प्रत्ययः] १. ५१. ६ । अतिथीन् गच्छते १. १३०. ७. । योऽतिथीनागच्छति तस्मै ६. २६. ३ ॥ अतिथिग्वस्य अतिथीन् गच्छति गमयति वा येन तस्य १. ५३. ८ । अतिथीन् गच्छतः २. १४. ७ । यो अतिथीनागच्छति तस्य ६. ४७. २२ ॥

अतिथिऽपतिः अतिथीनां पालकः (सं० वि० २५४) अथर्व० ६. ६. ३ ॥

अतिदीर्घम् अतिशयेन दीर्घम् १०. २२ ॥

अतिद्रुतः योऽतिद्रवति सः, अत्यन्तशीघ्रकारी वा १६. ३ ॥

अतिऽनेनीयमानः भृशं न्यायव्यवस्थां प्रापयन् ६. ४७. १६ ॥

अतिऽपारयः योऽत्यन्तं [illegible] सः ६. ४७. ७ ।

अतिऽमतिम् अतिशयिता चासौ मतिश्च ताम् १. १२६. ५ ॥

अतिऽमन्यै अतिमानं कुर्याम् १. १२८. ४ ॥

अतिऽयाजस्य अतिशयेन यष्टुं योग्यस्य यज्ञस्य ६. ५२. १ ॥

अतिऽयाथः अत्यन्तं गच्छतः ५. ७७. ३ ॥

अतिरः [अतिरः] (शत्रुबलं) प्लावयति [अत्र लडर्थे लुङ् । विकरणव्यत्ययेन शपः स्थाने शश्च] १. ११. ७ । हन्याः ४. ३०. ३ । हंसि ४. ३०. ७ ॥

अतिरत् [अतिरत्] सन्तरति प्लावयति [अत्र विकरणव्यत्ययेन शः] १. ३३. १३ । सन्तारयति २. १७. २ । उल्लंघयतु ३. ३४. १ । सन्तरेत् ३. ३४. ५ । तरति ६. ६. १ ॥

अतिरतम् तमो हिंस्तः [अवतिरतितिरिति वधकर्मा निघं० २. १९] १. ६३. ४ । तरेतम् १. ११६. १० । उल्लंघयतम् १. १५२. १ ॥

अतिरन्त तरन्ति ७. ७. ६ ।

अतिरम् सन्तरेयमुल्लंघेयम् ११. ८२ ॥

अतिरुग्भ्याम् रुचीच्छाभ्याम् २५. ३ ॥

अतिरोहति अत्यन्तं वर्द्धते ३१. २ ॥

अतिलोमशम् अतिशयेन लोमयुक्तम् ३०. २२ ॥

अतिऽविध्ये अतिवेद्धुं योग्यौ ५. ६२. ६ ॥

अतिऽव्याधी अतिशयेन व्यद्धुं शत्रूँताडयितुं शीलं यस्य सः २२. २२ ॥

अतिव्रजत्ऽभिः अतिशयेन गमयतृभिर्द्रव्यैः १. ११६. ४ ॥

अतिशुक्लम् अतिश्वेत ३०. २२ ॥

अतिष्कद्वरीम् अतिशयेन या स्कन्दति जानाति ताम् ३०. १५ ॥

अतिष्ठः उत्तिष्ठते ५. ११. ३ ॥

अतिष्ठत् [अतिष्ठत्] तिष्ठति १. ५४. १० । तिष्ठतु १. ११६. १७ । तिष्ठेत् १. १६३. ३ । उत्तिष्ठति ४. १८. ८ ॥ अध्यतिष्ठत् अधिष्ठातृत्वेन वर्तते १७. २० । उपरितिष्ठति २९. १३ ॥

अतिष्ठन् तिष्ठन्ति [अत्र वर्तमाने लङ्] १. ३२. ११ ॥

अतिष्ठन्त स्थिराः भवेयुः [अत्र लिङर्थे लङ्] १. ११. ६ ॥

अतिष्ठन्तीनाम् चलन्तीनाम् १. ३२. १० ॥

अतिसर्पति अतिशयेन गच्छति ११. ७४ ॥

अतिस्थिपः संस्थापयेः १. ५६. ५ ॥

अतिस्थूलम् बहुत मोटे ३०. २२ ॥

अतिस्वतः अत्यन्त ज्ञानवान् १०. ३१ ॥

अतिऽहाय [अतिहाय] अतिशयेन त्यक्त्वा १. १६२. २० ॥

अतिह्रस्वम् अतिशयेन ह्रस्वम् ३०. २२ ॥

अतीतृपन्त अतिशयेन तर्पयत १९. ३६ ॥

अतीतृपाम तर्पयाम ७. २६ ॥

अतीतृपाम अतितृष्णायुक्तान् कुर्याम [अत्र संहितायामिति दीर्घः] ४. ३४. ११ ॥

अतीत्वरीम् अति गमनशीलाम् ३०. १५ ॥

अतुस्तवम् प्रशंसेयम् ३. ५३. १२ ॥

अतूतुजिम् भृशमहिंस्रम् ७. २८. ३ ॥

अतूर्तः अहिंसितः १. १२९. १ ॥ अतूर्तम् अहिंसितम् ४. २२. ४ ॥

अतूर्ण इतिवाऽत्वरमाण इति वा नि० ९. ९ ॥

अतूर्तऽपन्थाः अतूर्तोऽहिंसितः पन्था यस्य सः ५. ४२. १ ॥

अत्वरमाणपन्थाः नि० ११. २० ॥

अतृणत् [अतृणत्] सन्तारयति [अत्र व्यत्ययेन श्ना] २.१५. ३ [हिनस्ति २. २४. ४ ॥

अतृन्दन् हिंस्युः ३. ३१. ५ ॥

अतृपासः अतृप्ताः सन्तः ४. ५. १४ ॥

अतृष्णुवन्तम् भोगेष्वतृप्तम् ४. १९. ३ ॥

अतृष्यन्तीः तृष्णादिदोषरहिताः १. ७१. ३॥

अत्कम् निरन्तरम् १. ६५. ७ । कूपम् १. १२२. २ । अतति व्याप्नोति तं वायुम् ४. १६. १३ । व्याप्तम् ५. ७४. ५ । व्याप्तशीलं वस्त्रम् ६.२९.३ ॥ अत्कान् व्यक्तान् ५. ५५. ६ ॥ अत्कैः अत्तुमर्हैः २. ३५. १४ । अश्वैः ६. ३३. ३ ॥

अत्त [अत्त] भक्षयत १९. ५९ ॥

अत्तवे अत्तुम् २. ३५. ७ ॥

अत्ति [अत्ति] भक्षयति १. ६५. ४ । भुङ्क्ते १. १६४. २० ॥

अत्तु भुङ्क्ताम् १९.५१ । प्राप्नोतु (भूमिका २७६) १९. ५१ ॥

अत्नत [अत्नत] तन्वते [अत्र लडर्थे लुङ् । बहुलं छन्दसीति विकरणाऽभावः । तनिपत्योश्छन्दसि अ० ६. ४. ९९ अनेनोपधा लोपः] १. ३७. १० । प्रयतध्वम् १. ८०. १६ । निरन्तरं गच्छत ५. ४८. २ ॥

अतनिषत नि० १२. ३३ ॥

अत्यः अतति व्याप्नोतीति १.१४९.३ । सुशिक्षितस्तुरंगः २. ४. ४ । व्याप्तिशीलोऽश्वः ३. २. ७ । सततं गन्ता ३. ३८. १ । अतति व्याप्नोति मार्गं सः ५. ३०. १४ । अतति व्याप्नोत्यध्वानमित्यत्योऽश्वः ६. ४. ५ । योऽतिसततंगच्छति सः २२. १९ ॥ अत्या यावततोऽध्वानं व्याप्नुतस्तौ ४.२.३ ॥ अत्याः अतितुं शीलाः १. १६२.१० । नितरां गमनशीला अश्वाः १. १७७. २ । सततगमनाः १. १८१. २ । अतन्ति सर्वत्र व्याप्नुवन्ति त आकाशादयः ३. ५६. २ । सततं गामिनोऽश्वाः ५. ३१. ९ । सकलशुभगुणकर्मव्यापिनः ६. ४४. १९ ॥ अत्यासः ये अतन्त्यध्वानं व्याप्नुवन्ति ते ७. ५६. १६ ॥ अत्यम् अश्वम् १. ५२. १ । व्याप्तिशीलम् १. १२९. २ । अतन्तमश्वम् १. १३५. ५ । व्यापकं शीघ्रगामिनं वायुम् ३. २२. १ । अतति व्याप्नोति तत्र भवम् ९.४४.३। वेगवन्तं वाजिनम् ७. ३. ५ । अतितुं व्याप्तुं योग्यम् १२. ४७ ॥ अत्यान् ये ऽतन्ति मार्गान् व्याप्नुवन्ति तान्

१. १२६. ४. । सुशिक्षयाऽश्वान् ३. ३४. ६ ॥ अत्येन अश्वेनेव वेगेन २. ३४. १३ ॥ अत्यैः अश्वैरिव वेगवद्भिः ६. ३२. ५ ॥ अत्याय सर्वविद्याव्यापनशीलाय ३.७.६॥ अत्यस्य अश्वस्य १. १८०. २ ॥ अत्याऽइव अश्ववत् ५. ५६. ३ ॥ अत्यंऽइव यथाऽश्वम् १. १३०. ६ ॥ अत्यान्ऽइव यथाऽश्वाः सततं सद्यो गच्छन्ति तथा २. ३४. ३ । अश्वानिव ३.३२.६ ॥

अत्यः अश्वनाम निघ० १. १४ । कौ० नि० ९३ ॥ अत्याः अमनाः नि० ४. १३ ॥ (हेऽश्व त्वं) अत्योऽसि । ता. १. ७. १. । तस्मादश्वः पशूनत्येति तस्मादश्वः पशूनां श्रैष्ठ्यं गच्छति । श० १३. १. ६. १ । अत्योऽसीत्याह तस्मादश्वः सर्वान् पशूनत्येति तस्मादश्वः सर्वेषां पशूनाꣳ श्रैष्ठ्यं गच्छति । तै. ३. ८. ९. १ ॥

अत्यंꣳहाः अतिक्रान्तमंहो दुष्कृतं येन सः १७. ८० ॥

अत्र अप्सु भूमौ वा १. ३३. १५ । विद्वत्प्रचारिते रचिते व्यवहारे १.४१.४। अस्यां विद्यायाम् १. ४८. ४ । अस्मिन् व्यवहारे १. ५२. ११ । अस्मिन् जगति १. ९२. १९ । अस्मिन् १. ६७. २ । अस्मिन् गृहाश्रमे १. १२३. ३ । [अत्रा] अस्मिन् विद्यायोगाभ्यासव्यवहारे [अत्र ऋचि तनुघेति दीर्घः] १. १६३. ७ । अस्मिन् जन्मनि १. १६४. ३३ । अासु १. १७३.१२ । राज्यप्रबन्धे २. १५.६। अस्मिन् राजव्यवहारे ३. ३८. ६ । अस्मिन् ब्रह्मणि, विज्ञानव्यवहारे वा ३. ५५. २ । अस्मिन् राज्ये ४. २२. ७ । अस्यां प्रजायाम् ४. ४१. ६ । अस्मिञ्छिल्पविद्याकर्मणि ५. ३१. १० । अस्माकं सत्कारसंयुक्ते व्यवहारे स्थाने वा २. ३१ । येषु ६. ३ । [अत्रा] अस्मिन् सैन्ये [अत्र संहितायामिति दीर्घः] २६. १६ । अस्मिन् राज्यपालनव्यवहारे ३३. ६४ । [अत्रा] अस्मिन् संसारे समये वा [अत्र निपातस्य चेति दीर्घः] ३५. १० ॥

अत्रम् योऽतति सर्वत्र व्याप्नोति तम् ५.३२. ८ ॥ अत्रैः अतन्तीत्याततायिनस्तान् गच्छन्तीत्यत्राः शत्रवस्तैः १. १२६. ८ ॥

अत्रिः सुखानामत्ता भोक्ता [अदधातोरौणादिकस्त्रिः प्रत्ययः] १. १३६. ६ । सततं पुरुषार्थी ५. ७. १० । सकलविद्याव्यापकः ५. ४०. ८ । अविद्यमानत्रिविधदुःखम् ५. ७३. ६ । अत्रिवारम् ५. ७३. ७ । आप्तविद्यः ५. ७४.१ । अविद्यमानत्रिविधदुःखः ५. ७८. ४ ॥ अत्रयः त्रिभिः कामक्रोधलोभदोषैः रहिताः, अविद्यमानत्रिविधदुःखाः ५.२२. ४ । अविद्यमाना त्रिविधगुणानां दोषा

येषु ते ५. ३६. ५ । विद्याविशालाः ५. ४०. ६ ॥ अत्रे । अविद्यमानत्रिविध दुःख । ५. ४०. ७ ॥ अत्रिम् अत्तारम् [अदेस्त्रिनिश्च । उ० ४.६६ । अत्र चकारात् त्रिन्ननुवर्तते । तेनाद्धातोस्त्रिप्] १. ११६. ८ । अविद्यमानान्यात्ममनःशरीरदुःखानि येन तम् १. ११७. ३ । पालकम् ५. १५. ५ । सूर्यम् ६. ५०. १० ॥ अत्रिभ्यः प्राप्तविद्येभ्यः ५. ६७. ५ ॥ अत्रये अविद्यमानानि त्रीणि दुःखान्याध्यात्मिकाऽधिभौतिकाऽधिदैविकानि यस्मिन्सुखे तस्मै १. ५१. ३ । अविद्यमानानि त्रीणिदुःखानि यस्मिन् व्यवहारे तस्मै १. ११२. ७ । अविद्यमाना आत्मिकवाचिकशारीरिकदोषा यस्मिंस्तस्मै १. ११२. १६ । अविद्यमानत्रिविधदुःखाय १. ११८. ७ । न सन्ति त्रीणि भूतभविष्यद्वर्तमानकालजानि दुःखानि यस्य तस्मै सर्वदा सुखसम्पन्नाय १. १८०. ४ ॥ अत्रेः अविद्यमानत्रिविधदुःखस्य ५. २. ६ ॥ अत्रिवत् न विद्यन्ते त्रयं आध्यात्मिकाधिभौतिकाधिदैविकतापा यस्य तद्वत् १. ४५. ३ । अत्रयः सततं गन्तारो विद्यन्ते यस्य तत्सम्बुद्धौ ५. ४. ६ । अविद्यमानत्रिविधदुःखेन तुल्यम् ५. ७२. १ ॥

अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मादत्रिः, न त्रय इति नि० ३. १७ ॥ अत्रिम् अग्निरन्तरौषधिवनस्पतिष्वप्सु तम् नि० ६. ३६ ॥ तद्वै तद्धेवाः । रेतः (वाचः सकाशात् पतितं गर्भं) चर्मन्वा यस्मिन्वा बभुस्तद्ध स्म पृच्छन्त्यत्रैव स्या३दिति ततोऽत्रिः सम्बभूव । श. १. ४. ५. १३ । वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति । श. १४. ५.२.६ ॥

अत्रिणः शत्रवः १.२१.५ ॥ अत्रिणम् अत्ति भक्षयत्यन्यायेन यः स शत्रुस्तम् १.३६ १४ । परपदार्थापहन्तारं शत्रुम् १. ३६. २० । परसुखमत्तारम् [अदेस्त्रिनिश्च । उ० ४.६६ अनेन सूत्रेणाद्धातोस्त्रिनिः प्रत्ययः] १. ८६. १० । शत्रुम् ६. १६. २८ । परस्वापहारकम् ६. ५१. १४ । अत्तुं भोक्तुं योग्यम् १७. १६ ॥

रक्षांसि वै पाप्माऽत्रिणः । ऐ० २. २ । अत्रिणो वै रक्षाꣳसि । ष० ३. १ । पाप्मानोऽत्रिणः । ष० ३. १ ॥

अथ अनन्तरार्थे १. ४. ३ । [अथा] आनन्तर्ये [अत्र निपातस्य चेति दीर्घः] १. १०. ३ ॥

अथर्य ! संशयरहित ! [थर्वतिश्चरतिकर्मा । नि० ११. १८ थर्वति संशेते यः सः थर्य्यो न थर्य्योऽथर्य्यस्तत्सम्बुद्धौ । अत्र वर्णव्यत्ययेन वकारस्थाने यकारः], अहिंसक दयालो स्वामिन् ! (सं०वि० १७८), व्यापक ईश्वर ! (आर्य्य० २८१) ३. ३७ ॥

अथर्यः अहिंसिताः स्त्रियः ४. ६. ८ ॥

अदर्दः अदृणाः नि० १०. ९ ॥

अदर्दृतं भृशं विदारयतम् ४. २८. ९ ॥

अदर्धः भृशं विदारयति [अत्र वर्णव्यत्ययेन दस्य स्थाने धः] २. ३८. ४ ॥

अदर्शि [अदर्शि] दृश्यताम् १. ४६. ११ । दृश्यते १. ९२. ९ ॥

अदहः [अदहः] दह १. ३३. ७ । दहति ७. १. ७ ॥

अदहत् दहति भस्मीकरोति ४. २८. ३ ॥

अदाः प्रदेहि १६. ६६ ॥

अदात् [अदात्] दत्तवान्, ददाति, दास्यति वा [अत्र छन्दसि लुङ् लङ् लिट् इति सामान्यकाले लुङ्] १. ३०. १६ । दूरीकुर्य्यात् ६. २७. ७ । दद्यात् ६. ४७. २४ ॥

अदाभ्यः अविनाशित्वान्नैव केनापि हिंसितुं शक्यः १. २२. १८ । हिंसितुमनर्हः ३. ११. ५ । अहिंसनीयः ४. ५३. ४ । निष्कपटः ५. ५. २ । आश्रयरहितः १८. १६ । अहिंसकत्वाद्दयालुः ३४. ४३. ॥ अदाभ्य ! दभितुं हिंसितुं योग्यानि दाभ्यानि तान्यविद्यमानानि यस्य तत्सम्बुद्धौ [अत्रदभेश्चेति वक्तव्यम् । अ० ३. १. १२४ अनेन वार्तिकेन दभ इति सौत्राद्धातोर्यत्] १. ३१. १० । अहिंसनीय ! ७. १५. १५ ॥ अदाभ्या हिंसितुमयोग्यौ १. १५५. १ । अहिंसनीयौ ५. ७५. ७ ॥ अदाभ्याः अहिंसनीयाः २. ३४. १० । हिंसितुमनर्हाः ३. २६. ४ ॥ अदाभ्यम् अहिंसनीयं सत्कर्तव्यम् ३. ६२. ६ ॥

ते (देवाः) होचुः । अदभाम् वा एनान् (असुरान्) इति तस्माददाभ्यो न वै (असुराः) नोऽदभन्निति तस्माददाभ्यो वाग्वाऽअदाभ्यः । श० ११. ५. ९. ५ । वागेवादाभ्यः । श० ११. ५. ९. १ । प्राण एवाꣳशुश्चक्षुरेवादाभ्यश्चक्षुरेवाꣳशुः श्रोत्रमदाभ्यः । श० ११. ५. ९. २ ॥

अदमानः निर्बन्धनाः ६. २४. ४. । अदातारः ६. ४४. १२ ॥

अदाशत् ददाति ४. ४२. ६ ॥

अदाशन् ददति ७. १६. ६ ॥

अदाशून् अदातॄन् १. १७४. ६ ॥ अदाशुषः अदातुः ७. १६. १ ॥ अदाशुषाम् अदातॄणाम् १. ८१. ६ ॥

अदिक्षि आदिशामि ५. ४३. ९ ॥

अदितिः माता [अत्रादितिर्द्यौरित्यादिना माता गृह्यते] १. ४३. २ । द्यौः १. ७२. ९ । उत्पत्तिनाशरहिता १. ८९. १० । उत्पन्नं वस्तुमात्रं जनित्वं कारणं वा १. ८९. १६ । अन्तरिक्षम् १. ९६. ६ । विश्वे देवाः, सर्वे विद्वांसः १. ९८. ३ । प्रकाशमयी विद्या १. १०६. ७ । विद्वत्पिता, सूर्य्यदीप्तिर्वा १. १०७. २ । अखण्डिता

१. १५३. ३। अखण्डितः १. १६२. २२ । अदीना देवमाता [नि० ४. २२] १. १६१. ६ । द्यौरिव विद्या-गुणप्रकाशकः २. १. ११ । मातेव २. २७. ७। अखण्डितमन्तरिक्षम् ४. १. २०। माता पिता वा ४. ३६. ३। अखण्डितः परमात्मा ४. ५४. ६.। अखण्डसुखप्रदा ५. ४२. २। अविनाशिनी प्रकृतिः ५. ४४. ११। अविद्यमानखण्डनः ५. ४६. ६। मातेव भूमिः ६. ७५. १२ । पितेव वर्तमानः ७. ६. ३। अखण्डिता नीतिः ७. ५१. २। नाशरहितो जगदीश्वरः १. १४ । यज्ञस्यानुष्ठाता यजमानः [अदितिरिति पदनामसु पठितम् निघ० ५. ५ । इति यज्ञस्य ज्ञाता पाल-कोऽर्थो गृह्यते] १. १६ । प्रकाशव-न्नित्या [अदितिर्द्यौरिति प्रकाशकार-कोऽर्थो गृह्यते] ४. २१ । अविद्यमाना दितिर्नाशो यस्याः सा राजपत्नी ६. ३४ । पुत्रः पुत्री च ११. ५६। अध्यापिका ११. ६१ । अखण्डितै-श्वर्यमन्तरिक्षमिवाक्षुब्धा १३. १८। अखण्डिता सभासदलंकृता सभा १७. ४८ । विनाशरहिता, कारणरूपेण नाशरहिताः, स्वात्मरूपेण नित्यम्, कारणरूपेण नित्यम् २५. २३ । कारणरूपेणाविनाशिनी भूमिः २५. ४५ । अखण्डितबुद्धिः ३३. १६ ॥ अदितयः अखण्डिताः ७. ५२. १ ॥ अदिते ! विनाशरहित ! १. ९४. १५ । अखण्डितस्वरूपविज्ञाने ! २. २७. १४ । विदुषि मातः ! २.२६.३ । अखण्डित-विद्य ! ५. ५१. १४ । अखण्डितज्ञा-नैश्वर्य्ये । ६. ५१. ५ । नाशरहिता राजनीतिः ! [अदितिरिति पदनामसु पठितम् निघ० ४. १ । अनेनात्र प्राप्त्यर्थो गृह्यते] ३. २७ । आत्मस्वरू-पेणाविनाशिनि ! ८. ४३ । अखण्डिता-नन्दे ! ११. ५६ । अखण्डितानन्ददे ! ३८. २ ॥ अदितिम् सर्वविद्याप्रकाशव-न्तम् १. ८९. ३ । मातरं पितरं पुत्रं जातं सकलं जगत्तत्कारणं जनित्वं वा १. १०६. १ । दिवम् १. १३६. ३ । नाशरहितम् ४. २. ११ । अख-ण्डिताम् ४. ५५. ३ । आकाशं भूमिं वा ५. ४२. १ । अन्त-रिक्षम् ५. ४६. ३ । अविनाशिकारणम् ९. ६२. ८ । अखण्डितशोभाम् ५. ६६. ३ । अमातरम् ६. ५०. १ । अख-ण्डितां विद्यां पृथिवीं वा ६. ५१. ३ । अखण्डितां नीतिम् ६. ५१. ४ । अखण्डितां कालविद्याम् ७. १०. ४ ।

जनित्वं कामम् ७. १८. ८ । अविनाशिनं पदार्थम् १०. १६ । अखण्डनीयां गाम् १३. ४९ । कारणरूपेण नित्याम् १८. ३० । अविनाशिकां प्रज्ञाम् २५. २ । अखण्डितप्रज्ञम् २५, १६ ॥ अदितये कारणरूपेण नाशरहितायां पृथिव्याम् [अदितिरिति पृथिवीनामसु पठितम् निघ० १. १ । अत्रोभयत्र सप्तम्यर्थे चतुर्थी] १. २४. १ । अखण्डितसुखाय १. २४. १५ । अविनष्टायाऽन्तरिक्षाय ४. ३. ८ । मात्राद्याय ५. ८२. ६ । पृथिवीराज्याय १२. १२ । अविनाशिने २६. २६ ॥ अदित्यै पृथिव्या अन्तरिक्षस्य वा [अत्र षष्ठ्यर्थे चतुर्थी । अदितिरिति पृथिवीनामसु पठितम् निघ० १. १, पदनामसु च निघ० ४. १ । अनेन गमनागमनव्यवहारप्राप्तिहेतुरवकाशोऽन्तरिक्षं गृह्यते] १. ३० । पृथिव्यादिसृष्टये ४. ३० । दिवे विद्याप्रकाशाय ११. ५६ । प्रकाशस्य १४. २५ । पृथिव्यै, नाशरहितायै, जनन्यै २९. २० । अखण्डितायै जनित्वक्रियायै [अदितिर्जनित्वमिति मन्त्रप्रामाण्यादत्रादितिशब्देन गृह्यते] २४. ६ । दिवे प्रकाशाय [अदितिर्द्यौरिति प्रमाणात्] २५. ८ । नाशरहितायै नीत्यै ३८. १ । नित्यविज्ञानम् [अत्र कर्मणि चतुर्थी ... ३८. ३ ॥ अदितेः जातस्यापत्यस... [अदितिर्जातमिति मंत्रप्रमाणात् ... १. ११३. १६ । पृथिव्याः सूर्यस... वा १. १८५. ३ । अखण्डितविज्ञानस... २. २८. ३ । अखण्डितस्यान्तरिक्षस... ४. ४२. ४. । अन्तरिक्षस्याया भूमे... प्रकाशस्य वा ७. ४१. २ । अखण्डिताया... कारणशक्तेः ३. ३३ । अविनाशिन... कारणस्येव मातुः ३४. ३५ ॥ अदित्या... विज्ञानदीप्तेर्वेदवाचः सकाशादन्तरिक्षे मे... मण्डलस्य मध्ये [अदितिर्द्यौरदितिरन्त... रिक्षमिति मंत्रप्रामाण्यात् १. ८९. १०... अदितिरिति वाङ्नामसु पठितम् निघ... १. ११, पदनामसु च निघ० ४... १] १. ११ । पृथिव्याः अन्त... रिक्षस्य १. १४ । प्रकाशस... १. १६ ॥ अदितित्वे अखण्डितत... ७. ५१. १ ॥

अदितिः इति पृथिवीनाम निघ० १. १... कौ० नि० ७२ । वाङ्नाम निघ० १. ११... कौ० नि० १०२ । गोनाम निघ० २. ११... कौ० नि० ९२ । अदीना देवमाता नि० ४. २२... अग्निरप्यदितिरुच्यते नि० ११. २१ ॥ ... (पृथिवी) वाऽअदितिर्मही । श० ६, ५, १. १... इयं (पृथिवी) वै देव्यदितिर्विश्वरूपी... तै० १. ७. ६. ५ । अदित्यै पुनर्वसू (नक्षत्र... विशेषः) तै० १. ५. १. १ । यथा न दे... दितिरनर्वा विश्वस्य भर्त्री जगतः प्रतिष्ठा... पुनर्वसू हविषा वर्धयन्ती । प्रियं देवानामप्येतु...

पाय। । तै० ३. १. १. ४ । अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमश्नात् सा गर्भमधत्त तत आदित्या अजायन्त । गो० पू० २. १५ । अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्या उच्छेषणमददुः । तत्प्राश्नात् सा रेतोऽधत्त । तस्यै धाता चार्यमा चाजायेताम् ।...... मित्रश्च वरुणश्चाजायेताम् । अंशश्च भगश्चाजायेताम् । ....इन्द्रश्च विवस्वांश्चाजायेताम् । तै० १. १. ९ । १-३ । सर्वं वाऽअत्तीति तददितेरदितित्वम् । श० १०. ६. ५. ५ । इयं (पृथिवी) वाऽअदितिरियꣳहीदꣳ सर्वं ददते । श० ७. ४. २. ७ । इयं (पृथिवी) वा अदितिः । कौ० ७. ६. । तै० १. १. ६. ५ । गो० उ० १.२५ । इयं (पृथिवी) वै देव्यदितिः । तै० १. ४. ३. १ । इयं (पृथिवी) ह्यदितिः । ऐ० १. ८ । इयꣳ (पृथिवी) ह्येवादितिः । श० ३. २. ३. ६ । इयं वै पृथिव्यदितिः । श० १. १. ४. ५ । २. २. १. १९ । ३. ३. १. ४ । इयं वै पृथिव्यदितिः सेयं देवानां पत्नी । श० ५. ३.१. ४ । अदितिर्हि गौः । श० २. ३. ४ ३४ । मा गामनागामदितिं वधिष्ट मं० २. ८. १५ । वाग्वाऽअदितिः श० ६. ५. २. २० । अदितिरस्युभयतः शीर्ष्णी (वाक्) इति । श० ३.२. ४. १६ । आदित्या (अदितेरपत्यानि) वा इमाः प्रजाः । ता० १३. ९. ५ । १८. ८. १२ । अथ यत् प्रायणीयेन यजन्ते 'अदितिमेव देवतां यजन्ते' श० ।२. १. ३. २ । तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयः । ऐ० १.७ । ऊर्ध्वामेव दिशं अदित्या प्राजानन्नियं (पृथिवी) वाऽअदितिस्तस्मादस्या ऊर्ध्वा ओषधयो जायन्त ऊर्ध्वा वनस्पतयः । श० ३ २. ३. १९ । सा (अदितिः) ऊर्ध्वां दिशं प्राजानात् । कौ० ७. ६ ॥

अदित्सन्तम् दातुमनिच्छन्तम् ६. ५३. ३ ॥

अदिद्युतत् द्योतते ६. ११. ४ । प्रकाशितवान् प्रकाशयति वा ४. २५ ॥

अदिष्ट दिशेत् ५. ३६. ६ ॥

अदीदेः [अदीदेः] प्रकाशयेः १. १४०. १० ॥

अदीदेत् प्रदीप्येत् [दीदयतीति ज्वलतिकर्मसु पठितम् निघ० १. १६ । अत्र दीदिधातोर्लिङि प्रथमैकवचने शपो लुक्] १. ११२. १७ ॥

अदीधयुः दीपयेयुः ७. ३३. ५ ॥

अदीधयुः दृश्यन्ते [अत्र व्यत्ययेन परस्मैपदम्] ५. ४०. ५ ॥

अदीनाः दीनतारहिताः ३६. २४ ॥

अदीमहि क्षाययेम, नाशयेम [अत्र दीङ्क्षय इत्यस्माल्लिङर्थे लङ्, बहुलंछन्दसीति श्यनो लुक्] ३. ५८ ॥

अदीयम् निःसरेयम् ४. २७. १ ॥

अदुः देवें (सं० वि० १७८) १०. ८५. ४३ । ददति २१. ६१ ॥

अदुःऽकृतौ अदुष्टाचारिणौ ३. ३३. १३ ॥

अदुग्धाःऽइव दुग्धरहिता इव ७. ३२. २२ । अविद्यमानपयस इव २७. ३५ ॥

अदुद्रोत् द्रवयति २. ३०. ३ ॥

अदुवः अपरिचारकाः ७. ४. ६ ॥

अदुहत् परिपूरयति १७. ७४ ॥

अदृꣳहीः प्राप्य वर्द्धस्व ६. २ ॥

अदृꣳहीत् धरेत् २८. २० ॥

अदृंहत् धरति २. १२. २ ॥

अद्द'क्षत [अद्द_क्षत] दृश्यन्ते १. ४८. १३ ॥

अद्द'पितेभिः मोहादिदोषरहितैः १. १४३. ८ ॥ अद्दपिताय अमोहिताय ४.३.३ ॥

अद्द'प्तः मोहरहितः १. ६६. २ ॥

अद्द'प्तऽक्रतुम् अमोहितप्रज्ञम् ६. ४६. २ ॥

अद्द'प्वता हर्षमोहरहितेन १. १५१. ८ ॥

अद्द'श्रन् [अद्द_श्रन्] दृश्यन्ते १. १६१. ५. । पश्यन्ति ५. ३. ११ । समीक्षेरन्, पश्येयुः १६. ७ ॥

अद्द'श्रम् प्रेक्षेयम् [अत्र लिङर्थे लङ् शपो लुक् रुडागमश्च] १. ५०. ३ । पश्येयम् [अत्र लिङर्थे लुङ् । उत्तमैकवचनप्रयोगो बहुलंछन्दसीति रुडागमः । ऋदृशोऽङि गुण इति प्राप्तौ गुणाभावश्च] ८. ४० ॥

अद्द_ष्टऽहा योऽदृष्टमन्धकारं हन्ति सः १. १६१. ८ । यो गुप्तान् विषान् हन्ति सः १. १६१. ६ ॥

अद्द'ष्टाः [अदृष्टाः] ये न दृश्यन्ते ते विषधारिणो जीवाः १. १६१. १ । दृष्टिपथमनागता विषधरा विषा वा १. १६१. ४ । ये न दृश्यन्ते ते १. १६१. ५ । अदृश्यमानाः १. १६१. ७ ॥ अदृष्टान् दृष्टिपथमनागतान् १. १६१. २ ॥

अदे'दिष्ट असमुपदिशत ३. ३१. २१ ॥

अदे'वः प्रकाशरहितः ६. १७. ८ । अवि[द्वा]न् ६. १८. ११ ॥ अदेवम् अवि[द्य]मानो देवः प्रकाशो यस्मिँस्तम् [अत्राऽन्येषामपि दृश्यत इत्यकारस्य दीर्घत्वम्] २. २२. ४ । प्रकाशरहि[त]मविद्वांसं दुष्टं वा ३. ३२. ६ । अदेवान् अविदुषः ३. १. १६ ॥ अदे[व]स्य असुरस्य शत्रुगणस्य १. १७४. ८ ॥ अदेवयोः न देवौ अदेवौ तयोरदेवयोः १. १५०. २ ॥

अदे'वऽत्रात् देवान् त्रायते यस्मात्तद्विरुद्धात् ५. ६१. ६ ॥

अदे'वऽयन्तम् आत्मानमदेवमिच्छन्तम् २. २६. १ ॥

अदे'वानि अशुद्धानि ६. ४८. १० ॥ अदेवेन अशुद्धेन २. २३. १२ ॥

अदे'वीः असुरस्य दुष्टस्य नगरीः १. १७४. ८ । अविदुषीः स्त्रियः ३. ३१. १६ । अशुद्धाः ५. २. ६ । अप्रमदाः क्रियाः ५. २. १० । अदिव्याः ६. २९. ६ । समन्ताद्देदीप्यमाना विदुषीः ६. ४६. १५ ॥

अदे'वृऽघ्नि । हे देवर को दुःख न देने वाली (सत्य० १२१) अथर्व० १४.२.१८॥

अद्धा साक्षात् १. ५२. १३. । प्रसिद्धम् ३३. ३६ ॥

अद्धा इति सत्यनाम निघ० ३ १० । कौ० नि० ७१ ॥

द्रि [अद्रि] अशान १. १६४. ४० । मुंङ्न्द्व ३. ३५. ३ । भक्ष ३. ५२. ७॥

द्भुतऽएनसाम् अद्भुतानि महान्त्येनांसि पापानि येषान्ते ५. ८७. ७ ॥

द्भुतः आश्चर्य्ययुक्तः १. ६४. १२ । आश्चर्य्यगुणकर्मस्वभावः १. ६४. १३॥ अद्भुता आश्चर्य्य रूपाणि [अत्र सर्वत्र शेश्छन्दसीति लोपः] १. २५. ११ ॥ अद्भुत ! आश्चर्य्योत्तमगुणकर्मस्वभाव ! ९. १०. २ । महाशय ! [अद्भुतमिति महन्नाम निघ० ३. ३] ६. १५. २ । आश्चर्य्यकर्मन् ! २७. ३४॥ अद्भुतम् आश्चर्य्यगुणस्वभावस्वरूपम् [अदिभुवो डुतच् । उ० ५. १ अनेन भूधातोरद्युपपदे डुतच् प्रत्ययः] १. १८. ६ । आश्चर्य्यस्वरूपम् १. १४२. १० । आश्चर्य्यभूतमिव वर्तमानम् १. १७०. १ । आश्चर्यगुणकर्मस्वभावम् २७. २० ॥ अद्भुतान् आश्चर्य्यगुणकर्मस्वभावान् ४. २. १२ ॥ अद्भुतस्य आश्चर्य्यगुणकर्मयुक्तस्य सैन्यस्य १. ७७. ३ ॥

अद्भुतम् इति महन्नाम निघ० ३. ३ । कौ० नि० ६८ ॥ अभूतम् नि० १. ६ । महत्त्वम्भूतम् नि० ६. २१ ॥

द्भुतऽक्रतु अद्भुता क्रतुः प्रज्ञा कर्म वा ययोस्तौ ५. ७०. ४ ॥

द्म अत्तुमर्ह कर्मफलम् १. ५८. २ ॥

अद्मऽसत् योऽद्मानि सादयति परिपचति सः १. १२४. ४ । [अद्मसद्वा] योऽद्मेषु भोक्तव्येषु सीदति ६. ४. ४ ॥ अद्मऽसदः येऽद्मऽस्वत्तव्येषु सीदन्ति ते ६. ३०. ३ ॥

अद्मसत् अद्मान्नं भवति अद्मसादिनीति वाऽद्मसानिनीति वा नि० ४. १६ ॥

अद्य अस्मिन् दिने १. १३. २ । [अद्या] अस्मिन्नहनि [अत्र निपातस्य चेति दीर्घः] १. ३४. १ । अस्मिन् वर्तमाने दिने १. ४७. ३ । अस्मिन् वर्तमानसमये १. १२०. ३ । [अद्या] इदानीम् [अत्र संहितायामिति दीर्घः] ३. ३६. ३ । अधुना ६. ३७. १ ॥

अद्यास्मिन् द्यवि नि० १. ६ ॥

अद्यः अत्तुं योग्यः २. १३. ६ ॥

अद्यत् अत्ति २८. २३ ॥

अद्युतः अप्रकाशकान् (भूम्यादीन्) ६. २६. ३ ॥

अद्युम् प्रकाशरहितं व्यवहारम् ७. ३४. १२ ॥

अद्यूत्यै [अद्यूत्ये] द्यूते भवो व्यवहारो द्यूत्यश्छलादिदूषितस्तद्भिन्ने १. ११२. २४ । अविद्यमानानि द्यूतानि यस्मिंस्तस्मिन्भवे ३४. २६ ॥

अद्यौत् [अद्यौत्] विद्योतयति प्रकाशते १. ११३. १४ । प्रकाशयति १. १२२. १५ । द्योतयति १. १२३. ७ । द्योतते ३. ५. ६ ॥

अद्रिः मेघः [अद्रिरिति मेघनामसुपठितम् निघ० १ । १०] १. १४ ॥ अद्री यौ न द्रवतः विनश्यतः कदाचित्तौ १. १०६. ३ । अनिन्दितौ ७. ३६. १ । मेघविद्युतौ ७. ४२. १ ॥ अद्रयः मेघाः, पर्वता वा ३. ३२. १६ ॥ अद्रिम् मेघम् १. ७. ३ । पर्वताकारम् १. ६१. ७ । मेघमिव शत्रुम् ४. २. १५ ॥ अद्रिणा मेघेन सह १. १६८. ६ ॥ अद्रिभिः मेघैः शैलैर्वा १. १२१. ८ । शिलाखण्डादिभिः १. १३०. २ । शिलावयवैरुलूखलादिभिः १. १३५. ५ ॥ अद्रेः मेघात् १. ६३. ६ ॥ अद्रेः शैलस्य १. ११७. १६ । मेघस्य ३. ३१. ६ ॥ अद्रौ शैलादौ घने पदार्थे १. ७०. २ ॥

अद्रि मेघनाम निघ० १ । १० । पर्वतस्य कौ० नि० १०१ ॥ अद्रिरादृणात्येतेन अपि वाऽत्तेः स्यात् नि० ३. ४ ॥ अद्रयः आदरणीयाः नि० ९. ८ ॥ गिरिर्वाऽअद्रिः । श० ७. ५. २. १८ ॥

अद्रिऽजाः योऽद्रेर्मेघाज्जातः ४. ४०. ५ । यो मेघपर्वतवृक्षादीन् जनयति सः १०. २४ ॥

एष (सूर्यः) वा अद्रिजा । ऐ० ४. २० ॥

अद्रिऽजूतः योऽद्रौ मेघे जवति सद्यो गच्छति ३. ५८. ८ ॥

अद्रिऽदुग्धाः अद्रेर्मेघात्पर्वतेभ्यो वा प्रपूरिताः १. ५४. ६ ॥

अद्रिऽबुध्नम् मेघाकाशम् १३. ४२ ॥

अद्रिऽभित् मेघछेत्ता ६. ७३. १ ॥

अद्रिऽवः ! अद्रिमर्वः प्रशंसा धनं भूयान् विद्यते यस्मिन् तत्सम्बुद्धावीश्वर मेघवान्सूर्यो वा [अद्रिरिति मेघनामसु पठितम् निघ० १. १० । अत्र भूम्न्यर्थे मतुप्] १. १०. ७ । बहवोऽद्रयो मेघा विद्यन्ते यस्मिन्सः [अत्र भूम्न्यर्थे मतुप् । छन्दसीर् इति मतुपो मकारस्य वत्वम् । मतुवसोरुः सम्बुद्धौ छन्दसि अ० ८. ३. १ इति नकार स्थाने रूरादेशश्च] १. ११. ५ । मेघवत्पर्वत युक्तराज्यालंकृत ! १. ८०. ७ । बहु मेघयुक्तसूर्यवत्सेनायुक्त ! १. ८०. १४ प्रशस्ता अद्रयो विद्यन्ते यस्य राज्ये तत्सम्बुद्धौ १. १२१. १० । बहुशैल राज्ययुक्त !; अद्रयो बहवो मेघा विद्यन्ते यस्मिन्सूर्ये तदिव तेजस्विन् ! १. १२९ १० । अद्रिवन्मेघ इव वर्तमान ! १. १३२ २ । प्रशस्तमेघयुक्तसूर्यवद्वर्तमान !; प्रशस्ताद्रयः शैला विद्यन्ते यस्य तत्सम्बुद्धौ १. १३३. ६ । अद्रयो बहवो मेघा विद्यन्ते यस्य सूर्यस्य तत्सम्बुद्धौ ३. ३७ । मेघवान्सूर्य इव वर्तमान ! ३. ४१. १ सूर्य इव विद्याप्रकाशक ! ५. ३९. सुशोभित शैलयुक्त ! ५. ३६. प्रशस्ताश्ममयवस्तुयुक्त ! ३७. ३८ ।

अद्रिवः अद्रिवश्च । नि० ४.४ ॥

द्रिसानो । अद्रौ मेघे सानूनि यस्याः सा ६. ६५. ९ ॥

द्रिऽसुतासः अद्रिणा मेघेन सुता उत्पन्नाः १. १३९. ६ ॥

द्रुहः द्रोहरहिताः १. ३. ९ । द्रोहरहितस्य १. १९९. २ । द्वेषरहिताः ३. २२. ४ ॥ अद्रुहा द्रोहरहितावंध्यापकोपदेशकौ ३. ५६. १ । अद्रोग्धव्ये ४. ५६. २ ॥ अद्रुहा द्रोहादिदोषरहिताः [अत्र सुपामित्याकारादेशः] २. ४१. २१. ॥ अद्रुहम् द्रोहरहितम् ६. १५. ७ ॥

द्रुहाणा द्रोहरहितौ ५. ७०. २ ॥

द्रोघः द्रोह रहितः ६. १२. ३ ॥ अद्रोघ । द्रोहरहित । ३. ३२. ९ ॥ अद्रोघम् द्रोहरहितम् ५. ५२. १ ॥ अद्रोघेण अद्रोहेण निर्वैरेण [अत्र वर्णव्यत्ययेन हस्य घः] ३. १४. ६ ॥

द्रोघऽवाचम् अद्रोघा द्रोहरहिता वाग्यस्य तम् ६. ५. १ ॥

द्वयन्तम् अद्वयमिवाचरन्तम् ३. २६. ९ ॥

द्वयाः अविद्यमानं द्वयं यस्मिन् सः १. १८७. ३ ॥

द्वयावी छलकपटादिरहितः ७. ५६. ८१ ॥ अद्वयाविनम् यो द्वयोर्न तं सरलगामिनम् ३. २. १५ । द्वन्द्व- भावरहितम् ५. ७५. ५ ॥ अद्वयाविनः न विद्यते द्वितीयो यस्मिँस्तस्य १. १५१. ३ ॥

अद्वि॒ऽपे॒ण्यः अद्वेष्टा १. १८७. ३ ॥

अद्वे॒षः अविद्यमानो द्वेषो यस्मिन्सः १. २४. ४ । द्वेषभावरहिताः १. १८६. १० । द्वेषरहितान् ५. ८७. ८ ॥ अद्वेषे द्वेष्टुमनर्हे प्रीतिविषये १२. २९ ॥

अध अनन्तरे [अत्र पृषोदरादित्वात् थस्य घः । निपातस्य चेति दीर्घः] ८. ५ । अथ १२. ८ । अथ मंगले [अत्र निपातस्य चेति दीर्घः । वर्णव्यत्ययेन थस्य धश्च] १९. ४५ ॥

अधः अधोगामिनः १६.५७ । अर्वाक् ३३. ७४ ॥

अ॒धः॒ऽअ॒क्षाः अधोऽर्वाचीना अक्षा इन्द्रियाणि येषान्ते [अक्षा इति पदनाम निघ० ५. ३] ३. ३३. ९ ॥

अधत्त [अ॒धत्त] दधाति २. २२. २ । धरति ६. ८. ३ ॥

अ॒ध॒त्तम् धत्तः, धारयत १. ६३. ५ । पोषयतम् १. ११६. ८ । भरतम् १. ११६. १५ । पुष्येतम् १. ११६. १६ । दध्यातम् १. ११७. १७ ॥

अ॒ध॒त्थाः दध्याः ५. ३२. २ ॥

अ॒ध॒मः शब्दैः शिक्षय १.३३. ५ । शिक्षय, अग्निना संयोजयति वा [लोडर्थे

लडर्थे वा लुट्] १. ३३. ६ ।

धम कम्पय १. ५१. ५ ॥

अधमत् धमति निराकरोति ४. ५०. ४ । धमति ३३. ६५ ॥

अधमम् निकृष्टम् १. २४. १५ । नीचं तमोन्धकारम् ६. १६ ॥ अधमान् पापाचारान् ४. २८. ४ ॥

अधमानि निष्कृष्टानि १. २५. २१ ॥

अधयत् धयति पिबति १. १४४. २ ॥

अधरः अधस्थः १. ३२. ६ । नीचः ३. ५३.२१ ॥ अधरम् निम्नम् २.१२.४ । अधोगतिम् ८. ४४ ॥ अधः पतितान् १७. ६३ ॥ अधरात् नीचे से ६. १६. ६ ॥

अधरोऽधोरः, अधोधावतीत्यूर्ध्वगतिः प्रतिषिद्धा नि० २. ११ ॥

अधरकण्ठेन अधस्थेन कण्ठेन २५. २ ॥

अधरा नीचानि १. ३३. १५ ॥

अधराक् दक्षिणस्याः ६. ३१ । अधस्तात् १०. १६ ॥

अधराचीः याऽधरान् नीचानञ्चन्ति ताः १९. ५ ॥

अधराचीनम् योऽधोऽञ्चति तम् २.१७. ५॥

अधर्म्माय धर्माचरणरहिताय ३०. १० ॥

अधवन्त धुन्वन्ति ७. १८. १५ ॥

अधस्तात् अधो निपात्य ३. ३०. १६ ॥

अधरपदम् [illegible] ॥

अधाक् दहति २. १५. ४ ॥

अधात् [अधात्] समन्ताद्धाति १[illegible] १६४. ३३ । दध्यात् ५. ४०. ८ ॥

[सम्] अधात् समादधाति १६. ६३ ॥

अधातम् धारण करो २०. ६६ ॥

अधाताम् दध्याताम् २०. ५७ ॥

अधायि [अधायि] धीयताम् १. १० ४[illegible] ७ । धृता १. ११६. २ । ध्रियते १[illegible] १६२. ७ । धीयते ३. ५. ३ ध्रियेत ७. ३४. १४ ॥

अधायि अध्यायि नि० ६. २२ ॥

अधारयः धारयन् [अत्रानञुपपदात् धारि[illegible] पारीति शः प्रत्ययः] १. ५१. ४ [illegible] धारय १. ५२. ८ । धरति २.१३.७ [illegible] धारयसि ६. १७. ७ । धरितवानसि [illegible] (भूमिका १४४) ८. १२. ३० ॥

अधारयत् [अधारयत्] धारयेत् १. ६२[illegible] ७ । धारयति २. १७. ५ । धारयत[illegible] १३. २४ ॥

अधारयतम् धारयतम् ५. ६२. ३ ॥

अधारयन् धारयन्तु ३. २. ७ । धारयन्ति[illegible] ३३. ७५ ॥

अधारयन्त धारयन्ति [अत्र लडर्थे लङ्[illegible] १. २०. ८ । धृतवन्तः १.१०३.१ [illegible]

अधि उपरितः १. ६. ६ । अधिकार्ये १[illegible] ६. १० । उपरान्तसमये १. ४८. ७ [illegible] अध्यक्षतया १. ८४. १७ । आधेयत्वे[illegible]

१. ८८. ३ । आधारार्थे १.१२६.१ । अनन्तरार्थे २. ३०. ३ । उत्कृष्टे ३. १६. ५ । मध्ये ४. ३०. १२ । अधिकार-युक्त (सं० वि० १६५) १०. ८९. ४६ । [अधीत्युपरिभाव-मैश्वर्यं प्राह नि० १. ३] १. २२ । सम्मुख १३. १३ । अधिष्ठातृभावे १६. ५८ ॥

अधीत्युपरिभावमैश्वर्यं वा नि० १. ३ ॥

अधिऽअतिष्ठत् अधिष्ठाता भवति १.१६३.६।

अधिऽअधत्तम् उपरि धरतम् १.११७.८॥

अधिऽअस्थाः उपरि तिष्ठन्तीति १.४६.२॥

अधिऽअस्थात् अधितिष्ठति ५. ३१. १ ॥

अधिऽआसते तिष्ठन्ति १. २५. ६ ॥

अधिऽइतौ अध्ययने २. ४. ८ ॥

अधिऽइथ स्मरण करो ७. ५६. १५ ॥

अधिऽइमसि सर्वोपरिविराजमानं प्राप्नुमः १. ८०. १५ ॥

अधिकल्पिनम् अधिगतसामर्थ्ययुक्तम् ३०. १८ ॥

अधिऽक्षियन्ति आधाररूपेण निवसन्ति १. १५४. २ ॥

अधिऽगर्त्यस्य अधिकसुन्दरे गर्ते गृहे भवस्य ५. ६२. ७ ॥

अधित [अधित] दधाति, १. १४४. ५ । दध्यात् ११. ४६ ॥

अधिथाः धारयेथाः ४. १७. ६ । दध्याः ६. ३१. १॥

अधिपतिः अधिष्ठाता १४. ६ । पत्युः पतिः, सर्वेषां स्वामी वा १४. २८ । उपरिष्टात्पालकः १५. १० । द्योतकानामधिष्ठाता [सूर्य्य] १५. ११॥ अधिपतयः अधिष्ठातारः १५. १० । उपरिष्टात्पालकाः १५. ११ । स्वामिनः १५. १२ ॥ अधिपतिना अधिष्ठात्रा १९. ६ ॥ अधिपतये सर्वाधिष्ठातृणामुपरि वर्तमानाय ६. २० । पतीनां पालकानामधिष्ठात्रे १८. २८ । सर्वस्वामिने २२. ३० । सर्वाधिष्ठात्रे २२. ३२ ॥

प्रजापतिर्वाऽअधिपतिः । श० ८. २. ३. १२ ॥

अधिपत्नी गृहेऽधिकृता स्त्री १४. १३ । अधिपतिसहिता १४. २६ । सर्वासां दिशामुपरि वर्तमाना १९१४॥ अधिपत्नी अधिष्ठात्र्यौ १४. ३० ॥ अधिपत्नीम् अधिष्ठातृत्वेन पालयिकाम् १४. ५ ॥

अधिपाः अधिकः पालकः १२. ५८ ॥

अधिऽभोजना अधिकानि भोजनानि ६. ४७. २३ ॥

अधिऽमन्थनम् उपरिस्थं मन्थनम् ३. २९. १ ॥

अधिऽराजः राजाधिराजः (भूमिका २३४), सर्वोपरि विराजमान (सत्य० १४५)

अथर्व० ६. ६८. १ ॥ अधिराजम् सर्वेषामुपरि राजमानम् ३४. ४६ ॥

अधिऽवक्ता अधिकं वक्तीति सः १. १००. १६ । यथावदनुशासिता १.१०२.११ । सर्वेषामुपर्यधिष्ठातृत्वेन वर्तमानः सन्नध्यापकः १६. ९ ॥ अधिऽवक्तारम् सर्वेषामुपर्युपदेशकम् २. २३. ८ ॥

अधिषवणे सोमलताद्योषधिसाधके १८.२१॥

अधिष्ठानम् अधितिष्ठन्ति यस्मिन्निति तत् ७. १३ । आधार इव ७. १८ ॥

अधिऽसवन्या अधिगतं सुन्वन्ति याभ्यान्तेऽधिषवणी तयोर्भवे [अत्र भवे छन्दसीति यत्] १. २८. २ ॥

अधीमहि प्राप्नुयाम ४. ३२. १६ ॥

अधीयन्त अधीयताम् १४. २८ ॥

अधीरा धैर्यरहिता १. १७९. ४ ॥

अधीवासम् अधिवासमिव वासादिकम् १. १४०. ६ । अधि उपरि वास आच्छादनं यस्य तम् १. १६२. १६ । ह्युपरि स्थापनीयम् २५. ३६ ॥

अधुः आच्छादयन्ति ४. १३. ४ । दध्यासुः १०. ६४ ॥

अधुक्षः दोग्धुमिच्छसि [अत्र लडर्थे लुङ्] १. ३ ॥

अधुक्षत् प्रपिपूर्द्धि [अत्र लोडर्थे लुङ्] १. ३३. १० ॥

अधुक्षन् प्रपूरयन्तु २. ३६. १ ॥

अधू नुतम् कंपाती हैं २. १२. ६ ॥

अधूनोत् कम्पयति १. ५९. ६ ॥

अधूर्षत हिंसन्तु ५. १२. ५ ॥

अधूषत दूरीकुरुत १. ८२. २ । कम्पय[...] [अत्र लडर्थे लुङ्] ३. ९१ ॥

अधृष्टम् अधर्षितम् ६. ६७. २ ॥

अधृष्टाः [अधृष्टासः] अप्रगल्भाः ६. ५[...] ४ । अधर्षणीयाः ६. ६६. १० ।

अधेनुम् अदोहयित्रीम् १. ११७. २० ॥

अधोक् प्रायात् ४. १६. ७ ॥

अधोरामः अधः क्रीडी २६. ९८ ॥ अधो[...] रामौ अधो रमणं ययोस्तौ २४. १[...] अधो भागे श्वेतवर्णौ २६. ५६ ॥

अध्यक्षाय अधिरुपरिभावेऽक्षणोऽक्षणाय; अधि[...] वा यस्य यस्माद्वा तस्मै ४. १६ ॥

अध्यतिष्ठत् अधिष्ठातृत्वेन वर्तते १७. २०[...] उपरि तिष्ठत् २६. २० ॥

अध्यालोहकर्णैः अधिगतश्च तल्लोहश्च सुव[...] तद्वद्वर्णोऽस्य सः [लोहमिति हिरण्य[...] नाम निघ० १. २] २४. ४ ॥

अध्येति स्मरति ३. ४२ ॥

अध्यैरयन्त सर्वत्र स्वेच्छया विचरन्ति ३२[...] १० ॥

अध्रजन् धावन्ति १. १६६. ४ ॥

अध्रिगावः अधृता गावो रश्मयो यैस्ते १[...] ६४. ३ ॥

अध्रिऽगुः सत्यगतिः ६. ४५. २० ॥ अध्रिगू अधिकगन्तारौ ५.७३.२ ॥ अध्रिगो ! योऽध्रीन् मंत्रान् गच्छति जानाति तत्सम्बुद्धौ ३. २१. ४ । योऽध्रीन् धारकान् गच्छति तत्सम्बुद्धौ ९. १०. १ ॥ अध्रिऽगुम् इन्द्रं परमैश्वर्यवन्तम् [इन्द्रोऽप्यध्रिगुरुच्यते नि० ५. ११] १. ११३. २० ॥ अध्रिगवे शत्रुभिरसहमाना वीरास्तान् गच्छति प्राप्नोति तस्मै १. ६१. १ ॥

अध्रिगुर्मन्त्रो भवति गव्यधिकृतत्वात् । अपि वा प्रशासनमेवाभिप्रेतं स्यात्तच्छब्दवत्त्वात् । अग्निरप्यध्रिगुरुच्यते । इन्द्रोऽप्यध्रिगुरुच्यते । नि० ५. ११ ॥ शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगवेति । अध्रिगुर्वै देवानां शमिता ऐ० २. ७ ॥ अध्रिगुश्चापापश्च । उभौ देवाना शमितारौ । तै० ३. ६. ६. ४ ॥

अध्रिजः अध्रिषु धारेकषु जातः ५. ७. १० ॥

अध्रुक् [अध्रुक्] यो न द्रुह्यति ६. ५. १ । यःकश्चिन्न द्रोग्धि ६. ११. ३ । द्रोहरहितः ६. ५१. ५ ॥

अध्वनयत् धुनयति ६. १८. १० ॥

अध्वपते ! धर्म्यव्यवहारमार्गपालयितः ! ९.३३॥

अध्वरः यज्ञः २. ८ । अहिंसनीयो व्यवहारः १५. ३८ ॥ अध्वरम् हिंसादिदोषरहितम् [ध्वरति हिंसाकर्मा तत्प्रतिषेधो निपातः निघ० १. ७] १. १. ४ । अहिंसनीयं सुखहेतुम् १. १४. ११ । क्रियाजन्यं जगत् १. १८. ८ । यज्ञम् १. १६. १ । अहिंसनीयं सुखरूपं यज्ञम् १. २३. १७ । त्रिविधं यज्ञम् १. २६. १ । अहिंसकम् १. ७४.१ । अग्निहोत्रादिकमिव विद्याविज्ञानवर्द्धकं यज्ञम् १. ७४. ४ । व्यवहारयज्ञम् १. ६३. १२ । अध्ययनाध्यापनाख्यमहिंसनीयं यज्ञम् १. १०१. ८ । राज्यपालनाख्यं यज्ञम् १. १३५. ३ । अहिंसादिलक्षणं धर्मम् १. १३५. ७ । अहिंसाधर्मयुक्तं व्यवहारम् १.१५१.३ । अहिंसनीयं शिल्पसाध्यं व्यवहारम् २. २. ५ । अहिंसादिव्यवहारयुक्तं यज्ञम् ३. २४. २ । अहिंसादिलक्षणं धर्म्यं व्यवहारम् ३. २८. ९ । पालकं व्यवहारम् ३. ५४. १२ । न्याय व्यवहारम् ४. ६. ७ । सत्कर्तव्यं व्यवहारम् ४. १५. २ । अहिंसामयं यज्ञम् ४. ३७. १ । अहिंसनीयं गृहाश्रमादिव्यवहारम् ७. २. ७ । उपदेशाख्यं यज्ञम् ७. ४२. ५ । क्रियामयं यज्ञम् ३. ११ । गृहाश्रमक्रियासिद्धिकरं यज्ञम् ६. २४ । अविनश्वरं यज्ञम् ६. २५ । निष्कौटिल्यम् ६. ३० । अहिंसनीयराज्यव्यवहारम् २३. १५ ॥ अध्वरान् अहिंसनीयान् गृहाश्रमव्यवहारन् १.४८. ११ । अहिंसकान् १. १३५. ५ ॥ अध्वरा अहिंसनीयान् यज्ञान् २१.४७॥

अध्वराय अहिंसारूपयज्ञाय ३. २. ७। हिंसारहिताय धर्म्याय व्यवहाराय ७. ४१. ६। अहिंसाख्याय शिल्पमयाय यज्ञाय ३३. ७५ ॥ अध्वरस्य हिंसितुमनर्हस्य १. १२८. ४। अहिंसामयस्य शिल्पव्यवहारस्य ३. २३. १। न्यायव्यवहारस्य ३. ६०. ७। अहिंसनीयस्य राज्यस्य ४.३.१। अहिंसनीयस्य धर्मस्य व्यवहारस्य ४. ६. १। अहिंसामयस्य यज्ञस्य ५. ४६. ४। सर्वव्यवहारस्य ७. ११. १। यज्ञस्य मध्ये ७. १४. २। अहिंसनीयस्य वर्द्धितुं योग्यस्य यज्ञस्य १२. ११० ॥ अध्वराणाम् यज्ञानां धार्मिकाणां मनुष्याणाम् वा १. १.८। राज्यपालनाग्निहोत्रादिशिल्पान्तानां यज्ञानाम् १. २७. १। अहिंसनीयानां यज्ञानाम् १. ४४. २। यज्ञानाम् १. ४४. ६। अहिंसनीयव्यवहाराख्यकर्मणाम् १. ४५. ४। यज्ञ और युद्धों के (आर्य्य० ८६) ८. ११. २। अग्निहोत्राद्यश्वमेधान्तानां शिल्पविद्यासाध्यानां वा सर्वथारक्ष्याणां यज्ञानाम् ३. २३ ॥ अध्वरे अहिंसनीये कर्तव्ये वा यज्ञे १. १२.७। अनुष्ठातव्ये क्रियासाध्ये यज्ञे १.१९.७। उपासनाक्रियासाध्ये यज्ञे १. १६. ३।

संगते शिल्पक्रियासिद्धे याने १.४७.२ अहिंसनीये धर्म्ये यज्ञे १. ५७. ३ अहिंसनीयेऽहातव्य उपासनाख्ये कर्त संग्रामे वा १.६४.१२। ज्ञानादि यज्ञ (आर्य्य० १४५) १. ६४. १३ अहिंसनीये प्रजापालनाख्ये व्यवहारे १२१. १। अविद्यमानो ध्वरो हिंस यस्मिन् रक्षणे १.१२१.७। सङ्गते संस ३. २७. १२। दयामये व्यवहारे २८. ३। सङ्गन्तव्ये व्यवहारे ३.५ ४। सत्ये व्यवहारे ४. ५५. १ शिल्पादिव्यवहारे ५.२८. १। सर्वथा ऽनुष्ठातव्ये व्यवहारे ६. १६. २ अहिंसादिलक्षणे योगे ६. १६. ४६ अहिंसनीये विद्याप्राप्तिव्यवहारे ६. ५ ६। अहिंसनादिलक्षणे धर्माचरणे १६. ९। मित्रभावेऽहिंसनीये य वा २. ४ ॥ अध्वरेषु अनुष्ठातव्ये कर्ममयेषु यज्ञेषु १. ९८. ७ मित्रत्वादिगुणयुक्तव्यवहारेषु विधियज्ञे वा ३. २७. ८। संगतिमयेषु व्यवहारे ३. २६. ७। अहिंसनीयेषु विद्याप्राप्ति कर्मसु ३. ६२. ५। गृहाश्रमव्यवहार ऽनुष्ठानेषु ४. ५१. २। अहिंसनीये प्रजापालनन्यायव्यवहारेषु ९. ४. १ अहिंसनीयेषु धर्म्येषु व्यवहारेषु ९.१४ २। राज्यपालनादिव्यवहारेषु ५. २८

४ । अहिंसायुक्तेषु संग्रामादिव्यवहारेषु ७. १. १६ । अग्निहोत्रादिक्रियामयव्यवहारेषु ७. १०. ५ । उपासनाऽग्निहोत्राद्यश्वमेधान्तेषु शिल्पविद्यान्तर्गतेषु वा यज्ञेषु ३. १५ ॥

अध्वरः यज्ञनाम निघं० ३. १७ । कौ० नि० ९५ ॥ अध्वरम् अन्तरिक्षनाम निघ० १. ३ ॥ अध्वर इति यज्ञनाम; ध्वरति हिंसा कर्मा तत्प्रतिषेधः नि० १. ७ ॥ अध्वरम् यज्ञम् नि० ८. ६ ॥ अध्वरेषु यज्ञेषु नि० १०. १९ ॥ देवान्ह वै यज्ञेन यजमानान्त्सपत्ना असुरादुधूर्षाञ्चक्रुःतेदुधूर्षन्त एव न शेकुर्धूर्षितुं तेपराबभूवुस्तस्माद्यज्ञो ऽध्वरो नाम । श० १. ४. १. ४० । अध्वरो वै यज्ञः । श० १. ४. १. ३८, ३९ । १. २. २. ५ । १. ४. ५. ३ । २. ३. ४. १० । ३. ५. ३. १७ । ३. ९. २. ११ । प्राणोऽध्वरः । श० ७. ३. १. ५ । रसो ऽध्वरः । श० ७. ३. १. ६ ॥

अध्वरकृतम् अध्वरं करोति येन सामग्रीसमूहेन तम् । [अत्र कृतो बहुलमिति वार्तिकेन करणे क्विप् । अध्वरो वै यज्ञो यज्ञकृतम् श० १. २. २. ५] १. २४ ॥

अध्वरस्यऽइव अहिंसामयस्य यज्ञस्येव ६. ६६. १० ॥

अध्वरऽश्रियः या अध्वरस्य अहिंसनीयस्य चक्रवर्तिराज्यस्य लक्ष्मीस्ताः । १.४७. ८ ॥ अध्वरऽश्रियम् याऽध्वराणां अहिंसनीयानां यज्ञानां श्री शोभा ताम् १. ४४. ३ ॥

अध्वराऽइव अहिंसनीयौ यज्ञाविव ३. ६. १० ॥

अध्वरिऽयताम् आत्मनोऽध्वरमिच्छतमास्माकम् [अत्र न छन्दस्य पुत्रस्य अ० ७. ४. ३५ । अपुत्रादीनामिति वक्तव्यमिति वचनादीकारनिषेधो न भवति । वा छन्दसि सर्वे विधयो भवन्तीति नियमात् कव्यध्वर पृतनस्यर्चिलोपः । अ० ७. ४. ३९ इत्यकारलोपोऽपि न भवति] १. २३. १६ । य आत्मनोऽध्वरमहिंसायज्ञं कर्तुमिच्छन्ति तेषाम् ४. ६. ५ ॥

अध्वरिऽयसि आत्मनोऽध्वरमहिंसामिच्छसि २. १. २ ॥

अध्वर्यन्ता आत्मनोऽध्वरमिच्छन्तौ १.१८१. १. ॥ अध्वर्यन्तः आत्मनोऽध्वरमिच्छन्तः १७. ५६ ॥

अध्वर्युः अध्वरस्य योजको नेता कामयिता वा [अत्राध्वरशब्दोपपदाद्युज् धातोः बाहुलकात् क्युः प्रत्ययष्टिलोपश्च । अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्यनेताऽध्वरं कामयत इति वा । अपि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम । ध्वर इति हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके नि० १.७] १. ९४. ६ । आत्मनोऽध्वरमहिंसनमिच्छुः १. १६३. ५ । यज्ञकर्ता २. ५. ६ । आत्मनोऽध्वरमहिंस-

नीयं व्यवहारं कर्तुमिच्छुः ४. ६. ४. । अध्वरं शिल्पविद्यां कामयानः ६. ७३. २ । अहिंसायज्ञमिच्छुः २५. २८ ॥ अध्वर्यू आत्मनोऽध्वरमहिंसनीयं गृहाश्रमाख्यं यज्ञमिच्छू १४. १ । आत्मनोऽध्वरमहिंसामिच्छन्तौ ३३. ७२ ॥ अध्वर्यवः अध्वरमहिंसाधर्मकाममिच्छवः १. १५३. १ । आत्मनोऽध्वरं कामयमानाः २. १४. १ । सर्वस्य प्रियाचरणाः २. १४. ४ । युद्धयज्ञसिद्धिकराः २. १४. ६ । सर्वहितं कामयमानाः २. १४. ८ । पुरुषार्थिनः २. १४. ६ । महौषधिनिष्पादकाः २. १४. १० । राजसम्बन्धिनः २. १४. ११ । विद्यायज्ञसम्पादकाः ५. ३१. १२ । आत्मनोऽहिंसाख्ययज्ञमिच्छन्तः २३. ४२ ॥ अध्वर्यो । अहिंसक । ३. ४६. ५ । योऽध्वरं यज्ञं युनक्ति तत्सम्बुद्धौ २०. ३१ । योऽध्वरमिवाचरति तत्सम्बुद्धौ २३. २१ ॥ अध्वर्युभिः य आत्मानमध्वरमिच्छन्ति तैः १. १९५. २. । अध्वरं यज्ञमिच्छद्भिः १. १३५. ६ । आत्मनो हिंसामनिच्छुभिः २. ३७. २ । अध्वरं निष्पादकैः ३. ७. ७. । हिंसाऽन्यायवर्जितैः ३३. ७० ॥

अध्वर्योः य आत्मनोऽध्वरमिच्छति तस्य ३. ३५. १० ॥

अध्वर्युः अध्वरयुः । अध्वरं युनक्ति, अध्वरस्य नेता, अध्वरं कामयत इति वा । अपि वाऽधीयाने युरुपबन्धः नि० १. ८. ॥ पूर्वार्धो वै यज्ञस्याध्वर्युर्जघनार्धः पत्नी । श० १. ९. २. ३ । प्रतिष्ठा वा एषा यज्ञस्य यदध्वर्युः तै० ३. ३. ८. १० । वायुर्वा अध्वर्युरधिदैवं प्राणोऽध्यात्मम् । गो० पू० ४. ५ । वह्निरध्वर्युः । तै० १. १. ६. १० । मनो वाऽध्वर्युः श० १. ५. १. २१ । श० १२. १. १. ५ । चक्षुरध्वर्युः कौ० १७. ७ । राज्यं वा अध्वर्युः । तै० ३. ८. ५. २ । प्राणोदानौ वा अध्वर्यू । श० ५. ५. १. ११ । अश्विनावध्वर्यू । ऐ० १. १८ । श० १. २. २. ४ । १. ९. ३. ३ । गो० उ० २. ६ । अश्विनौ हि देवानामध्वर्यू । तै० ३. २. २. १ । प्राणापानावेवाध्वर्यू । गो० पू० २. ११ । वायुर्वा अध्वर्युः । गो० पू० २. २४ । वायुरध्वर्युः गो० पू० १. १३ । अध्वर्युरेव महः । गो० पू० ५. १५ । तमेतमग्निरित्यध्वर्यव उपासते श० १०. ५. २ २० । प्रतीच्यध्वर्योः श० १३. ५. ४. २४ । पर्णमयेनाध्वर्युरभिषिञ्चति तै० १. ७. ८. ७ ॥

अध्वस्मऽभिः अध्वस्तैः २. ३४. ५ । अपतनशीलैर्गुणकर्मस्वभावैः २. ३९. १४ ॥

अध्वस्मानः ये नाधः पतन्ति । [ध्वसु अधः पतने] १. १३६. ४ ॥

अध्वा मार्गः १. ११३. ३ । सन्मार्गरूपः १. १७३. ११ ॥ अध्वानम् धर्ममार्गम् १. ३१. १६ ॥

अध्वानम् अन्तरिक्षनाम निघ० १. ३। कौ० नि० ९८ ॥ योजनशो हि मिमाना अध्वानं धावन्ति श० ५. १. ५. १७ ॥

अनः शकटम् २. १९. ६ । शकटमिव ४. ३०. ११ ॥

अनो वा वायुरनितेः, अपि वोपमार्थे स्यात् अनस इव शकटादिव। अनः शकटम् आनद्धम् अस्मिंश्चीवरम्, अनितेर्वा स्याज्जीवनकर्मणः उपजीवन्त्येनत्। मेघोऽप्येतस्मादेव। नि० ११. ४३ ॥ भूमा वाऽअनः। श० १. १. २. ६। यज्ञो वाऽअनः। श० १. १. २. ७। ३. ९. ३. ६ ॥

अनक् प्रकटीकरोति २. १५. ७ ॥

अनक्ति [अनक्ति] कामयते १. १५३. २ ॥

अनक्तु कामयताम् ७. ४३. ३ । प्रकट करे २. ३. २ । सिञ्चतु ६. २ । संमुनक्तु ३७. ११ ॥

अनग्नाः सर्वतो वस्त्रभूषणादिभिराच्छादिताः ३. १. ६ ॥

अनभिऽत्राः अविद्यमानमभिवरेण रक्षकाः १. १८९. ३ ॥

अनभिस्वात्ताः अविद्यमानाग्निविद्याग्रहणा ज्ञाननिष्ठाः पितरः १९. ६० । ये वायुजलभूगर्भादिविद्यानिष्ठाः (भूमिका २७८) १९. ६० ॥

अनज उच्चरत, उपदिशत [अत्र व्यत्ययेनैकवचनम्] ५. ५४. १ ॥

अनजन् कामयेरन् ३. १९. ५ ॥

अनड्वान् वृषभः १४. १० । हलशकटादिवहनसमर्थः १८. २७ ॥ अनड्वाहम् योऽनांसि शकटानि वहति तद्वद्वर्तमानम् ३९. १३ ॥

(सूर्यः) श्वेत इव सौर्यं (सूर्यः) उदेतास्ते य यन्भवति तस्माच्छ्वेतो ऽनड्वान्दक्षिणा । श० ५. ३. १. ७। अग्निरेष यदनड्वान् । श० ७. ३. २. १ । आग्नेयो वाऽनड्वान् । श० ७. ३. २. १६ । १३. ८. ४. ६ । वह्निर्वा अनड्वान् ॥ तै० १. १. ६. १० । १. ८. २. ५ ॥

अनत् प्राणत् १. १६४. ३० ॥

अनदतीः अविद्यमाना अतीव सूक्ष्मा दन्ता यासां ताः ३. १. ६ ॥

अनुनुऽदः अप्रेरितः २. २१. ४ । योऽनुगतं न ददाति तस्य १. ५३. ८ । येऽनुददति तेऽनुदा न विद्यन्तेऽनुदा यस्य सः २. २३. ११ ॥

अननुऽभूतीः अनुभवरहितान् ६. ४७. १७ ॥

अनन्तः अविद्यमानान्त आकाशः १. ११३. ३ । निःसीमः ६. ६१. ८ ॥ अनन्तम् देशकालवस्तुपरिच्छेदशून्यम् १. ११५. ५ । अविद्यमानो अन्तो यस्य तत् ३३. ३८ ॥

अनन्तो द्यावापृथिव्योः कौ० नि० ६० ॥

अनन्तऽशुष्माः अनन्तं शुष्मं बलं येषान्ते १. ६४. १० ॥

अनपऽच्युतः अपत्नयरहितः ४. ३१. १४ ॥

अनपत्यानि अविद्यमानान्यपत्यानि येषु तानि ३. ५४. १८ ॥

अनपऽवृज्यान् अपवर्जितुमनर्हान् १. १४६. ३ ॥

अनपऽवृत् यो नापवृणोति ६. ३२. ५ ॥

अनपऽव्ययन्तः अपव्ययमप्राप्नुवन्तः ६. ७५. ७ । अपव्ययमप्रापयन्तः २९. ४४ ॥

अनपऽस्फुरन्तीम् दृढां निश्चलां प्रज्ञां सम्पादयन्तीम् ४. ४२. १० । विज्ञापयित्रीमिव योगविद्याजन्यां वाचम् ७. १० ॥

अनपऽस्फुराम् निश्चलाम् दृढाम् ६. ४८. ११ ॥

अनपिऽनद्धम् अनाच्छादितम् ६. ७२. ४ ॥

अनपेताः नापेताः पृथग्भूताः १८. ६५ ॥

अनप्नसः अविद्यमानमप्नः कर्म यासां ताः क्रियाः ३. ३३. ९ ॥

अनप्नसः अप्न इति रूपनाम आप्नोतीति सतः। नि० ३. ११ ॥

अनभिऽद्रुहा द्रोहकर्मरहितौ २. ४१. ५ ॥

अनभिम्लातऽवर्णः न विद्यतेऽभितो म्लातो हर्षक्षीणो वर्णो यस्य सः २. ३५. १३ ॥

अनभिशस्ति यन्नाभिशस्यतेऽभिहिंस्यते तत् ५. ९ ॥

अनभिशस्ता: प्रशस्यनाम निघ० ३. ८ ॥

अनभिशस्तेन्यम् यदनभिशस्तेऽविद्यमानहिंसने नयति तत् ५. ५ ॥

अनभीशुः नियामकरश्मिरहितः १. १५२. ५ । अविद्यमानावभीशू बलयुक्तौ बाहू यस्य सः [अभीशू इति बाहुनाम निघ० २. ४] ६. ६६. ७ ॥

अनमत् [अनमत्] नमति ६. १७. ९ । नमतु २. २४. २ ॥

अनमम् नमामि १. १६५. ६ ॥

अनमन्त नमन्ते [लडर्थे लुङ्] ८. ४६ । नमन्तु १७. २४ ॥

अनमयत् नम्रान् कारयेत् ७. ६. ५ ॥

अनमस्यन् प्रह्वीभूता भवन्ति ६. ९. ७ ॥

अनमित्रम् अविद्यमानशत्रुः १८. ६ ॥

अनमीवः अविद्यमानरोगः ७. ४६. २ । अनमीवाः अमीवो व्याधिर्न विद्यते यासु ताः [अम रोगे इत्यस्माद्बाहुलकादौणादिक ईवन् प्रत्ययः] १. १ ॥

अनम्नत नम्रता को धारण करे १३१. १ ॥

अनयः उन्नेयः २. १३. १२ । नयसि ६ १. ७ ॥

अनयत् [अनयत्] प्राप्त करावे ६. ४५ १ । नयति ६. ५७ ४. ॥

अनयन् [अनयन्] नयन्ति ६. १५ १७ । प्राप्नुवन्ति १०. १ ॥

अनयन्त [अनयन्त] नयन्ति ४. ३ ७. । प्राप्नुयुः ३. ७. ६ ॥

अनयम् प्रापयेयम् ४. २६. २ ॥

अनुर्वा अविद्यमानाश्वः १. ६४. २। अविद्यमाना अश्वा यस्याः सा २. ४०. ६ ॥ अनर्वाणः अविद्यमानमर्वधर्मादन्यत्र गमनं येषां ते १. १६०. ६ ॥ अनर्वन् अनर्वणोऽविद्यमानज्ञानाय [सुपां सुलुक् इति विभक्तिलुक्] १. ११६. १६ ॥ अनर्वाणम् अविद्यमानाऽर्वाणोऽश्वा यस्मिँस्तम् [अर्वेत्यश्वनामसु पठितम् निघ० १.१४] १. ३७. १। अग्न्याद्यश्वसहितं पश्वाद्यश्वरहितम् १. ५१. १२। द्वेषादिदोषरहितम् १. १३६. ९। अविद्यमानाश्वं पदातिम् १. १६०. ११ अविद्यमानाश्वं रथम् २. ६. ९ ॥ अनर्वम् प्राकृताश्वयोजनरहितम् १. १६४. २ ॥

अनर्वा प्रत्यृतोऽन्यस्मिन् । नि० ६. २३ ॥ अनर्वम् अप्रत्यृतमन्यस्मिन् । नि० ४. २७ ॥ अनर्वा प्रेहीति । असपत्नेन प्रेहीत्येवैतदाह । श० ३. ८. २. ३ ॥

अनर्विशे अनस्सु शकटेषु विट् प्रवेशास्तस्मै। [अत्र वाच्छन्दसीत्युत्वाभावः] १. १२१. ७ ॥

अनुलुतऽसु गवादिषु ३. ५३. १८॥

अनवः मनुष्याः । [अनव इति मनुष्यनाम निघं० २. ३] ९. ३१. ४ ॥

अनवः इति मनुष्यनाम निघ० २. ३ । को० नि० ७८ ॥

अनवद्य । न विद्यतेऽवद्यं निन्द्यं कर्म यस्मिँस्तस्मिन्बुद्धौ [अवद्यपण्यवर्या अ० ३. १. १० । अनेन गर्ह्ये वद्यशब्दो निपातितः] १. ३१. ६ । प्रशंसितगुणयुक्त । १. १२६. १ ॥ अनवद्यम् सर्वदोषरहितम् ३३. ११ ॥

अनवद्य प्रशस्यनाम । निघ० ३. ८ ॥ को० नि० ६२ ॥

अनवद्या विद्यासौन्दर्य्यादिशुभगुणयुक्ता १. ७३. ३ ॥

अनवन्त स्तुवन्तु ९. ३०. १० ॥

अनवऽपृग्णा सम्पर्करहितानि १.१५२.४ ॥

अनवभ्रऽराधसः अविनष्टधनाः १. १६६. ७ । अनवभ्रमविनाशि राधो येषान्ते ३. २६. ६ ॥

अनवसः अविद्यमानमवोऽन्नं यस्य सः ६. ६६. ७ ॥

अनवऽस्यन्तः अपरिचरन्तः कुर्वन्तः ४. १३. ३ ॥

अनवऽह्वरं सरलम् २. ४१. ६ ॥

अनश्नन् भोगमकुर्वन् १. १६४. २० ।

अनश्च्यू अव्यापिनौ ४. ३३ ॥

अनश्वः अविद्यमानतुरङ्गः १. १५२. ५ ॥

अनश्वऽदाम् अविद्यमाना अश्वा यस्यां ताम् गतिम् ५. ५४. ५ ॥

अनष्टऽवेदसम् अनष्टविज्ञानधनम् ६. ५४. ८ ॥

अनष्टाम् प्रसिद्धाम् ७. ४५. २ ॥

अनस्था अस्थिरहितः १. १६४. ४

अनस्वन्तः बहून्यनांसि शकटानि विद्यन्ते येषां ते १. १२६. ५ ॥

अना प्राणात्मकानि ४. ३०. ३ ॥

अनाकृतः न आकृतो न निवारितः १. १४१. ७ ॥

अनागसः न विद्यत आगः पापं दोषो यासु ता निर्दोषाः ४. १२ । अनपराधिनः १२. १२ ॥

अनागाः अनपराधः नि० १०. ११ ॥

अनागाःऽत्वम् निष्पापत्वम् । [इण् आग अपराधे च । उ० ४, २१६ । अत्र नञ् पूर्वादागःशब्दात्त्वे प्रत्ययेऽन्येषामपि दृश्यत इत्युपधाया दीर्घत्वम्] १. ६४. १५ ॥

अनागास्त्वमनपराधत्वम् । नि० ११. २१ ॥

अनाततायं अविद्यमान आततो विस्तारो यस्य तस्मै १६. १४ ॥

अनातुरम् दुःखवर्जितम् १. ११४. १ ॥

अनाधृष्टः केनाप्याधर्षयितुमयोग्यः ७. १५. १४ ॥ अनाधृष्टम् प्रौढम्, यत्समन्तान्न धृष्यते तत्तेजः, प्रगल्भगुणसहितं वा ९. ६ । धार्ष्ट्यम् १४. ६ ॥

अयं वा अग्निरनाधृष्टः । कौ० २७. ५ ॥

अनाधृष्यम् प्रगल्भम् ४. १८. १० । न केनापि धर्षितुं योग्यम् ५. ५ ॥

अनाधृष्या तदर्शिनः । ते० ५. २५ ॥ असावा-दित्योऽनाधृष्यः । कौ० २७. ५ ॥

अनानृत: मन्त्रतारहिता । ६. ४१. ६ ॥

अनानतम् नम्रीभूतम् ७. ६. ४ ॥

अनानतस्य महतः १२. २० ।

अनाप्तः अप्राप्तः १. १००. २ ॥

अनाप्ता तत्पृथिवी । ते० ५. २५ । इयं वै पृथिव्यनाप्ता । कौ० २७. ५ ॥

अनामयत् रोगादिरहितम् १८. ६ ॥

अनाभुवः ये समान्ताद्धर्माचरणे भवन्ति त आभुवो नाभुवोऽनाभुवस्तान् १. ९१. ६ ॥

अनामि नम्यते ३. ६२. ५ । नम्येत ६. ८. ६ ॥

अनामृणः अविद्यमाना समन्तान्मृणा हिंसका यस्य सः १. ३३. १ ॥

अनायतः इतस्ततोऽगच्छन्त्सन्निहितः ४. १३. ५ ॥

अनायुधासः अविद्यमाना युधाः ४. ९. १४ ॥

अनारम्भणे अविद्यमानमारम्भणं यस्मिँस्त-स्मिन् १. ११६. ५ । आलम्बरहिते (भूमिका २०२) १. ११६. ५ ॥

अनाविद्धया अप्राप्तक्षतया २६. २८ । शस्त्रास्त्ररहितया ६. ७५. १ ॥

अनाशवः अव्याप्ताः १. १३५. ६ ॥

अनाशस्ताःऽइव अप्रशस्तगुणसामर्थ्या इव १. २९. १ ॥

अनाशुना अनश्वेनाचिरेण गन्त्रा ६.४५.२ ॥

अनासः अविद्यमानास्यान् ५. २९. १० ॥

अनास्थाने अविद्यमानं स्थित्यधिकरणं यस्मिन् १. ११६. ५। स्थातुमशक्ये (भूमिका २०२) १. ११६. ५ ॥

अनिंःऽशस्ताः निर्गतं शस्तं प्रशंसनम् येभ्यस्तद्विरुद्धाः ४. ३४. ११ ॥

अनितभा अप्राप्तदीप्तिः ५. ५३. ६ ॥

अनिध्मः अदीप्यमानः २. ३५. ४ ॥

अनिनस्यं यत्प्रशस्तं प्राणनिमित्तं तस्य १. १५०. २ ॥

अनिन्दिषुः निन्देयुः १. १६१. ५ ॥

अनिन्द्या निन्दितुमनर्हौ १. १८०. ७ ॥

अनिन्द्याः प्रशस्यार्थे कौ० नि० ६२ ॥

अनिन्द्रम् अनैश्वर्यम् ७. १८. १६ ॥

अनिन्द्राः अविद्यमाना इन्द्रा राजानो यासु ताः १. १३३. १ । अनैश्वर्याः ५. २. ३ ॥ अनिन्द्राम् अनीश्वरीं गतिम् ४. २३. ७ ॥

य इन्द्रं न विविदुः, इन्द्रोऽहमस्मि; अनिन्द्रा इतर इति वा। नि० ३. १० ॥

अनिंऽपद्यमानम् यो मन आदीनीन्द्रियाणि न निपद्यते प्राप्नोति तम् १. १६४. ३१। अपदनशीलमचलम् ३७. १७ ॥

अनिंऽबद्धः न कस्याप्याकर्षेण निबद्धः ४. १३. ५ ॥

अनिऽबाधे बाधारहिते ३. १. ११। निर्विघ्ने सति ५. ४२. १७ ॥

अनिभृष्टम् नित्यं भृष्टम् पतिरहितमाचरितवान् १०. ६ ॥

अनिभृष्टऽतविषिः न निभृष्टा प्रदग्धा तविषी सेना यस्य सः ५. ७. ७ ॥

अनिऽमानः अविद्यमानं निमानं परिमाणं यस्य सः १. २७. ११ ॥

अनिमिषः अहर्निशं प्रयतमानः १७. ३३ ॥ अनिऽमिषाः निमेषालस्यवर्जिताः २. २७. ६ ॥ अनिऽमिषम् अहर्निशम् ५. १६. २ । निरन्तरम् १. २४. ६ ॥ अनिऽमिषा अहर्निशजन्यया क्रियया ३. ५६. १. । नैरन्तर्येण ७ ६०. ७ ॥ अनिमिषत्ऽभिः नैरन्तर्येणालस्यरहितैः १. १४३. ८ ॥

अनिमिषा अनिमिषन् । नि० १०. २२ ॥

अनिमिष्येण निरन्तरं प्रयतमानेन १७. ३४ ॥

अनिंऽमेषम् प्रतिक्षणम् १. ३१. १२। निरन्तरम् १. १६४. २१ ॥

अनिमेषम् अनिमिषन्तः नि० ३. १२ ॥

अनिराः नितरां दातुमयोग्याः ११. ४७ ॥ अनिराम् अविद्यमाना इराऽन्नभुक्तिर्यस्यां ताम् १२. १०५ ॥

अनिरेण अरमणीयेन ४. ५. १४ ॥

अनिलम् कारणरूपं वायुम् ४०. १५ ॥

अनिंऽविशमानाः याः कुत्रचिन्न निविशन्ते ७. ४६. १ ॥

अनिंऽवृतः निरन्तरः ३. २६. ६ ॥

अनिवेशनानाम् अविद्यमानं निवेशनमेकत्र-स्थानं यासां तासाम् १. ३२. १० ॥

अनिवेशनानाम् अनिविशमानानाम् । नि० २. १६ ॥

अनिशितः न विद्यते नितरां शिता तीव्रा क्रिया यस्मिन्स संग्रामो यज्ञपात्रं वा १. २६ ॥

अनिऽशितम् अतीक्ष्णम् २. ३८. ८ ॥

अनिशिता अतिविस्तीर्णा सेना कार्या वेदिर्वा १. २६ ॥

अनिषङ्गाय अविद्यमानो नितरां सङ्गः पक्षपातो यस्य तस्मै १. ३१. १३ ॥

अनिष्टृतः अनुपहिंसितः २७. ४ । दुःखात् पृथग्भूतः २७. ७ ॥

अनीकम् सैन्यम् १. १२१. ४ । सेनेव किरणसमूहम् १३. ४६ । सैन्यमिव ज्वालासमूहम् ८. २४ । सैन्यमिव कार्य्यसिद्धिप्रापकम् ६. ५१. १ । चक्षुरादीन्द्रियैरप्राप्तम् १. ११५. १ । बलवत्तरं सैन्यमिव प्रसिद्धम् । अनिति जीवयति सर्वान् प्राणिनः सः [अनिहृषिभ्यां किच्च उ० ४. १६ । अनेन ईकन् प्रत्ययः] ७. ४२ । सैन्यवद्रक्षयित्री १. ११३. १६ । सैन्यमिव समूहम् १. १२४. ११ । सैन्यमिव तेजः २. ३५. ११ ॥

सेनाया वै सेनानीरनीकम् । श० ५. ३. १. १ ॥

अनीकऽवते प्रशस्तसेनायुक्ताय २६. ५६ ॥

अनीताम् प्रापयेताम् १. १२१. ५ ॥

अनु वीप्सायाम् १. ६. ४ । पश्चादर्थे १. ६. ५ । अनुगमार्थे १. २५. १६ । अर्वाक् १. ८२. ३ । अनुक्रमेण १. ३७. ६ । आनुकूल्ये १. ३४. २ । आनुपूर्व्ये १. ५२. ४ । अनुयोगे १. ५२. १४ । अनुलक्ष्ये १. १६१. १५ । क्रियार्थे १. १०. १२ । सद्यः २. ५५. ४ ॥

अन्विति सादृश्यापरभावम् नि० १. ३ ॥

अनुऽअविन्दत् अनुलभते २. १२. ११ ॥

अनुऽएतवे अन्वेतुं विज्ञातुं प्राप्तुं गन्तुं वा ७. ३३. ८ ॥

अनुऽएतवै अनुकूलार्थे एतुं गन्तुम् [अत्रेण्धातोः कृत्यार्थे तवैके० अनेन तवै प्रत्ययः] १. २४. ८ । अन्वेतुमनुगन्तुम् ७. ४४. ५ ॥

अनुकामः धर्मानुकूला कामना १८. ८ ॥

अनुऽकामम् कामंकाममनु १. १७. ३ ॥

अनुकथाः अविद्वांसः ५. २. ३ ॥

अनुक्षत्तारम् सारथ्यनुकूलम् ३०. ११ । धर्मात्मा के अनुकूलवर्ती को ३०. १३ ॥

अनुऽगमन् अनुकूलं गच्छन् ३. ३१. ५ ॥

अनुग्रः अतेजस्वी ७. ३८. ६ ॥

अनुऽघुष्य आनुकूल्येन शब्दयित्वा १. १६२. १८ ॥

अनुचरम् सेवक को ३०. १३ ॥

अनुत्तम् अप्रेरितं स्वाभाविकम् १. ८०. ७। अनुकूलम् शत्रुभिरबाधितम् ७. ३४. ११॥

अनुत्तऽमन्युम् न उत्तो न प्रेरितो मन्युः क्रोधो यस्य तम् ७. ३१. १२॥

अनुत्ताः आनुकूल्येन धृताः ३. ३१. १३॥

अनुदकाः जलरहिताः ७. ५०. ४॥

अनुऽददाति अनुकूलता से देता है २. १२. १०॥

अनुदिताम् ईश्वरोक्ताम् (भूमिका २१३) अथर्व० ९. १. २॥

अनुदिश्य प्राप्तुं शोधयितुमनुलक्ष्य १.२८॥

अनुदृश्य आनुकूल्येन दृष्ट्वा ३४. ४६॥

अनुदेथाम् प्रेरयेथाम् १. ११६. ६॥

अनुऽदेयम् अनुदातुं योग्यम् ६. २०. ११॥

अनुऽधूपितासः अनुकूलैः सुगन्धैः संस्कृताः २. ३०. १०॥

अनुपऽक्षितम् यद्व्ययेनापि नोपक्षीयते तत् ३. १३. ७.॥

अनुपत् अनु पश्चात्प्राप्यते या सा १९. ८॥

अनुऽपथाः अनुकूलः पन्था येषान्ते ९. ५२. १०॥

अनुपश्यतः अनुकूलेन योगाभ्यासेन साक्षाद्द्रष्टुः ४०. ७॥

अनुपश्यति विद्याधर्मयोगाभ्यासानन्तरं समीक्षते ४०. ६॥

अनुऽपूर्वम् अनुकूलाः पूर्वे वेदोक्ता आप्तसिद्धान्ता यस्य तम् १. ११७. २। क्रमशः १०. ३२। आनुकूल्यमनतिक्रम्य २३. ३८। अनुकूलं प्रथमम् १६. ६॥

अनुप्राणन्तु आयुर्भुञ्जताम् ४. २५॥

अनुप्राणिहि जीवतोऽनुजीवनं धर, धरति वा ४. २५॥

अनुप्रेतं आनुकूल्येन प्राप्नुत १८. ५८॥

अनुऽब्रुवाणः पठित्वाऽनूपदिशन् ५. ४४. १३॥

अनुऽभर्त्री अनुगतसुखधारणस्वभावा १. ८८. ६॥

अनुमता अनुज्ञापिता १२. ७०॥

अनुमतिः अनुकूलं विज्ञानम् ३४. ९॥ अनुऽमते। हे अनुमन्तः परमेश्वर। (भूमिका २११) १०. ५९. ६। अनुकूला मतिर्यस्य तत्सम्बुद्धौ ३४. ८॥ अनुमत्यै अनुमति के लिए २४. ३२। याऽनुमन्यते तस्यै २६. ६०॥ अनुमतिरनुमननात् नि०. ११. २७॥

अनुऽमदन्ति आनुकूल्येनानन्दयन्ति ३. ४७. ४॥

अनुऽमदाम अनुहृष्येम [अत्र विकरणव्यत्ययेन शप्] १. १०२. ३॥

अनुऽमाद्यः अनुहर्षितुं योग्याः ६. ३४. २ ॥ अनुऽमाद्यासः अनुमोदकारकगुणेन प्रशंसनीयाः १. ११५. ३ ॥

अनुम्लोचन्ती अनुम्लोचयन्ती दीप्तिः १५. १७ ॥

(आदित्यस्य) प्रम्लोचन्ती चानुम्लोचन्ती चान्तरसाविति दिक् चोपदिशा चेति ह स्माह माहित्थिः, अहोरात्रे तु ते । ते हि प्र च म्लोचतोऽनु च म्लोचतः । श० ८. ६. १. १८ ॥

अनुऽयच्छमाना अनुकूलतया प्राप्ता १. १२३. १३ ॥ अनुऽयच्छमानाः आनुकूल्येन नियन्तारः [अत्र व्यत्ययेनात्मनेपदम्] १. १०६. ३ ॥

अनुऽयतम् आनुकूल्येन यतन्तम् ५. ४१. १३ ॥

अनुगा यानुयाति तया १५. ६ ॥

अनुयाजान् अनुकूलान् यज्ञपदार्थान् १९. १६ ॥

नद्यतासु सर्वास्विष्टासु (देवतासु) अथैतत्पश्चेवानुयजति तस्मादनुयाजा नाम श० १. ८. २. ४ । छन्दांसि वाऽनुयाजाः । श० १. ८. २. ८ । पशवो वाऽनुयाजाः । श० ३. ८. ४. ८ । अग्निरिव प्रथमोऽनुयाजः । इन्दुर्द्वितीयः उर्णुपो तृतीयः । श० ११. २. ७. २९ । अपाना अनुयाजाः । श० ११. २. ७. २७ ॥ रेतोधेयमनुयाजाः । कौ० १०. ३ ॥ प्रजाऽनुयाजाः । ऐ० १. ११ । ये (अग्नयः) अवांश्च स्तेऽनुयाजाः । ऐ १. ११ ॥

अनुऽयाति अनुगच्छति ६. ६. ३ ॥

अनुरुधम् योऽनुरुणद्धि तम् ३०. ९ ॥

अनुरूपः अनुकूलः १९. २४ ॥

स योऽयं (पुरुषः) चक्षुष्येषोऽनुरूपो नाम । अन्वङ् ह्येष सर्वाणि रूपाणि । जै० उ० १. २७. ५ । पूर्वमु चैव तद्रूपमपरेण रूपेणानुवदति यत्पूर्वं रूपमपरेण रूपेणानुवदति तदनुरूपस्यानुरूपत्वमनुरूप एनं पुत्रो जायते य एवं वेद । तां० १२. १. ५ । १२. ७. ७ । १३. १. ९ । १३. ७. ७ ॥ प्रजा अनुरूपः । गो० उ० ३. २१ ॥ प्रजा वा अनुरूपः । ऐ० ३. २४ ॥ प्रजाऽनुरूपः । ऐ० ३. २३ । कौ० १५. ४ । २२. ८ । जै० उ० ३. ४. ३ ॥ अग्निरनुरूपः जै० उ० ३. ४. २ ॥

अनुवर्त्मानः अनुकूलाचरणाः; अनुकूलो वर्त्मा मार्गो येषान्ते १७. ८६ ॥

अनुऽव्राति पीछे चलता है ४. ७. १० ॥

अनुऽवित्तः अनुलब्धः ४. १८. १ ॥

अनु वीक्षस्व आनुकूल्येन विशेषतः संप्रेक्षस्व १३. ३० ॥

अनु वेद विद्यापठनानन्तरं जानाति १. १६४. १८ ॥

अनु व्यायन् अनुकूलतयोत्पादिताः १४. ३० ॥

अनुव्रतः अनुकूल आचरण युक्त (सं० वि० १७३) अथर्व० ३, ३०. २ ॥ अनुऽव्रताय अनुगतानि धर्म्याणि व्रतानि यस्य तस्मै १. ५१. ९ ॥

अनुऽशासे अनुशासनाय ५. ५०. २ ॥

अनुऽशासता अनुशासितारौ १. १३९. ४ ॥

अनुऽशासति अनुशासनं करोति [अत्र बहुलं छन्दसीति शपो लुक् न] ६. ५४. १ ॥

अनुशिष्टः प्राप्तशिक्षः ५. २. ८ ॥

अनुषु प्राणप्रदेषु १. १०८. ८ ॥

अनुष्ठु अनुतिष्ठन्ति यस्मिँस्तत् १. ६५. ३ ॥

अनुष्टुप् अनुष्टोभते स्तम्नात्यज्ञानं यः ८. ४७ । यया पठित्वा पुनः सर्वा विद्या अन्येभ्यः स्तुवन्ति सा १०. १३ । अनुस्तौति यया सा १४. १० । सुखानामनुष्टम्भनम् १४. १८ । श्रुत्वा पश्चात् स्तुम्नाति जानाति शास्त्राणि यया मननक्रियया सा १९. ५ । अनुष्टुप् छन्द २१. १४ । ययाऽनुष्टोभते सा २३. ३३ ॥ अनुष्टुभा अनुष्टुप् मन्त्र द्वारा सिद्ध हुई विद्या से १२. ३४ ॥

अनुष्टुप् वाङ्नाम निघ० १. ११ । कौ० नि० १०२ ॥ अनुष्टुबनुष्टोभनात् नि० ७. १२ । अनुष्टुबनुष्टोभनात् । दै० ३. ७ । अन्वस्तौदिति हि ब्राह्मणम् । दै० ३. ८ ॥ यस्याष्टौ ता अनुष्टुभम् । कौ० ९. २ । गायत्री वै सा यानुष्टुप् १०. ५ । वागेवासौ प्रथमानुष्टुप् । कौ० १५. ३ । अनुष्टुप् सोमस्य छन्दः । कौ० १५. २ । आपो वा अनुष्टुप् । कौ० २४. ४ । आनुष्टुभं वै चतुर्थमहः । कौ० २२. ७ । द्वात्रिंशदक्षरानुष्टुप् । कौ० २६. १ । तै० १. ७. ५५ । तां० १०. ६. १३ । वागनुष्टुप् सर्वाणि छन्दांसि । तै० १.७.५.५ । आनुष्टुभः प्रजापतिः । तै० ३. ३. २. १ । आनुष्टुभो राजन्यः । तै० १. ८. ८. २ । तां० १८. ८. १४ । वागनुष्टुप् । तां० ५. ७. १ । श० १०. ३. १. १ । ज्यैष्ठ्यं वा अनुष्टुप् । तां० ८. १०. १० । अनुष्टुब्भि छन्दसां योनिः । तां० ११. ५. १७ । अन्तो वा अनुष्टुप् छन्दसाम् तां० १९. १२. ८ । इयं (पृथिवी) वाऽनुष्टुप् । तां० ८. ७. २ । श० १. ३. २. १६ । प्रजापतिर्वा अनुष्टुप् । ता० ४. ८. ९ । आनुष्टुभो वै प्रजापतिः । तां० ४. ५. ७ । आनुष्टुभी वै वृष्टिः । तां० १२. ८. ८ । यथा वै प्रत्यक्षमनुष्टुब्व्याख्याय-नीयम् (साम) । तां० १५. ९. १५ । परमं वाऽएतच्छन्दो यदनुष्टुप् । श० १३. ३. ३. १ । आनुष्टुभो वाऽअश्वः । श० १३. २. २. १९ । अनुष्टुबुदीची (दिक्) । श० ८. ३. १. १२ । आनुष्टुभैषा (उत्तरा) दिक् । श० १३. २. २. १९ । सक्थ्यावनुष्टुभः । श० ८. ६. २. ९ । वागनुष्टुप् । श० १. ७. ३. १८ । वाग्वा अनुष्टुप् । ऐ० १. २८ । गो० उ० ६. १६ । यस्य ते (प्रजापतेः) ऽहं (अनुष्टुप्) स्वं छन्दोऽस्मि । ऐ० ३. १३ । आनुष्टुभी वै रात्रिः । ऐ० ४. ६ । या कुहूः सानुष्टुप् । ऐ० ३. ४७ । अनुष्टुब् वै परमा परावत । ऐ० ३. १५ । अनुष्टुबेव सर्वम् । गो० पू० ५१. ५ । पादावनुष्टुप् । ष० २. ३ ॥

अनुष्ठुया आनुकूल्येन ४. ४. १४ ॥

अनुष्वधम् सर्वेषु पक्वान्नेष्वनुकूलम् [अत्र विभक्त्यर्थेऽव्ययीभावः समासः] ७. ३८ । स्वधान्तस्यानुकूलम् १७. ८८ ॥

अनुष्वधम् अन्नमन्नम् । नि० ४. ८ ॥

अनुऽसत्यम् सत्यस्यानुकूलम् ३. २६. १ ॥

अनुसृष्टान् अनुषंगिणः २४. १६ ॥

अनुऽसेषिधत् पुनः पुनरनुकूलान्प्रापयेत् [अत्र यङ्लुगन्ताल्लेट् । सेधतेर्गतौ

अ० ८. ३. ११३ इत्यभ्यासस्य षत्व-प्रतिषेधः उपसर्गादिति वक्तव्यम् किं प्रयोजनम् । उपसर्गाद्या प्राप्तिस्तस्याः प्रतिषेधो यथा स्यादभ्यासाद्या प्राप्ति-स्तस्याः प्रतिषेधो माभूदिति । स्तम्भु सिवु० अ० ८. ३. ११६ अत्र महाभाष्यकारेणोक्तम् । सायणाचार्येणे-दमंज्ञानान्न बुद्धमिति] १. २३. १५ ॥

अनुःस्थाः या अनुतिष्ठन्ति १. ६४. १० ॥

अनुऽस्यदे आनुकूल्येन किंचित्प्रस्रवणाय २. १३. २ ॥

अनुस्रऽयाम्ने योऽनुस्रं शीतं देशं याति तस्मै ४. ३२. २४ ॥

अनुऽस्वधम् स्वधामन्नमनुकूलम् १. ८१.४ । स्वधामनुगतं द्रव्यम् २. ३. ११ । अन्वन्नम् ३. ६. ९ । अनुकूलं स्वधा-न्नं विद्यते यस्मिँस्तम् ३. ४७. १ । स्वधामन्नमनुवर्तमानम् ५. ५२. १ ॥

अनूकाशेन अनुप्रकाशेन २५. २ ॥

अनूक्यम् अनुकूलता से कहने योग्य (सं० वि० २९४) अथर्व० ९. ६. १ ॥

अनूचः कपटेनानुकूलान् ३. ३०. ६ ॥

अनूची इति अन्योन्यवर्तमाने १.११३.२ ॥

अनूची अनूच्यौ इतरेतरमभिप्रेत्य नि० २.२० ॥

अनूचीना यान्यनुचरन्ति तानि ४.५४.२ । यैरन्वञ्चन्ति जानन्ति तानि ३३. ५४ ॥

अनूती अरक्षा ६. २९. ६ ॥

अनूनम् ऊनतारहितम् २. १०. ६ । पुष्कलम् ४. २. १६ ॥

अनूनवर्चाः न विद्यते ऊनं न्यूनं वर्चो यस्य सः १२. १०७ ॥

अनूनोत् प्रेरयेत् ५. ४५. ७ ॥

अनूरुत् योऽनुरौत्युपदिशति ३. ५५. ५ ॥

अनूऽर्ध्वऽभासः न ऊर्ध्वा भासो दीप्तिर्यस्य ५. ७७. ४ ॥

अनूषत [अनूषत] प्रशस्तां कुर्वन्ति [णू स्तवन इत्यस्य लुङ्प्रयोगः ; संज्ञा-पूर्वको विधिरनित्य इति गुणाभावः; लडर्थे लुङ् च] १. ६. ६ । स्तुवन्तु [अत्र लोडर्थे लुङ्] १. ७. १ । प्रशंसन्तु ३३. ८१ । स्तुवन्ति [अत्र लडर्थे लुङ्] १. ११. ८ । स्तुवत १. १५१. ६ । प्रशंसेयुः ३. ५१.१ । प्रशंसत २०. ९९ । कीजिए ५. ५. ४ ॥

अनूषत अस्तोषत नि० ४. १९ ॥

अनूपि स्तौमि ६. ३८. ३ ॥

अनूहिरे अनुवहन्ति पुनः पुनः प्राप्नुवन्ति च १९. ५१ । अनुप्रापयन्ति (भूमिका २७६) १९. ५१ ॥

अनृक्षरः कण्टकगर्तादिदोषरहितः सेतुमा-र्जनादिभिः सह वर्तमानः सरलः । चोरदस्युकुशिक्षाऽविद्याऽधर्माचरणरहितः १. ४१. ४ । निष्कण्टकः २.२७.६ ॥

अनृक्षरा अविद्यमाना ऋक्षरा दुःखप्रदाः कण्टकादयो यस्यां सा १. २२. १५॥

अनृक्षरा ऋक्षरः कण्टक ऋच्छतेः । नि० ९.३०॥

अनृजोः कुटिलस्य ४. ३. १३ ॥

अनृणः अविद्यमानं ऋणं यस्य सः १६.११॥

अनृतम् असत्यमाचरणमानभाषणम् १. २३. २२ । असत्यं कार्यम् १. १०५.५ । मिथ्याव्यवहारम् १. १३६. २ । मिथ्याभाषणादिकं कर्म १. १५२. ३ । असत्यम् ६. १७ ॥ अनृताः असत्यवादिनः ४. ९. ५ ॥ अनृतात् न विद्यते ऋतं यथार्थमाचरणं यस्मिँस्तस्मान्मिथ्याभाषणान्मिथ्यामानात् (पृथग्भूत्वा) १.९ ॥ अनृतस्य मिथ्यावस्तुनः ७. ६०. ५ ॥

अमेध्यो वै पुरुषः यदनृतं वदति । तेन पूतिरन्तरतः । श० १. १. १. १ । सत्यमेव देवा अनृतं मनुष्याः । श० १. १. १. ४ ॥ एतद्वाचश्छिद्रं यदनृतम् । तां० ८.६. १३॥ अनृतं (वा एतत्) यदा तपति वर्षति । तै० १. ७. ५.३ ॥ अनृतं स्त्री शूद्रः श्वा कृष्णः शकुनिस्तानि न प्रेक्षेत । श० १४. १. १. ३१ ॥

अनृतुऽपाः यः ऋतून् पाति स ऋतुपा न ऋतुपा अनृतुपाः २.५३.८ ॥

अनेजत् न एजते कम्पते तदचलत् स्वावस्थायाश्च्युतिः कम्पनं तद्रहितम् ४०. ४ ॥

अनेद्यः प्रशस्यः [अनेद्य इति प्रशस्यनाम निघ० ३. ८] १. ८७. ४ । अनिन्दनीयः ५. ६१. १३ ॥

अनेद्यः प्रशस्यनाम निघ० ३. ८ । कौ० नि० ६. २ ।

अनेनः अविद्यमानमेनः पापं यस्मिँस्तत् ६. ६६. ७ ॥

अनेनाः अविद्यमानमेनः पापं यस्य सः १. १२६. ५ ॥

अनेशन् नश्येयुः । [णशु अदर्शने । लुङि रूपम् । नशिमन्योरलिट्येत्वं वक्तव्यम् । अनेन वार्तिकेनात्रैत्वम्] १६. १० ॥

अनेपत स्वीकार करो २९. १८ ॥

अनेहः अहन्तव्यम् १. १८९. ३ । सततं रक्षणीयं व्यवहारम् ६. ५०. ३ ॥ अनेहसा अहिंसिके ६. ७५. १० । अविनाशिनौ २६. ४७ ॥ अनेहसम् अहिंसनीयं सर्वदा रक्षणीयं निर्दोषम् [अत्र नञि हन् एह च उ० ४. २३१ २४ इति नञ्पूर्वकस्य हन्धातोः प्रयोगः] १. ४०. ६ । अहन्तारम् ३. ६. १ ॥ अनेहसा अहिंसामयेन धर्मेण १.१२६. ६ ॥

अनोनवुः स्तुवत १. ८०. ६ ॥

अन्तः [अन्तः] पारम् १.५४.१ । भागः १. १६४. ३५ । अन्तःकरणम् ८. २५ । आभ्यन्तरे १. ६५. १० । अभ्यन्तराकाशः ७.९ । आभ्यन्तरस्थान् प्राणादीन् ७. ४ । मध्ये १.२३.१६ । हृदि (भूमिका १३४) ३१. १६ । समीपे १०. ७ ॥ अन्तम् अवसानस्थम्

६. ४३. २ । प्रान्तम् १. ३७. ६ । नाशम् ७. २१. ६ ॥

अन्तः अभ्यन्तरम् नि० १०. १९ ॥ अन्ताम् अन्तोऽतते। नि० ४. २५ ॥ अन्तो वै क्षयः। कौ० ८।१ ॥ अन्तो वै पर्यासोऽन्त उदर्कः। गो० उ० ३. १६ ॥

अन्तःऽपथाः अन्तराभ्यन्तरे पन्था येषान्ते ५. ५२. १० ॥

अन्तः पर्श्व्येन अन्तः पार्श्वावयवभावेन ३६. ८ ॥

अन्तःपार्श्व्यम् अन्तः पार्श्वे भवम् ३६. ६ ॥ मध्य आलिङ्गनम् १४. ६ । मध्ये स्पर्शो यस्य १४. १५ । मध्यप्रवेशः १९. ५७ ॥

अन्तःऽवतीः अन्तर्मध्ये कारणं विद्यते यासु ताः ३. ५५. ५ ॥

अन्तःऽवावत् अन्तर्मध्ये वाति गच्छति सोऽन्तर्वा वायुः स विद्यते यस्मिन् गृहे तत् १. ४०. ७ । योऽन्तर्भृशं वाति ६. ८. ३ ॥

अन्तःऽविद्वान् योऽन्तर्वेत्ति सः १. ७२. ७ ॥

अन्तः श्लेषः आभ्यन्तरे सम्बन्धः १३. २५ ॥

अन्तकम् दुःखनाशकर्त्तारम् १. ११२. ६ ॥ अन्तकाय योऽन्तं करोति तस्मै हितकरम् ३०. ७ । नाशाय ३०. १८ । नाशकाय कालाय ३६. १३ ॥

अन्तमः समीपस्थः ३. १०. ८ । य आत्मान्तःस्थोऽनिति जीवयति सोऽतिशयितः [स उ प्राणस्य प्राणः । केनोपनिषत् । खं० १. म० २ । अनेनात्मान्तःस्थोऽन्तर्यामी गृह्यते] ३. २५ । अतिशयेनान्तिकः [अन्तमानामित्यन्तिकनाम निघ० २. १६] १५. ४८ । निकटस्थः २५. ४७ ॥ अन्तमस्य सर्वेषां दुःखानामन्तं मिमीते येन युद्धेन तस्य १. २७. ५ ॥ अन्तमानाम् अन्तः सामीप्यमेषामस्ति तेऽन्तिका अतिशयेनान्तिका अन्तमास्तत्समागमेन [अत्रान्तिकशब्दात्तमपि कृते पृषोदरादित्वात्तिकलोपः । अन्तमानामित्यन्तिकनामसु पठितम् । निघ० २. १६] १. ४. ३ ॥

अन्तमानाम् अन्तिकनाम । निघ० २. १६ ॥ कौ० नि० ७३ ॥

अन्तरः मध्यस्थः १. ३१. १३ । भिन्नः ६. ५. ४ । येनानिति प्राणिति सः १६. १६ ॥ अन्तरम् अन्तः शोभनमाभ्यन्तरं वा १. १०. ६ । मध्यस्थमाभ्यन्तरम् २५. २ । मध्ये स्थितमपि दूरस्थमिव १७. ३१ । यदन्ते समीपे रमते तत् ६. ७५. १६ ॥

अन्तरा व्यवधाने ३. ४०. ६ । मध्ये १३. २५ । आभ्यन्तरे १४. २७ । सब से भिन्न १६. ४१ । भिन्नः भिन्न (सं०

वि० २०३) अथर्व० ६. ३. १५ ॥ अन्तरौ २६. ६ ॥ अन्तराम् मध्ये पृथग्वा १. १०४. ६ ॥

अन्तरिक्षम् अनेकेषां लोकानां मध्येऽवकाशरूपं वर्तमानमाकाशम् १. ५२. १३ । अक्षयमाकाशम् १८. १८ । अन्तरालमवकाशम् ७. ५ । मधुरादिगुणयुक्तं रोगनाशकमुदकं वा १४. १२ । उदकम् [अन्तरिक्षमित्युदकनाम निघ० १. १२] ३. ३४. १० । आकाशमिवाऽक्षोभता ३. ५४. १६ । अन्तरिक्षं कारणाख्यम् ६. ४७. ४ । सुखसाधनार्थमवकाशम् १. ७ । अवकाशं सुखेन निवासार्थम् १. ११ । आकाशस्यान्यपदार्थानन्तरात्मस्थमक्षयं ज्ञानं वा [अन्तरिक्षं कस्मादन्तरा क्षान्तं भवति, अन्तरा इमे इति वा, शरीरेष्वन्तः अक्षयमिति वा नि० २. १०] १. १८ । आकाशस्थं पदार्थसमूहम् ५. १३ । आकाशं तत्रस्थं प्राणिवर्गञ्च [अत्र तात्स्थ्योपाधिना प्राणिनामपि ग्रहणम्] ५. २७ । धर्मप्रचारस्यावकाशम् ६. २ । सर्वनिर्गतमनन्तमाकाशम् ७. ४२ । क्षयरहितमन्तर्यामिस्वाभाविकं ब्रह्मविज्ञानम् ७. ५ । अन्तरं क्षयमन्तःकरणे क्षयरहितं विज्ञानम् ८. ६ । मेघमण्डलम् ८. ६० । आकाश इवाक्षयोऽक्षोभो वा ११. २० । अक्षयप्रेमयुक्ता ११. ५८ ॥ अन्तरिक्षा अन्तरिक्षेण सहचराणि ६. २२. ८ ॥ अन्तरिक्षाणि अन्तरिक्षस्थानि सर्वाणि भुवनानि १. ३९. ७ ॥ अन्तरिक्ष ! अन्तरिक्षस्थो यज्ञः ४. ७ ॥ अन्तरिक्षाय आकाशे गमनाय ५. २६ ॥ अन्तरिक्षात् उपरिष्ठात् १. ४८. १२ ॥ अन्तरिक्षे स्वव्याप्तिरूपे ब्रह्माण्डे १. ३५. ११ ।

अन्तरिक्षं अन्तरिक्षनाम निघ० १. ३। अन्तरिक्षं कस्मात्? अन्तरा क्षान्तं भवति, अन्तरा इमे इति वा, शरीरेष्वन्तः अक्षयमिति वा नि० २. १०॥ तद्यदस्मिन्निदं सर्वमन्तस्तस्मादन्तर्यक्षम्। अन्तर्यक्षं ह वै नामैतत्। तदन्तरिक्षमिति। परोक्षमाचक्षते। जै० उ० १. २०. ४। अन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वम्। तां० २०. १४. २। अन्तरिक्षायतना हि प्रजा। तां० ४. ८. १३। छिद्रमिवेदमन्तरिक्षम्। तां० ३. १०. २। अन्तरिक्षेणेदꣳ सर्वं पूर्णम्। तां० १५. १२. ५। वायुनान्तरिक्षेण वयोभिस्तेनैव लोक-ऽस्त्रिवृद्योऽयमन्तरा। तां० १०. १. ११। (देवाः) अन्तरिक्षं पशुमद्भिः (पशुभिरभ्यभवन्यन्)। तां० १७. १३. १८। अयं मध्यमो लोकः-अन्तरिक्षं) बृहती। तां० ७. ३. ९। अन्तरिक्षं वै वामदेव्यं (साम)। तां० १५. १२. ५। सह हैवेमावग्रे लोकावासतुस्तयोर्वियतोर्योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवदीक्षꣳ हैतन्नाम ततः पुरान्तरा वा इदमीक्षमभूदिति तस्मादन्तरिक्षम्। श० ७. १. २. २३। मध्यं वाऽन्तरिक्षम् श० ७. ५. १. २६। अन्तरिक्षं वाऽअवरꣳ सधस्थम्। श० ९. २. ३. ३९। अन्तरिक्षं वाऽअपाꣳ सधस्थम्। श० ७. ५.

२. ५७। यान्येव वभ्रूणीव हरीणि (लोमानि) तान्यन्तरिक्षस्य रूपम्। श० ३. २. १. ३। अथ यत्कपालमासीत्तदन्तरिक्षमभवत्। श० ६. १. २. २। घृतमन्तरिक्षस्य (रूपम्)। श० ७. ५. १. ३। अन्तरिक्षलोको वै प्रमा। अन्तरिक्षलोको ह्यस्माल्लोकात्प्रमित इव। श० ८. ३. ३. ५। 'अन्तरिक्षं यच्छान्तरिक्षं दृंहान्तरिक्षं मा हिंसीः' इत्यात्मानं यच्छात्मानं दृंहात्मानं मा हिंसीरित्येतत् (अन्तरिक्षं आत्मा)। श० ८. ३. १. ९। अन्तरिक्षमेव विश्वं वायुर्नरः। श० ९. ३. १. ३। 'अन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीम्' इत्यन्तरिक्षस्य ह्येतत् पृष्ठं व्यचस्वत्प्रथस्वत्। श० ८. ३. १. ९। अन्तरिक्षं नाराशंसः। श० १. ८. २. १२। अन्तरिक्षं वाऽआग्नीध्रम्। श० ९. २. ३. १५। अन्तरिक्षं वाऽउपयमन्यन्तरिक्षेण हीदं सर्वमुपयतम्। श० १४. २. १. १७। अन्तरिक्षं वाऽउलूखलम्। श० ७. ५. १. २६। अन्तरिक्षं ह्येष उद्धिः। श० ६. ५. २. ४। अथ यया त्रिद्धः शयित्वा जीवति वा म्रियते वा सा द्वितीया (इषुः) तदिदमन्तरिक्षंसैषा रुजा नाम (इषुः) श० ५. ३. ५. २९। अन्तरिक्षमेवोपांशुसवनः। श० ४ १. २. २७। अयमन्तरिक्षलोको निरुक्तः सन्ननिरुक्तः। श० ४. ६. ७. १९। मनोऽन्तरिक्षलोकः। श० १४. ४. ३. ११। अन्तरिक्षं वै वरिवश्छन्दः। श० ८. ५. २. ३। अन्तरिक्षं वै त्रिवयश्छन्दः। श० ८. ५. २. ५। अन्तरिक्षलोको महः। श० १२. ३. ४. ७। अन्तरिक्षं महाव्रतम्। श० १०. १. २. २। अन्तरिक्षं वै तृतीया चितिः॥ श० ८. ४. १. १। अन्तरिक्षं वै मध्यमा चितिः। श० ८. ७. २.१८। अन्तरिक्षं वै माध्यन्दिनंसवनम्। श० १२. ८. २. ९। ये वधकास्तेऽन्तरिक्षस्य रूपम्। श० ५. ४. ५. १४। अन्तरिक्षमु वै त्रिष्टुप्। श० १. ८. २. १२। भुव इत्यन्तरिक्षलोकः। श० ८. ७. ४. ५।

अन्तरिक्षलोको वै मारुतो मरुतां गणः। श० ९. ४. २. ६। अन्तरिक्षं वै मातरिश्वनो घर्मः। तै० ३. २. ३. २। अन्तरिक्षदेवत्याः खलु वै पशवः। तै० ३. २. १. ३॥ अन्तरिक्षं वै सर्वेषां देवानामायतनम्। श० १४. ३. २. ६। अवलिष्ट (अवरिष्ट इति पाठान्तरम्) इव वा अयमध्यमो लोकः। तां० ७. ३. १८। तस्मादेषां लोकानामन्तरिक्षलोकस्तनिष्ठः। श० ७. १. २. २०। महद्धीदमन्तरिक्षम् कौ० २६. ११। रजता (पुरी) अन्तरिक्षम्। गो०उ० २. ७। अन्तरिक्षं पृथिव्याम् (प्रतिष्ठितम्)। ऐ० ३. ६। गो० उ० ३. २। अन्तरिक्षमस्यग्नौ श्रितम्। वायोः प्रतिष्ठा। तै० ३. ११. १. ८। य एवायम्पवते (वायुः) एतदेवान्तरिक्षम्। जै० उ० १. २०. २॥ तद् (ब्रह्म) इदमन्तरिक्षम्। जै० उ० २. ९. ६। अन्तरिक्षं वै प्र, अन्तरिक्षं हीमानि सर्वाणि भूतान्यनुप्रयन्ति। ऐ० २. ४१। इयं (पृथिवी) अन्तरिक्षम्। ऐ० ३. ३१। अन्तरिक्षं विश्वव्यचाः। तै० ३. २. ३. ७। अन्तरिक्षं सावित्री। गो० पू० १. ३३। अन्तरिक्षं वै नभांसि। तस्य रुद्रा अधिपतयः। तै० ३. ८. १८. १। अन्तरिक्षं पुरोधाता। ऐ० ८. २७। अन्तरिक्षमाग्नीध्रम्। तै० २. १. ५. १। अन्तरिक्षमुपभृत्। तै० ३. ३. १. २। ३. ३. ६. ११। वागित्यन्तरिक्षम्। जै० उ० ४. २२. ११। अन्तरिक्ष एव महः। गो० पू० ५. १५। महद्धा अन्तरिक्षम्। ऐ० ५. १८, १९। अन्तरिक्षलोको माध्यन्दिनं सवनम्। गो० उ० ४. ४.। अन्तरिक्षमगाधः। जै० उ० ३. ४. २ उपहूतं वामदेव्यं (साम) सहान्तरिक्षेण श० १. ८. १. १९। अन्तरिक्षदेवत्यो हि सोमः गो० उ० २. ४। वसुरन्तरिक्षसत्। श० ५. ४. ३. २२। अन्तरिक्षलोको यजुर्वेदः। ष० १, ५ अन्तरिक्षं वै यजुषामायतनम्। गो० पू० २ २४। अन्तरिक्षं त्रिष्टुप्। जै० उ० १. ५५. २ त्रैष्टुभमन्तरिक्षम्। श० ८. ३. ४. ११। त्रैष्टु

भोऽन्तरिक्षलोकः । कौ० ८. ९ । (प्रजापतिः) भुव इत्येव यजुर्वेदस्य रसमादत्त । तदिदमन्तरिक्षमभवत् । तस्य यो रसः प्राणेदत् स वायुरभवद्रसस्य रसः । जै० उ० १. १. ४ । भुवरिति यजुर्भ्योऽक्षरत् । सोऽन्तरिक्षलोकोऽभवत् । ष० १. ५ । स भुव इति व्याहरत् । सोऽन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । तै० २. २ ४. २, ३ ॥

अन्तरिक्षऽसत् योऽन्तरिक्ष आकाशे वा सीदति ४. ४०. ५ । यो धर्मावकाशे सीदति १२. १४ ॥ अन्तरिक्षसदम् अवकाशे गमकम् ६. २ ॥

वसुरन्तरिक्षसत् । श० ५. ४. ३. २२ ॥

अन्तरिक्षऽप्राः योऽन्तरिक्षं प्राति व्याप्नोति सः ७. ४९. १ ॥ अन्तरिक्षऽप्राम् स्वतेजसा अन्तरिक्षं प्राप्य प्राति पिपर्ति ताम् १. ५१. २ ॥

अन्तरिक्षप्रुत्ऽभिः अवकाशे गच्छन्तीभिः १. ११६. ३ । अन्तरिक्षं प्रति गन्तृभिः (भूमिका १९८) १. ११६. ३ ॥

अन्तरिक्ष्याः अन्तरिक्षे भवाः ५. ५४. ६ ॥

अन्तर्यामः अन्तर्मध्ये यामाः प्रहराः यस्मिन्समये सः १३. ५५ । योऽन्तर्मध्ये याति स वायुः १८. १९ ॥ अन्तर्यामि यमनामयं यामः अन्तश्चासौ यामश्च तस्मिन् ७. ५ ॥

तद्यदस्यैषो (उदानः) ऽन्तरात्मन्यतो यद्वैनेनेमाः प्रजा यतास्तस्मादन्तर्यामो नाम । श० ४. १. २. २ । (यज्ञस्य) उदान एवान्तर्यामः । श० ४. १. १ । अन्तर्यामोऽपान एव । कौ० १२. ४ । असौ (द्यौः) एवान्तर्यामः । श० ४. १. २. २७ । अन्तर्यामपात्रमेवान्ववयः प्रजायन्ते । श० ४. ५. ५ ३ ॥

अन्ति समीपे [अत्र सुपां सु० इति लुविभक्तेर्लुक् । छान्दसो वर्णलोपो वेति 'क' लोपश्च] १. ७९. ११ । अन्तिके १. ९४. ९ । अनन्ति जीवन्ति विद्यादिसुखसाधनैर्ये तेऽन्त्यः [अत्रानधातोरौणादिकस्तिन् प्रत्ययः । सुपां सुलुगिति जसो लुक् च] १. ८९. ९ ॥ अन्तौ बन्धने १७. ६० ॥

अन्तिऽऊतिम् अन्ति निकट ऊती रक्षणाद्या क्रिया यस्य तम् १. १३८. १ ॥

अन्तिके समीपे ४०. ५ ॥

अन्तिकं कस्मात् ? आनीतं भवति । नि० ३. ९ ॥

अन्तितः समीपतः १. १७९. ५ ॥

अन्तिमित्राः अन्तौ समीपे मित्राः साहाय्यकारिणो यस्य सः १७. ८३ ॥

अन्त्याय अन्ते भवाय ६. २० ॥

अन्धः अन्नम् [अन्ध इत्यन्ननामसु पठितम् निघ० २. ७ । अदेर्नुम् धौच । उ० ४. २१३ । अनेनाऽदेरसुन् प्रत्ययो नुमागमो धकारादेशश्च । वा शरप्रकरणे खरपरे लोपो वक्तव्य इति विसर्जनीयलोपः]; प्राप्तुं योग्यो रसो वा [अन्ध

इति पदनामसु पठितम् । निघ० ४. २ । अनेन प्राप्तव्यो रसो गृह्यते] ३. २० । अद्यते यत्तदन्धोऽन्नम् ८.५४ । नेत्रहीनः १. ६४. ७ । रसम् ६.६३. २ ॥ अन्धसः अन्नानि पृथिव्यादीनि १. ६. १ । अन्नादेः १. ५२. ३ । अन्नादियोगात् १६. ७३ । अन्नादेः सकाशात् २६. ९ । अन्नादेर्मध्ये २६. २४ । अन्धकाररूपस्याऽन्यायस्य १६. ७५ । आवरणस्य १६. ७६ । अधर्माचरणस्य १६. ७७ ॥

अन्धः अन्ननाम । निघ० २.७ ॥ अन्धांसि अन्नानि । नि० ९. ३४ ॥ अन्धसोऽन्नस्य । नि० ११.७ ॥ अन्धसस्पतऽइति सोमस्य पतेऽइत्येतत् । श० ९. १. २४ । अरद्वा अन्धः । तां० १२. १.३. ३ । अन्धो रात्रिः । तां० ९. १. ७ ॥

अन्धः ज्ञानशून्यः १. १६४. १६ । अन्धकारकृत् ४. १६. ६ ॥ अन्धम् अविद्यान्धकारयुक्तम् १. ११२. ८ । अविद्यायुक्तम् १. १४७. ३ । चक्षुर्हीनः १. ११६. १६ । चक्षुर्विज्ञानविकलम् ४. ३०. १६ । आवरकम् ४०. ६ । दृष्ट्यावरकम् ४०. १२ ॥

अन्ध इत्यन्ननाम आध्यायनीयं भवति । तमोऽप्यन्धउच्यते ; नास्मिन् ध्यानं भवति न दर्शनम् अन्धमन्धीतरोऽन्ध एतस्मादेव । नि० ५. २ ॥

अन्धाहीन् अन्धान् सर्पान् २५. ७ ॥

अन्नपते ! अन्नानां पालक ! ११. ८३ ॥

अन्नभागः खानपान (सं० वि० १७४) अथर्व० ३.३०.६ ॥

अन्नम् अत्तुं योग्यमत्तुमर्हं वा २. ३५. ७ । तण्डुलादिकमत्तव्यम् १६. ६६ ॥ अन्नेन पृथिव्यादिना ३१. २ ॥ अन्नस्य प्राणधारणस्य निरन्तरसुखस्य च हेतुः [कृ० उ० ३. १० इत्यनधातोर्नः प्रत्ययः । धापृवस्यज्य० उ० ३. ६ इत्यतधातोर्नः प्रत्ययः] ३. ४३ ॥

अन्नम् उदकनाम निघ० १. १२ । कौ०नि० ७५ ॥ अन्नं कस्मात् ? आनतम्भूतेभ्यः ; अत्तेर्वा । नि० ३. ९ ॥ अर्को वै देवानामन्नम् । श० १२.८. १. २ । तै० १. १. ८. ५ । अन्नं वै देवा अर्क इति वदन्ति । तां० १५. ३. २३ । अन्नं वा अर्कः । तां० ५. १. ९ । १४. ११. ९ । १५. ३. ३४ । गो० उ० ४. २ । अन्नमर्कः । श० ९. १ १. ४ । अन्नं वै वाजः । तां० १३. ९. १३. २१ । १५. ११. १२ । १८. ६. ८ । त्रेधाविहितं ह्यन्नम् । श० ८. ५. ३. ३ । त्रिवृद्धयन्नम् । श० ३. २. १. १२ । ३. ७. १. २० । त्रिवृद्वा अन्नं कृषिर्वृष्टिर्बीजम् । श० ८. ६. २. २ । विरूपं (नानारूपम्) अन्नम् । तां० १४. ९. ८ । पाङ्क्तं ह्यन्नम् । तां० ५. २. ७ । सप्त वा अन्नानि । तै० १. ३. ८. १ । सर्वं ह्येतदन्नं यद्दधिमधुघृतम् । श० ९. २. १. ११ । एतद् परममन्नं यद्दधिमधुघृतम् । श० ९ २. १. १२ । यद्वाऽआत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति । श० ७. ५. १. १४ । ९. २. ७. २ । प्राणो वा अन्नम् । ऐ० ५. २७ ॥ ७. ३ । अन्नं वै सर्वेषां भूतानामात्मा । गो० उ० १. ३ । वैश्वदेवं वा अन्नम् । तै० १. ६. १ । १० ॥ अन्नं वाऽआयतनम् । श० ६. २.

१. १४। अन्नं जीवनꣳ हीदꣳ सर्वम्। श० ७. ५. १. २०। अन्नं प्राणमन्नमपानमाहुः। अन्नं मृत्युं तमु जीवातुमाहुः। अन्नं ब्रह्माणो जरसं वदन्ति। अन्नमाहुः प्रजननं प्रजानाम्। तै० २. ८. ८ ३। अन्नमेव ग्रहः। अन्नेन हीदꣳ सर्वं गृहीतम्। श० ४. ६. ५. ४। तस्मात्प्राणोऽन्नेन गृहीतो यो ह्येवान्नमत्ति स प्राणिति। श० ७. ५. १ १६। तस्मात्प्राणेनान्नं गृहीतं यो ह्येव प्राणिति सोऽन्नमत्ति। श० ७. ५. १. १७। अन्नं प्राणः। तै० ३. २. ३. ४। अन्नꣳ हि प्राणः। श० ३. ८. ४. ८। ४. ३. ४. २५। ताः (प्रजाः) अन्नादेव सम्भवन्ति तस्माद्वन्नमेव प्रजाः। श० २. ५. १. ६। अन्नं पशवः। ऐ० ५. १९। रेतो वा अन्नम्। गो० पू० ३. २३। अन्नमु श्रीः। श० ८. ६. २. १। अन्नं वै ब्रह्मणः पुरोधा। तां० १२। ८. ६। १३ ९. २७। १४. ९. ३८। अन्नमशीतयः। श० ९. १. १. २१। अन्नमशीतिः। श० ८. ५. २. १७। अन्नं वै चन्द्रमाः। तै० ३. २. ३. ४। अन्नं वाऽअपां पाथः। श० ७. ५. २. ६०। अन्नं वै प्रजापतिः। श० ५. १. ३. ७। अन्नं वाऽअयं प्रजापतिः। श० ७. १. २. ४। यत्तदन्नमेव स विष्णुर्देवता। श० ७. ५. १. २१। अन्नं वै ठत्र हीमानि सर्वाणि भूतानि विष्टानि। श० १४. ८. १३. ३। अन्नं वै पूषा। कौ० १२. ८। तै० १. ७. ३. ६। ३. ८. २३. २। अन्नं वाजः। श० ५. १. १. १६। ८. १. १. ९। अन्नं वै वाजः। तै० १. ३. ६. २. ६। १. ३. ८. ५। श० ५. १. ४. ३। ६. ३. २. ४। अन्नं वै वाजाः। श० १. ४. १. ९। अन्नं वै वाजपेयः। तै० १ ३. २. ४। अन्नं नमः। श० ६. ३. १. १०। अन्नꣳ हि स्वाहाकारः। श० ६. ६. ३. १७। अन्नं वै स्वाहाकारः। श० ९. १. १. १३। अन्नꣳ पुष्टिः। श० ७. २. २. ५। अन्नꣳ रश्मिः। श० ८. ५. ३. ३। अन्नं वै नृम्णम्। कौ० २७. ४। भर्गो देवस्य कवयो ऽन्नमाहुः। गो० पू० १, ३२। अन्नं वै भद्रम्। तै० १. ३. ३. ६। (मेधः) मेधाय इत्यन्नायेत्येतत्। श० ७. ५. २. ३२। अन्नं प्रेतिः। श० ८. ५. ३. ३। अन्नं वै पितुः। श० १. ९. २ २०। ७. २. १. १५। अथर्वपितुं मे गोपायेत्याह। अन्नमेवैतेन स्पृणोति। तै० १। १. १०. ४। अन्नं वै पितु। ऐ० १. १३। अन्नं वै देवाः पृश्नीति वदन्ति। तां० १२। १०. २४। अन्नं वै पृश्नि। तै० २. २. ६. १। श० ८. ७. ३. २१। अन्नं वै रूपम्। श० ९. २. १. १२। अन्नं वै सुरूपम्। कौ० १६. ३। अथ यत्कृष्णं तदपां रूपमन्नस्य मनसो यजुषः। जै० उ० १. २५. ९। अन्नं वै वयश्छन्दः। श० ८. ५. २. ६। अन्नं वै गिरश्छन्दः। श० ८. ५. २. ५। अन्नं प्रच्छच्छन्दः। श० ८. ५. २. ४। अन्नं केतः। श० ६. ३. १. १९। अन्नं पुरीषम्। श० । ८. १. ४. ५। ८. ७. ३. २। अन्नं वै पुरीषम्। श० ८. ५. ४ ४। ८. ६. १. २१.। १४. २. १. २३। अन्नं वै कम्। ऐ० ६. २१। गो० उ० ६। ३। तदन्नं वै विश्वम्प्राणो मित्रम्। जै० उ० ३. ३. ६। अन्नं व्रतम्। तां० २३. २७. २। अन्नꣳ हि व्रतम्। श० । ६. ६, ४. ५। अन्नं वै व्रतम्। तां० २२. ४. ५। श० ७. ५. १. २५। अन्नं भुजिष्याः। श० ७. ५. १. २१। अन्नꣳ हि गौः। श० ४. ३. ४. २५। जै० उ० ३. ३. १२। अन्नं वै गौः। तै० ३. ९. ८. ३। अन्नं पयवः। श० ६. २. १. १५। ७. ५. २. ४२। आपो वै सूदोऽन्नं दोहः। श० ८. ७. ३. २१। [illegible] कौ० ९. ६। तां० ६. ६. ११। अन्नꣳ सोमः। श० ३. ३. ४. २८। अन्नं वै

सोमः । श० ३. ९. १. ८ । ७. २. २. ११ । एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः । श० १. ६. ४. ५ । २. ४. २. ७ । ११. १. ४. ४ । अन्नꣳ सुरा । तै० १. ३. ३ ५ । अन्नं विशः । श० २. १. ३. ८ । अन्नं वै विशः । श० ४. ३. ३ १२ । ५. १. ३. ३ । ६. ७. ३. ७ । अन्नं वै श्रीर्विराट्, । गो० पू० ५. ४ । गो० उ० १. १९ । अन्नं विराट् । कौ० ९. ६ । १२. ३ । तै० १. ६. ३. ४ । १. ८. २. २ । तां० ४. ८. ४ । अन्नं विराट् तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति तद्विराजो विराट्त्वम् । ऐ० १. ५ । अन्नं वै विराट् । ऐ० १ ५ । ४. ११ । ५. १९ । ६. २० । श० ७. ५. २. १९ । अन्नं वै पङ्क्तिः । गो० उ० ६. २ । पङ्क्तिर्वा अन्नम् । ऐ० ६. २० । पाङ्क्तमन्नम् । तां० १२. १. ९ । पाङ्क्तꣳ (पञ्चविधम्) ह्यन्नम् (भक्ष्यं खाद्यं चोष्यं लेह्यं पेयमिति सायणः) । तां० ५. २. ७ । अन्नं वा इडा । ऐ० ८. २६ । कौ० ३. ७ । अन्नं वा आपः । श० २. १. १. ३ । ७. ४. २. ३७ । ८. २. ३. ६ । तै० ३. ८. २. १ । ३. ८. १७. ५ । अन्नं वृष्टिः । गो० पू० ४. ४. ५ । सप्तदशꣳ ह्यन्नम् । श० ८. ४. ३. ७ । अन्नं वै सप्तदश । तां० २. ७. ७ । १७. ९. २ । १९. ११. ४ । २०. १०. १ । २५. ६. ३ । अन्नं सावित्री । गो० पू० १. ३३ । अन्नं वै स्वयमातृण्णा (इष्टका) । श० ७. ४. २. १ । अन्नꣳ समिष्टयजुः । श० ११. २. ७. ३० । अन्नं वै यजुष्मत्य इष्टकाः श० ८. ७. २. ८ । अन्नमेव यजुः । श० १०. ३. ५. ६ । अन्नं याज्या । कौ० १५. ३ । १६. ४ । गो० उ० ३. २१ । अन्नं वै याज्या । गो० उ० ३. २२ । ६. ८ । अथो अन्नं निविद इत्याहुः । कौ० १५. ३, ४ । अन्नमुक्थानि । कौ० ११. ८ । १०. ७ । अन्नं वा उक्थ्यम् । गो० पू० ४. २० । अन्नं वा उक्थ्यः । श० १२. २. २. ७ । अन्नं वै स्तोमाः । श० ९. ३. ३. ६ । अन्नं पृष्ठानि । तां० १९. ९. ४ । अन्नं न्यूङ्खः । कौ० २२. ६. ८ । २५. १३ । ३०. ५ । अन्नं वै न्यूङ्खः । ऐ० ५. ३ । ६. २९, ३०, ३६ । गो० उ० ६. ८, १२ । तस्मादाहुः सामैवान्नमिति । सा० १. १. ३ । साम देवानामन्नम् । तां० ६. ४. १३ । एतद्वै साक्षादन्नं यद्राजनं (साम) पञ्चविधं भवति पाङ्क्तं ह्यन्नम् । तां० ५. २. ७ । अन्नं वै रथन्तरम् । ऐ० ८. १ । अन्नं वै मरुतः । तै० १. ७. ३. ५ । १. ७. ५. २ । १. ७. ७. ३ । अन्नं वै गार्हपत्यः । श० ८. ६. ३. ५, एते हि साक्षादन्नं यद्रुषाः । तै० १. ३. ७. ६ । अन्नं वा ऊर्गुदुम्बरः । श० ३. २. १. ३३ । ३. ३. ४ २७ । अन्नꣳ सम्मार्जनानि । तै० ३. ३. १. ५ । वरुणोऽन्नपतिः । श० १२. ७. २. २० ॥

अन्नादम् योऽन्नं यवादिकं सर्वमत्ति तम् २.५॥

अन्नादो अग्निः । श० २. १. ४. २८ । प्रजापतिर्वै देवानामन्नादो वीर्यावान् । तै० ३. ८. ७. १ । स यो हैवमेतं वृत्रमन्नादं वेदान्नादो हैव भवति । श० १. ६. ३. १७ ॥

अन्नाद्यम् खाने के योग्य पदार्थ (सं० वि० १७६) अथर्व० १२. ५. १० ॥ अन्नाद्येन अन्नादिराज्यैश्वर्येण (भूमिका १६६) अथर्व० १३. ४. ५६ ॥

एतद्वै परममन्नाद्यं यत्सोमः । कौ० १३. ७ । यश उ वै सोमो राजान्नाद्यम् । कौ० ९. ६ । श्रीर्विराडन्नाद्यम्, कौ० १. १ । २. ३ । १२. २ । श्रीर्वै विराड् यशोऽन्नाद्यम् । गो० पू० ५. २० । गो० उ० ६. १५ । विराडन्नाद्यम् । ऐ० ४. १६ । ८. ४ । एतद्वै कृत्स्नमन्नाद्यं यद्विराट्, कौ० १४. २ । सो (प्रजापतिः) ऽब्रवीदेकं वावेदमन्नाद्यमसृक्षि सामैव । जै०उ० ३. १. ११ ॥

अन्नियते अदतां नियते निश्चिते समये ४. २. ७ ।

अन्यऽउदर्यः अन्योदराज्जातः ७. ४. ८ ॥

अन्यः अन्यः भिन्नो वा ६. ३७ । कश्चिदपि द्वितीयः १. ५२. १३ ॥ अन्यान् शत्रून् ३. ४६. २ ॥

अन्यः नानेयः नि० १. ६ ॥ अन्ये सपत्नाः नि० १०. ७६ ॥

अन्यऽकृतम् अन्येन कृतम् ६. ५१. ७ ॥

अन्यऽजातम् अन्येनाऽन्यस्माद्वा समुत्पन्नम् ७. ४. ७ ॥

अन्यत् द्वितीयम् १. ३०. १६ । भिन्नम् १. ११५. ५ ॥

अन्यत्ऽअन्यत् पृथक् पृथक् ३. ३८. ७ ॥

अन्यतः भिन्नात् १. ४. ५ ॥

अन्यतःऽएन्यः या अन्यतो यन्ति प्राप्नुवन्ति ताः २४. ८ ॥

अन्यतःऽशितिबाहुः अन्यतः शितयो बाहवो-र्यस्य सः २४. २ ॥

अन्यतःऽशितिरन्ध्रः समन्ततो रन्ध्राणीव शितयः श्वेतचिन्हानि यस्य, सः २४. २ ॥

अन्यतोरण्याय अन्यतोऽरण्यानि यस्मिन्देशे तद्विनाशाय ३०. १६ ॥

अन्यत्र अन्य स्थान में ७. ९१. ५ ।

अन्यन्नायः कोकिलाख्यः पक्षिविशेषः २४. ३७ ॥

अन्यत्र तस्य धर्मविरुद्धाचरणस्य ५. २०. २ । अन्येषां पालने व्रतं शीलं यस्य तस्य ३८. २०. ॥

अन्याऽअन्या भिन्ना भिन्ना पृथक् पृथक् संयुक्ते च [अत्र वीप्सायां द्विर्वचनम्] १. ६२. ८ । भिन्ना भिन्ना एकैका कालभेदेन ३३. ५ । परस्परं वर्तमाना १. ६९. १ ॥

अन्यादृङ् अन्येन समानः १७. ८१ ॥

अन्वागन्ता धर्ममन्वागच्छति यः सः १८. ९६ ॥

अन्वातताान आच्छाद्य विस्तारयति ८. ६२॥

अन्वातांसीत् पश्चात्समन्तात्तनुताम् [अत्र वचनव्यत्ययेन द्विर्वचनस्याने एकवचनम्] १५. ५३ ॥

अन्वारभामहे आरम्भ करें ६. २१ । स्थापयेम ३५. १३ ॥

अन्वालेभिरे अनुलभन्ते ३४. ४६ ॥

अन्वित्या अन्वेषणेन १५. ६ ॥

अन्वमन्विति । ऋ० ८. ५. ३. ३ ॥

अप निवारणे [निपातस्य च अ० ६. ३. १३६ इति दीर्घः] १. ७. ६ । दूरीकरणे वर्जने निषेधार्थे वा २. १५ । दूरार्थे ३. २१ । पृथग्भावे १. ५०. २ । विरुद्धार्थे १. ८५. ३ । अपराधे १. ४८. ८ । क्रियायोगे १. ११. ५ । धात्वर्थे १. १०. ७ ॥

अपऽअकंषन् प्रादुर्भूतोऽस्ति (भूमिका ६) अथर्व० १०. ७. २० ॥

अपऽअतक्षन् उत्पन्नोऽस्ति (भूमिका ६) अथर्व० १०. ७. २० ॥

अपऽअवंपः दूरे प्रक्षिप १. १३३. ४ ॥

अपऽअवंपत अधो वपति २. १४. ६ ॥

अपऽउदकाभिः अपगत उदकप्रवेशो यासु ताभिः १. ११६. ३ ॥

अपऽऊर्णुते उद्घाटयति प्रकाशयति आच्छादकमन्धकारं निवारयति १. १९६. ४ ॥

अपऽऊर्णुवन्तः अविद्यादिदोषैरनावरन्तः १. १६०. ६ । निवारयन्तः ४. ४५. २ ॥

अपः [अपः] कर्म १. १५१. ४ ॥

अपः कर्मनाम निघ० २. १ । कौ० नि० ६१ ॥ कर्म नि० ४ १७ । अपो यत्कर्म । नि० ७. २७ । प्रजननकर्म । नि० ११. २८ ॥

अपःऽतमः अतिशयेन क्रियावान् १. १६०. ४ ॥

अपःऽतमा अतिशयेन कर्मकर्त्री ६. ६१. १३ ॥

अपकामम् कामविनाशनम् ६. ७५. २ । अपगतश्चासौ कामश्च तम् २६. ३६ ॥

अपगल्भम् प्रगल्भतारहितम् ३०. १७ ॥ अपगल्भाय अपगतं दूरीकृतं गल्भं धार्ष्ट्यं येन तस्मै १६. ३२ ॥

अपऽगूर्य उद्यम्य ५. ३२. ६ ॥

अपंऽगूढम् अपगतश्चासौ गूढश्च तम् १. २३. १४ । अपगतं संवरणमाच्छादनं यस्मात्तत् १. ११६. ११ । गुप्तम् ४. ५. ३ ॥ अपऽगूढा आच्छादितानि १. १२३. ६ ॥

अपऽगोहम् आच्छादकम् २. १५.७ ॥

अपचत् पचति ५. २९. ७ ॥

अपचन्त पचन्ति १. १६४. ४३ ॥

अपंचितिः प्रजाजनकम् २०. ६ ॥ अपचितिम् सत्कारम् ४. २८. ४ ॥

अपचेतयाते अपचेतयेत् [चितिसंज्ञाने इतिणयन्तस्य लेटः प्रथमपुरुषस्यैकवचने प्रयोगोऽयम्] २. १७ ॥

अपऽच्युवम् त्यागम् १. २८. ३ ॥

अपऽजगुराणः पृथक्कुर्वन् ५. २९. ४ ॥

अपतिऽघ्नी पति को दुःख न देने वाली (सत्य० १२१) अथर्व० १४. २.१८ ॥

अपत्यऽसाचम् उत्तमापत्यसंयुक्तम् २. ३०. ११ । यदपत्ये सचति व्याप्नोति तत् ६. ७२. ९ ॥

अपत्यम् सन्तानम् १. १७४. ६ ॥

अपत्यं कस्माद् ? अपततं भवति, नानेन पततीति वा । नि० ३. १ ॥

अपदीऽइति अविद्यमानपादे १. १८५. २ ॥

अपदे न विद्यन्ते पदानि चिन्हानि यस्मिँस्तस्मिन्नन्तरिक्षे १. २४. ८ । चौरादिनिष्पादितेऽप्रसिद्धे व्यवहारे ८. २३ ॥

अपद्महि प्राप्नुयाम् ४. २६ ॥

अपद्यन्त प्राप्त होते हैं (सं० वि० १७०) अथर्व० १४. २. ३२ ॥

अपद्रन् अपद्रवन्ति ६. २०. ४ ॥

अपऽधा योऽपदधाति सः [अत्र सुपां सुलुक् इति विभक्तेर्डादेशः] २. १२.३ ॥

अप॑न्नगृहस्य अप्राप्तगृहस्य कुमारब्रह्मचारिणः ६. २४ ॥

अ॒पु॒ऽपि॒त्वम् अपचयम् ३. ५३. २४ ॥

अ॒प॒प्त॒त् [उत्–] उदय होता है १. १६१. ६ ॥

अ॒प॒प्त॒न् पतन्ति १. ६२. २ । गच्छन्ति ६. ६४. २ ॥

अ॒प॒ऽबाध॑मानः अपबाधते सः १७. ३६ ॥

अ॒प॒ऽभ॒र्ता अपबिभर्ति दूरीकरोतीति २. ३३. ७ ॥

अप॑मृष्टः अपमृज्यते दूरीक्रियतेऽविद्यादि-क्लेशैर्यः सः शुद्धः ७. १२ । दूरीकृतः ७. १७ ॥

अप॑रः अन्यः ३५. १५ ॥ अपरा अपरौ १. १८९. १ ॥ अपरासः पश्चाद्भूताः ५. ४२. ६ ॥ अपरम् श्वो दिन-म्प्रति १. ३६. ६ । भविष्यति काले ३३. ६४ । पश्चात् १. १८४. १ । द्वितीयम् २. २८. ८ ॥

अ॒प॒र॒जाय॑ अपरं जाताय ज्येष्ठानुजायान्त्य-जाय वा १६. ३२ ॥

अप॑रा अन्य कोई पीछे उत्पन्न हुई (छोटी बहिन) १. १२४. ६ ॥ अपराः या जनिष्यन्ते ३. ५५. ५ । अन्याः ५. ४८. २ ॥

अप॑राऽजितम् यो न केनापि पराजितुं शक्यते तम् १. ११. २ ॥ अपराजिता शत्रुभिः पराजेतुमशक्यैः ३. ५२. ४ ॥

अप॑रिऽइतः अवर्जितः ५. २ ६. १४ ॥ अपरिऽइतासः अवर्जनीयाः १. ८६. १ ॥

अप॑रितासः अन्यैरव्याप्ताः २५. १४ ॥

अप॑रिऽविष्टम् परिवेषरहितम् २. १३. ८ ॥

अप॑रिऽस्कृतः परितः सर्वतोऽनावृतः २. १०. ३ ॥

अप॑रिहृ॒ताः सर्वतोऽकुटिला ऋजवो भूत्वा । [अपरिहृ्वृताश्च । अ ७. २. ३२ इत्यनेन निपातनाच्छन्दसि प्राप्तो ह्वुभावो निषिध्यते] १. १००. १६ । अपरिवर्जिताः १. १०२. ११ ॥

अ॒पु॒रीभ्यः॑ अपूर्णाभ्यः सेनाक्रियाभ्यः । [अत्र पृ धातोः अत्र इः । उ० ४. १४४ अनेन इः प्रत्ययः कृदिकारादक्तिनः अ० ४. १. ४५ अनेन ङीष् प्रत्ययः] १. ३२. १३ ॥ अपरीषु आगामिनी षूपस्सु १. ११३. ११ ॥

अ॒प॒र्वन् अपर्वणि, पर्वरहिते समये ४. १६. ३ ॥

अ॒प॒ऽव॒क्ता मिथ्यावादी ८. २३ ॥

अ॒प॒ऽव॒र्ता अपवारयिता [अत्र तृन् प्रत्ययः] ४. २०. ८ ॥

अ॒प॒ऽवाति॑ अपगतं वाति गच्छति १. १६२. १० ॥

अपऽवृतम् दानाय भोगाय वा प्रसिद्धम् १. ५७. १ ॥

अपऽव्रतान् अपगतानि दुष्टानि मिथ्याभाषणादीनि व्रतानि कर्माणि येषां तान् दस्यून् १. ५१. ८ । ब्रह्मचर्यसत्यभाषणादिव्रताचाररहितान् ५. ४२. ६ ॥ अपव्रतेन अन्यथा वर्तमानेन ९. ४०. ६ ॥

अपश्वात्ऽदध्वने उत्तमेषु व्यवहारेष्वग्रगामिने ६. ४२. १ ॥

अपश्यः पश्येत् [अत्र लिङर्थे लङ्] १. ३२. १४ ॥

अपश्यत् पश्यति १. १६४. ८ । पश्येत् ३. २६. ८ ॥

अपश्यताम् पश्यतः ७. ३३. १० ॥

अपश्यन् पश्येयुः १. ११३. ११ ॥

अपश्यन्त पश्यन्ति १. १४६. ४ ॥

अपश्यम् [अपश्यम्] पश्यामि [अत्रलङर्थे लङ्] १. १८. ८ । पश्येयम् १. १६३. ५ ॥

अपश्याम संप्रेक्षेमहि १. १३६. २ ॥

अपऽश्रितः योऽपश्रयति सः ५. ६१. १६ ॥ अपऽश्रितम् आसेवितम् १. ८४. १४॥

अपऽसेधन् दूरीकुर्वन् ३४. २६ । निवारयन् १. ३५. १० ॥

अपस्पृधेथाम् स्पर्धेयाम् ६. ६६. ८ ॥

अपस्यः अपःसु कर्मसु साध्व्यः [अत्र सुपांसुलुगिति शसः स्थाने सुः] १०.८ ॥

अपस्यात् आत्मनोऽपांसि कर्माणीच्छेत् १. १२१. ७ ॥

अपस्याम् आत्मनः कर्मेच्छाम् ७. ४५. २॥

अपस्युवः आत्मनोऽपांसि कर्माणीच्छन्तः १. ७६. १ ॥

अपहथंसि दूरे प्रक्षिपसि १८. ५२ ॥

अपह्नुवे आच्छादयेयम् १. १३८. ४ ॥

अपहताः अपहिंसिताः । अविद्वांसो दुष्टस्वभावाः प्राणिनः २. २६ ॥ अपहतम् विनाशितम् १. ६ ॥

अपाः पिब ३. ५३. ६ । पाहि ५. २६. ८ ॥

अपाक् पश्चिमतः ३. ५३. ११ । पश्चिमोपाः ६. ३६ ॥

अपाकः अप्रशस्यः [पाक् इति प्रशस्यनाम निघ० ३. ८] २०. ४४ । अपरिपक्वः ६. ११. ४ ॥ अपाकाः वर्जितपाकयज्ञा यतयः १. ११०. २ ॥

अपाका अपगतमविद्याजन्यं दुःखं यस्य तम् १. १२६. १ ॥

अपाङ् अपाञ्चति १. १६४. ३८ ॥

अपाचीः या अधोऽञ्चन्ति ९. ४८. २ ॥

अपात् पिबेत् २. ३७. ४ ॥

अपात् अविद्यमानौ पादौ यस्याः सा ३३. ६३ । अविद्यमानौ पादौ यस्य सः १.३२.७ । अविद्यमानाः पादा यस्याः सा [विद्या] १. १५२. ३ ॥

अपाताम् रक्षेतम् ३८. १३ ॥

अपादयत् विनाशयेत् २. ११. १० ॥

अपानः नाभेरधोगामिवातः १८. २ । बाह्यदेशाच्छरीरं प्रविशति स वायुरपानः (भूमिका १०३) अथर्व० १२. ५. ६ । अपानयति दुःखं येन सः २२. ३३ ॥ अपानाय दुःखनिवारणाय १३. १६ ॥

अपानो वा एतवाङ् । श० १.४.३.३ । अपाना: अनुयाजाः । श० ११. २. ७२७ । अन्तर्ह्यपानः । तां० ७.६.१४ । अन्तर्यामो अपान एव । कौ० १२. ४ । अग्निरपानः । जै० ३. ४. २२. ९ । अपानो वरुणः । श० ८. ४. २. ६ । वरुणस्य सायं (कालः) आसवोऽपानः । तै० १. ५. ३. १ । अपानः प्रस्तोता । कौ० १७. ७ । गो० उ० ५. ४ । अपानस्त्रिष्टुप् । तां ७. ३. ८ । अपानो रथन्तरम् । तां ७. ६. १४ । अपानो याज्या । श० १४. ६. १. १२ । अपानो वै यन्ताऽपानेन ह्ययं यतः प्राणो न पराङ् भवति । ऐ० २. ४० ॥

अपानती अपानमधोगमनशीलं वायुं निष्पादयन्ती विद्युत् ३. ७ ॥

अपानदाः या अपानं दुःखदूरीकरणसाधनं प्रयच्छन्ति ताः १७. १५ ॥

अपानपाः योऽपानं पाति २०. ३४ ॥

अपापकाशिनी अपापान् सत्यधर्मान् काशितुं शीलमस्याः सा १६. २ ॥

अपापविद्धम् यत् पापयुक्तं पापकारि पापप्रियं कदाचिन्न भवति तत् ४०. ८ । प्रापात् पृथग्भूतम् (भूमिका ३२०) ४०.८ ॥

अपाम आप्नुयाम १०. २१ ॥

अपामार्ग ! रोगनिवारकोऽपामार्ग औषधिरिव पापदूरीकर्ता ३५. ११ ॥

प्रतीचीनफलो वाऽअपामार्गः । श० ५. २. ४. २० ॥

अपायि [अपायि] पाति ६.४४.८ । पिबति ६.४४.१६ । पान क्रिया २.१६.१ ॥

अपारः पाररहितः ९. ८७. ६ ॥ अपारम् अपारविद्यं गम्भीराशयम् ४. १७. ८ ॥

अपारयत् पारयति २. १५. ५ । पारयेत् ४. ३०. १७ ॥

अपारे अगाधे द्यावापृथिव्यौ [अपारे इति द्यावापृथिवीनाम निघ० ३. ३०] ३. १. १४ ॥

अपारे द्यावापृथिवीनाम निघ० । ३. ३० ॥ दूरपारे । नि० ६. १ ॥

अपि भी १. १२१. १३ । निश्चयार्थे १. १४०. ७ ॥

अपीति संसर्गम् । नि० १. ३ ॥

अपिऽइतेः विनाशनात् १. १२१. १० ॥

अपिऽइत्य निश्चयेन प्राप्य [अत्र संहितायामिति दीर्घः] २. ४३. २ ॥

अपिऽइव समुच्चिता इव ३. ३८. ९ । अतीव ७. १८. ६ ॥

अपिथ्थंशत् अवनयन्ति २९. ३४ । अवनयन्ति [अत्र बहुलं छन्दसीति शस्विकरणोपि] ३. ६०. ३ ॥

अपिंशत् अकरोत् नि० ८१. ४ ॥

अपिंशत अवयवीकुरुत १. ११०. ८ । विभक्तान् कुरुत १. १६१. ६ ॥

अपिंशन् साऽवयवान् कुर्वन्ति ४. ३३. ४ ॥

अपिऽकक्षे पार्श्वे ४. ४०. ४ । पार्श्वावयवे ६. १४ ॥

अपिकक्ष्यम् कक्षासु विद्याप्रदेशेषु भवा बोधाः कक्ष्यास्तान्प्रति वर्तते तम् १. ११७. २२ ॥

अपिऽकर्णे आच्छादितश्रोत्रे ६. ४८. १६ ॥

अपिजाय निश्चयेन जायमानाय ६. २० । उत्पन्नाय २२. ३२ । स्वीकाराय १८. २८ ॥

अपिऽजुवा प्रेरके २. ३१. ५ ॥

अपिधानेऽवन्तम् आच्छादनयुक्तम् ९. २६. १२ ॥

अपिऽधाना अपिधानान्यावरणानि १. ९१. ४ । अपिधानानि मुखच्छादनानि १. १६२. १३ ॥

अपिऽधीन् सद्गुणधारकान् दुःखाच्छादकान् १. १२७. ७ ॥

अपिन्वः पिन्व २. ११. २ ॥

अपिन्वत् [अपिन्वत्] सेवतें १. ६२ ६ । सेवेत, सिञ्चेत वा ४. १६. ७ ॥

अपिन्वत [अपिन्वत] सिञ्चति, सेवते वा ३. ५९. १३ । विद्या और उपदेश से संयुक्तक्रिया करो (सं० वि० २४०) १०. ७२. ७ ॥

अपिन्वतम् जलादिभिः सिञ्चतम् १. ११७. २० । सेवन करो १. ११८. ८ ॥

अपिन्वम् सेवे ४. ४२. ४ ॥

अपिंपत पूरयेत् ९. ३४. २ ॥

अपिऽप्राणी निश्चितप्राणबलप्रदा १. १८६. ११ ॥

अपिप्रियम् प्रीणामि [णयन्ताल्लुङ् प्रयोगोऽयम्] २६. ७ ॥

अपिबः [अपिबः] पी चुके हो ७. ३५ । पिबति ३. ३२. ६ । पिबसि ३. ३२. १० । पिब १०. ३४ । पिबेः २० ७७ ॥

अपिबत् [अपिबत्] पिबति [अत्र लडर्थे लङ्] १. ३२. ३ । पिबेत् ३. ४८. ४ । गृह्णीयात् १६. ७५ ॥

अपियन्तम् म्रियमाणम् १. १६३. २० । योऽप्येति तम् २५. ४३ ॥

अपिऽरिप्ताय सकलविद्योपचयनाय [लिप् धातोर्निष्ठा कपिलकादित्वाल्लत्वविकल्पः] १. ११८. ७ ॥

अपिऽवातयन्तः शीघ्रं गमयन्तः १. १६५. १३ ॥

अपिऽवृतम् सुखबलैर्युक्तम् १. १२१. ४ । आच्छादितम् १. ११. ५ ॥

अपिऽशर्वरे निश्चिते रात्रावन्धकारे ३.६.७ ॥

अपिशर्वराणि (छन्दांसि) अपिशर्वर्या अनुष्टम-सोऽत्यनुवन्नपिशर्वराणि खलु वा एतानि छन्दांसीति ह स्माहैतानि हीन्द्रं रात्रेस्तमसो मृत्योर्बिभ्यतमत्यपारयंस्तदपिशर्वराणामपिशर्वरत्वम् । ऐ० ४. ५ । तद्यदपिशर्वर्या अपिशर्वरमसोऽत्यनुवंस्तदपिशर्वराणामपिशर्वरत्वं शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति ह स्माहैतानि ह वा इन्द्रं रात्र्यास्तमसो मृत्योरभिपत्या आरयंस्तदपिशर्वराणामपिशर्वरत्वम् । गो० उ० ५. १ । द्वादशस्तोत्राण्यपिशर्वराणि । ऐ० ४. ६ ॥

अपिऽस्थितम् स्थिर हुए को १. १४५. ४ ॥

अपिऽहितम् आच्छादितम् १. ३२. ११ ॥

अपिहिताऽइव आच्छादितानीव ४. २८. १ ॥

अपीच्यम् येऽप्यञ्चन्ति प्राप्नुवन्ति तेषु साधुम् १. ८४. १५ । स्वगुणैर्निश्चितम् [अपीच्यमिति निर्णीतान्तर्हितनाम । निघ० ३. २५] २. ३५. ११ ॥

अपीच्यमिति निर्णीतान्तर्हितनाम । निघ० ३. २५ । कौ० नि० १०७ ॥ अपीच्यमपचितं, अपगतं अपहितं, अन्तर्हितं वा । नि० ४. २५ ॥

अपुः [अपुः] पिबन्ति १. १६४. ७ । पिबन्तु २१. ६० ॥

अपुः रूपनाम । निघ० ३. ७ ॥

अपुनन् पवित्र करती हैं ३. ३. ६ ॥

अपुपोत् पवित्रं कुर्यात् ३. २६. ८ ॥

अपुरुषघ्नः यः पुरुषान्न हन्ति सः १. १३३. ६ ॥

अपुष्पाः पुष्परहिताः १२. ८६ ॥ अपुष्पाम् कर्मोपासनानुष्ठानाचारविद्यारहिताम् (भूमिका ३३७) १०. ७१. ५ ॥

अपूपम् पुआ ३. ५२. ७ ॥

इन्द्रियमपूपः । ऐ. २. २४ ॥

अपूपऽवन्तम् प्रशस्ता अपूपा विद्यन्ते यस्य तम् ३. ५२. १ । सुष्ठुसम्पादितापूपसहितम् २०. २६ ॥

अपूर्व्यम् अनुत्तमगुणकर्मस्वभावम् ३४. २ ॥

अपूर्व्यः पूर्वैः कृतः पूर्व्यो न पूर्व्योऽपूर्व्यः १. १३४. ६ ॥ अपूर्व्यम् अपूर्वेषु दिव्येषु गुणेषु कुशलम् ३. १३. ५ । अपूर्वे भवम् ५. ५६. ५ ॥ अपूर्व्या न पूर्वैः कृता [अत्र पूर्वैः कृतमिनियौ च अ० ४. ४. १३४. अनेनायं सिद्धः] १. ४६. १ । न विद्यते पूर्वो यस्मात् सोऽपूर्वस्तत्र भवानि ६. ३२. १ ॥

अपृच्छत् पृच्छन्तु १. १६१. ४ ॥

अपृच्यन्त पृच्यन्ति १. ११०. ४ ॥

अपृणः पृष्णीयाः ३. ३. १० ॥

अपृणक् तर्पयेत् ४. १६. ७ ॥

अपृणत् पृणाति व्याप्नोति २. १९. २ । तर्पयति २. २२. २ । पूरयति ३. २. ७ । प्रपूरयेत् ३. ३४. १ ॥

अपृणतः आपालयतः ५. ७. १० । दुःखदातुर्दुर्जनात् ६. ४४. ११ ॥

अपृणन्तः अपूर्णा, अपालयन्तो वा ५. ४२. ६ ॥ अपृणन्तम् धर्मेणापुष्यन्तमन्यानपोषयन्तम् १. १२५. ७ ॥

अपृणाः पिपर्ति ३. ६. २ । पूरय ७. १६. २ ॥

अपृणात् पृणाति पालयति ४. १८. ५ । प्रपूर्यात् १२. २३ ॥

अपृतन्युत् आत्मनः पृतनां युद्धमिच्छतीति [अत्र कव्यध्वरपृतनस्य० अ० ७.४.३६। इत्याकारलोपः] १. ३२. ७ ॥

अपेशसे निर्धनतादारिद्र्यादिदोषविनाशाय १. ६. ३ । अविद्यमानं पेशः सुवर्णं यस्य तस्मै नराय २९. ३७ ॥

अपो दूरीकरणे ३५. ११ ॥

अपोहते अपसा सुवर्णेन आप्ते [आप इति हिरण्यनाम । नि० १.२] २६. २६ ॥

अप्ऽजाः योऽद्भ्यो जातः ४. ४०. ५ ॥

अप्ऽजिते योऽप्सु जयति तस्मै २.२१.१ ॥

अप्तुः व्यापकः ५. ३५. ॥

प्रजा वा अप्तुरित्याहुः । गो० उ० ५. ९ ॥

अप्ऽतुरः मनुष्याणामपः प्राणान् तुतुरति विद्यादिबलानि प्राप्नुवन्ति, प्रापयन्ति च ते [अयं शीघ्रार्थस्य तुरेः क्विबन्तः प्रयोगः] १. ३. ८ । अप्स्वन्तरिक्षे त्वरन्ति ते १. ११८. ४ । प्राप्नुवन्तः २. २१. ९ ॥ अप्ऽतुरम् योऽपः प्राणान्, जलानि वा तोरयति प्रेरयति तम् ३. २७. ११ । प्राणप्रेरकम् ३. ५१. २ ॥

अप्ऽतूर्यम् कर्मानुष्ठानाय त्वरितव्यम् ३. १२. ८ ॥ अपऽतूर्ये अपोभिः कर्मभिः प्रेरयितव्ये ३. ५१. ६ ॥

अप्त्यस्य अप्तौ विस्तीर्णे संसारे भवस्य १. १२४. ५ ॥

अप्नः अपत्यम् १. ११३. ६ ॥

अप्नः कर्मनाम । निघ० २. १ । कौ० नि० ६१ । अपत्यनाम । निघ० २. २ । कौ० नि० ८७ । रूपनाम । निघ० ३. ७ ॥ अप्न इति रूपनाम आप्नोतीति सतः । नि० ३. ११ ॥

अप्नःऽस्थः अपत्यस्थः ६. ६७. ३ ॥

अप्नवानः पुत्रपौत्रादियुक्ताः ४. ७. १ । येऽप्नान् विद्यासन्तानान् कुर्वन्ति तेऽप्नवानः [अप्न इत्यस्मात्तत्करोति तदाचष्टे । अ० ३. १. २६ अनेन करोत्यर्थे णिच् ततोऽन्येभ्योपि दृश्यन्ते इति वनिप् । अप्न इत्यपत्यनामसु पठितम् निघ० २. २] ३. १५ । रूपवन्तः [अप्न इति रूपनाम । निघ० ३. ७ । अत्र छान्दसो वर्णलोप इति मतोस्तलोपः] १५. २६ । सुसन्तानयुक्ताः सुशिष्याः ३३. ६ ॥

अप्नवाना बाहुनाम । निघ० २. ४ । कौ० नि० ८१ ॥

अप्रस्वतीम् प्रशस्तापत्ययुक्ताम् १. ११२. २४ । प्रशस्तान्यप्नांसि कर्माणि विद्यन्ते यस्यास्ताम् ३४. २६ ॥

अप्र्यः योऽपोऽर्हति १. १४५. ५ । अप्सु सत्कर्मसु भवः ६. ६७. ६ ॥ अप्याः अप्स्वन्तरिक्षे भवाः ३. ५६. ५. । अप्सु भवाः ६. ५०.११ । अप्सु भवाः नौयायिनो मुक्ताद्याः पदार्था वा ७.३५. ११ ॥ अप्यम् अप्सु प्राणेषु भवम् २. ३८. ७ ॥

अप्यम् अप्सु शृतमद्भिः संस्कृतमिति वा । नि० ११. ३५ ॥

अप्रऽआयु यत्र प्रैति नश्यति तत् ५. ८०. ३. ॥ अप्रऽआयुवः न विद्यते प्रगतः प्रणष्ट आयुर्बोधो येषान्ते [जसादिषु छन्दसि वा वचनमिति गुणविकल्पात् यङादिप्रकरणे तन्वादीनां छन्दसि बहुल-मुपसंख्यानमितिवार्तिकेनोवङादेशः] १. ८६. १ ॥ अप्रऽआयुषे यः प्रैति सः प्रायुट् न प्रायुडप्रायुट् तस्मै १. १२७. ५ ॥

अप्रऽक्षितम् यत्र प्रक्षीयते तत् १. ५९.८ ॥

अप्रऽचेताः विद्याविज्ञानरहितः १. १२०. १ ॥

अप्रऽच्युतानि अविनश्वराणि २. २८. ८ ॥

अप्रजाः अविद्यमानाः प्रजा येषान्ते १. २१. ५ ॥

अप्रति अप्रतीतानि यथा स्यात्तथा १. ५३. ६ । अप्रत्यक्षेऽपि ७. २३. ३ ॥ अप्रतीनि अविद्यमाना प्रतीतिः परिमाणं येषान्तानि २. १६. ४ । अप्रतीतानि ४. १७. १६ ॥

अप्रतिऽइतः प्रसिद्धिमप्राप्तः ३. ४६. ३ । अज्ञातः ६. २०. ६ । अप्रत्यक्षः ५. ३२. ६ । शत्रुभिरपराजितः ४. ५०. ६ । अप्रीयमानः ६. ७३. ३ ॥ अप्रतिऽइतम् यश्चक्षुरादीन्द्रियैर्न प्रतीयते तमगोचरम् १. ३३. २ । अधर्मिभिर-प्राप्तम् ५. ३२. ७ ॥

अप्रतिः अविद्यमाना प्रतिः प्रतीतिर्यस्य सः ५. ३२. ३ ॥

अप्रतिधृष्टऽशवसम् न प्रतिधृष्यते शवो बलं यस्य तम् १. ८४. २ । धृष्टं प्रगल्भं शवो बलम् येन तम्प्रतीति ८. ३५ ॥

अप्रतिपदम् अनिश्चितबुद्धिम् ३०. ८ ॥

अप्रतिऽष्कुतः [अप्रतिस्कुतः] असञ्चलितोऽ-विस्मृतो वा [यास्काचार्योऽस्यार्थमेवमा-ह । अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वेति । नि० ६. १६] १. ७. ६ । सत्य-भावनिश्चयाभ्यां याचितोऽनुगृहीतां स्व-कक्षां विहायेतस्ततो ह्यचलितो वा १. ७. ८ । अकम्पितो दृढः ५. ६१. १३ ॥ अप्रतिस्कृतम् इतस्ततो

लोकान्तरस्याभितो भ्रमणरहितम् ३. २. १४ ॥

अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वा । नि० ६. १६ ॥

अप्रथतम् प्रख्यापयतम् ६. ६६. ५ । प्रथयाथाम् ६. ७२. २ ॥

अप्रथन्त प्रथयन्ति ७. ३३. ६ ॥

अप्रथयः प्रथय १. ६२. ५ ॥

अप्रथिष्ट प्रथताम् २. ११. ७ ॥

अप्रथेताम् प्रख्याते भवेताम् १७. २५ ॥

अप्रऽदुग्धाः न केनापि प्रकर्षतया दुग्धाः ३. ५५. १६ ॥

अप्रऽदपितः न प्रमोहितः १. १४९. २ ॥

अप्रमादम् प्रमादरहितम् ३४. ५५ ॥

अप्रमादम् अप्रमाद्यन्तः । नि० १२. ३५ ॥

अप्रऽस्मूराः मूढत्वरहिता धार्मिकाः [अत्र वर्णव्यत्ययेन ढस्य स्थाने रेफादेशः] १. ९०. २ ॥

अप्रऽमृष्यः परैर्न प्रमर्षणीयः ४. २. ५ ॥ अप्रऽमृष्यम् अविचारणीयम् १. ३२. ५ ॥

अप्रयावम् प्रयुवत्यन्यायं यस्मिन् स प्रयावो न विद्यते प्रयावो यस्मिन् गृहाश्रमे तम् ११. ७५ ॥

अप्रऽयुच्छन् प्रमादमकुर्वन् अप्रमाद्यन् वा ४. ९. ४ । अप्रवियास्यन् ९. ४ ॥

अप्रयुत्वऽभिः अविभक्तैः ६. ४८. १० ॥

अप्रवीता अगच्छन्ती ४. ७. ९ ॥ अप्रवीताः अव्याप्ताः परिच्छिन्नाः ३. ५९. ५ ॥

अप्रशस्ताः प्रशस्तसुखरहिताः ४. २८. ४ ॥ अप्रऽशस्तान् निन्द्यकर्माचारिणः १. १६७. ८ ॥

अप्रशस्ताःऽइव यथा न प्रशस्ता अप्रशस्ता तथा वर्तमाना २. ४१. १६ ।

अप्रऽहनम् योऽन्यायेन कंचिन्न प्रहन्ति तम् ६. ४४. ४ ॥

अप्राः प्राति व्याप्नोति ४. ५२. ५ । प्रपूर्द्धि १. ५२. १३ । पूरितवान् १. ११५. १ । पिपृहि ६. २ । यः प्राति पिपर्ति [अत्र लडर्थे लुङ्] ७. ४२ ॥

अप्रायि पूर्यन्ते २४. २२ ॥

अप्रायि आपूपुर । नि० ९. २० ॥

अप्रायुवः अनष्टायुषः २५. १४ ॥

अप्रायुवोऽप्रमाद्यन्तः । नि० ३. १९ ॥

अप्रियायत प्रिय इवाचरति २. ५२. ९ ॥

अप्वे यापवाति शत्रुप्राणान् हिनस्ति तत्सम्बुद्धौ [अप पूर्वाद्वातेरन्येभ्योऽपि दृश्यत इति क्विप् अकारलोपश्छान्दसः] १७. ४४ ॥

अप्वे यया यदेनया विद्धोऽपवीयते । व्याधिर्वा भयं वा । नि० ९. १२ ॥

अप्सः रूपम् [अप्स इति रूपनाम । निघ० ३. ७] १. १२४. ७ । न विद्यते

परपदार्थस्याप्सो भक्षणं यस्य सः १५. ३।

अप्सः रूपनाम। निघ० ३. ७। कौ० नि० ७९। अप्सः रूपाणि। नि० ३. ५। अप्स इति रूपनामाप्सातेरप्सानीयं भवत्यादर्शनीयं, व्यापनीयं वा, स्पष्टं दर्शनायेति शाकपूणिः। 'यदप्सः' इत्यभक्षस्य। 'अप्सो नाम' इति व्यापिनः। नि० ५. १३॥

अप्सन्त प्राप्नुवन्तु [अत्र प्साधातोर्लङि छन्दस्युभयथेत्यार्धधातुकत्वादातोलोप इटि चेत्याकारलोपश्च। प्सातीति गतिकर्मा। निघ० २. १४] १. १००. ८॥

अप्सरसः या अप्सु अन्तरिक्षे सरन्ति ताः ७. ३३. ६। याऽप्सु सरन्ति ताः १८. ३८। याऽप्सु प्राणेषु सरन्ति प्राप्नुवन्ति ताः १८. ४२। याऽप्सु प्राणादिषु पदार्थेषु सरन्ति प्राप्नुवन्ति ताः १८. ४३। आकाशगताः किरणाः १८.४०॥ अप्सरसः अन्तरिक्षचराद्यायोः ७.३३.१२॥ अप्सरसाम् किरणादीनाम् २४. ३७॥

अप्सरा अप्सारिणी, अपि वाऽप्स इति रूपनामाप्सातेरप्सानीयं भवत्यादर्शनीयं, व्यापनीयं वा, स्पष्टं दर्शनायेति शाकपूणिः। 'यदप्सः' इत्यभक्षस्य। 'अप्सो नाम' इति व्यापिनः। तद्रा भवति रूपवती, तदनयात्तमिति वा तदस्यै दत्तमिति वा। नि० ५. १३॥ गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति। श० ९. ४. १. ४। गन्ध इत्यप्सरसः (उपासते)। श० १०. ५. २. २०। किं नु तेऽस्मासु (अप्सरस्सु) इति। इमो मे क्रीडा मे मिथुनम्मे। जै० उ० ३. २५. ८। सोमो वैष्णवो राजेत्याह तस्याप्सरसो विशस्ता इमा आसत इति युवतयः शोभना उपसमेता भवन्ति ता उपदिशत्यङ्गिरसो वेदः सोऽयमिति। श० १३. ४. ३. ८। तस्य (अग्नेः) ओषधयोऽप्सरसः। श० ९. ४. १. ७। तस्य (सूर्यस्य) मरीचयोऽप्सरसः। श० ९. ४. १. ८। तस्य (चन्द्रमसः) नक्षत्राण्यप्सरसः। श० ९. ४. १. ९। तस्य (वातस्य) आपोऽप्सरसः। श० ९. ४. १. १०। तस्य (यज्ञस्य) दक्षिणा अप्सरसः। श० ९. ४. १. ११। तस्य (मनसः) ऋक्सामान्यप्सरसः। श० ९. ४. १. १२॥

अप्साम् योऽपो जलानि प्राणान् सनोति ददाति तम् ३४. २०। सत्कर्मणां विभक्तारम् ६. १४. ४॥

अप्सुक्षितः येऽप्सु क्षियन्ति निवसन्ति ते १. १३९.११। प्राणेषु क्षियन्ति निवसन्ति ते ७. १६॥

अप्सुजाः प्राणेषु जायमानः २३. १४॥

अप्सुषदम् [अप्सुषदम्] योऽप्सु प्राणेषु जलेषु वा सीदति तम् ३. ३. ५। जलेषु गच्छन्तम् ६. २॥ अप्सुसदे यो जलेषु नौकादिषु सीदति तस्मै १७. १२॥

अफलाः अविद्यमानफलाः १२. ८६.॥ अफलाम् धर्म्येश्वरविज्ञानाचारविरहाम् (भूमिका ३३७) १०. ७१. ५॥

अफलाम् अफलाऽस्मै वागभवतीति। नि० १. १०८॥

अबध्नन् बध्नन्ति ३१. १५ । बध्नीयुः ३४. ५२ ॥

अबन्धनः यो बध्नाति तद्भिन्नः ३.५५.६ ॥

अबन्धुना अविद्यमाना बन्धवो मित्रा यस्य तेनार्येन सह १. ५३. ६ ॥

अबलाः अविद्यमानं बलं यासान्ताः ५. ३०. ६ ॥

अबाधेथाम् बाधेयाम् ४. २८. ४ ॥

अबिभ्यत् बिभेति ६. २३. २ ॥

अबिभ्युषा भयनिवारणहेतुना किरणसमूहेन वायुगणेन सह वा १. ६. ७ ॥ अबिभ्युषः भयरहितस्य १. ११. ५ ॥

अबीभयन्त भीषयन्ते [अत्र लडर्थे लुङ्] १. ३९. ६ ॥

अबुध्ने अन्तरिक्षसादृश्ये स्थूलपदार्थे [बुध्नमन्तरिक्षं बद्धा अस्मिन्धृता आप इति नि० १०.४२] १. २४. ७ ॥

अबुध्यम् बुद्धिरहितम् ४. १६. ३ ॥

अबुध्यमानाः बोधरहिताः ४. ५१. ३ ॥ अबुध्यमानम् उपदेशेनाप्यजानन्तम् ४. १६. ३ ॥

अबुध्यमाने इति बोधनिवारके शरीरमनसी आलस्ये कर्मणि ये १. २६.३ ॥

अबुभोजीः आकर्षणेन न्यायेन वा पालयसि पालयति वा [अत्र भुज पालनाभ्यवहारयोलर्डर्थे लङि सिपि बहुलंछन्दसीति शपः स्थान आदिष्टस्य श्नमः स्थाने श्लुः श्लाविति द्वित्वम् बहुलंछन्दसीतीडागमश्च] १. ३३. ६ ॥

अबू बुधत् बोधयेत् १. १६१. १३ ॥

अबोधयः बोधयसि १. १०३. ७ । बोधय ५. ७६. १ ॥

अबोधि [अबोधि] बोधयति १. ६२. ११ । बुध्यते विज्ञायते १. १५७. १ । बुध्यताम् ३. ५६. ४ ॥

अब्जाः योऽपो जनयति १०. २४ । योऽपः प्राणान् जनयति ११. १४ ॥

अब्जाम् अप्सुजम् नि० १०. ४२ ॥ एष (सूर्य्यः) वा अब्जा अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति । ऐ० ४. २० ॥

अब्दः संवत्सरः १२. ७४ ॥

अब्दया येऽपो जलानि ददति ते ९. ५४. ३ ॥

अब्दिमान् जलदवान् ५. ४२. १४. ॥

अब्रवम् [अब्रवम्] उक्तवानस्मि १. १०८. ६ । ब्रूयाम् ६. ५५. ५ ॥

अब्रवीत् [अब्रवीत्] उपदिशति १. १४५. ५ । ज्ञापयति [अत्र लडर्थे लुङन्तर्गतो ण्यर्थः प्रसिद्धीकरणम् धात्वर्थश्च] १. २३. २० । ब्रूते १. १. १६१. ६ । ब्रूयात् १. १६१. १३॥

अब्रवीत उपदिशत ४. ३५. ३ ॥

अब्रवीतन [अब्रवीतन] ब्रूयात् १. १६१. ३ । ब्रूयुः १. १६१. ८। उपदिशेत् १. १६१. १२ ॥

अब्रह्मता अधनता ९. ३३.३ । वेदेश्वरनिष्ठारहितता १०. २२ ॥

अब्रह्मा अवेदवित् ४. १६. ६ ॥ अब्रह्माणः अचतुर्वेदविदः ७. २६. १ ॥

अब्राह्मणाः न ब्राह्मणाः अब्राह्मणाः, अविद्यमानो ब्राह्मणो येषान्ते ३०. २२ ॥

अब्रुवन् ब्रूयुरुपदिशेयुः १. १६१. २ । ब्रुवन्तु ३१. २१ ॥

अभक्त भजेत ३. ३३. १२ ॥

अभक्तम् असेवितम् १. १२७. ५ । विभागरहितम् ३. ३०. ७ ॥

अभक्षि सेवे ४. ३१. ९ ॥

अभजः सेवेथाः ३. ३९. ६ । सेवस्व ३. ४७. ३ ॥

अभजत् सेवेत १. १५६. ५ । भजेत् २. २४. १४ । सेवते २. ३८. १ ॥

अभजन्त भजन्तु १६. ५२ । भजन्ति १. ६१. १ ॥

अभ_न्त नहीं डरते हैं ५. ३०. ५ ॥

अभयम् भयवर्जितम् २. २७. ११ । अविद्यमानं भयं यस्य यस्माद्वा ६. ३८. ४ ॥ अभये भयरहिते व्यवहारे ३. ३०. ५ ॥

स्वर्गो वै लोकोऽभयम् । श० १२. ८. १. २२ ॥

अभयसनिं अभयं सनति सम्भजति येन १६. ४८ ॥

अभरत् [अभरत्] धारयति (भूमिका २९१) अथर्व० ११. ९. १६ । भरति १. १६१. १० । धरेत् ११. १ । बिभर्ति २०. ५६ ॥

अभरत् अहरत् । नि० ७. २६. । ११. १ ॥

अभरन् धरन्ति पुष्यन्ति वा ४. ३३. ४ ॥

अभरिष्य भरति २. ३०. २ ॥

अभवः [अभवः] भवति [अत्र वर्तमाने लङ्व्यत्ययः] १. ३२. १२ । भवसि १. ६१. २ । भव १.५१.१३ । भवेः ३. ३. १० । भूयाः भवति वा (अत्र पक्षे व्यत्ययः लिङ्लटोरर्थे लङ् च) १. ४. ८ ॥

अभवत् [अभवत्] भवति १. ५८. १ । भवेत् १. ११२. ४ ॥

अभवत भवन्ति ४. ३५. ८ ॥

अभवतम् भवेतम् १. ११७. १४ ॥

अभवन् [अभवन्] भवन्तु १. ११६ ८। भवेयुः ३. ३५. ६ ॥

अभवम् अस्मि ४. २६. १ ॥

अभाः पुष्णाति धरति वा १२. ६१ ॥

अभाष्टाम् दहताम् २८. १७ ॥

अभि आभिमुख्यार्थे १. ११. २ । सर्वतोभावे १. ३५. ६ । अभितः १. ७१. ७ । अभिलक्ष्य १. १६२. ११ ॥

अभीत्याभिमुख्यम् । नि० १. ३ ॥

अभिऽआयंसेन्या आभिमुख्यतया समन्तात् यम्येते गृह्येते यौ तौ [अत्र सुपां सुलुगित्याकारादेशः । अभ्याङ्पूर्वा-द्यमधातोर्बाहुलकादौणादिकः सेन्यः प्र-त्ययः] १. ३४. १ ॥

अभिऽआवर्ती यो विजेतुमभ्यावर्तते सः ६. २७. ८ ॥ अभिऽआवर्तिने अभ्यावर्तितुं शीलं यस्य तस्मै ६. २७. ५ ॥

अभिऽईतिम् अभयम् ७.२१.६॥ अभिऽइतीः अभितः सर्वत इत्या प्राप्त्या २. ३३. ३ ॥

अभिऽइत्य अभितः प्राप्य ४. ३२. १० ॥

अभिऽइद्धः सर्वतः प्रदीप्तः १. १६४. २६ ॥

अभिऽउदेत्य प्राप्य (भूमिका २८६) अथर्व० १५. ११. २ ॥

अभिऽउप्य अभितो वपनं कृत्वा २. १५. ६ ॥

अभिऽऊर्वाना आभिमुख्येनार्थानाच्छाद-यन्ती ५. ४१. १६ ॥

अभिकल्पमानाः आभिमुख्येन समर्थयन्तः १३. २५ । अभितः सुखाय समर्थयन्तः १४. १५ । सम्पादयन्तः १५. ५७ ॥

अभिऽक्रतूनाम् आभिमुख्येन क्रतुः कर्म येषां तेषां बलीयसां शत्रूणाम् २. ३४. १० ॥

अभिक्रम्य सर्वतः उल्लङ्घ्य १. ८०. ९ ॥

अभिक्रोशकम् योऽभितः क्रोशति आह्वयति तम् ३०. २० ॥

अभिऽक्षत्तारः आभिमुख्ये योगस्य कर्तारः २. २६. २ ॥ अभिऽक्षत्तुः अभितः क्षयकर्तुः हिंस्रस्य ७. २१. ८ ॥

अभिऽक्षदाम् ये भिक्षां न ददति तेषाम् ६. ५०. १ ॥

अभिऽक्षिपन् आभिमुख्ये प्रेरयन् ५. ८३. ३॥

अभिऽख्या येऽभितः ख्यान्ति ते १. १४८. ५. ॥

अभिख्या प्रज्ञानाम । निघ० ३. ९ ॥

अभिऽख्याता आभिमुख्येनान्तर्यामितयोपदेष्टा ४. १७. १७ ॥

अभिऽख्याय अभितः प्रख्यातुम् १. १५५. ५ । अभितः सर्वतः संख्याय २. ३०. ६ ॥

अभिगरः अभिगतस्तवः ८. ४७ ॥

अभिऽगूर्तम् अभित उद्यमिनम् १. १६२. १९ ॥

अभिगूर्तिः अभितः सर्वतो गूर्तिरुद्यमो यस्य सः १. १६२. ६ ॥

अभिऽगूर्य अभित उद्यमं कृत्वा २. ३७. ३ ॥

अ॒भि॒ऽगृ॒णा॒ति॑ अभिगतान्युपदिशति १. ५४. ७ ॥

अ॒भि॒घ्न॒ते य आभिमुख्येन हन्ति तस्मै १६. ४६ ॥

अ॒भि॒ऽच॒क्षा॒णः अभिव्यक्तवागविषयः २. ४०. ५ ॥

अ॒भि॒ऽच॒क्षे॑ आभिमुख्येन दर्शनाय १. १०२. २ । अभितः ख्यातुम् ५. ३१. १२ । अभिपश्यति ३२. ३८ ॥

अ॒भि॒ऽच॒क्ष्य॑ अभितः सर्वतः प्रकाश्य १. ६२. ६ ॥

अ॒भि॒ऽजाय॑न्त प्रगट करते हैं १. १६८. २ ॥

अ॒भि॒जि॒ता॑ आभिमुख्यगतान् शत्रून् जयति येन तेन १५. ७ ॥

देवासुराः संयत्ता आसन् तेदेवास्तस्मिन्नक्षत्रेऽभ्यजयन् । यदभ्यजयन् तदभिजितो(नक्षत्रस्य)ऽभिजित्त्वम् । तै० १. ५. २. ३, ४ ॥ यस्मिन्ब्रह्माभ्यजयत् सर्व्वमेतत् । अमुञ्च लोकमिदञ्च सर्व्वम् । तन्नो नक्षत्रमभिजिद्विजित्य श्रियं दधात्वहृणीयमानम् । तै० ३. १. २. ५ । अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामवस्ताच्छ्रोणायै । तै० १. ५. २. ३ । अभिजिता (यज्ञेन) वै देवा अभ्यजयन्निमांल्लोकान् । कौ० २४. १ । अभिजिता वै देवा इमान् लोकानभ्यजयन् । तां० २२. ८. ४ । अभिजिता वै देवा असुरानिमान् लोकानभ्यजयन् तां० २० ८. १ । सो (इन्द्रः) ऽकामयत यन्मेऽनभिजितं तदभिजयेयमिति स एतमभिजितमपश्यत्तेनानभिजितमभ्यजयत् । तां० १६. ४. ६ । यदभिजिद्भवत्यनभिजितस्याभिजित्यै । तां० १६. ४. ७ । अग्निरेवाभिजिदग्निर्हीदं सर्वमभ्यजयत् । कौ० २४. १ । अथ यदभिजितमुपयन्ति । अग्निमेव देवतां यजन्ते । श० १२ १. ३. १२ । स वा अभिजिदुभयसामा सर्वस्तोमो भवति । कौ० २४. १ । एकाहो वा अभिजित् । कौ० २४. २ ॥

अ॒भि॒ऽज्ञु अभिगते जानुनी यासां ताः [अत्र अव्ययं विभक्ति अ० २. १. ६ इति यौगपद्यार्थे समासः वाच्छन्दसि सर्वे विधयो भवन्तीति समासान्तो ज्ञुरादेशश्च] १. ३७. १० । अभितो जानुनी यस्य तम् १. ७२. ५ । आभिमुख्ये जानुनी यस्य सः ३. ३९. ५ । अभिमुखे जानुनी यैस्ते ७. २. ४ ॥

अ॒भितः॑ सर्वतः १. ५३. ३ । सर्वतोऽभिमुखाः ४. १. १४ ॥

अ॒भित्यै॑ भयराहित्याय ११. १४ ॥

अ॒भि॒ऽदास॑त् अभिक्षियति ६. ५. ४ ॥

अ॒भि॒ऽदास॑ति अभीष्टं ददाति १. ७६. ११ । सर्वत उपक्षयति [दसु उपक्षये । अत्र वर्णव्यत्ययेनाकारस्य स्थान आकारः] ८. ४४ । अभिमुखेनोपक्षयति १८. ७० ॥

अ॒भि॒ऽदि॒प्सुः अभितो दम्भमिच्छुः २. २३. १० ॥

अ॒भि॒ऽदि॒प्स्वः॑ अभितो दिप्सवो दम्भितुमिच्छवो यासु ताः २. २३. १३ ॥

अभि॒ऽद्रुद्रोह॑ आभिमुख्येन द्रोहं कृतवान् १. २३. २२ ॥

अभिऽद्य॑वः अभितः सर्वतो द्यवो दीप्ता विद्या विद्युदादयः पदार्थाः साधिता यैस्ते । [अत्र द्युतधातोर्बाहुलकादौणादिको डुप्रत्ययः] १. ४७. ४ । आभ्यन्तरे कामयमानाः प्रकाशवन्तः १. ५१. १९ । अभितो द्यवो विद्याप्रकाशा येषान्ते १. १३४. २ । अभितो द्यवः सूर्य्यकिरणा इव देदीप्यमानाः १. १३४. २ ॥

अर्द्धमासा वाऽभिद्यवः । श० १. ४. १. ९ । मासा देवा अभिद्यवः । गो० पू० ५. २१ ॥

अभि॒ऽदुह॑ योऽभिद्रुह्यति तस्मै २. २७. १६ ॥

अभि॒धाः योऽभिदधाति सः २२. ३ ॥

अभिधी॑तः निश्चितः ८. ५४ ॥

अभि॒ऽध्रु॒क् अभितो द्रोहं कुर्वन् १. १२२. ६ ॥

अभि॒ऽनक्ष॑न्तः अभितो जानन्तः २. २४. ६ ॥

अभि॑नत् [अभि॒न॒त्] विदारयति [अत्र लडर्थे लङन्तर्गतो ण्यर्थश्च] १. ३२. १ । भिनत्ति [अत्र लडर्थे लङ्] १. ३३. १२ । विदारयसि १. ५३. ८ । भिनत्ति २. ११. २ । भिन्द्यात् १२. ३३ ॥

अभि॒ऽने॒ता आभिमुख्यं प्रापयिता [अत्र तृन् प्रत्ययः] ४. २०. ८ ॥

अभिन्नो एकीभूते व्यवहारे ६. २८. २ ॥

अभि॒ऽपासि॑ सर्वतो रक्षसि ३. ६. १ ॥

अभि॒ऽपि॒त्वम् प्राप्तम् ४. १६. १ । प्राप्यम् ७. १८. ६ । प्राप्ति (सत्य० १२०) १०. ४०. २ ॥ अभिऽपित्वे सर्वतः प्राप्तौ १. १२६. ३ । अभीष्टप्राप्तौ ४. ३५. ६ । आभिमुख्यगमने ३३. ३४ ॥ अभिऽपित्वेषु अभितः सर्वतः प्राप्तव्येषु व्यवहारेषु [अत्र पदधातोर्बाहुलकादौणादिक इत्वन् प्रत्ययो डिच्च] १. ८३. ६ ॥

अभिपित्वम् अभिप्राप्तिम् । नि० ३. २० ॥

अभि॒ऽप्र॒घ्नन्ति॑ आभिमुख्ये प्रकर्षेण घ्नन्ति ६. ४६. १० ॥

अभि॒ऽप्र॒चक्षे॑ अभिगतप्रसिद्धवागादिव्यवहाराय १. ११३. ६ ॥

अभि॒प्र॒श्निन॑म् अभितो बहवः प्रश्ना विद्यन्ते यस्य तम् ३०. १० ॥

अभि॒प्रिय॑म् सर्वतः कमनीयम् २९. २६ ॥

अभि॒ऽभ॒ङ्गाय॑ दुष्टानामभितो मर्दकाय २. २१. २ ॥

अभि॒भ॒ञ्ज॒तीना॑म् शत्रुसेनामभितो मर्दनमाचरन्तीनाम् १७. ४० ॥

अभि॒ऽभा अभितः कान्तिः २. ४२. १ ॥

अभिभा अभिभूतिः । नि० ९. ३ ॥

अभिभुवे अभिमुखं भावुकाय २२. ३० ॥

अभिभूः दुष्टानां तिरस्कर्ता १०. २८ ॥

अभिभूति शत्रूणामभिभवकर्त्री २०. ४७ ॥

अभिऽभूति शत्रूणां तिरस्कारनिमित्तम् ४. २१. १ ॥ अभिभूतिम् पराजयम् ४. ३८. १ ॥

छन्दांꣳसि वा अभिभूतयः । तां० ९. ४. ७ ॥

अभिभूतिऽओजाः अभिभूतिपराजयकरमोजो वलंयस्य सः ३. ३४. ६ ॥ अभिभूतिऽओजसम् अभिगतानि तप ऐश्वर्याण्योजः पराक्रमश्च यस्मात्तम् १. ५२. ७ ॥

अभिऽभूय तिरस्कृत्य ३. ४८. ४ ॥

अभिऽमाति अभिमन्यते येन ९. २३. ४ ॥ अभिऽमातयः अभिमानिनः [मा माने इत्यस्य रूपम्] १. २५. १४ ॥ अभिऽमातिनम् शत्रुगणम् १. ८९. ३ ॥ अभिमातीः अभिमानहर्षयुक्ताः ६. ३७ । अभिमानयुक्तान् दुष्टान् विघ्नकारिणः ३. २४. १ । शत्रूनिव रोगान् ३. ६२. १५ ॥ अभिऽमातिषु अभिमानयुक्तेषु चोद्धृषु ३. ३७. ७ ॥

सपत्नो वाऽअभिमातिः । श० ३. ९. ४ ९ । ५. २. ४. १६ । १४. २. २. ८ ॥

अभिमातिघ्ने येनाभिमानयुक्ताः शत्रवो हन्यन्ते तस्मै ६. ३२ ॥

अभिमातिजित् अभिमानजित् २८. २ ॥

अभिमातिऽसहः येऽभिमात्याऽभिमानेन युक्ताञ्छत्रून् सहन्ते ते ६. ७. ३ ॥

अभिमातिऽसह्ये अभिमातयोऽभिमानयुक्ताः शत्रवः सह्या यस्मिन्संग्रामे तस्मिन् ३. ३७. ३ ॥

अभिमातिषाहः येऽभिमातीनभिमानयुक्ताञ्छत्रून्सहन्ते निवारयन्ति १२. ११३ ॥

संवृष्पयान्यभिमातिषाह इतिसꣳरेताꣳसि वाप्मसह इत्येतद् । श० ७. ३. १. ४६ ॥

अभिमातिहा येऽभिमिमत इत्यभिमातयस्तान् हन्ति सः [अत्र औणादिकः क्विप्] ५. २४ ॥

अभिमृशे आभिमुख्येन मृषन्ति सहन्ते येन तस्मै ११. २४ ॥

अभिऽमृशे अभिसहे २. १०. ५ ॥

अभियुग्वा योऽभितो युङ्क्ते सः ३६. ७ ॥ अभिऽयुग्वना योऽभियुज्यते वन्यते विभज्यते तेन ६. ४५. १५ ॥

अभिऽयुजः या आभिमुख्येन युज्यन्ते ताः प्रजाः ३. ११. ६ । योऽभियुङ्क्ते तस्य ४. ३८. ८ । याऽभिमुख्यं युञ्जते ताः शत्रुसेनाः ५. ४. ९ ॥

अभिरक्षति सब ओर से रक्षा करता हुआ ३३. ९० ॥

अभिऽरक्षन्ति सर्वतः पालयन्ति १. १६३. २ ॥

अभिऽवदति संवाद वा अभिवादन करता है (सं० वि० २५४) अथर्व० ६. १. ४ ॥

अभिविख्येषम् अभितः सर्वतो विविधं पश्येयम् [अत्राभिव्योरुपपदे चक्षिङ् इत्यस्याशीर्लिङ्यार्धधातुकसंज्ञामाश्रित्य ख्याञादेशः लिङ्याशिष्यङित्यङ् । सार्वधातुकसंज्ञामाश्रित्य च या इत्यस्य इय् आदेशः । सकारलोपाभाव इति] १. ११ ॥

अभिऽवीता अभितः सर्वतो व्याप्ता अभयाख्या ७. २७. ४ ॥

अभिवीरः अभीष्टा वीरा यस्य सः १७. ३७ ॥

अभिऽवृतम् अभितः सर्वतः साधनैः पूर्णो वर्तते सोऽभिवृतम् [नहिवृति० अ० ६. ३. ११६ इति पूर्वस्य दीर्घत्वम्] १. ३५. ४ । अभितो वृतं युक्तम् ९. ४४. ९ ॥

अभिऽवृता सर्वतो वायुना आवृता १. ११४. २६ ॥ अभिवृते येऽभितो वर्तेते ६. ७०. ४ ॥

अभिऽव्रजन् अभितः सर्वतो गच्छन् १. ९८. ५ ॥

अभिऽव्लग्य अभितः सर्वतो लगित्वा [अत्र पृषोदरादिना वुगागमः] १. १३३. १ । अभितः सर्वतः प्राप्य १. १३३. २ ॥

अभिऽव्लङ्गैः अभितो गमनागमनैः १. १३३. ४ ॥

अभिशस्तिऽचातनः योऽभिशस्तिं हिंसां चातयति सः ३. ३. ६ ॥

अभिशस्तिपाः योऽभिशस्तेः हिंसनात्पाति रक्षति ५. ५ ॥ अभिशस्तिऽपाम् अभिमुखप्रशंसारक्षितारम् ६. ५२. ३ ॥

अभिशस्तिऽपावा योऽभिशस्तेः हिंसायाः पावा रक्षकः सः १. ७६. ३ । प्रशंसितानां पालकः पवित्रकरः ७. ११. १ । यो ऽ भिशस्तेराभिमुख्याद्धिंसमानात्पाति रक्षति ५. ४ ॥

अभिऽशस्तिम् अभितो हिंसाम् ३. ३०. ११ दुर्वचनवादम् ३४. १८ ॥ अभिशस्त्यै अभिमुख्यायै स्तुतये [शंसु स्तुतावित्यस्य क्तिन्प्रत्ययान्तः प्रयोगः] २. ५ ॥ अभिऽशस्तेः सुखहिंसकात् १. ६१. १५ । अभितो हिंसकात् १. ६३. ५ । सर्वतोऽपराधात् २७. ६ । आभिमुख्येन स्वप्रशंसां कुर्वतो दम्भिनः ७. १३. २ ॥ अभिशस्तेः अभितः प्रशंसितस्य ६. ४२. ४ ॥

अभिऽशासति आभिमुख्ये शासनं करोति ६. ९४. २ ॥

अभिऽश्रावाय योऽभितः शृणोति श्रावयति वा तस्मै १. १८९. १० ॥

अभि॒ऽश्रीः अभिता श्रियो यस्माद्वा १. ६८. १। सबका निधि [शोभाकारक] (आर्य० ६७) १. ६८. १। अभितः सर्वतः श्रियो यस्य सः २६. ७॥

अभिश्रीः अभिश्रयणीयः। मि० ७. २१॥

अभि॒ऽश्वसन् सर्वतः श्वसन् प्राणं धरन् १. १४०. ५॥

अभि॒से॒क्तारम् अभिषेककर्त्तारम् ३०. १२॥

अभि॒ष्टिः अभितः सर्वतो ज्ञाता ज्ञापयिता मूर्तद्रव्यप्रकाशको वा [अत्राभिपूर्वादिषगतावित्यस्माद्धातोर्मन्त्रे वृषेष० अ० ३. ३. ६६ अनेन क्तिन्। एवमन्नादिषु छन्दसि पररूपं वक्तव्यम्। एङि पररूपमित्यस्योपरिस्थवार्तिकेनाभेरिकारस्य पररूपेणेदं सिध्यति] १. ६. १। अभिमुखा इष्टिः संगतिर्यस्य सः ३. ३४. ४। अभितः सर्वत इष्ट्यो यज्ञा यस्य सः [अत्र छान्दसो वर्णलोपो वेतीकारलोपः] २०. ३८। अभियष्टव्यः सर्वतः पूज्यः [पृषोदरादित्वादिष्टसिद्धिः] ३३.२५॥ अभिष्टयः अभीप्सिताः १. ११६. ८। इष्टय इच्छाः ४. ११. १०॥ अभिष्टये इष्टसिद्धये [अत्र एमन्नादिषु छन्दसि पररूपं वाच्यम्। अ० ६. १. ६. ४ अनेन वार्तिकेन पररूपादस्य सिद्धिः] ४. ११। अभीष्ट सुखप्राप्तये। ३३. ८७॥ अभिष्टौ आभिमुख्येन यजनक्रियायाम् ३. ६७. ११। अभितः संगते कर्मणि ४. १६. ४। अभि प्रियायां संगतौ ७. १६. ८॥

अभि॒ष्टि॒ऽकृत् योऽभिष्टिं करोति सः ४. ११. ४। योऽभिष्टिं सर्वत इष्टं सुखं करोति सः २०. ४८॥

अभि॒ष्टि॑तः अभितः स्थितः जाज्वल्यमानः ८. २३॥

अभि॒ष्टि॒ऽद्युम्नाः प्रशंसितयशोधनाः ४.५१.७॥

अभि॒ष्टि॒ऽपा योऽभिष्टिं पाति सः [अत्राकारादेशः] २. २०. २॥

अभि॒ष्टि॒ऽमत् अभीष्टानि प्रशस्तानि सुखानि विद्यन्ते यस्मिँस्तत् १. ११६. ११॥

अभि॒ष्टि॑ऽशवसे अभीष्टबलाय ३. ५६. ८॥

अभि॒ष्ण॒क् उपसेवताम् [भिष्णज् उपसेवायामिति कण्ड्वादिधातोर्लङि विकरणव्यत्ययेन यको लुक्] १०. ३४। उपसेवेत २०. ७७॥

अभि॒स॑खा अभितः सर्वतः सत्वानो युद्धविद्वांसो रक्षका भृत्या वा यस्य सः १७. ३७॥

अभि॒सं॒वि॒श॒न्तु अभितः सम्यक् प्रविशन्तु १३. २९॥

अभि॒स॒र्तार॑म् आभिमुख्ये गन्तारम् ३०. १४॥

अभि॒ऽसाच॑ः ये आभिमुख्येन सचन्ति ते ६. ६३. ६ । य आभ्यन्तर आत्मनि सचन्ते सम्बध्नन्ति ते ७. ३५. ११ ॥

अभि॒ऽस॑ताः अभितो विभक्ताः ५. ४१. १४ ॥

अभि॒ऽसृ॑ष्टः आभिमुख्येन प्रेरितः ३. ३५. १ ॥

अभि॒ऽसे॒नान् आभिमुख्या सेना येषां तान् ६. ४४. १७ ॥

अ॒भि॒संय॑न्ति मानं कुर्वन्ति (भूमिका २४६) अथर्व० ११. ५. ३ ॥

अभि॒ऽस्त॒ने अभितः शब्दयुक्ते व्यवहारे १. ८०. १४ ॥

अभिस्तु॑ते अभितः प्रशंसनीये ७. ३६. ७ ॥

अभि॒ऽस्वर॑न्ति आभिमुख्येनोच्चरन्ति १. १६४. २१ ॥

अभिस्वरन्ति अभिप्रयन्ति । नि० ३. १२ ॥

अभि॒ऽस्वरा॑ अभितः सर्वतः स्वरा वाणी तया । [अत्र सुपां सुलुगिति डादेशः । स्वर इति वाङ्नाम । निघं० १. ११] २. २१. ५ ॥ अभिऽस्वरे योऽभितः स्वरति शब्दयति तस्मिन् ३. ४५. .२ ॥

अभिऽहि॑तः कथितो धृतो वा ५. ५०. ४ ॥

अभि॒ऽह्रु॒तः आभिमुख्यं प्राप्तात् कुटिलात्, अभितः सर्वतो वक्रात् १. १२८. ५ ॥

अ॒भीके॑ संग्रामे [अभीके इति संग्रामनाम । निघं० २. १७] १. ७१. ८ । कामिते व्यवहारे १. ११६. १४ । कमिते १. १८५. १० । कमितरि ३. ५६. ४ । समीपे १. ११६. ८ ॥

अभीके संग्रामनाम । निघ० २. १७ । अभीके प्रवित्वे । निघ० ३. २९ । अभीके प्राप्तस्य । कौ० नि० ११७ ॥ अभीके इत्यासन्नस्य; अभीकेऽभ्यक्ते । नि० ३. २० ॥

अ॒भीत्व॑री आभिमुख्यं राजविरोधं कुर्वती: ११. ७७ ॥

सेना वा अभीत्वरी । कौ० २८. ६ ॥

अभी॑द्धात् अभितः सर्वतः इद्धात् दीप्तात् ज्ञानमयात् (पञ्च० १०) १०. १६०. १ ॥

अभी॒पु॒तः अभित उभयत आपो यस्मिँस्तस्मात् १. ११४. ५२ ॥

अभी॑रुः भयरहितः ४. २६. २ ॥

अ॒भी॒व॒र्तः य आभिमुख्ये वर्तते सः १४. २३ ॥

अभीवर्तेन वै देवाः स्वर्गं लोकमभ्यवर्तन्त । तां० ४. ३. २ । अभीवर्तेन वै देवा असुरानभ्यवर्तन्त यदभीवर्तो ब्रह्मसाम भवति भ्रातृव्यस्याभिवृत्त्यै । तां० ८. २. ८ । वृषा वा एष रेतोधा यदभीवर्तः । तां० ४. ३. ८ । अभीवर्तो ब्रह्मसाम भवत्येकाक्षरणिधनः प्रतिष्ठायै । तां० १५. १०. ११ । संवत्सरो वाऽअभीवर्तः सविंशस्तस्य द्वादशमासाः सप्तर्तवः संवत्सर एवाभीवर्तः सविंशस्तद्यत्तमाहाभीवर्त इति संवत्सरो हि सर्वाणि भूतान्यभिवर्तते । श० ८. ४. १. १५ ॥

अ॒भीश॑वः अभितोऽश्नुवते व्याप्नुवन्ति मार्गान्यैस्ते रश्मयो हया वा ।

[अत्राभिपूर्वादशूङ् व्याप्तावित्यस्माद्धातोः कृवापा० उ० १. १ इत्युण्। वर्णव्यत्ययेनाकारस्थान ईकारश्च] १. ३८. १२ । अङ्गुलय इव [अभीशव इत्यंगुलीनाम । निघ० २. ५] ९. ६१. २ ॥ अभीशुऽभिः रश्मिभिः ९. ४४. ४ । [अभीशव इति रश्मिनाम । निघं० १. ५] ॥ अभीशूनाम् बाहूनाम् ६. ७५. ६ । अभितः सद्यो गन्तृणाम् २६. ४३ ॥

अभीशू बाहुनाम । निघ० २. ४ । अभीशवः रश्मिनाम । निघ० १.५ । अंगुलिनाम । निघ० २. ५ ॥ अभीशवः रश्मिनाम साधारणमश्व-रश्मिभिः । नि० २. ५ । अभीशवोऽभ्यश्नुवते कर्माणि । नि० ३. ८ ॥ अभीशवो वै रश्मयः श० ५. ४. ३. १४ ॥

अभीशूनऽइव रश्मीनिव ६. ५७. ६ ॥

अभीषाट् योऽभिसहते सः ७. ४. ८ ॥

अभीषाट् अभिषहमाणः सपत्नान् । नि० ३. ३ ॥

अभुंजतः भोगमकुर्वतः १. १२०. १२ ॥

अभुत्स्महि विजानीयाम ४. ५२. ४ ॥

अभूः [अभूः] भवेः ६. २१. १ ॥

अभूत् [अभूत्] भवति [अत्र लडर्थे लुङ्] १. ४६. १० । भवेत् १. ४६. ११ । भवतु ५. ४० । हुई ४. ९२. २ । भवन्ति [अत्र वचनव्यत्ययेनैकवचनम्] ४०. ७ ॥

अभूत [अभूत] भवत ४. ३४. ३ ॥

अभूत अभवत । नि० ६. १६ ॥

अभूतन भवन्ति १. १६१. ५ ॥

अभूताम् भवतः १. १६२. २१ । भवेताम् २५. ४४ ॥

अभूत्यै अनैश्वर्याय ३०. १७ ॥

अभूम भवेम २. ११. १२ ॥

अभूवन् भवेयुः २. ३०. १० । भवन्ति ३. ३०. १५ ॥

अभूषन् [अभूषन्] अलंकुर्युः ३.५१. ८ । अलंकुर्वन् ३. ३८. ४ । भूषयेयुः ३३. २२ ॥

अभेत् भिनत्ति १. ३३. १३ ॥

अभोक्ऽहनः ये भोज्यन्ते ते भोजो, हन्यन्ते ते हनः ; भोजश्च ते हनो भोग्घनः न भोग्घनोऽभोग्घनस्ते १. ६४. ३ ॥

अभ्यर्धऽयज्वा आभिमुख्यस्यार्धे संगन्ता ६. ५०. ५ ॥

अभ्यर्द्धयज्वाऽभ्यर्धयन्यजति । नि० ६. ६ ॥

अभ्यवह्रियमाणः भुज्यमानः ८. ५९ ॥

अभ्यसेताम् प्रक्षिप्ते भवतः २. १२. १ ॥

अभ्यसेताम् भ्यसते रेजत इति भयवेपनयोः । नि० ३. २१ । अबिभीताम् । नि० १०. १० ॥

अभ्यावर्तिन् आभिमुख्येन वर्तितुं शीलमस्य तत्सम्बुद्धौ १२. ७ ॥

अभ्यावृत्तः आभिमुख्येनाङ्गीकृतः ८. ५८ ॥

अभ्युपावहरामि अभितः सामीप्येऽर्वाक् स्थापयामि १०. २९ ॥

अभ्रा अभ्राणि १. ७९. २ ॥ अभ्रेण घनेन ५. ६३. ४ । मेघेन [अभ्र इति मेघनाम । निघं० १. १०] ५. ८५. ४ ॥

अभ्रम् मेघनाम । निघ० १. १० । कौ० नि० १०० ॥ अभ्रमेवसविता । गो० पू० १. ३३ । अथ यदभ्रं स्यादेतद्वा अस्य तद्रूपं येन प्रजा बिभर्ति । कौ० १८. ४ । अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिः । श० ५. ३. ५. १७ । अभ्रं वा अपां भस्म । श० ७. ५. २. ४८ । (वसोर्धारायै) अभ्रमूधः । श० ९. ३. ३. १५ ॥

अभ्राजि प्रकाश्यते ५. ५४. ६ ॥

अभ्राट् न केनापि प्रकाशितो भवति, स्वप्रकाशत्वात् १. ६१. ३ । भ्राजते ४. ६. ५ ॥

अभ्राणीऽइव वायुदलानीव १. ४४. १२ ॥

अभ्रातरः अबन्धुरिव वर्तमानाः ४. ५. ५ ॥

अभ्रातेऽइव यथाऽबन्धुस्तथा १. १२४. ७ ॥

अभ्रिः अयोमयं खननसाधनम् ११. १० ॥

वज्रो वा अभ्रिः । श० ६. ३. १. ३९ । वाग्वा अभ्रिः । श० ६. ४. १. ५ ॥

अभ्रियाऽइव यथाऽभ्रेषु भवान्युदकानि १. ११६. १ ॥

अभ्रियाः अभ्राणि २. ३४. २ ॥ अभ्रियाम् अभ्रेषु भवां गर्जनाम् १. १६८. ८ ॥

अभ्वः यो विरोधी मित्रो वा न भवति सः १. ३९. ८ ॥ अभ्वा नोत्पद्यते कदाचित्तेन कारणेन सह वर्तमानः १. ६३. १ ॥

अभ्वम् सत्तानिषेधम् अत्र भूधातोः क्विप् ततश्छन्दस्युभयथा अ० ६. ४. ८६ इत्यमि परे यणादेशः] १. २४. ६ । अभवन्तम् १. १४०. ५ । अविद्यमानम् १. १६८. ६ । अचाक्षुषत्वेनाप्रसिद्धं वा कारणम् १. १६९. ३ । महत् २. ३३. १० । महान्तम्महिमानम् ६. ४. ३ । महान्तं न्यायम् ६. ७१. ५ । उदकमिव २. ४. ५ ॥ अभ्वात् असत्याचरणजन्याद् दुःखात् १. १८५. २ ॥

अभ्वः महन्नाम । निघ० ३. ३ । कौ० नि० ८६ । अभ्वम् उदकनाम । निघ० १. १२ ॥

अमुथ्थं स्त मन्यते ५. ४० ॥

अमुथ्थं सताम् मन्येताम् ३८. १३ ॥

अमः गृहम् ५. ५९. ३ । यो गच्छति ६. ६१. ८ । गृहादिपदार्थः १८. ४ । ज्ञानस्वरूपम् (भूमिका ११८) अथर्व० १३. ४. ५० ॥ अमम् अपरिपक्वविज्ञानं मनम् १. ६६. ४ ॥

अमम् भयं वा बलं वा । नि० १०. २१ ॥

अमतिः रूपम् [अमतिरिति रूपनाम । निघं० ३. ७] १. ६४. ९ । सुन्दरस्वरूपः १. ७३. २ ॥ अमतिम् सुरूपां लक्ष्मीम् ३. ३८. ८ । अमतिम् अविद्यमाना मतिर्विज्ञानं सुखं वा यस्यामविद्यायां दरिद्रायां वा तां सुरूपम् वा १. ५३.४ ।

अज्ञानम् १७. ५४ । नष्टा मतिरमतिस्ताम् १६. ८४ ॥

अमतिः रूपनाम निघ० ३. ७ । कौ० नि० ७९ । हिंसायाम् । कौ० नि० १९ ॥ अमतिः अमामयीमतिरात्ममयी । नि० ६. १२ ॥ अशनाया वै पाप्माऽमतिः । ऐ० २. २ । अशनाया वाऽमतिः । श० ९. २. ३. ८ ॥

अमत्त हृष्यतु २. ३७. ४ ॥

अमत्रः ज्ञानवान् ज्ञानहेतुर्वा १. ६१. ६ ॥
अमत्रम् सुपात्रम् ४. २२. ६ ॥
अमत्रिन् वहुबलयुक्त । ६. २४. ६ ॥

अमत्रम् पात्रममा अस्मिन्नदन्ति, अमापुनरनिर्मितं भवति । नि० ५. १ । अमत्रः अमात्रो महान् भवति, अभ्यमितो वा । नि० ६. २३ ॥

अमत्सुः हर्षयेयुः १. ८४. ५ ॥
अमथ्नात् मथ्नाति १. ९३. ६ ॥
अमदः आनन्दः १. ८२. ६. ॥
अमदत् हर्षयेत् १. ८०. २ ॥
अमदन् मदन्ति हर्षन्ति ७. १८. १२ । हृष्यन्तु १. ५२. १५ । हृष्येयुर्हर्षयेयुर्वा १. १०२. १ । हर्षयन्ति १. १०३. ७ । आनन्देयुः ३३. २६ ॥
अमध्यमासः अविद्यमानो मध्यमो येषां ते ५. ५९. ६ ॥
अमनुत विजानीत ४. ५. १० ॥
अमन्त रुजन्ति १. १८६. ३ ॥
अमन्ति प्रापयन्ति रोगान् ७. २५. २ ॥
अमन्थत् मन्थन करके ११. ३२ ॥
अमन्थत मन्यन्ति ६. १६. १३ । मन्थित्वा गृह्णीयात् १५. २२ ॥
अमन्थिष्टाम् मथ्नीताम् ३. २३. २ ॥
अमन्दत् आनन्दयतु १. १६५. ११ ॥
अमंदत आनन्देत् ५. ३४. २ ॥
अमन्दन् आनन्देयुः ३. ३१. ४ । आनन्देयुः ३. ५१. ६ । आनन्दन्ति ५. ३०. १० ॥
अमंदान् मन्दभावरहितान् तीव्रान् १. १२६. १ ॥

अमन्दान् अबालिशाननल्पान् वा । नि० ९. ९ ॥

अमन्दिषुः हर्षयन्तु १. ८२. ६ ॥
अमन्महि [अमन्महि] विजानीयाम [अत्र बहुलं छन्दसीति श्यनोलुक्] १. ३०. २१ । विजानीमहि [अत्र लिङर्थे लङ् बहुलं छन्दसीति विकरणलुक्] ७. २६ ॥
अमन्यत मन्यते ६. ७२. ३ ॥
अमन्यन्त मन्यन्ताम् १. ११६. १७ ॥
अमन्यमानान् अज्ञानहठाग्रहयुक्तान् सूर्य्यप्रकाशनिरोधकान् मेघावयवान्वा १. ३३. ६ । अज्ञानिनः शठान् २. १२. १० ॥
अमन्वत मन्यन्ते १. ८४. १५ ॥

अमन्वत सममंसत नि० ४. २४ ॥

अममदुः हर्षन्ति ७. १८. २१ ॥

अमुमन्दुः आनन्दयेयुः ९. ३०. १२ ॥

अमर्त्यः [अम_त्यः] अविद्यमाना आकर्षका मनुष्यादयः प्राणिनो यस्मिन्त्सः १. ३०. १८ । नाशरहितः १. ९८. ३ । अनादित्वान्मृत्युधर्मरहितः १. १६४. ३० । मरणधर्मरहितो जीवः १. १६४. ३८ । स्वरूपेण नित्यः १. २७. ५ । मनुष्यस्वभावाद्विलक्षणः १. १७५. २ ॥ अमर्त्य ! कीर्त्या मरणधर्मरहित ! १. १२६. १० ॥ अमर्त्यम् कारणरूपेण मरणधर्मरहितम् २२. १५ ॥ अमर्त्ये मरणधर्मरहिते वह्नौ परमात्मनि वा ७. १. २१ ॥

अमर्धन्ता सर्वान् शोषयन्तौ ३. २९. ४ ॥

अमर्धन्तीः अहिंसन्त्यः ५. ४३. १ ॥

अमुमर्मणः अविद्यमानं मर्म यस्मिंस्तस्य ३. ३२. ४ ॥

अमंऽवत् अमः प्रशस्तो बोधः सम्भागो यस्मिंस्तत् १. ५२. ६ । प्रशस्तरूपयुक्तम् ४. ५५. ४ । गृहेणतुल्यम् ५. ३४. ६ ॥ अमवत्सु अमाः प्रशस्तानि गृहाणि विद्यन्ते येषु तेषु ६. ६६. १ ॥

अमंऽवती ज्ञानयुक्ता १. ११८. ७ ॥

अमंऽवान् बलवान् १. ५२. १० । गृहवान् ५. ८७. ५ । गृहः सचिवा विद्यन्ते यस्य तद्वत् ... ॥

अमानां रोगाणां गमनागमनबलानां वा सम्बन्धो विद्यते येषान्ते [अत्र सम्बन्धार्थे मतुप् । अम रोगे । अम गत्यादिषु चेत्यस्माद्धलादेश्चेति । करणाधिकरणयोर्घञ् । अमन्ति रोगं प्राप्नुवन्ति यद्वाऽमति गच्छन्ति आगच्छन्ति बलयन्ति यैस्तेऽमाः] १. ३८. ७ । निन्दितरोगकारकः १. ३६. २० ॥

अमवान् अमात्यवान्, अभ्यमनवान्, स्ववान् वा नि० ६. १२ ॥

अमहीयमानाम् असत्कृताम् ४. १८. १२ ॥

अमा समीपस्थगृहाय १. १२४. १२ । गृहे ६. २४. १० । गृहम् ६. ५१. १५ [अमेति गृहनाम । निघं० ३. ४] गृहेषु ३. ३. २ ॥

अमा गृहनाम । निघ० ३. ४ । कौ० नि० ८९ ॥ अमा गृहे । नि० ११. ४२ ॥

अमाऽइव गृहं यथा २. ३६. ३ ॥

अमाजूःऽइव येऽमा गृहे जूरिति तद्वत् २. १७. ७ ॥

अमात्यः मेधावी खानकः प्रधानभृत्यः ८. २३ ॥ अमात्यम् अमात्येषु साधुम् ७. १५. ३ ॥

अमात्रम् अपरिमितम् १. १०२. ७ ॥

अमानुषम् मनुष्यसम्बन्धरहितम् २. ११. ...

अमितऽओजाः अमितं प्रमाणरहितं बलमुदकं वा यस्य यस्माद्वा सः १. ११. ४ ॥

अमितऽक्रतुः अमिताः क्रतवः प्रज्ञा यस्य सः १. १०२. ६ ॥

अमिता अतुलशुभगुणा ५. ३४. २ । अमितान्यपरिमितानि ६. ६२. २ । अमिताः अप्रक्षिप्ताः १. ११६. ३ ॥

अमित्रऽदम्भनः शत्रूणां हिंसकः ४.१५.४ ॥
अमित्रऽदम्भनम् शत्रुहिंसनम् २.२३.३ ॥

अमित्रऽयन्तम् शत्रुवदाचरन्तम् ५. ३५. ५ ॥

अमित्रऽयुधः अमित्रेषु शत्रुषु प्रक्षिप्तान्यायुधानि यैस्ते ३. २६. १५ ॥

अमित्रऽहा यो येन वाऽमित्रान्शत्रून्हन्ति सः ५. २४ । अमित्रऽहन् अरिहन् ६. ४५. १४ ॥

अमित्राः शत्रवः १७. ४४ । मित्रभाववर्जिताः १. १३३. १ ॥ अमित्रान् धर्मविरोधिनो मनुष्यान् । १. ६३. ५ । दुष्टान् सर्वपीडकान् ६. ६१. ३ । न विद्यन्ते मित्राण्येषांतान् १७. ३१ ॥

अमित्रिया अमित्राणि ६. १७. १ ॥ अमित्रिणे अविद्यमानानि मित्राणि सखायो यस्य तस्मै जनाय १. १२०. ८ ॥

अमिनः अहिंसकः ६. १६. १ । अनुपमोऽतुलपराक्रमः ७. ३६ ॥

अमिनः अमितमात्रो महान् भवति अभ्यमितो वा । नि० ६. १६ ॥

अमिनती अहिंसन्ती १. ६२. १२ ॥

अमिनती इति अहिंसके ४. ५६. २ ॥

अमिनते अहिंसकाय ४. ५. १ ॥

अमिनन्त प्रक्षिपन्ति १. ७६. २ ॥

अमिनाः निवारयेद्वा । [मीनातेर्निगमे अ० ७. ३. ८१ इतिहूस्वादेशश्च] १. ३२. ४ ॥

अमिनात् हिंसेत् २. ३४. ३ ॥

अमिनात् प्रामापयद्‌ । नि० ५. ९ ॥

अमिमीत [अमीमीत] निमिमीते १. १२१. १ । निर्मीयते ३. २६. ११ । निर्मितवान् निर्मिमीते वा ४. २५ । मिमीते २६. ३६ ॥

अमिमीत निरमिमीत । नि० ९. १९ ॥

अमिमीथाः निर्माणं कुर्याः ९. ३१. ७ ॥

अमीतऽवर्णाः अहिंसितवर्णाः ४. ५१. ६ ॥

अमीति प्राप्नोति २२. ५ ॥

अमीमदन्त आनन्दन्तु १. ८२. २ । आनन्दयत २. ३१ । आनन्दयन्ति [अत्र लडर्थे लुङ्] ३. ५१ ॥

अमीमेत् [अमीमेत्] प्रक्षिपति १. १६४. ६ । मिनाति १. १६४. २८ ॥

अमीमेत् अन्वमीमेत् । नि० ११. ४२ ॥

अमीव॒चात॑नः योऽमीवान् रोगान् शातयति सः [अत्र वर्ण व्यत्ययेन शस्य चः] १२. ८० ॥

अमी॒व॒ऽहा अविद्यादि रोगाणां हन्ता १. १८. २ । अमीवानामविद्यादीनां ज्वरादीनां वा हन्ता १. ९१. १२ [११५ आर्य०] ॥

अमीवहा अभ्यमनहा । निं० १०. १७ ॥

अमीवा॑ रोगः ६. ७४. २ । अमीवाः रोगान् २. ३३. २ । २१. १० । रोगपीडाः ११. ४७ । ये रोगवद्वर्तमानाः शात्रवस्तान् ६. ११ । रोग इव प्राणिनां पीडकाः ११. ४६ ॥

अमीवाः देवाश्वा वति वा । नि० १२. ४३ ॥

अमु॑ग्ध्वम् मुञ्चत ९. ५५. ६ ॥

अमु॒च्य॒त मुच्येत १२. ६८ ॥

अमु॒च्ये॒ 'छोड़ देता हूं' (सं० वि० १४६) अथर्व० १४. १. ५७ ॥

अमु॒ञ्च॒ः मुच्याः ५. २. ७ । मोचय ७. १३. २ ॥

अमु॒ञ्च॒त् मुञ्चति १. ६१. १० । मुच्यात् ३. ३१. ८ ॥

अमु॑ञ्चत त्यजत [अत्र संहितायामिति दीर्घः] ४. १२. ६ ॥

अमु॑ञ्चतम् [अमु॒ञ्च॒त॒म्] मुञ्चतो मोचयतो वा १. ६३. ५ । मुञ्चतम् [अत्रलोडर्थे लङ्] १. ११२. ८ । मोचयतम् १. ११७. १६ । मुञ्चेताम् १. ११८. ८ ॥

अमुञ्चतम् अमुमुचतुः । नि० ५. २१ ॥

अ॒मु॒तः॑ अमुष्मात् १. १७६. ४ । मोक्षाख्यात्परलोकात्परजन्मसुखफलाद् धर्माद्वा ३. ६० ॥

अ॒मु॒त्र॑ परस्मिन् जन्मनि १७. २ ॥

अ॒मु॒त्र॒भू॒यात् परजन्मनि भाविनः [अत्रामुत्रोपपदाद् भूधातोः क्यप्] २७. ९ ॥

अ॒मुना॑ एवं प्रकारेण २६. १ ॥

अ॒मु॒मु॒क्त॒म् मोचयतम् १. ११६. १४ । मोचयेतम् ६. ५०. १० ॥

अ॒मु॒या 'इससे' १. ३२. ८ ॥

अ॒मु॒ष्णाः मुष्णीयाः १. १३१. ४ ॥

अ॒मु॒ष्णा॒त् मुष्णाति चोरयति ६. ४४. २२ ॥

अमु॑ष्णीतम् चोरवद्धरतम् १. ९३. ४ ॥

अमू॑रः गन्ता १. १४१. १२ । मूढत्वादिदोषरहितः ३. २९. ३ । मोहरहितः ४. २६. ७ । अमूढः [अत्र वर्णव्यत्ययेन ढस्यरः] ४. ६. २ ॥

अमूरः अमूढः । नि० ६.८ ॥

अमृ॑क्तः अन्यैरहिंस्यः ३. ११. ६ । अहिंसितः ७. ३७. १ ॥ अमृक्तम् अकोमलम् २. ३७. ४ । शुद्धिरहितम् ६. १.

४ ॥ अमृक्ते इति विकारावस्थयाऽशुद्धे ३. ६. ४ ॥

अमृक्षन्त मृष्यन्ति सहन्ते १. १२६. ४ ॥

अमृध्रः हिंस्याः ५. २६. १० ॥

अमृणातम् सुखयतम् ४. २८. ४ ॥

अमृतः नाशरहितः १. ७०. २ । स्वस्वरूपेण नाशरहितः ७. ४. ४ । अविनाशी १२. २४ । शत्रुभिरप्रतिहतः १. ३८. ४ । अमृताः (अमृतासः) नाशरहिता जीवाः ७. ११. १ । कारणरूपेण नाशरहिताः ४. ३. १२ । मरणधर्मरहिताः प्राप्तमोक्षा वा १. ७२. १० । प्राप्तात्मविज्ञानाः ५. २. १२ । अमृतात्मैकरसाः २१. ४२ ॥ अमृतम् नाशरहितं सदामुक्तम् १. ४४. ९ । मोक्षाख्यं सुखं ब्रह्म वेदश्च (भूमिका २२६) २०. ५ । धर्मार्थकाममोक्षाख्यममृतं सुखम् १. ७२. ६ । अमृतात्मकं मोक्षसुखं प्रकाशनं वा १. ३१ । जलम् [अमृतमित्युदकनाम नि० १. १२] १. १८५. ६ । उदकममरणधर्मकमाकाशादिकं वा ३३. ४३। सत्वविज्ञानं किरणसमूहं वा (भूमिका १४५) ३३. ४३ । अमृतात्मकं ब्रह्म ओषधेः सारं वा १९. ७२ । अल्पमृत्युरोगनिवारकम् १९. ८४ । स्वात्मसं मुक्तिसुखं यज्ञशिष्टमन्नं वा १८. ६ ॥ अमृतान् प्राप्तमोक्षान् सदेहान् विदेहान्वा विदुषो, मुक्त्यानन्दानुत्तमान्भोगान्वा ४. २८ ॥ अमृतेन जलादिना ६. ७५. १८ । परमात्मना सह युक्तेन ३४. ४ । सर्वरोगनिवारकेणामृतात्मकेनौषधेन १७. ४६ । सर्वरोगप्रहारकेण गुणेन १६. १ । परमेश्वरमोक्षत्रोधेन परमानन्देन (भूमिका २४६) अथर्व० ११. ५. ५ ॥ अमृताय मोक्षाय ४. २. ६ । जलवच्छान्तस्वरूपाय ४. ३. ३ ॥ अमृतात् मोक्षप्राप्तेः ७. ५६. १२ ॥ अमृतस्य नाशरहितस्य कारणस्य १. ४३. ६ । नाशरहितस्य परमेश्वरस्य वेदस्य वा ३३. ७७ । नाशरहितस्य विज्ञानस्य ६. ५२. ६ । अतिस्वादिष्टस्य ६. ३४ ॥ अमृते प्रवाहरूपेण नाशरहिते १. ११३. २ ॥ अमृतेषु हिरण्यादिषु धनेषु [अमृत इति हिरण्यनाम निघ० १. २] ३. ६३. ३ ॥

अमृतम् हिरण्यनाम । निघ० १. २ । कौ० नि० ९१ । उदकनाम । निघ० १. १२ । कौ० नि० ७५ ॥ अमृते अमरणधर्माणौ । नि० २. २० । अमृतस्य उदकस्य । नि० १२. ८ । अमृतेषु देवेषु । नि० ८. १९ । प्रजापतिर्वाऽमृतः । श० ६. ३. १. १७ । ते (देवाः) होचुः (हे मृत्यो !) नातोऽपरः कश्चन सह शरीरेणामृतोऽसद्यदैव त्वमेतं भागꣳ हरासाऽथ व्यावृत्य शरीरेणामृतोऽसद्योऽमृतोऽसद्विद्यया वा कर्मणा वेति यद्वै तदब्रुवन्विद्यया वा कर्मणा

वेत्येषा हैव सा विद्या यदग्निरेतदु हैव तत्कर्म यदग्निः । श० १०. ४. ३. ९ । अमृता देवाः । श० २. १. ३. ४ । अमृतं वाऽआपः । श० १. ९. ३. ७ । ४. ४. ३. १५ । तद्यत्तदमृतꣳ सोमः सः । श० ९. ५. १. ८ । अमृतं वै हिरण्यम् । श० ९. ४. ४. ५ । तै० १. ३. ७. ७ । अमृतꣳ हिरण्यम् । श० १०. ४. १. ६ । तां० ९. ९. ४ । तेजोऽसि शुक्रमस्यमृतमसि (आज्य !) । श० १. ३. १. २८ । प्राणो ऽमृतम् । श० १०. २. ६. १८ । अमृतमु वै प्राणाः । श० ९. १. २. ३२ । सदमृतम् । श० १४. ४. १. ३१ । अथ यद् ब्रह्म तदमृतम् । जै० उ० १. २५. १० । अमृतं वा ऋक् । कौ० ७. १० । अमृतं वै ऋक् । श० ७. ४. २. २१ । अमृतत्वं वै ऋक् । श० ९. ४. २. १४ । अमृतमेव सप्तमी चितिः । श० ८. ७. ४. १८ । अमृतमिव हि स्वर्गो लोकः । तै० १. ३. ७. ५ । किं नु तेऽस्मासु (देवेषु) इति । अमृतमिति । जै० उ० ३. २६. ८ । अमृतात्मृत्युः (निवर्तते) । श० १०. २. ६. १९ । एतद्वै मनुष्यस्यामृतत्वं यत्सर्वमायुरेति । श० ९. ५. १. १० । एतद्वाव मनुष्यस्यामृतत्वं यत्सर्वमायुरेति । तां० २२. १२. २ । २३. १२. ३ । य एव शतं वर्षाणि यो वा भूयाꣳसि जीवति स हैवैतदमृतमाप्नोति । श० १०. २. ६. ८ । अमृतमु वै प्राणाः । श० ९. ३ ३. १३ । अमृतं वै प्राणाः । गो० उ० १. १३. । अमृतं वै प्राणाः कौ० ११. ४. १४. २ । अमृत ꣳ हि प्राणः । श० १०. १. ४. २ । प्राणो वाऽअमृतम् । श० १४ ४. ४. ३ ; अमृतमापः । गो० उ० १. ३ । अमृतत्वं वा आपः । कौ० १२. १ । अमृता ह्यापः । तै० १. ७. ६. ३ । यद्वै पवं तदमृतं यदमृतं तद्ब्रह्म । गो० पू० ३. ४ । अमृतꣳ ह्येतदमृतेन क्रीणाति यत्सोम ꣳ हिरण्येन । श० ३. ३. ३. ६ । अमृतꣳ हिरण्यम् । तै० १. ७. ६. ३ । १. ७. ८. १ । अमृतꣳ हिरण्यममृतमेष (आदित्यः) । श० ६. ७. १. २ । आदित्योऽमृतम् । श० १०. २. ६. १९ । अग्निरमृतम् । श० १०. २. ६. १७ । अमृतमेभ्यः (विश्वसृड्भ्यः) उदगायन् । सहस्रं परिवत्सरान् । तै० ३. १२. ९. ३ ॥

अमृतत्वम् अमृतस्य मोक्षस्य वा भावम् १. ११०. ३ । मोक्षभावमुत्तममानन्दं वा ४. ३१. ४ । मोक्षसुखम् ४. ३३. ४ । उदकस्य भावम् ५. ६३. २ । क्रियासिद्धं नित्यं विज्ञानम् ७. ४७ ॥ अमृतत्वेन सर्वरोगनिवारकत्वेन सह ६. १६ । अमृतत्वस्य अविनाशिनो मोक्षसुखस्य कारणस्य वा ३१. २ ।

अमृत्यु अविद्यमानं मृत्युभयं यस्मिन् ६. ४८. १२ ॥

अमृध्रः अहिंसकः ५. ४३. १३ ॥ अमृध्राः अध्यापकोपदेशकाः ३. ५८. ८ ॥ अमृध्राः अकोमलाङ्गा दृढाङ्गाः २६. ४६ ॥

अमृधम् न मर्धते नोनत्ति [अत्र नञ्पूर्वास्मृधधातोर्बाहुलकादौणादि कोरक् प्रत्ययः] १. ३७. ११ ॥

अमृध्ये अहिंसिते ९. ४३. २ ॥

अमेनान् अविद्यमाना मेनाः प्रक्षेपकर्त्र्यः स्त्रियो येषां तान् ९. ३१. १ ॥

अमेनि अहिंसकः सन् [अत्र सुपां सुलुगिति सुलोपः] ३८. १४ । निर्वैरः (भूमिका १५६) ॥

अमेन्यस्मे नृम्णानि धारयेत्यक्रुध्यन्नो धनानि धारयेत्येवैतदाह । श० १४ ...

अमे॒ष्टम् अमायां गृहे इष्टम् १०. २० ॥

अमो॒ची मुच्यते ५. १. २ ॥

अम्ब [अम्बे] मातरध्यापिके २. ४१. १६ । अमति प्रेमभावेन प्राप्नोति तत्सम्बुद्धौ [अत्रोणादिर्वन् प्रत्ययः] ६. २६ ॥

अम्ब॒यः रक्षणहेतव आपः १. २३. १६ ॥

आपो वा अम्बयः । कौ० १२. २ ॥

अम्बरी॒षः शब्दाविद्यावित् [अत्र शब्दार्थादविधातोरौणादिक इषिन् प्रत्ययो रुगागमश्च] १. १००. १७ ॥

अम्बालिके ! प्रपितामहि ! २३. १८ ॥

अम्बिकया अम्बते शब्दयति यया तया २. ५७ । अम्बिके ! पितामहि ! २३. १८ ॥

अम्बिका शरद्वा अस्य (रुद्रस्य) अम्बिका स्वसा । तै० १. ६ । अम्बिका अम्बिका ह वै नामास्य (रुद्रस्य) स्वसा । श० २. ६. २.९ ॥

अम्बितमे याऽम्बतेऽध्यापयति साऽतिशायिता तत्सम्बुद्धौ २. ४१. ११ ॥

अम्बे मातः २३. १८ ॥

अम्भः [अम्भ] उदकम् [अम्भमित्युदकनाम निघ० १ । १२] १८. ४ । व्यापकं शान्तस्वरूपं जलवत् प्राणस्यापि प्राणम् [आप्लृन्धातोरसुन् प्रत्ययान्तस्यायं प्रयोगः] (भूमिका १६८) अथर्व० १३. ४. ९० ॥

अयं वै (भूः) लोकोऽम्भांसि ... १८. ९ ॥

अम्भृणम् शत्रुभ्यो भयङ्करम् १. १३३. ५ । अम्भृणौ अपो बिभर्ति याभ्यां तौ १६. २७ ॥

अम्भृण महन्नाम नि० ३. ३ ॥

अम्यक् अमि सकलां गतिमञ्चति गच्छति १. १६६. २ ॥

अम्यक् अमाक्तेति वाऽभ्यक्तेति वा । नि० ६. १५ ॥

अम्यन्ति गच्छन्ति ६. ११. ५ ॥

अय॒ प्राप्नुहि ४. १८. २ ॥

अयं॒सत उपयच्छेयुः १. १३९.३ । यच्छेयुः १. १३५. ६ ॥

अयं॒स्त उद्यच्छति १. ५६. १ । उपयच्छति १. १२६. २ । यच्छति ६. ७१.१ । यच्छतः १. १४४. ३ ॥

अयः प्राप्तिसाधका धातवः १. १६३. ६ । योऽयते गच्छति सः ५. ६२. ७ । सुवर्णम् ४. २. १७ । लोहयुक्तम् ६. ७५. १५ । लोहा १८. १३ । अयसे विज्ञानाय १. ५७. ३ । गमनाय ४. २१. ७ ॥

अयस् हिरण्यनाम निघ० १. २. ॥ अयः (प्रजापतिः) अश्मनोऽसृज्यत (असृजत) । श० ६. १. ३. ५ । दिशो वा अयस्मय्यः (सूच्यः) तै० ३. ९. ६. ५ । अस्य वै (भूः) लोकस्य रूपमयस्मय्यः (सूच्यः) । तै० ३. ९. ६. ५ । (असुराः) अयस्मयीमेव (पुरीं) ... (...) ... १. ३ । अयः (प्रजापतिः) अयसो हिरण्यं (असृजत)

तस्मादयो बहुध्मातं हिरण्यसंकाशमिवैव भवति । श० ६. १. ३. ५ ॥ अयः विश एतद्रूपं यदयः श० १३. २. २. १९ ॥

अयःऽदंष्ट्रान् अयोदंष्ट्रा, अयोदंसनानि येषु तान् १. ८८. ९ ॥

अयःशया याऽयस्सु स्वर्णादिषु शेते सा ['अयः' इति हिरण्य नामसु पठितम् नि० १. २] ५. ८ ॥

अयःशिप्राः अय इव शिप्रे हनू नासिके येषामश्वानां तद्वन्तः ४. ३७. ४ ॥

अयःस्थूणं सुवर्णस्तम्भमिव ५. ६२. ८ ॥

अयःहनुः अयो लोहमिव दृढ़ा हनुर्यस्य सः ६. ७१. ४ ॥

अयक्षि नाशयसि २० १८ ॥

अयक्ष्मम् यक्ष्मादिरोगरहितम् १६. ४ । १८. ६ ॥ अयक्ष्माय यक्ष्मादिरोगनिवारणाय ११. ३८ । आरोग्याय ११. ५३ ॥ अयक्ष्माः न विद्यते यक्ष्मा रोगराजो यासु ताः [यक्ष इत्यस्मात् अर्त्तिस्तु उ० १. १३८. अनेन मन् प्रत्ययः] १०१ अविद्यमानो यक्ष्मा क्षयरोगो याभ्यस्ताः ४. १२ । अयक्ष्मया पराजयादिपीडानिवारकया १६. ११ ॥

अयंच्छत् [अयुच्छत् दद्यात् ११. ५६ । प्रयच्छति ददाति ७. १८. १७ ॥

अयंच्छथाः 'प्रदान कीजिये' १. ९२. ८ ॥

अयंजः संगमयसि १. ३१. ३ । 'प्राप्त होता है' १. ७६. ५ । यजेः ३. १७. २ ॥

अयंजन्त [अयुजन्त] ददतु १. १२१. ५ । समपूजयन्त पूजयन्ति पूजयिष्यन्ति च (भूमिका १९२) १०. १३०. ३ । संगमयन्ति १२. ३२ । यजन्ते १७ ५५ ॥ यजन्ति संगच्छन्ते १. १६४. ५० । समन्तात्संगच्छन्ते ४. ४२. ८ । संगच्छेरन् ४. ३. ८ । १७. २८ । यजन्तु १७. ५९ । अपूजयन्त (भूमिका १२९) ३१. ६ ॥

अयंजमानम् अदातारम् १२. ६२ ॥

अयंज्ञऽसाचः ये यज्ञेन न सचन्ति संबध्नन्ति ते ६. ६७ ॥

अयज्ञान् संगाद्यग्निहोत्राद्यनुष्ठानरहितान् ७. ६. ३ ॥

अयंज्युम् अयजमानम् १. १३१. ४ । अयज्यून् असंगतिकर्तॄन् १. १२१. १३ । विद्वत्सत्कारविरोधिनः ७. ६. ३ ॥

अयंज्वनः यज्ञविरोधिनः १. १०३. ६ । अयाज्ञुस्ते यज्वानो न यज्वानोऽयज्वानः १. ३३. ४ । यज्ञानुष्ठानं त्यक्तवन्तः १. ३३. ५ ॥

अयत् प्राप्नुयात् ३. ३०. ७ । प्राप्नोति ७. २०. ७ । गच्छति ५. ३७. २ ॥

अयंतंता प्रयत्न रहितौ २. २४. ५ ॥

अयते प्राप्नोति १ १२७. ३ ॥

अयते गतिकर्मा निघं० २. १४ ॥

अयन् प्राप्नुवन्ति ४. २. १६ ॥

अयनम् भूमिस्थानम् ३. ३३. ७ ॥ अयनाय अभीष्टस्थानाय मोक्षाय ३१. १८। व्यावहारिकपारमार्थिक सुखाय (भूमिका ११३) ॥ अयने भूमौ १३. ५३।

इयं (पृथिवि) वाऽअयामयनमस्या ४५ह्यापो यन्ति। श० ७. ५. २. ५० ॥

अयन्त प्राप्नुवन्ति ६. २६. १ ॥

अयन्ते गच्छन्ते १. १६. २ ॥

अयम् प्रत्यक्षमनुष्ठीयमानः १. २०. १। प्रत्यक्षः ३. ६। निरूपितपूर्वः ३. १२ ॥

अयमानम् प्राप्नुवन्तम् ४. ३८. ५ ॥

अयवाः अमिश्रिताः १४. ३१। अयवोभिः मिश्रितामिश्रितैरन्नैः क्षणादिभिः कालावयवैः १२. ७४ ॥

अयवाः (अपरपक्षा हीद ४५ सर्वं) अयुवते। श० ८. ४. २. ११। अपरपक्षा अयवाः। श० ८. ४. २. ११। योऽसुराणाम् (अर्धमासः = कृष्णपक्षः) सोऽयवा न हि तेनासुरा अयुवन्। श० १. ७. २. २५। अथोऽइतरथाहुः य एव देवानाम् (अर्धमासः = शुक्लपक्षः) आसीत्सोऽयवा न हि तमसुरा अयुवत। श० १. ७. २. २६ ॥

अयष्ट अभिसंगच्छेत ६. ४७. २५ ॥

अयस्तापम् लोहस्येवतापकम् १०. १४ ॥

अयस्मयः हिरण्यमिव तेजोमयः ५. ३०. १५ ॥ अयस्मयम् सुवर्णादिप्रकृतम् १२. ६३ ॥

अया [अया] अनया [अत्र पृषोदरादिना न लोपः] १. १२८. २। अनया [अत्र वाच्छन्दसीत्येकारादेशाभावः] १. १४३. ६। अनया [अत्र छान्दसो वर्णलोप इतिनलोपः] २. २४. १। अनया नीत्या ६. १७. १५ ॥

अयांसम् [अयांसं] अयौ प्राप्तवन्तौ दोर्दण्डौ येन तम् २. ३५. १५ ॥

अयाः प्राप्नुवन्तः ६. ६६. ५ ॥

अयाः यजेः [अत्र लङ् मध्यमैक वचने शपो लुक् श्वेतवाहादित्वात्पदान्तेऽस्] ३. २६. १६। यजेः संगच्छस्व [अत्र लिङर्थेलङ्] ८. २० ॥

अयाट् अयाक्षीत् ७. १५। यजेत् २१. ४७ ॥

विश्वाङ् देवानयाडिहेति सर्वाह देवानयाक्षीदिहेत्येवैतदाह श० १४. २. २. १६ ॥

अयातन [अयातन] प्राप्नुत ५. ५४. अत्र संहितायामिति दीर्घः ॥

अयातम् [अयातम्] प्राप्नुतम् १. ११६. १८। प्राप्नुयातम् १. ११६. २०। अप्राप्तम् ५. ३१. ८ ॥

अयातयतम् सुशिक्षया प्रयत्नवर्ती संस्कुर्वन्तु १. ३३. ६ ॥

अयातुः यो न याति तस्मात् ७. ३४. ८ ॥

अयान् प्राप्तान् २. ३८. ३ । यच्छतु ४. ५३. १ । इयात् ६. ७१. ५ । प्रकाशित करते हैं १७. ५८ ॥

अयाम प्राप्नुयाम [अयं लोडुत्तम बहुवचने प्रयोगः] १. ३३. १ । गमयेम ५. ४५. ५ ॥

अयामन् अगन्तव्ये मार्गे १. १८१. ७ ॥

अयामि [अयामि] एमि प्राप्नोमि १. १५३. २ । प्राप्नोमि २. ४१. २ ॥

अयावि पृथक्कुरुतः २८. १५ ॥

अयासः प्राप्तिशीलाः १. ६४. ११ । प्राप्ताः १. १५४. ६ । शीघ्रगामिनः १. १६७. ४ । विज्ञानवन्तः ३. १८. २ । प्राप्तविद्याः ३ ५४. १३ । गच्छन्तः ५. ५२. १९ ॥

अयन्त इत्ययासः ६. ३ ॥

अयासः अयनाः नि० २. ७ ॥

अयासम् अयासिषम् प्राप्नुयाम [अत्र वाच्छन्दसीतीडभावः] ३. ३३. ३ ॥

अयासिषम् प्राप्नुयाम १. १८. ६ । प्राप्तवती ८. २७ । करोमि [अत्र लडर्थे लुङ्] ३. ४८ ॥

अयासिष्ट यातु ५. ५८. ६ ॥

अयासिष्टाम् प्राप्नुतः २८. १४ ॥

अयासुः प्राप्नुयुः ७. ५७. १ ॥

अयास्यः प्रयत्नासाध्यः स्वाभाविकः १. ६२. ७ ॥

अयास्यः ते (असुरा) ऽप्नुवन्नयं वा आस्य इति । यदब्रुवन्नयं वा आस्य इति तस्मादयास्यः । अयमास्यो ह वै नामैषः । तमयास्य इति परोक्षमाचक्षते । जै० उ० २. ८. ७ । स एष एवाऽयास्यः (= [illegible]) । आस्ये धीयते । तस्मादयास्यः । यद्वै वा (ऽयम्) आस्ये रमते तस्माद्वैवाऽयास्यः । जै० उ० २. ११ ८. । क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्ये ऽन्तरिति सोऽयास्यः । श० १४. ४. १. ९ ॥ स प्राणो वा अयास्यः । जै० उ० २. ८. ८ ॥

अयुक्त [अयुक्त] योजयति १. ५०. ९ । युनक्ति १. ११५. ४ ।

अयुक्तासः योगरहिताः ५. ३३. ३ । अधर्मकारिणः १०. २२ ॥

अयुक्थाः योजयसि १. ६४. १० ॥

अयुक्षत युञ्जते १. ९२. २ । संयुङ्ध्वम् ३. २६. ४ ॥

अयुक्षाताम् अयोजयताम् युङ्क्थः १. १५७. १ ॥

अयुग्ध्वम् [अयुग्ध्वम्] योजयत १. ६४. ७ । संयोजयत ९. ५९. ६ । संप्रयुग्ध्वम् १. ८५. ९ ॥

अयुञ्जन् युञ्जन्ति ६. ७ ॥

अयुजि असंयुक्तायाम् ५. ४६. १ ॥

अयुज्महि प्रयुञ्ज्महि ६. ५३. १ ॥

अयुञ्जन् युञ्जन्ति १. १६६. २ ॥

अयुक्षत युञ्जते १. १३०. ५ ॥

अयुतम् अपरिमितसंख्याकम् ४. २१. ७ । दशसहस्राणि १७. २ ॥

अयुतं दक्षिणा इति वा नि० १०. १२ ॥

अयुध्यः [अयुध्यः] योद्धुमनर्हः ४. ३०. ५ ॥

अयुनक् नियुञ्जीत १. १६३. २ । युनक्ति ६. ४४. २४ ॥

अयुयुत्सन् युद्धेच्छां कुर्युः [अत्र लिङर्थेलङ् व्यत्ययेन परस्मै पदञ्च] १. ३३. ६ ॥

अर्येभ्यः य अर्य्यन्ते प्राप्यन्ते पदार्थास्तेभ्यः ३०. ८ ॥

अयोः अनयोः १. १८५. १ । वियोजय संयोजय वा ६. २५. ६ ॥

अयोः एनयोः नि० ३. २२ ॥

अयोगूम् अयसा शस्त्रविशेषेण सह गन्तारम् ३०. ५ ॥

अयोजि [अयोजि] योज्यते ७. ७१. ६ । युज्यते १. १२३. १ ॥

अयोद्धाऽइव न योद्धा अयोद्धा तद्वत् १.३२॥

अयोधयः सम्यक् योधय [अत्र लोडर्थे लङ्] १. ३३. ७ ॥

अयोधीत् योधयति ४. ३८. ८ ॥

अयोयवीत् पुनः पुनर्मिश्रयत्यमिश्रयति वा १. ६२. १० ॥

अरंस्त रमताम् २. ११. ७ ॥

अरंहः गमयति ५. ३२. २ ॥

अरक्षः अरक्षणीयम् ५. ८७. ६ ॥ अरक्षसा अविद्यमानानि दुष्टानि रक्षांसि यस्मिंस्तेन १. १२६. ६ । अदुष्टभावेन २. १०. ५ । रक्षोवद्दुष्टतारहितेन ११. २४ । अरक्षसः अकुटिलस्योत्तमस्य १. १६०. ३ ॥

अरक्षत् रक्षति १. ७४. २ ॥

अरक्षत रक्षति ६. ८. २ ॥

अरक्षन् [अरक्षन्] रक्षेयुः १. १४८.५ । रक्षन्ति ४. २७. १ ॥

अरज्जौ असृष्टौ २. ५३. ६ ॥

अरणः विज्ञाता २. २४. ७ । संगन्ता ५. २. ५ । संग्रामरहितो यथावत्संग्रामं न करोति १. ७५. १६ । अरममाणः ७. ४. ८ ॥ अरणम् प्रेरितम् ३. ५३. २४ । उदकम् ९. ८५. ७ ॥ अरणाय सल्लक्षणाय प्राप्तायान्त्यजाय २६. २ ॥

अरणः अपार्णो भवति नि० ३. २ ॥ निरमणे निर्गमने नि० ११. ४२ ॥

अरणी इति काष्ठविशेषाविव ९. ६. ३ ॥ अरणिऽभिः अरणियों से १. १२७. ४ । सुखप्रापिकाभिः १. १२६. ५ ॥

अरणी अग्निः प्रत्यृतः एने नि० ५. ९ ॥

अरण्यम् वनम् २५. ३ ॥

अरण्यम्, अपार्णं ग्रामात्, अरमणं भवतीति वा नि० ९. २९ ॥ अरण्यानी अरण्यस्य पत्नी नि० ९. २९ ॥

अरताम् प्राप्नुताम् ९. ३३. १३ ॥

अरतिः स्वव्याप्त्या भर्ता १. ५६. २ । प्रापकः १. १२८. ६ । समर्थः २. ४. २ । सर्वत्र प्राप्तः ४. २. १ । प्राप्तिः ६. १२. ३ । अरमणः ६. ३. ५ । सत्यमुपदेशं प्राप्तः सन् ६. १७. ८ । ज्ञाता १२. २४ ॥ अरतिम् सुखप्रापकम् ७. १६. १ । प्राप्तवित्तम् १. १२८. ८ । प्राप्तम् २. २. ३ । प्रापणीयम् ४. १. १ । नास्ति रतिश्चैतन्यमस्मिंस्तम् १५. ३२ । विषयेष्वरममाणम् ६. ४६. २ । दुःखम् ४. ३८. ४ ॥ अरतौ अरमणवेलायाम् ९. २. १ ॥

अरत्नी भुजमध्यप्रदेशौ २० ८ ॥

बाहुर्वाऽरत्निः । श० ६. ३. १. ३३ ॥

अरथाः अविद्यमाना रथा येषां ते ५. ३१. ५ ॥ अरथेभ्यः अविद्यमाना रथाः येषां तेभ्यः पदातिभ्यः १६. २६ ॥

अरथीः अविद्यमानरथः ६. ६६. ७ ॥

अरदः [अरदः] विलिखत्याकर्षति ६. ३०. ३ ॥

अरदत [अरदत] विलिखति ७. ४७. ४ । विलिखेत् ३. ३३. ६ ॥

अरदतम् विज्ञापयताम् १. ११६. ७ ॥

अरध्रम् असमृद्धव्यवहारम् ६. ६२. ३ ॥

अरध्रस्य अहिंसकस्य ६. १८. ४ ॥

अरन् आचरन्तु १. १२५. ७ । समन्तात्प्राप्नुयुः ५. ३१. १२ ॥

अरन्त [अरन्त] रमन्ताम् ५. ३१. ८ ॥ रमते ४. १६. ६ ॥

अरन्धनायः अरम् अलं धनं यस्य स इवाचरसीत्यरन्धनायः [अत्र लडर्थे लिङ्] १. ५३. १० ॥

अरन्धयः हिन्धि १. ५१. ६ । हिंसय ५. २६. ११ । हिंसयेः ७. १६. २ ॥

अरन्धयत् [अरन्धयत्] हिंस्यात् ७. १८. ६ ॥

अरपः अविद्यमानं पापं यस्मिंस्तत्तथाचरणम् [रपोरिप्रमिति पापनामनी भवतः नि० ४. २१.] १६. ५५ । निष्पापताम् (भूमिका २७६) ॥

अरपत् रपति गुञ्जति १. ११६. ६ । व्यक्तमुपदिशति ५. ६१. ६ ॥

अरपाः अविद्यमानं रपः पापं यस्य सः २. ३३. ६ ॥

अरम् अलम् [अत्र कपिलकादित्वाल्लत्वम्] ११. ५२ । पर्याप्तं वा १. ६३. २ । [अरमत्र वर्णव्यत्ययेन लस्य स्थाने रः] ६. ४१. ५ ॥

अरमतिः न रमती रमणं विद्यते यस्य सः २. ३८. ४ । न विद्यते पूर्वा रमती रमणे गृहस्थक्रिया यस्याः सा ७. १. ६ । अरं अलं मतिः प्रज्ञा यस्य सः ७. ३४. २१ ॥ अरमतिम् विषयेष्वरममाणाम् [illegible]

५. ५४. ६ । अलं प्रज्ञाम् ७. ३६. ८ । पूर्णां प्रज्ञाम् ७. ४३. २ ॥

अरमणसम् यस्मिन्न रमन्ते शत्रवस्तम् ६. १७. १० ॥

अरमन्त रमन्ते ३. ५६. ४ ॥

अरमयः रमयसि २. १३. १२ । रमय ४. १६. ६ ॥

अरंकृतः सर्वान्पदार्थान् अलंकर्तुं शीलं येषान्ते [अत्र अन्येभ्योऽपि दृश्यते । अ ३. २. १७८ अनेन ताच्छील्येर्थे क्विप्] १. १४. ५ ॥ अरंकृताः अलंकृताः भूषिताः [संज्ञा छन्दसोर्वा कपिलकादीनामिति वक्तव्यम् । अ० ८. २. १८ । इति लत्वविकल्पः] १. २. १ । 'उत्तम रीति से बनाए हैं' (भार्य० ३३) अरंकृते पूर्णपुरुषार्थिने २. १. ७ ॥

अरंकृतिः अलङ्कारः ७. २६. ३ ॥

अरंगमाय यो विद्याया अरं पारं गच्छति तस्मै १. ४२. १ ॥

अरम्णाः रमय ५. ३२. १ ॥

अरम्णाः रम्णाति संयमनकर्मा, विसर्जनकर्मा वा नि० १० । ९ ।

अरम्णात् [अरम्णात्] वधति [रमणातीति वधकर्मा निघ० २. १६] २. १२. २ ॥

अरम्णात् अरमयत् नि० १० ३२ ।

अररिन्दानि उदकानि १. १३६. १० ॥

अरराव्णः प्राप्नुवन् १. १४७. ४ ॥

अररो दुष्ट मनुष्य । १. २६ ॥ अररुम् प्रापकम् १. १२६. ३ । असुरराक्षसस्वभावशत्रुम् [अर्तेररुः उ० ४. ८०. अनेन ऋधातोररुः प्रत्ययः] १. २६ ॥ अररुषे अलंरोपकाय ७. ५६. १६ ॥ अररुषः अदातुः ['रा दाने' इत्यस्मात्क्वसुस्ततः षष्ठ्येकवचनम्] १. १८. ३ । अहिंसकस्य १. १५०. २ । भृशं हिंसकात् ७. ५६. १६ ॥

अररु र्ह वै नामासुररक्षसमास तं देवा अस्याः (पृथिव्याः) अपाघ्नन श० १. २. ४. १७ ॥ भ्रातृव्यो वा अररुः । तै० ३ २. ९. ४ ॥

अरसम् अविद्यमानरसम् १. १९१. १६ ॥

अराः रथचक्रावयवाः (भूमिका ६) ३४. ५ ॥

अरातिः शत्रुः २. ७. २ ॥ अरातयः अविद्यमाना रातिर्दानं येषां शत्रूणां ते १. २६ ४ । परपदार्थगृहीतारः शत्रवः १. १६ । अदानस्वभावाः कृपणाः १. १६ । सत्यविरोधिनोऽरयः, अन्येभ्यो दुःखप्रदाः, परसुखासोढारः, विद्याविघ्नकारिणो वा १. २६ । कपटेन विद्यादानग्रहणरहिताः १. ७ ॥ अरातये रातिर्दानं न विद्यते यस्मिँस्तस्मै शत्रवे, बहुदानकरणार्थं दारिद्र्यविनाशाय वा १. ११ ॥ अरात्याः शत्रुभूताया वाण्याः तादृशस्य कर्मणो वा ।

(भूमिका १६६) अथर्व० १३. ४. ४७ ॥

अरातयः अदानकर्माणः वा अदानप्रज्ञा वा। नि० ३. ११। अमित्राः अप्रदानानिति वा नि० ११. २।

अ॒रा॒ति॒ऽय॒तः शत्रोरिवाचरणशीलस्य १. ६६. १ ॥

अ॒रा॒ति॒ऽवा योऽरातिरिवाचरति १. १४७. ४। योऽरातीन् शत्रून् वनति सम्भजति १. २३. ७ ॥

अ॒रा॒ती॒यु॒तः विद्यादिदानं कर्तुमनिच्छतः १२. ५ ॥

अ॒रा॒ती॒यात् शत्रुत्वमाचरेत् ११. ८७ ॥

अ॒रा॒धस॑म् धनरहितम् १ ८४. ८ ॥

अराधस् धनाराधकम् । नि० ५. १७ ॥

अराधि [अ॒रा॒धि] संसाध्यते १. ७०. ४। संसाधितम् २. २८ ॥

अराध्यै अविद्यमानसंसिद्धये प्रवृत्तम् ३०. ६ ॥

अराध्वम् दत्त १. ११६. १२। स्पर्धयन्ति ७. ५६. ४ ॥

अ॒रा॒म अलग करें ७. ५६. २१ ॥

अरावा अदाता अवचनो वा ७. ५६. १५ ॥

अरावाणो वा एते येऽमूनमभियंवन्ति । तां० ६. १०. ७ ॥

अरासत [अ॒रा॒स॒त] रासन्ते १. १११. ३। ददयुः ५. ७६. ६ ॥

अ॒रिः शत्रु १. ४. ६। ऋच्छति गृह्णात्यन्यायेन सुखानि च यः [अचइ इति अनेन ऋधातोरौणादिक इः प्रत्ययः] १. ६. १०। प्रापकः १. १५०. १ ॥

अरिः अमित्र ऋच्छतेः। ईश्वरोऽप्यरिरेतस्मादेव। नि० ५. ७ ॥

अ॒रि॒ऽगू॒र्तः अरिषु शत्रुषु गूर्त उद्यमी १. १८६. ३ ॥

अ॒रि॒च्य॒त रिच्यतेऽतिरिक्तोऽस्ति २. २२. २। पृथग्भूतोऽस्ति (भूमि १२३) ३१. ५ ॥

अरिणक् विरिणक्ति २. १३. ५ ॥

अ॒रि॒ण॒न् प्राप्नुवन्तु । [रिणातीति गतिकर्मसु पठितम् निघं० २ । १४] ६. १८ ॥

अ॒रि॒णाः (अरिणाः] प्राप्नोसि १. ९६. ६। प्राप्नुयाः ४. ४२. ७। हिनस्ति ४. १६. ५ ॥

अरिणात् [अ॒रि॒णा॒त्] गमयति २. १२. ३। प्राप्नुयात् ३. ३. ११। प्रेरयति ४. २८. १ प्राप्नोति २. १९. ६ ॥

अरिणीत [अ॒रि॒णी॒त] प्राप्नुवन्ति ३. ६०. २। प्राप्नुत १. १६१. ७ ॥

अ॒रि॒णी॒त॒म् गच्छतम् १. ११७. ११ ॥

अ॒रि॒ता॒ऽइ॒व यथाऽरितानि २. ४२. १ ॥

अ॒रि॒त्र॑म् यानस्तम्भनार्थं नलगाधग्रहणार्थं वा लोहमयं साधनार्थम् १. ४६. ८ ॥

अरित्राः येऽरिभ्यस्त्रायन्ते ते ३३. १ ॥

अरिऽधायसः अरीन् शत्रून् दधति यैस्ते १. १२६. ५ ॥

अरिप्रम् निष्पापम् निर्दोषम् ७. ४७. १ ॥

अरिरेचीत् रिक्तङ्कुर्यात् ४. ३४. ६ ॥

अरिषण्यन् ! आत्मनो रिषं हिंसनमिच्छन् ! [अत्र दुरस्युर्द्रविणस्युः अनेनेत्व निषेधः अ. ७. ४. ३६] १. ६३. ९ । द्रविणमनिच्छुः २. ३७. ३ । अहिंसयन् ! ६. २४. ६ । अहिंसन् ! ६. २५. २ ॥ अरिषण्या अहिंसकौ २. ३९. ४ ॥

अरिष्टः सर्वविघ्नरहितः १. ४१. २ । अहिंसनीयः ९. १८. ३ । अहिंसितः ५. ३१. १ ॥ अरिष्टम् (साम) अनेन (अरिष्टेन साम्ना) नारिषामेति तदरिष्ट-स्यारिष्टत्वम् तां० २२. ५. २३ । देवाश्चवा असुराश्चास्पर्द्धन्त यं देवानामघ्नन्न स समभवद्यमसुराणा थ्वं स थ्वं सोऽभवत्ते देवास्तपोऽतप्यन्त त एतदरिष्टमपश्य-थ्वं स्ततोयं देवानामघ्नत् (अघ्नन् ?) सं थ्वं सोऽभवद्यमसुराणान्न स समभवत् । तां० १२. ९. २३ ॥

अरिष्टऽगातुः अरिष्टाऽहिंसिता गातुर्वाग् यस्य सः ५. ४४. ३ ॥

अरिष्टऽग्रामाः अहिंसका ग्रामा येभ्यस्ते १. १६६. ६ ॥

अरिष्टतातये रिष्टानां हिंसकानां रोगाणामभावाय १२. ८१ ॥

अरिष्टनेमिः अरिष्टानि दुःखानि दूरे नयति स कार्तिकः १९. १८ । योऽरिष्टानि सुखानि प्रापयति सः [अत्रारिष्टोपपदात् णीञ् प्रापणे धातोरौणादिको मिः प्रत्ययः) २५. १९ । अरिष्टानां दुःखानां नेमिर्वज्रवच्छेत्ता । [नेमिरिति वज्रनाम निघं० २. २०] १. ८९. ६ । योऽरिष्टानि अहिंसितानि कर्माणि नयति तत्संबुद्धौ ३. ५३. १७ ॥

तस्य (यज्ञस्य) तार्क्ष्यश्चारिष्टनेमिश्च सेनानी-ग्रामण्यानिति शारदौ तावृतू । श० ८. ६. १. १९ ॥

अरिष्टऽवीराः अरिष्टाऽहिंसिता वीरा यासु ताः १. ११४. ३ ॥

अरिष्टिम् अहिंसाम् २०. ११. ६ । अरिष्ट्यै सुखहेतवे, दुःख निवारणेन सुखाय, सुखाय वा २. ३ । कुशल प्राप्तये ३० १३ ॥

अरिष्यन्तः अहिंस्यमानाः २. ८. ६ । अन्यैरहिंसिष्यन्तः ४. ५७. ३ ॥

अरीः सुखप्रापिकाः प्रजाः १. ३६ ॥

प्रजा वा अरीः । श० ३. ९. ४. २१ ॥

अरीरयत् रमयति २. ३८. ३ । रमयेत् ६. ७१. ५ ॥

अरी॑ळ्हम् शत्रूणां हन्तारम् ४. १८. १० ॥
अरु॑ग्णम् रोगरहितम् ६. ३६. २ ॥
अरु॑चः प्रकाशरहितांश्चन्द्रादीन् ६. ३६ ॥
अरु॑जः [ऋरु॒ज॒ः] रोगयुक्ताः ४. ३२. १० । रुज १. ५१. ५ । आमर्दय १. ५६. ६ । रुजति ३. ३२. १६ ॥
अ॒रु॒जत् भनक्ति ६. ६१. २ ॥
अ॒रु॒णऽअ॑श्वाः रक्तवर्णाऽश्वाः ५. ५७. ४ ॥
अ॒रु॒णः य ऋच्छति सर्वां विद्यां स आरोचको वा । [अत्रऋधातोरौणादिक उनच् प्रत्ययः] १. १०५. १८ । रक्तवर्णः १. १३०. ६ । २४. ३ । २६. ५६ । अग्निरिव तीव्रतेजाः १६. ६ ॥
अरुणैः अग्न्यादिभिः २. १. ६ ॥
अरुणेभिः आरक्तवर्णैरग्निप्रयोगजैः १. ८८. २ । अरुणाय प्रापकाय १६. ३६ ॥

अरुणः आरोचनः नि० ५. २० ॥

अ॒रु॒णऽप्सवः अरुणा रक्तगुणविशिष्टाश्च प्सवो भक्षणानि येषान्ते वृद्धा जाताः १. ४६. १ ॥
अ॒रु॒णऽप्सुम् अरुणरूपाम् [प्सु इति रूपनाम निघं० ३. ७] ५. ८०. १ ॥
अ॒रु॒णब॑भ्रुः अरुणेन युक्तो वभ्रुर्वर्णो यस्य सः २४. २ ॥

अ॒रु॒णम् प्रकाशस्वरूपम् (भूमिका १६८) अथर्व० १३. ४. ५१ ॥ अरुणा पदार्थप्रापणसमर्थानि १ १३४ ३ ॥
अ॒रु॒णयुक्ऽभिः येऽरुणान् किरणान् योजयन्ति तैः ६. ६५. २ ।
अ॒रु॒णाम् प्राप्तव्याम् ९. ६३ ६ ॥
अ॒रु॒णीः ब्रह्मचारिणीः १. ११२. १६ । उषसोऽरुणयो दीप्तय इव वर्तमाना राजनीतीः १. १२१. २ । रक्तगुणविशिष्टाः ४. १. १६ । प्राप्ताः प्रजाः ४. २. १६ । किञ्चिदारक्ताभाः ४. १४. ३ । सुशीलतया प्रकाशमयाः स्त्रियः १६. ६६ ॥ अरुण्यः उपः कालाः १. १४०. १३ ॥ अरुणीनाम् अरुणवर्णानां स्त्रीणाम् १६. ६३ ॥

अरुण्यो गाव उषसाम् इति आदिष्टोपयोजनम् निघ० १. १५ ॥

अरु॑पितम् आरोपण किया गया ४. ५. ७ ॥
अ॒रु॒षः अहिंसकः सन् ३. १५. ३ । मर्मसु स्थितः ३. २६. ६ । अरुणरूपः ४. ५८. ७ । निर्मर्मव्यापी ५. १. ५ । सुखप्रापकः ५. ४७. ३ । मर्मणः ५. ५६. ७ । योऽरुःषु मर्मसु सीदति सः ६. ३. ६ । आरक्तगुणः ६. ४८. ६ । गर्भस्थः ७. ३. ३ । य ऋच्छत्यध्वानम् १७. ६९ ॥ अरुषा अश्वाविव

जलाग्नी ७. १९. २ ॥ अरुषाः रक्तादिगुणविशिष्टा ऽन्यादयः १. ११८. ५ । रक्तभास्वरगुणाः ५. ७३. ५ ॥ अरुषम् सर्वेषु मर्मसु सीदन्तमहिंसकं परमेश्वरं प्राणवायुं तथा बाह्ये देशे रूपप्रकाशकं रक्तगुणविशिष्टमादित्यं वा [अरुषमिति रूप नामसु पठितम् । निघ० ३. ७] १. ६. १ । मर्मविद्यायां सीदन्तम् ९. ४३. १२ । सुन्दररूपयुक्तम् १. ३६. ६ । अश्वादिकम् १. ११४. ५ । अश्वम् ३. १४ ॥ अरुषा रूपवता पदार्थसमूहेन १५. २१ ॥

अरुष इति अश्वनाम नि० १. १४ ॥ अग्निर्वा अरुषः तै० ३. ९. ४. १ ॥

अ॒रु॒षऽस्तू॑पः ये ऽरुष्षु मर्मसु सीदन्ति तेषु प्रशंसितः ३. २९. ३ । योऽरुषान् अहिंसकान् उच्छ्रापयति सः २४. १४ ॥

अ॒रुषासः अहिंसमानाः किरणाः १. १४१. २ । ज्वालाः ७. १९. ३ ॥

अ॒रु॒षि॒ रक्तगुणप्रकाशयुक्ता १. ३०. २१ ॥

अरु॑षी रक्तगुणा अरुष्यो गमनहेतवः । अत्र बाहुलकादूषन् प्रत्ययः । अन्यतोङीषु अ. ४. १. ४० अनेनङीष् प्रत्ययः । वा छन्दसि अ० ६. १. १०६ । अनेन जसः पूर्वसवर्णम्] १. १४. १२ । उपसः इव सर्वसुखप्रापिका विद्याः किया वा १. ७२. १० । अरुष्यो रक्तगुणविशिष्टाः १. ६२. १ ॥

अरुषी उपोनाम निघ० १. ८ ॥ अरुषीः आरोचनात् नि० १२. ७ ॥

अरु॑हत् [अ॒रु॒ह॒त्] रोहति [अत्र लडर्थे लङ् । विकरणव्यत्ययेन शपः स्थाने शः] १. १०. २ । वर्धयति १. १४१. ५ । रोहेत् १. ९१. २ ॥

अ॒रु॒ह॒न् रोहन्ति १. ११०. ६ ॥

अ॒रु॒ह॒म् आरूढोऽस्मि ६. १० । रोहेयम् १७. ६७ ॥

अ॒रु॒हा॒म॒ प्रादुर्भवेम [अत्र विकरणव्यत्ययः] ८. ५२ ॥

अरू॑क्षितम् रूक्षतारहितम् । ४. ११. १ ॥

अ॒रू॒रु॒च॒त सम्यक् प्रकाशते २७. १५ ॥

अ॒रे॒ नीचसम्बोधने २३. ५५ ॥

अरे॑जन्त कम्पते (रेजृ कम्पने अस्माद्धातोर्लडर्थे लङ्) १. ३८. १० ॥

अरे॑जेताम् चलतः [भ्यसतेरेजत इति भयवेपनयोः नि० ३. २१] १. ३१. ३ । कम्पेताम् १. १५१. १ । कम्पेते २. ११. ६ ॥

अ॒रे॒ण॒वः अविद्यमाना रेणवो धूल्यंशा इव विघ्ना येषुवे । [अजिवृरी उ० ३. ३७ । इति रीधातोर्णुः प्रत्ययः] १. ३५. ११ । दुष्टानप्राप्ताः १. १५१. ५ । रेणुरहिताः ६. ६६. २ ॥

अरेणु अहिंसनीयम् १. ५६. ३ ॥

अरेपाः पापाचरणरहिताः ४. १०. ६ ॥ अरेपसा न विद्यते रेपः पापं ययोस्तौ १. १८१. ४ । अनपराधिनौ ५. ७२. ४ । अरेपसौ दयालू ५. ९१. ६ । अविद्यमानं रेपो व्यक्त प्राकृतं वचनं ययोरध्येत्रध्यापकयोस्तौ ५. ३ ॥ अरेपसः अव्यक्तशब्दा निष्पापाः १. ६४. २ ॥ अरेपसा अकम्पितेन १. १२४. ६ ॥

अरेपसा पापेनालिप्यमानया नि० १२. ३ ॥

अरैक [अरैक्] अतिरिणक्ति १. ११३. २ ॥

अरोचत प्रकाशते ३. २९. १४ । रोचते ३१. ६२ ॥

अरोचथाः रोचस्व ३. २९. १० । दीपयंति [अत्र व्यत्ययो लडर्थे लुङ्] ३. १४ । प्रदीप्येथाः १२. ५२ ॥

अरोचयः रोचय ३. ४४. २ ॥

अरोचयत् प्रकाशयेत् १. १४३. २ । रोचयेत् ३. ३४. ४ ॥

अरोचि प्रकाशते ७. १०. २ ॥

अरोचिष्ट प्रकाशते ३७. १५ ॥

अरोरवीत् भृशं शब्दायते ५. ३०. ११ ॥

अरोहत् रोहति ३. ७. ३ ॥

अरोहयः रोहयसि १. ५१. ४ ॥

अर्कः अग्निः १८. ५० । अर्चनीयमन्नम् । १. १६७. ९ । वज्रो विद्युद्वा ३. २६. ७ । अर्चनीयः ६. २१. ४ । सत्कर्तव्यः ७. २४. ५ । पूजनीयसामग्री विशेषः १८. २२ । सर्वान्प्राणिनोऽर्चन्ति येन सः १८. ६६ । विद्यमानसूर्य्यः १. १८३. ६ ॥ अर्काः मन्त्रार्थविदः ५.५.४॥ अर्कम् अन्नं सत्कर्तव्यं जनं वा । ७.९.२ । सत्कर्तव्यमन्नं विचारं वा ७. ३९. ७ । ऋग्वेदम् १. १६४. २४ । सत्कर्तव्यं क्रियामयं व्यवहारम् ६. ४६. ८ । सूर्यादिलोकम् १. १९. ४ । अर्च्यते पूज्यते सर्वैर्जनैर्यस्तम् ॥ अर्कैः किरणैः २. ११. १५ । पूजितैः कर्मभिः २०. ५४ । मंत्रैर्विचारैर्वा १. ४७. १० वज्रवच्छेदकैः ६. ४. ६ ॥

अर्क इति अन्न नाम निघ० २. ७ । वज्र नाम निघ० २.२ ॥ अर्को देवो भवति, यदेनमर्चन्ति । अर्को मंत्रो भवति, यदनेनार्चन्ति । अर्कमन्नं भवति, अर्चति भूतानि । अर्को वृक्षो भवति, संवृत्तः कटुकिम्ना नि० ५. ४ ॥ अन्नं वै देवा अर्क इति वदन्ति । तां० १५. ३. २३ । अर्को वै देवानामन्नम् । श० १२. ८. १. २ ॥ तै० १. १. ८. ५ ॥ अन्नं वा अर्कः । तां० ५. १. ९ । गो० उ० ४. २ । अन्नमर्कः. श० ९. १. १. ४ । आदित्यो वाऽअर्कः । श० १०. ६. २. ६ । अर्कमयुस्तदसौ सूर्यः । तै० १. १. ७. २ ॥ स एष यथार्को य एष (सूर्यः) तपति । श० १०. ४. १. २२ । अयं वा ऽअग्निरर्कः । श० ८. ६. २. १९ ॥ अग्निर्वा ऽअर्कः । श० २. ५. १. ४ ॥ स एषोऽग्निरर्को यत्पुरुषः । श० १०. ४. ४. ५ ॥ आपो वा अर्कः । श० १०. ६. ५. २ ॥ ...अर्कः ।

श० १०. ४. १. २३ । प्राणापानौ वा एतौ देवानाम् । यदर्काश्वमेधौ । तै० ३. ९. २१. ८ । ओजो बलं वा एतौ देवानाम् । यदर्काश्वमेधौ तै० ३. ९. २१. ३ ॥ वेत्थार्कमिति पुरुषꣳ हैव तदुवाच । वेत्थार्कपर्णेऽइति कर्णौ हैव तदुवाच वेत्थार्कपुष्पे ऽइत्यक्षिणी हैव तदुवाच वेत्थार्ककोश्याविति नासिके हैव तदुवाच वेत्थार्कसमुद्गावित्योष्ठौ हैव तदुवाच वेत्थार्कधाना इति दन्तान्हैव तदुवाच वेत्थार्काष्ठीलामिति जिह्वाꣳ हैव तदुवाच वेत्थार्कमूलमिति अन्नꣳ हैव तदुवाच । श० १०. ३. ४. ५ ॥ दीर्घतमसोऽर्को भवति । तां० १५. ३. ३४ । अस्य (अग्नेः) एवैतानि (घर्मः, अर्कः, शुक्रः, ज्योतिः, सूर्यः,) नामानि श० ९. ४. २. २५ । एतस्य वै देवस्य (रुद्रस्य) आस्यादर्कः समभवत्स्वेनैवैनम् (रुद्रम्) एतद् भागेन स्वेन रसेन प्रीणाति (यजमानः) श० ९. १. १. ९ ॥

अर्कऽशोकैः अन्नादीनां शोधनैः १. ४. ७ । अर्कः सूर्य इव शोकाः प्रकाशा येषां तैः ३३. १२ ॥

अर्कऽसातौ अन्नानां संविभागे १. १७४. ७ ॥

अर्च [अर्च] पूजय १. ५४. ३ ॥

अर्चत् [अर्चत्] अर्चेत् १. १७३. २ ॥

अर्चत [अर्चत] सत्कुरुत ६. ४५. ४ ॥

अर्चतः सत्क्रियां कुर्वतः ७. २२. ४ ॥

अर्चति [अर्चति] सत्करोति १. ९. ८ ॥

अर्चति अर्चतिकर्मा निघ० ३. १४ ।

अर्चद्धूमासः अर्चन्तः सुगन्धियुक्ता धूमा येषान्ते ३३. १ ।

अर्चत्रयः अर्चकाः ६. ६६. १० ॥

अर्चत्र्यः सत्कारं कुर्वत्यः प्रजाः ६. २४. १ ॥

अर्चथ सत्कुरुथः १. १९१. ६ ॥

अर्चन् [अर्चन्] प्राप्नुवन्तु ३. १४. ४ । सत्कुर्वन्ति ४. १. १४ ।

अर्चनानसं अर्चिता श्रेष्ठा नासिका यस्य तम् ५. ६४. ७ ॥

अर्चन्ति [अर्चन्ति] सत्कुर्वन्ति १. ६२. २ । प्राप्नुवन्ति १. १६५. १ ॥

अर्चय सत्कुरु ३. ४४. २ ॥

अर्चा सत्कुरुत [अत्र वचनव्यत्ययो द्व्यचोऽतस्तिङ इति दीर्घश्च] ३३. २३ ॥

अर्चाऽइव सत्क्रियेव ६. ३४. ४ ॥

अर्चात् सत्कुर्यात् ४. १६. २ ॥

अर्चान् सत्कुर्युः ४. ५५. २ ॥

अर्चाम पूजयेम १. ६२. १ सत्कुर्याम ३४. १६ ॥

अर्चामसि अर्चामः सत्कुर्मः ६. २१६ ॥

अर्चामि सत्करोमि ४. ४. ८ ॥

अर्चिः दीप्तिः १. ६२. ५ । तेजः ४. ७. ६ । विद्याप्रकाशम् ३. ६. ३ ॥

अर्चयः दीप्तिरूपा ज्वाला न्यायप्रकाशका नीतयो वा १. ३६. ३ । प्रकाशाः १. ४८. १३ । किरणाः ५. २९. ८ । सत्क्रियाः ४. ६. १० ॥ अर्चिभिः पूजितैर्गुणकर्मस्वभावैः ५. ७६. ८ ॥

अर्चिषे पूज्याय १७. ११ । स्तुति-

विपर्ययाय २१. २० ॥

अर्चिरिति ज्वलतो नामधेयम् निघ० १. १७ ॥

अर्चिनः सत्कर्तारः २. ३४. १ ॥

अर्चे सत्करोमि ५. ४१. ८ ॥

अर्जुनः प्रशस्तं रूपं विद्यतेऽस्य सः । [अर्श आदित्वादच् ।] १०. २१ ॥ अर्जुनम् रूपम् ३. ४४. ४ । ऋजुगत्यादिगुणम् ६. ६. १ ॥

अर्जुनमिति रूपनाम निघ० ३. ७ ॥ अर्जुनम् शुक्लम् नि० २. २१ । अर्जुनो ह वैनामेन्द्रो यदस्य गुह्यं नाम । श० ५. ४. ३. ७ ॥ सोमस्य ह्रियमा (यस्य) यानि पुष्पाण्यवाशोदन्त तान्यर्जुनानि । तां० ८. ४. १ । इन्द्रो वृत्रमहंस्तस्य यो मस्तः सोमः समधावत्तानि बभ्रूतूलान्यर्जुनानि तां० ९. ५. ७ ॥

अर्जुनि अर्जयन्ति प्रतियतन्ते ययोषसा सा [अत्र अर्जप्रतियत्ने धातोः रक् प्रत्ययो णिलुक् च उ० ३. ५७ । अनेनायं सिद्धः] १. ४६. ३ । उषर्वद्वर्तमाने ५. ८४. २ ॥

अर्जुनो इन्द्रस्य नाम निघ० १. ८ । अर्जुन्यो वै नामैतास्ता एतत्परोक्षमाचक्षते फल्गुन्य इति । श० ६. २. १. ३२ ॥

अर्णः जलार्णवमिवशब्दसमुद्रम् । [उदके नुट् च । उ० ४. १९६ । अनेन सूत्रेणार्तेरसुन् प्रत्ययः । अर्ण इत्युदक नामसुपठितम् निघ० १. १२.] १. ३. १२ । उदकम् १. १६७. ६ ॥

अर्णाः प्रापिकाः ५. ५८. ४ । नदी सम्बन्धिनीः १. १७४. २ ॥ अर्णम् विज्ञानम् १२. ४६ ॥

अर्णा नदी नाम सुपठितम् । निघ० १. १३ ॥

अर्णचित्ररथा अर्णौ प्रापकौ च तौ चित्ररथा आश्चर्यरथौ च तौ ४. ३०. १८ ॥

अर्णोऽवृतम् अर्णांसि वर्तन्ते यस्मिँस्तम् २. १६. २ ॥

अर्णवः समुद्रः १. ५५. २ । समुद्र इवाकाशः ६. ६१. ८ ॥ अर्णवम् समुद्रवद्वर्तमानम् १. ५१. १ । अर्णवान् नदीः समुद्रान्वा ९. ३३. १ । अर्णवे यत्रार्णांसि उदकानि सम्बद्धानि सन्ति तस्मिन्संसारे २३. ६३ । प्राणे १३. ५३ ॥

अर्णवात् अर्णस्वतः नि० १०. ९ । प्राणो वा अर्णवः । श० ७. ५. २. ५१ ॥

अर्णसातौ अर्णानां विजयप्रापकानां योद्धृणां सातिर्यस्मिंस्तस्मिन् १. ६३. ६ । प्राप्तविभागे ४. २४. ४ । उदकस्य प्राप्तौ २. २०. ८ ॥

अर्त्तु नश्यतु ४. १६. ६ । प्राप्य ४. १. १७ । प्राप्नुत ५. २५. ८ ॥

अर्त्तनम् प्रापकम् ३०. १६ ॥

अर्थः सकलपदार्थसञ्चयः १८. १५ ॥ अर्थम् अर्तुं ज्ञातुं प्राप्तुं गुणं द्रव्यं वा । [उषिकुषिगार्तिभ्य स्थन् उ० २. ४ । अनेनार्तेः स्थन् प्रत्ययः] १. १०. ३ ।

द्रव्यम् १. ३८. २ । प्रयोजनम् १. १२४. १ । य ऋच्छति प्राप्नोति तम् १. १०५. २ । धनादि पदार्थम् १. १४४. ३ ॥ अर्थान् सत्यविद्या जो चार वेद हैं उन को (आर्य० १७५)

अर्थः अर्त्तेः, अरणस्थो वा । नि० १. १८ ॥

अर्थ॑ऽइव द्रव्यवत् १. ११३. ६ ॥

अर्थयन्ति अर्थं कुर्वन्ति ५. ४४. ११ ॥

अर्थयस्व अर्थंकुरु २. १३. १३ ॥

अर्थयासे याचस्व १. ८२. १ ॥

अर्थी प्रशस्तोऽर्थोऽस्याऽस्तीति ७. १. २२

अर्थिनः प्रशस्तोऽर्थः प्रयोजनं येषां ते १. १०५. २ ॥

अर्थेतः येऽर्थं यन्ति १०. ३ ॥

अर्दय नाशय २. २३. १४ ॥

अर्दयेत् अर्दयेत् प्रापयेत् १. १८७. १ ॥

अर्दयति नाशयति ३४. ७ ॥

अर्द्ध॑ऽऋचैः ऋचामर्धान्यर्धर्चास्तैर्मन्त्रभागैः १६. २९ । प्रतिष्ठा वा अर्द्धर्चः । गो० उ० ५. १० ॥

अर्धऽगर्भाः अपूर्णगर्भा महत्तत्त्वाहंकारपञ्च-भूतसूक्ष्मावयवाः १. १६४. ३६ ॥

अर्धऽदेवं देवस्यार्धमर्धस्य जगतो देवं वा ४. ४२. ८ । अर्धजगत्प्रकाशकं सूर्यम् ४. ४२. ६ ॥

अर्द्धम् [अर्धम्, अर्धम्] वर्द्धनम् ३३. ६९ ॥ सुसमृद्धिम् ६. ४४. १८ । वर्द्धकम् ७. १८. १६ । भूगोलार्धम् ६. ३०. १ । अर्ध भागम् १. १६४. १७ ॥

अर्धम् हरतेर्विपरीतात्, धारयतेर्वा स्यादुद्धृतं भवति, ऋध्नोतेर्वा स्यात् ऋद्धतमो विभागः । नि० ३. २० ॥

अर्द्धमासाः कृष्णशुक्लपक्षाः २३. ४१ ॥

अर्द्धय वर्धय ११. ८ ॥

अर्द्धयन्तु सिद्धकर्रे २०. १२ ॥

अर्ध्यः वर्धितुं योग्यः १. १५६. १ ॥

अर्ध्यम् अर्धेभवम् ५. ४४. १० ॥

अर्पय समर्पय २. ३३. ४ ॥

अर्पयतु संयोजयतु १. १ ॥

अर्पितः स्थापितः १. ५८. २ ॥ अर्पिताः स्थापनीयाः (भूमिका २०७) १. ११४. ४८ । समर्पिताः १. १४२. ६ ॥ अर्पितम् प्रार्पितम् स्थितम् १७. ३० ॥

अर्बुदम् असंख्यातगुणविशिष्टम् १. ५१. ६ । दशकोट्यः १७. २ ॥

अम्बुदो मेघो भवति ... स (मेघः) यथा महान् बहुर्भवति वर्षंस्तदिवार्बुदम् । नि० ३. १० । अर्बुदः काद्रवेयो राजेत्याह तस्य सर्पाविशः — सर्पविद्या वेदः ——सर्प विद्याया एकं पर्वव्याचक्षाण इवानुद्रवेत् । श० १३. ४. ३. ९ ॥ वाचा अर्बुदम् । तै० १. ८. १६. ३ ॥

अर्भकम् बाल्यावस्थापन्नम् १. ११४. ७ । अल्पं क्षुद्रम् १६. १५ ॥ अर्भकासः

अल्पवयसो वालका इव क्षुद्राशयाः ७. ३३. ६ ॥ अर्भकेभ्यः अल्प गुणेभ्यो विद्यार्थिभ्यः १. २७. १३ । कनिष्ठेभ्यः क्षुद्राशयेभ्यः शिक्षणीयेभ्यो विद्यार्थिभ्यः १६. २६ ॥

अर्भको ह्रस्व नाम निघ० ३. २। ह्रिश उत्तर नाम निघ० ३. २९॥ अर्भके अवृद्धे नि० ४. १५ ॥

अर्भगाय ह्रस्वाय बालकाय [अत्र वर्ण-व्यत्ययेन कस्य गः] १. ११६. १ ॥

अर्भा अल्पामपि शिल्पक्रियां वाचं वा १. ५१. १३ ॥

अर्भाय अल्पाय १. १४६. ५ ॥ अर्भे स्वल्पे युद्धे १. ७. ५ । अल्पवयसि जने ६. ५०. ४ ॥

अर्मके दुःख प्रापके १. १३३. ३ ॥

अर्मेभ्यः प्रापकेभ्यः ३०. ११ ॥

अर्यः अरयः शत्रवः ७. ३४. १८ । ईश्वरः २. १२. ४ । सर्वस्वामी सर्व सभा-ध्यक्षो राजा १. ११८. ६ । वैश्यः [अर्य स्वामीवैश्ययोः अ० ३. १. १०३ । इत्यनेन वैश्यार्थे निपातितः] १९. ३० । यथावज्ज्ञातारः ७. ६०. ११ ॥ अर्य ! प्रशंसित ! ४. १६. १७ ॥

अर्य इति ईश्वर नाम निघ० २. २२ ॥

अर्यजारा अर्य्यौ स्वामिवैश्यौ जारयति वयसा हन्ति सा २३. ३० ॥

अर्य्यपत्नीः स्वामीनां भार्य्या ७. ६. ५ ॥

अर्य्यमा न्यायाधीशः १. २६. ४ । न्याय-कारी १. ३६. ४ । यमराजः [आर्य्य० ६४] । नियन्ता वायुर्न्यायकर्तावा । १. १०७. ३ । विद्वत्प्रियः २. २७. ७ । विद्युत् ७. ६०. ४ । योऽर्यान् वैश्यान् स्वामिनोऽवमन्यते सः ३३. १५ । सूत्रात्मा ३४. ५७ ॥ अर्यमणम् प्रजायाः पालकम् २५. १६ ॥ अर्यम्णः यो ऋच्छति नियच्छत्याकर्षणेन पृथि-व्यादीन् स सूर्यलोकस्तस्य [स्वन्नुक्ष-न्पूषन् उ० १. १५७ अनेनायं निपा-तितः] ३. ३१ ॥ अर्याणां स्वामिनां सत्कर्तुः २५. ४ ॥ अर्यमन् योऽर्यान् श्रेष्ठान् मनुष्यान् मिमीते मन्यते वा तत्सम्बुद्धौ २. २७. ५ ॥

अर्यमन्नादित्योऽरीन्नियच्छति । नि० ११. २३ । यज्ञो वा अर्यमा । तै० २. ३. ५. ४ । अर्यमेति तमाहुर्यो ददाति । तै० १. १. २. ४ ॥ अर्यमा सम्होतृणां होता । तै० २. ३. ५. ६ । अर्यम्णो वा एतन्नक्षत्रं यत्पूर्वे फल्गुनी तै० १. १. २. ४ ॥

अर्यमाऽइव यथार्थन्यायकारीव १. ६१. ३॥

अर्यमा इति न्यायकारी [अत्रार्योपपदान्मनं-धातोरौणादिको बाहुलकादो प्रत्ययः] १. १६७. ८ ॥

अर्वा अश्वः १. १०४. १ । अश्व इव १. १६३. १२ । यः सद्यः अर्छति

गच्छति सः ४. ११. ४ । शीघ्रगन्ता २९. ९ । अश्व इव बुद्धिहीनो विषयासक्तः ६. २८. ४ । अश्व इव शुभगुणग्रहणे वेगवान् ६. ३३. २ । प्राप्तप्रेरणः ७. ४४. ४ ॥ अर्वन्तः प्रशस्तविज्ञानवन्तः १५. ४२ । वेगवन्तः ५. ६. २ । जानन्तः ९. १७ ॥ अर्वन् ! सर्वत्र प्राप्त ! १. १६३. ३ । अश्वेव शीघ्रं गमयन् ! ६. १२. ६ ॥ अर्वन्तं गमयन्तम् १. १६२. ८ । अश्ववत्प्राप्नुवन्तं वन्हिम् २९. २० । गच्छन्तम् २९. ३६ । प्राप्नुवन्तम् ५. ५४. १४ ॥ अर्वतः प्राप्तराज्यान्जनानश्वान् वा १. ११८. २ । शीघ्रं स्थानान्तरं प्राप्नुतः १. १६२. ८ ॥ अर्वता अश्वादियुक्तेन सैन्येन २. २. १० । विज्ञानेन सह १. १६२. ३ । अर्वते प्राप्ताय ६. ३६. २ । अर्वत्सु अश्वेषु प्राप्तवेगगुणेषु विद्युदादिषु वा ४. ३१।

अर्वेति ईरणवत्त्वम् नि० १०. ३१ । अश्वनाम निघ० १. १४ । अर्वा यच्छ्वयदराासीत् । तस्मादर्वा नाम तै० ३. ९. २१. ३ । (हे अश्व त्वं) अर्वासि । तां० १. ७. १ । अग्निर्वा अर्वा । तै० १. ३. ६. ४ । पुमान् वृषा सोऽर्वन्तः । श० ३. ३. ४. ७ ॥

अर्वतीः प्रशस्त बुद्धिमत्यः कन्याः १. १४५. ३ ॥

अर्वाक् अधस्तात् ३. ४. ८ । भूमेरधोभागम् १. ११८. २ । अवरः ९. ४३ । पश्चात् ३. ३२. १३ । पुनः ४. ३२. १५ । प्राप्त्यनन्तरमाभिमुख्येनानन्दकारकम् १. ६. ५ । योऽर्वागश्वोऽञ्चतः ५. ४३. ५ । सत्यधर्ममनु ५. ४३. ८ ॥

अर्वाके अन्तिकनामसुपठितम् निघ० २. १६ ॥

अर्वाग्वसुः अर्वाग्वृष्टेः पश्चाद्वसु धनं यस्मात् स हेमहन्तर्तुः १५. १६ ॥

अथ यदर्वाग्वसुरित्याहातो (पर्जन्यात्) ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः प्रदीयते श० ८. ६. १. २० । अर्वाग्वसुर्ह वै देवानां ब्रह्मा पराग्वसुरसुराणाम् । गो० उ० १. १ ॥

अर्वाङ् योऽर्वाचीनानुत्कृष्टानुत्कृष्टान् कर्तुमञ्चति जानाति सः १५. ४६ । योऽर्वाचीनानञ्चति प्राप्नोति सः ३४. २६ । आभिमुख्यं प्राप्तः २६. २३ । अर्वाचीनमञ्चन् १. १७७. ५ । अर्वतः स्वकीयानध ऊर्ध्वतिर्यग्गमनाख्यवेगानञ्चतिप्राप्नोतीति (अत्र ऋत्विग्दधृक्० ३. २. ५९ । इति क्विन् । क्विन्प्रत्ययस्यकुरिति कवर्गादेशः] १. ३५. १० । अर्वाचीनं देशं गच्छन् ३. ४१. ८ । अधस्ताद्वर्तमानः ३. ३५. ६। अर्वाचीनः २. ४३. १ । अर्वाचीने व्यवहारे । १. १०४. ९ । इतरस्मिन्नव्यवहारे वर्तमानः ४. १०. ३ । पश्चात् ९. ४०. ४ ॥ अर्वाञ्चम् अर्वागुपरिष्टादधस्त्यं स्थानमभीष्टं वाञ्छति येन तम् ३. ४१. ६ । अर्वा-

ग्गामिनम् २. ३. ५ । १. ३४. १२ । योऽर्वतो वेगादिगुणानश्वानञ्चति प्राप्नोति तम् १. ४५. १० ॥

अर्वाक्पथः अर्वाच पलात्पथः नि० १२. ४३ ॥

अर्वाची इदानीन्तनी १. १०७. १ । अस्मदभिमुखी ३३. ६८ । याऽर्वणोऽश्वानञ्चति सा २. ३४. १५ । याऽर्वागधोऽञ्चति ४. ५७. ६ । नवीना ७. १८. ३ । सुशिक्षाविद्याभ्यासात् पश्चाद्विज्ञानमञ्चति प्राप्नोत्यनया सा ८.४।

अर्वाचीनः विद्यादिबलेनाभिगन्ता २०. ४६ । इदानीन्तनः ४. ३. २ ॥ अर्वाचीनं अवस्ताद् भूमिजलयोरुपगन्तारम् १. ८४. ३ । अधोगामिनम् ८.३१। इदानीम् सुशिक्षितम् ३. ३७. २ । नूतनम् ७. ४१. ६ ॥

अर्वान् अग्न्याद्यश्वान् १. १६३. १३ । ज्ञानीजनः [अत्र न लोपाभावश्छान्दसः] २६. २४ ॥

अर्वाऽवतम् प्राप्तसामीप्यम् ३ ४०. ६ ॥

अर्वावतः अर्वाचीनात् ३. ३७. ११ ॥

अर्वाऽवति निकट देशे ५. ७३. १ ॥

अर्शसः मूलेन्द्रियव्याधेः १२. ६७ ॥

अर्शसानं-प्राप्तं सत् १. १३०. ८ ॥

अर्षत् गच्छत् ४०. ४ ॥

अर्षतु प्राप्नुत ४. ५८. १० ॥

अर्षेति प्राप्नुयात् गच्छति वा [ऋषधातोर्लेट् प्रयोगोऽयम्] १. १३५. २ । प्राप्नोति २३. ५५ ॥

अर्षन्ति प्रापयन्तु [लेट् प्रयोगोऽयम्] १. १०५. १२ । २. २५. ४ । वर्षन्ति १. १३५. ५ । गच्छन्ति निस्सरन्ति १७. ६३. । प्राप्नुवन्ति १७. ६४ ॥

अर्षन्तु प्राप्नुवन्तु ३. ३०. ६ ॥

अर्षात् प्राप्नुयात् ३. ३३. ११ ॥

अर्हणा सत्कृतानि १. १२७. ६ ॥

अर्हति योग्यो भवति २. १४. २ ॥

अर्हथः योग्य हैं ४. ४७. २ ॥

अर्हन् सत्कुर्वन् २. ३. १ । योग्य होते हुए २. ३३. १० । अर्हन्ता पूज्यौ ५. ८६. ५ ॥

अर्हपतये अर्हां पालकाय १८. २८ ॥

अर्हरिस्वनिः योऽर्हान् हिंसकांश्च सम्भजति सः १. ५६. ४ ॥

अर्हसि योग्य है १. १३४. १ ।

अर्हामसि योग्या भवामः ४. ५५. ७ ॥

अलजः पक्षिविशेषः २४. ३४ ॥

अल्गाभ्याम् मलक्गन्तृभ्याम् । [अत्र छान्दसो वर्णलोप इतिलोपः] २५. ६ ॥

अललाऽभवन्तीः अलला अलला इव शब्दयन्तीः ४. १८. ६ ॥

अलातृणः अलमातर्दनो मेघः । नि० ६. २ ॥

अल्पाञ्जिः अल्पगतिः २४. ४ ॥

अवं [अव] अर्वागर्थे १. ३३. ७ । क्रियार्थे १. २४. १४ । निरोधे १. ५४. ४ । निवारणे ४. १. ४ । निषेधे ५. २. ६ ॥ नीचार्थे १. ३२. २ । पृथक्करणे १. २४. १३ । विनिग्रहार्थे १. ११. ७ । जानीहि १. २८. ३ । प्राप्नुहि १. २८. २ । रक्ष १. २८. १ । प्रवेशय ३. ३९. ३ । प्रापय १. १०२ ३ ।

अवेति विनिग्रहार्थीयः । नि० १. ३ ।

अवऽअख्यत् प्रख्यापयेत् १. ११३. ४ ॥

अवऽआतिरः अवतरेत् १. ११३. ४ ॥

अवऽआतिरत् अधः प्रापयति १. १०१. ५ ॥

अवऽअधुः अधोधरन्तु १. १९८. ९ ॥

अवऽअभिनत् विदृणासि २. ११. १८ ॥

अवऽअसृजः अवसृजति ६. ४३. ३ ॥

अवऽअसृजत् अवसर्जति २. १२. १२ ॥

अवऽअस्यं विरुद्धतया प्रक्षिप्य १. १४०. १० ॥

अवऽअहन् वहन्ति ५. ४०. ६ ॥

अवंशात् असंतानात् ७. ५८. १ ॥ अवंशे अविद्यमाने वंश इव वर्तमानेऽन्तरिक्षे २. १५. २ । अविद्यमानो वंशो ययोस्ते अन्तरिक्षस्थे ४. ५६. ३ ॥

अवः [अवः] अवन्ति येन तद्रक्षणादिकम् ३६. ७ । अधोमुखम् १. १३३. ६ । दूरीकरोत्युद्घाटयति [अत्र पुरुषव्यत्ययः लडर्थे लङ् बहुलं छन्दसीत्याडभावश्च] १. ११. ५ । रक्षेः १. १२१. १२ । रक्ष ११. ६२ ॥

अव ऋत्यै विरुद्धप्राप्तये ३०. १२ ॥

अवंकाम् रक्षिकाम् २५. १ ॥ अवकया यया अवन्ति रक्षन्ति तया क्रियया १७. ४ ॥

आपो वा अवकाः । श० ७. ५. १. ११ । अथ (आपः) यदब्रूवन्नवाङ् नः कमगादिति ता अवाक्का अभवन्नवाक्का ह वै ता अवका इत्याचक्षते परोक्षम् । श० ९. १. २. २२ । तस्मादवका अपामनुजीवनीयतमा यातयाम्न्यो हि ताः । श० ९. १. २. २४ ॥

अवऽकर्षयन्ति कृषिं कर्तुं शक्नुवन्ति ६. २४. ७ ॥

अवक्रन्देन विकलतारहितेन २५. १ ॥ अवक्रन्दाय नीचैः कृताह्वानाय २२. ७ ॥

अवक्रामन् उल्लंघयन् ११. १५. ॥ अवऽक्रामन्तः इतस्ततो गच्छन्तः ६. ७५. ७ । अर्पयन्तः २६. ४४ ॥

अव ऽखादः विखादो भयम् १. ४१. ४ ॥

अव ऽगत्य प्राप्य ६. ७९. ५ ॥

अव ऽघ्नती अत्यन्तंदुःखयन्ती १. १६१. २ ॥

अवऽचक्षे [अव चक्षे] प्रख्यातुम् ४. ५८. ५ । अवख्यातव्याः १७. ६२ ॥

अव॒ट्ट अपरिभाषितानिन्दित । ११. ६१ ॥
अवटेषु अपरिभाषितेषु मार्गेषु १३.७ ॥
अव॒ट्याय अवटेषु गर्तेषु भवाय १६. ३६ ॥
अव॒त कामयध्वम् २. ३१. २ । रक्षत ७. ३८. ८ ॥
अव॒तः रक्षतः २१. ५२ ॥
अव॑ततधन्वा अवेति निगृहीतं ततं विस्तृतं धनुर्येन सः ३. ६१ ॥
अ॒व॒तत्य॑ विस्तार्य १६. १३ ॥
अव॒तम् [अव॑तम्] गच्छतम् २. ३१. १। प्रविशतम् १. ३४. ५ । प्रवेशयतम् १. ११७. २३ । प्राप्नुतम् १. १८१. रक्षतम् १. ११. ८ ॥
अव॒ऽत्तरम् अवाङ् मुखम् १. ११६. ६ ॥
अव॒ताः कूपाः ४. ५०. ३ ॥ अवतासः सर्वतो रक्षिताः १. ५५. ८ ॥ अवतम् रक्षणादियुक्तम् १. ८५. १० । निम्न-देशस्थम् १. ८९. ११ । अधोगामिनम् २. २४. ४ । रक्षणीयं वेद्यादि-गर्तम् १३. १९ ॥ अवतात् हिंसका-द्रक्षकाद्वा १. ११६. २२ ॥

अवत इति कूपनामसु पठितम् निघ० ३. २३ ॥
अवतः अवातितो महान् भवति नि० ५. २६ ॥

अव॑तात् रक्षति [अत्रलडर्थे लोट्] ५. ६ ॥
अ॒व॒ताम् [अव॑ताम्] रक्षतः २. १६ । रक्षेताम् २७. १७ ॥
अव॑ति रक्षति १. [illegible] ॥

अवति गतिकर्मा निघ० २. १४ ॥

अ॒व॒तु [अव॑तु] प्राप्नोतु १०. १० ॥
अव॑तोकाम् निरपत्याम् ३०. १५ ॥
अव॑त्तानाम् नम्रीभूतानाम् उत्कृष्टानामंगानाम् २१. ४३ । उदारचेतसाम् २१. ४५ । गृहीतानाम् २१. ४४ ॥
अ॒व॒ऽत्स॒रस्य॑ योऽवतो रक्षकान् सरति प्राप्नोति तस्य ५. ४४. १० ॥
अव॑थ [अ॒व॒थ] रक्षथ ४. ३६. ५ ॥
अव॑थः रक्षथः १. ११२. २ । अवतम् १. ११२. २० ॥ वर्धयेतम् १. ११२. १२ ॥
अ॒व॒दः वदेः ३. ३० ५ ॥
अव॑दन् [अ॒व॒दन्] उपदिशन्तु १२. ६१. कहते हुए १. १७६. २ ॥
अव॒दन्त परस्परं संवादं कुर्युः १२. ६६ ॥
अव॒द्य॒ऽगोहना अवद्यानि गर्ह्याणि निन्दितानि दुःखानि गूहत आच्छादयतो दूरीकुरुतस्तौ । [अवद्यपण्य० अ० ३. १. १०१ । इत्ययं निन्द्यार्थे निपातः । ण्यन्ताद् गुहूसम्वरणे इत्यस्माद्धातोः । ण्यासश्रन्थो युच् अ० ३. ३१. ७ । इति युच् । ऊदुपधाया गोहः । अ० ६. ४. ८९ । इत्यूदादेशे प्राप्ते । वाच्छन्दसि सर्वे विधयो भवन्तीत्यस्य निषेधः । सुपां सुलुगित्याकारादेशश्च] १. ३४. २ ॥

अ॒व॒द्यम् निन्द्यम् ६. १७ ॥ अवद्यात् निन्द्या-
दधर्माचरणात् २. ३१. ८ ॥
अ॒व॒द्यऽइ॑व निन्दनीयमिव ४. १८. ५ ॥
अ॒व॒धम् अमरणम् १. १८९. २ ॥
अ॒व॒ऽधाव॑ति [अ॒व॒धाव॑ति] निपतति १.
११२. ११ । गच्छति २५. ३४ ॥
अव॑धिष्म हन्याम ६ ३८ ॥
अव॑धीः [अ॒व॒धीः] हिन्धि [अत्र लोडर्थे
लुङ्] १. ३३. १२ । हन्सि १. ८०.
७ । हन्याः ४. ३०. १५ । हन्यात्
२७. ४ ॥
अव॑धीत् [अ॒व॒धीत्] हन्ति १. ५२. २ ।
नाश करे ९. ३४. ४ ॥
अव॑धूतम् दूरीकृतं विचालितम् १. १४ ।
विनाशितम् १. १६ ॥
अ॒व॒ऽधूनु॒षे अतिकम्पयति १. ७८. ४ ॥
अ॒वि॒ऽधून्वा॒नः अर्वाकम्पयन् ६. ४७. १७ ।
अ॒व॒ध्यम् हन्तुमनर्हम् ८. ४६ ॥
अ॒व॒न् [अव॑न्] रक्षन् ७. ४६. २ ॥
अव॑ऽनद्धं अधोबद्धम् १. ११६. २४ ॥
अ॒व॒ना अवनादीनि रक्षणादीनि ५. ५४. २॥
अ॒व॒निः [अ॒व॒निः] रक्षकः प्रापको दाता
१. ४. १० । पृथिवी १. १८१.
३ । अवनयः तटस्थ भूमयः १. १६०.
७ । अवन्ति यास्ता नद्यः ५. ८९. ६ ॥
अवनिम् रक्षिकाम् ४. १६. ६ ॥
[illegible]

निघ० १. १३ । अङ्गुली नाम निघ० २. ५ ॥
अवनयो ऽङ्गुलयो भवन्ति अवन्ति कर्माणि
नि० ३. ८ ॥
अव॑ऽनीतम् अर्वाक् प्रापितम् १. ११६. ८ ॥
अवऽनीताय अविद्यानामपगमनाय १.
११८. ७ ॥
अव॑नोः [अ॒व॒नोः] रक्ष ५. २६. ६ ॥
सम्भज ६. १८. ३ ॥
अव॑न्ति [अ॒व॒न्ति] रक्षन्ति ४. ५०. ६ ॥
अवन्ती इति रक्षित्र्यौ १. १८५. ४ ॥
अवन्तीः रक्षन्त्यः १. १५२. ६ ॥
अ॒व॒न्तु [अव॑न्तु] अवगमयन्तु प्रापयन्ति वा
[पक्षे लडर्थे लोट्] १. २२. १६ ।
रक्षन्तु ३. ८. ८ । वर्धयन्तु ७. ३६. ७ ।
कामयन्ताम् १७. ५४ । प्रवेशयन्तु
४. ११ ॥
अवन्तु आगच्छन्तु नि० ११. १६ ॥
अ॒व॒न्व॒न् अवन्ति रक्षणादिकं कुर्वन्ति [अत्रा-
वधातोर्विकरण व्यत्ययेन श्नुः] १.
५१. २ ॥
अव॑यत् वपति २. १४. ७ ॥
अ॒व॒पत॑न्तीः अध आगच्छन्तीः १२. ६१ ॥
अ॒व॒ऽपदः [अ॒व॒पदः] आपत्कालात् २.
२६. ६ । यत्रावपद्यन्ते पतन्ति ततः
३३. ५१ ॥
अ॒व॒ऽपश्य॑न् यथार्थं विजानन् ७. ४६. ३ ॥
[illegible]

अवभृथः यज्ञान्तस्नानादिकम् १८. २१ । शोधनम् १६. २८ ॥ अवभृथ ! यो निषेकेण गर्भं बिभर्ति तत्सम्बुद्धौ ८. २७ । विद्याव्रतस्नात ! २०. १८ । विद्याधर्मानुष्ठानेन शुद्ध ! [अत्र अवेभृञः उ० २. ३ । इति क्थन् प्रत्ययः] ३. ४८ ॥

अवभृथोऽपि निष्कुम्पुण उच्यते । नि० ५. १८ ॥ अवभृथः तद्यदपोऽभ्यवहरन्ति तस्मादवभृथः । श० ४. ४. ५. १ । यो ह वायमपामावर्तः स हावभृथः सहैव वरुणस्य पुत्रो वा भ्राता वा । श० १२. ९. २. ४ । वरुणयो वा अवभृथः । श० ४. ४. ५. १० । समुद्रोऽवभृथः । तै० २. १. ५. २ ॥

अवभेदिनं शत्रूनवभेत्तुं विदारयितुं शीलाय १६. ३४ ॥

अवमः रक्षकः ४. १. ९ ॥ अवमम् रक्षादिसाधकमुत्तममर्वाचीनं वा १. १०५. ४ । निकृष्टं रक्षकं वा ७. ३२. १६ । निकृष्टं तृणमृत्तिकाक्षुद्रकृमिकीटादिकम् (भूमिका १३८) अथर्व० १०. ७. ८ ॥ अवमा कनिष्ठानि १७. २१ ॥ अवमे रक्षितव्ये व्यवहारे १. १८९. ११ ॥

अवम इति अन्तिक नामसु पठितम् । निघ० २. १६ ॥

अवऽमार्जनानि शोधनानि १. १६३. ५ ।

अवऽब्रवीत् उपदिशेत् ४. ५८. २ ॥

अवयजनम् पृथक्करणम्, दूरीकरणम्, परिहरणम् वा ८. १३ । दूरीकरणसाधनम् २०. १७ ॥

अवयत् वेति प्राप्नोति २१. ४४ । व्याप्नुयात् २१. ४५ ॥

अवऽयाः [अव याऽः] योऽवयजति विरुद्धं कर्म न संगच्छते सः १. १७३. १२ । अवयजते विनिगृह्णाति ३. ४१ ॥

अवयातऽहेळाः अवयातं दूरीभूतं हेळो यस्मात्सः १. १७१. ६ ॥

अवऽयाता विरुद्धं गन्ता १. १२९. ११ ॥ अवऽयाताम् धर्म विरोधिनाम् १. ९४. १२ ॥

अवऽयानम् अपगमनं निरसनम् वा १. १८५. ८ ॥

अवयुनम् अज्ञानमन्धकाररूपम् ६. २१. ३ ॥

अवयुनम् अप्रज्ञानम् नि० ५. १५ ॥

अवऽयै धर्मसे विपरीत चलनेवाले को (आर्य० ९२) ८. ४७. १२ ॥

अवरः अर्वाचीनः १. १६३. ६ । अवकृष्टगुणः (भूमिका २७४) १६. ४६ ॥ अवरासः अर्वाचीना जिज्ञासवः ६. २१. ६ ॥ अवरस् कार्यम् १. १६८. ६ ॥ अवरान् अर्वाचीनानाकाशादीन् १७. १७ । अवरेण द्वितीयेन १. १६४. १७ । मार्गेण १. १६४. १८ ॥ अवरेभ्यः

उत्कृष्टेभ्यः ५. ४२ । मध्यस्थेभ्यो निकृष्टेभ्यो वा १३. ४४ ॥

अवरे परे नि० ११. १६ । अवरेभ्योऽसाक्षात्-कृतधर्मेभ्यः नि० १. १९ ॥

अवरस्परायं योऽवरेषां परस्तस्मै ३०.१६॥

अवरोकिणः अवरोधकाः २४. ६ ॥

अवऽरोहन् अवरोहं कुर्वन् ५. ७८. ४ ॥

अवर्त् आवर्तते ७. ५६. ४ ॥

अवर्त्तत वर्तमान आसीत् २९. १० । वर्तते ३१. १७ ॥

अवर्तन्त वर्तन्ते ५. ३१. ५ ॥

अवर्तयः [अवर्तयः] वर्तयेः ५. ३०. ७ । प्रवर्तय १. १२१. १३ ॥

अवर्तयत् [अवर्तयत्] वर्तयति १. ८५. ६ । वर्तमानं कारयति (भूमिका १४४) ६. ८. ३ ॥

अवर्तिम् अवाच्यम् १. ११८. ३ । अमार्गम् ९. ७६. २ ॥

अवर्त्या अवर्तनीयानि ४. १८. १३ ॥

अवर्त्रः अनिवारणीयः १. १२. ३ ॥

अवर्द्धताम् वर्धयतः २८. १५. । वर्द्धेत २८. ६ । वर्धयताम् २८. ३७ ।

अवर्द्धन् [अवर्द्धन्, अवर्धन्] वर्धेरन् १२. २० । वर्धयेयुः ३. ३२. ३ । वर्धन्ताम् ५. २६. ११ । वर्धयन्ति ५. ३१. १० ॥

अवर्द्धयत् वर्धयति २८. २०. २१ । वर्धयन्ति २८. ३६ । वर्धयेत् २८. १२ ॥

अवर्द्धयन् [अव र्द्धयन्] वर्धयन्ति २१. ५१ । वर्धयन्तु २८. १३ । वर्धयेयुः २८. ४१ ॥

अवर्धत वर्धते १. ३३. ११ ॥

अवर्धन्त वर्धन्ते १. ७५. ७ ॥

अवर्धयः वर्धयति २- ११. १५ ॥

अवर्धयन् [अवर्धयन्] वर्धयन्तु ३.१.४ ॥

अवर्षीः वर्षयति ९. ८३. १० ॥

अवर्ष्याय अविद्यमानासु वर्षासु भवाय १६. ३८ ॥

अवलिप्ताः अवलिप्तान्युपचितान्यंगानि येषां ते २४. ३ ॥

अववर्षते मिलावटसे तले ऊपर हुये बादलों में जो नीचे वाला है उसके लिये २२.२१।

अवऽविद्धम् अवताडितम् १. १८२. ६ ॥

अवव्रत्रन् [अवव्रत्रन्] वर्तन्ते [अत्र वृतु-वर्तने इत्यस्माद्वर्तमाने लङ् व्यत्ययेन परस्मैपदम् प्रथमपुरुषस्य बहुवचने बहुलं छन्दसीति रुडागमश्च] १. १६४. ४७ आवृणवन्ति ३. ३२. १५ । अर्वाचीनो वृत्र इवाचरन् । अत्राचारे सुबन्तात्क्विप् १०. १६ ॥

अवव्रतन्त विरोधेन धनं प्राप्नुवन्तु ४. २४. ४ ॥

अवऽव्ययन् दूरीकुर्वन् ४. १३. ४ ॥

अवशत् कामयते २. २२. १ ॥

अवसम् रक्षणम् सामर्थ्यं वा ३. ६१ ॥
अवसा रक्षाविद्याप्रवेशादिकर्मणा सह १. २२. ११ । विज्ञानेन तदुपकारकरणेन वा १. १७. ६ ॥

अवसा······पथ्यदनम् , अवतेर्गत्यर्थस्यासो नाम करणः······स्यन्तिरुपसृष्टो विमोचने । १. १५ ॥

अवसत वसेत् १. १४४. २ ॥

अवसर्जनाय त्यागाय १२. ६४ ॥

अवसर्पति विरुद्धं गच्छति १६. ७ ॥

अवसानाः अन्ते समीपेस्थिताः ३. १. ६ ॥
अवसानम् अवकाशमविकारं वा १२. ४५ ॥

प्रतिष्ठा वा अवसानम् । कौ० ११. ५ ॥

अवसान्याय अवसानव्यवहारे साधवे १६. ३३ ॥

अवसि रक्षसि १२. १०७॥

अवऽसितासः कृत निश्चयाः ४. २९. ८ ॥

अवऽसृजन् विविधया विद्यया अलंकुर्वन् १. १४२. ११ । अवसर्गं कुर्वन् २. ३. १० ॥

अवसृष्टः आज्ञप्तः पुरुषः २०. ४५ ॥ अवसृष्टाः निपतिताः ६. ७५. १६ । प्रेरिताः ७. ४६. ३ । अवसृष्टासः सुशिक्षिताः २०. ७८ ॥

अवऽसै निश्चयाय [अत्र षोन्ताौः क्विप् वाच्छन्दसीत्याकारलोपाभावः] ३. ५३. २० ॥

अवस्तात् अधस्तात् ३. २२. ३ । पीछे के समय में ८. ६ ॥

अवस्थाः [अवऽस्थाः] वस्ते ३. ३२. ११ । अवतिष्ठन्ति ५. १९. १ ॥

अवस्फूर्ज्जन् अर्वाचीनं घोषं कुर्वन् १५. १९ ॥

अवस्परत् पालयति ६. ४२. ४ ॥

अवऽस्पर्तः ! अवसा रक्षणेन दुःखात्पारकर्तः ! २ २३. ८ ॥

अवस्यते आत्मनोऽवो रक्षणादिकमिच्छते १. ११६. २३ ॥

अवस्युः आत्मनो रक्षणं विज्ञानं चेच्छुः १. २५. १९ ॥

अयं वा ऽ अवस्युरग्निमिदो गो ऽ यं (वातः) पवते । श० १४. २. २. ५ ॥

अवस्यूः यो अवसीव्यति तारादितन्तून् सन्तानयति येन वा सः ५. ३२ ॥

अवस्रन् वसन्ति ४. २. १९ ॥

अवऽस्रसः अवस्रारयति २. १७. ५ ॥

अवस्वन्याय अर्वाचीनेषु स्वनेषु भवाय १६. ३१ ॥

अवहः [अवहः] वहति प्राप्नोति २. १३. ८ । प्राप्नुहि ५. ३१. ८ ॥

अवहत् प्राप्नोति ३. ५३. ९ ॥

अवहन् प्राप्नुयुः १. ५१. १० । प्राप्नुवन्ति ४. ३३. २ ॥

अवऽहन्ता विरुद्धस्य हननकर्ता ४. २५. ६ ॥

अर्वऽहितः अवस्थितः १. १०९. १७ ॥

अवांसि [अवांᳫंसि] रक्षणानि ४. ५५. ५ । रक्षणादीनि २७. १४ ॥

अवाः रक्षे [अयं लेट् प्रयोगः] १२ ७. ७ ॥

अवाचः दुष्ट वचनस्य ४. २५. ६ ॥

अवाचि उच्यते १. ५१. १५ ॥

अवाजिनम् अविद्यमाना वाजिनो यत्र संग्रामे तम् ३. ५३. ३३ ॥

अवाट् वहसि १६. ११ ॥

अवातः वायुवर्जितः ६. १६ २० । अहिन्सितः ६. १८ ॥ अवाताः पतीनप्राप्ताः ६. ६७. ७ ॥ अविद्यमानो वायुः कम्पनं यासां ताः १. ५२. ४ ॥

अवात्सीः निवासम् कृतवान् (भूमिका २८६) अथर्व० । १५. ११. २ ॥

अवाथ रक्षेत् ७. ४०. ३ ॥

अवाथः रक्षेताम् ७. ६१. २ ॥

अवान्तरदि_शाभ्यः उपदिशाभ्यः २४. २६ ॥

सर्वत इव हीमा अवान्तरदिशः । श० २. ६. १. ११ ॥

अवारतः निरन्तरम् १०. ६५. १ । (भूमिका १४१) ॥

अवारयेथाम् निवारयेतम् १. ११६. ८ ॥

अवारि व्रियेत ४. ६. ७ ॥

अवाराय अर्वाचीनमागमनाय ३०. १६ ॥

अवार अवरम् नि० २. २३ ।

अवार्याः अवारेभवाः २५. १ ॥

अवावशीताम् भृशं कामयेथाम् [वश-कान्तावित्यस्य यङ्लुगन्तलङि रूपम्] १. १८१. ४ ॥

अवाशयः प्रकाशितवान् १. ३१. ४ ॥

अवासयः [अवासयः] वासयेः ६. १७. ५ । वासय ३. १. १७ ॥

अवासयत् [अवासयत्] आच्छादयति १. ११०. २ । वासयति ६. ३१. २ । वासयेत् ३. ७. ३ ॥

अविऽउष्टाः अविषु रक्षणादिषूष्टाः कारित-निवासाः २. २८. ६ ॥

अविः योऽवति रक्षति सः १६. ६० । रक्षणादिकर्त्री पृथिवी २३. १२ । भेड़ २१. ३० । रक्षिका प्रकृतिः २३. ५४ ॥

इयं (पृथिवी) वा अविरियं ᳫंह हीमाः सर्वाः प्रजाः अवति । श० ६. १. २. ३३ ॥ नासिकाभ्यामेवास्य वीर्यमस्रवत् । सोऽविपशुरभवन्मेषः । श० ११. ७. १. ३ ॥

अविका रक्षिका १. १२६. ७ ॥

अविऽक्रीतः न विक्रीतः ४. २४. ६ ॥

अविक्षत प्रविशन्ति १. १६१. ४ ॥

अविऽक्षितासः अविक्षीणाः क्षयरहिताः ७. १. २४ ॥

अविचाचलिः सर्वथा निश्चलः १२. ११ ॥

अविचृत्यम् अमोचनीयम् १२. ६ ९ ॥

अविजातम् अप्रसूतां ब्रह्मचारिणीम् ३०. १५ ॥

अविंऽजानन् न विजानन् १. १६४. ५ ॥
अविंज्ञाताः न विशेषेण ज्ञाताः विदिताः २४. ६ ॥
अ॒वि॒ड्ढि [अ॒वि॒ड्ढि] रक्ष २. १७. ८ ॥ प्रवेशय ४. ३१. १२ । प्रविश २. ३०. ८ । प्राप्नुहि २. २४. १ । व्याप्नुहि [अत्र विश्लृधातोः शपो लुकि लोटि मध्यमैकवचनं हेर्धिः ष्टुत्वम् जश्त्वं च छन्दस्यपि दृश्यत इत्यडागमः] १. ११०. ६ ॥
अ॒वि॒त प्रविशत, रक्षत ७. ५६. ६ ॥
अविंतुः ! रक्षक ! १. १२६. १० ॥
अविंतवे अवितुम् ७. ३३. १ ॥
अ॒वि॒ता रक्षको ज्ञापकः सर्वासु विद्यासु प्रवेशकः १. ३६. २ ॥ अवितारम् ज्ञानादिप्रदम् ६. ४७. ११ । वर्धयितारम् ७. ३६. ८ । प्रीणयितारम् २०. ५० ॥
अ॒वि॒त्री रक्षिका ६. ६१. ४ ॥
अ॒वि॒त्री इति रक्षादिनिमित्ते २. ३२. १ ॥
अ॒वि॒त्सि॒ जानीयाम् १२. ८१ । वेद्मि (भूमिका २७१) १६. ४१ ॥
अविंथुराः कम्पभयरहिताः [अत्र बाहुलकादौणादिकः कुरच् प्रत्ययः] १. ८७. १ ॥
अ॒वि॒दुः वेत्ति ५. ८३. १० ॥

अविंदत् [अ॒वि॒द॒त्] विन्दति प्राप्नोति ९३. १ प्राप्नुयात् ३. ५७. १ ॥
अ॒वि॒द॒न् [अविंदन्] लभन्ते १. ७२. ६ । विजानन्ति ३३. ६० ॥
अविंदम् लभेय ५. ४२ ॥
अ॒वि॒ऽद॒स्य॒म् अक्षीणम् ७. ३६. १ ॥
अ॒वि॒दा॒म विन्देमहि ८. ९२ ॥

अविदाम विजानीमः नि० ६. २८ ॥

अविंऽदीधयुम् द्यूतादिदुष्टकर्मरहितम् ४. ३१. ७ ।
अविंद्याम् अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति ज्ञानादिगुणरहितं वस्तु कार्यकारणात्मकं जडं परमेश्वराद् भिन्नम् । ४०. १२ ॥ अविद्यया शरीरादिजडेन पदार्थसमूहेन कृतेन पुरुषार्थेन ४०. १४ ॥
अ॒वि॒द्रि॒याभिः अच्छिद्राभिः ३४. २८ । या विदीर्यन्ते ता विद्रास्ता अर्हन्ति ता विद्रियाः । अविद्यमाना विद्रिया यासु क्रियासु ताभिः [अत्रार्थे कविधानम् ततोघस्ताद्धितः] १. ४६. १५ ॥
अविंद्वान् विद्याहीनो भृत्योऽन्यो वा १. १२०. २ ॥ अजानन् सन् ८. १३ ॥
अविंधत् परिचरेत् १. १३६. ९ । विदधाति २. १. ७ ॥

अविध्यत् [अविध्यत्] युक्तो भवति ५. ४०. ९ ॥ विध्यति [अत्र लडर्थे लङ्] १. ३३. १२ ॥

अविन्दः [अविंदः] लभते [अत्र पुरुषव्यत्ययः लडर्थे लोट् च [१. ६. ५ । विन्दसि प्राप्नोषि ६. ७. ५ ॥ प्राप्नुहि ६. ६१. ३ ॥

अविन्दत् [अविंन्दत्] जानाति [अत्र लडर्थे लङ्] १. २३. १४ । प्राप्नोति १. १३०. ३ । विन्देत् प्राप्नुयात ३. ३४. ४ ॥

अविन्दतम् लम्भयतम् १. ९३. ४ ॥

अविन्दन् [अविंन्दन्] लभेरन् ९. ४०. ६ । लभन्ते ३. ३१. ९ । प्राप्नुयुः १५. २८ ॥

अशिश्रेत् आश्रयेत् ३. ३८. ८ ॥

अशिश्वीः अबालाः ३. ५५. १६ । ''बाल्यावस्था से रहित'' [सत्यार्थ ८५] वत्सरहिताः १. १२०. ८ ॥

अशीतम् अश्नुते व्याप्नोति चराचरं यज्ञं सोऽतिशयितस्तत्संम्बुद्धौ स वा । अन्येषामपि दृश्यते इति दीर्घः] २. २०. ॥

अशीतिः उपलक्षणमेतदसंख्यस्य २३. ५८ । अन्नमशीतिः श० ८. ५. ७. १७ । अन्नमशीतयः श० ९. १. १. २१ ॥

अशीमहि [अशीमहि] प्राप्नुयाम ५. ४७. ७ ॥

अशीय व्याप्नुयाम्, प्राप्नुयाम् ५. ७ ॥

अशीर्षा शिर आद्यवयवरहितः ४. १. ११ ॥

अशुचत् शोषयति ७. ६. ४ ॥

अशुद्धाः न शुद्धा अशुद्धा गुणाः १. १३ ॥

अशुर्षम् असुरम् दुःखम् ४. १६. १२ । अशुष्कमार्द्रम् २. १६. ६ । शोकरहितम् हर्षितम् १. १०१. २ ॥

अशूद्राः न शूद्रा अशूद्राः; अविद्यमानः शूद्रो येषान्ते वा ३०. २२ ॥

अश्रवम् श्रणोमि १६. ४७ ॥

अश्रृणोः शृणुयाः ७. २६. ४ ॥

अशे म व्याप्नुयाम [वाच्छन्दसि सर्वे विधयो भवन्तीति नियमाच्छपः स्थानेश्नुर्न] १. २४. ५. । प्राप्नुयाम [अत्राशूङ् धातोर्लिङ्याशिष्यङित्यङ् सार्वधातुक-संज्ञया लिङः सलोप इति सकारलोपः आर्धधातुकसंज्ञया शपोऽभावः --] १. ८६. ८ ॥

अशेमहि प्राप्नुयाम २५. २१ ॥

अशेरन् शयीरन् १. १३३. १ ॥

अशेवा असुखानि ७. ३४. १३ ॥

अशेषसः निःशेषाः ७. १. ११ ॥

अशोचत् दीप्यते ३. २६. १४ ॥

अशोचि प्रकाश्यते ७. ८. १ ॥

अश्नः भोक्ता १. १६४. १ । व्यापकः १. १७९. २ । अश्नम् मेघम् २. १४.

५ ॥ अश्ना भोक्तव्यानि ४. २८. ५ ॥

अश्नः मेघनाम निघ० १. १० ॥

अश्नवत् प्राप्नोति [लेट् प्रयोगः व्यत्ययेन परस्मै पदम्] १. १. ३ (आर्य० २५) अश्नुते १. ११३. १८ । प्राप्नुयात् [अयं लेट् प्रयोगो व्यत्ययेन परस्मैपदञ्च] १. ४० ६. ७ ॥

अश्नवन्त अश्नुवते ७. ३०. ४ ॥

अश्नवाम प्राप्नुयाम १. ४६. २५ ॥

अश्नवामहै प्राप्नुयाम १२. ६१ ॥

अश्नवै प्राप्नुयाम [लोट् प्रयोगोऽयम्] २०. २३ ॥

अश्नाऽइव योऽश्नाति भुङ्क्ते तद्वत् २. ३०. ४ ॥

अश्नामि भुञ्जे २. ११ ॥

अश्नुतः व्याप्नुतः ८. ५ ॥

अश्नुतम् प्राप्नुतम् (भूमिका २१६) १०. ८९. ४२ ॥

अश्नुताम् प्राप्नुताम् ३२. १६ ॥

अश्नुते प्राप्नोति ६. २८. ४ ॥

अश्नुते व्याप्तिकर्मा निघ० २. १८ ॥

अश्नुथ प्राप्नुथ ५. ५४. १० ॥

अश्नुवत् व्याप्नुवन् १. ११६. २५ ॥

अश्नुवन्ति प्राप्नुवन्ति ७. २२. ८ ॥

अश्नुवन्तु प्राप्नुवन्तु ६. २३. ८ ॥

अश्नवे प्राप्नोमि १. ११४. २७ ॥

अश्नुहि व्याप्नुहि [अत्र व्यत्ययेन परस्मैपदम्] १. ५४. ६ ॥

अश्नोति व्याप्नोति [अत्र व्यत्ययेन परस्मैपदम् १. ६४. २ । प्राप्नोति २. २४. ८ ॥

अश्नोतु व्याप्नोतु १. १७. ६ । प्राप्नोतु [अत्र व्यत्ययेन परस्मै पदम्] ३. ५१. १२ ॥

अश्नऽआस्यम् अश्मनो मेघस्य मुख्यभागम् २. २४. ४ ॥

अश्मऽदिद्यवः मेघविद्याप्रकाशकाः ५. ५४. ३ ॥

अश्मन्ऽमयीनाम् मेघप्रचुराणामिव पाषाणनिर्मितानाम् ४. ३०. २० ॥

अश्मन्वतीः बहवोऽश्मानो मेघाः पाषाणा वा विद्यन्ते यस्यां सृष्टौ नद्यां वा सा २५. १० ॥

अश्मऽव्रजाः येऽश्मसु मेघेषु व्रजन्ति ४. १. १३ ॥

अश्मा मेघ इव १. १७२. २ । पाषाणवद्दृढम् ६. ७५. १२ । अश्नुते व्याप्नोति स मेघः १७. ६० । पाषाणः १८. १३ । अश्मानम् मेघमिव राज्यम् ४. २२. १ ॥

अश्मेत्र मेघनामसु पठितम् निघ० १. १० ॥ शर्कराया अश्मानम् असृजत तस्माच्छर्कराश्मैवान्ततो भवति श० ६. १. ३. ५ । स्थिरो वोऽश्मा । श० ९. १. २. ५ ॥

अश्याः प्राप्नुयाः २. ३१. ७ । भोगं कुर्याः १. ६०. ३ । व्याप्नुयाः (अत्र व्यत्ययेन परस्मैपदम्) १. १६. १ । व्याप्नुहि १. ७०. १ ॥

अश्याम् [अश्याम्] प्राप्नुयाम् [अत्र व्यत्ययेन परस्मैपदम् बहुलं छन्दसीति विकरणस्य लुक्] १. ६२. ८ ॥

अश्याम [अश्याम] प्राप्नुयाम १. ११४. १ । भुञ्जामहि १. १३६. ७ ॥

अश्युः भुञ्जते १. ७२. ५ । प्राप्नुयुः १. ७३. ६ ॥

अश्रद्धाम् अप्रीतिम् १६. ७७ ॥

अश्रद्धान् श्रद्धारहितान् ७. ६. ३ ॥

अश्रन्थन् विमुक्तानि भवन्ति २. २४. ३ ॥

अश्रमासः श्रमरहिताः ६. २१. १२ ॥

अश्रमिष्ठाः अतिशयेनाश्रान्ताः श्रमरहिताः ४. ४. १२ ॥

अश्रवम् शृणोमि १. १०६. २ ॥

अश्रवम् अश्रौषम् नि० ६. ९ । अशृणवम् नि० ११. ३९ ।

अश्रायि [अश्रायि] आश्रयति ६. ११. ५. । श्रियेत सेव्येत १. ५१. १४ ॥

अश्रितम् असेवितम् ४. ७. ६ ॥

अश्रीणीत श्रीणाति ७. १७ ॥

अश्रीरम् अश्लीलममङ्गलमधर्माचरणम् ६. २८. ६ ॥

अश्रोभिः सेवनैः १६. ६ ॥

अश्रेः [अश्रेः] आश्रय ३. ५४. ११ । सेवयेः ५. ३३. २ ॥

अश्रेत् [अश्रेत्] आश्रयति ४. १३. २ । आश्रयेत् ४. ६. २ । ५. १. १२ ॥

अश्रोत् शृणोति १. ३६. ६ । शृणुयात् ७. ३३. ५ ॥

अश्व ऽअजनि अश्वानां प्रत्नेप्त्रि । ६. ७६. १३ ॥

अश्वः व्याप्तिशीलोऽग्निः १. १६२. २२ । आशुगामी वायुरग्निर्वा १. १६४. २ । तुरङ्गः १. ३६. ८ । महत्तत्त्वम् २३. ५४ ॥ अश्वा (अश्वौ) तुरङ्गौ महान्तौ जनौ वा ६. ६७. ४ । वेगेनाध्वनि व्याप्तिशीलौ युग्मौ पदार्थौ ४. ३४. ६ ॥ अश्वाः व्याप्तिशीलाः किरणाः ३. ६. ८ । महान्तो विद्वांसः ६. २४.६ ॥ अश्वम् आशुगमयितारम् १. १६२. २ । वेगवन्तं पदार्थम् १. १६१. ७ । शुक्लवर्णं वाष्पाख्यम् (भूमिका २०२) १. ११६. ६ । विद्युतम् १. ११७. ४ । आशु सुखकरं बोधम् ४. ३६. ५ । व्यापकत्ववेगादिगुणसमूहम् ६. ७ ॥ अश्वैः आशुकारिभिः ५. ५५. १ । किरणैरिव महद्भिरग्निजलादिभिः ७. ४९. १ । महाबलिष्ठैः पुरुषार्थयुक्तैः ४. ५१. ५ । आशुगामिभिः विद्युदादिना निर्मितविमानादियानैः १. ११७,

१४ ॥ अश्वाय सद्यो गमनाय ९. ३१. ४ ॥ अश्वस्य अश्ववद्वीर्यवतः १. १६४. ३४ । व्याप्तुमर्हस्य राज्यस्य १. १२१. २ । सकलशुभगुणव्याप्तस्य ४. ३९. ६ । शीघ्रगामी सूर्य के १. १६४. ३५ ॥ अश्वेषु तुरङ्गहस्त्युष्ट्रादिषु १६. १६ । गवादिषु १३. २३ ॥

यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः नि० १. १३ । अश्नुतेऽध्वानम् । महाशनो भवतीति वा नि० २. २७ ॥ प्रजापतेरक्ष्यश्वयत् । तत्परापतत्ततोऽश्वः समभवद्यदश्वयत्तदश्वस्याश्वत्वम् । श० १३ ३. १ १ । प्रजापतेरक्ष्यश्वयत् । तत्परापतत् तदश्वोऽभवत् । तदश्वस्याश्वत्वम् । तै० १. १. ५. ४ । प्रजापतेरक्ष्यश्वयत्तत्परापतत्तदश्वोऽभवत्तदश्वस्याश्वत्वं तद्देवा अश्वमेधेन प्रत्यदधुः । तां० २१. ४. २ । (प्रजापतिः) चक्षुषाऽश्वम् (निरमिमीत) । श० ७ ५. २. ६ । वरुणो ह वै सोमस्य राज्ञोऽभीवाक्षि प्रतिपिपेष तदश्वयत्ततोऽश्वः समभवत्तद्यच्छ्वयथात्समभवत्तस्मादश्वो नाम । श० ४. २. १. ११ । तान् (असुरान्) अश्वा भूत्वा (देवाः) पद्भिरपाघ्नत यदश्वा भूत्वा पद्भिरपाघ्नत तदश्वानामश्वत्वमश्नुते यद्यत्कामयते य एवं वेद । ऐ० ५. १ । अथ यदश्रु संक्षरितमासीत्सोऽश्वोऽभवदश्रुर्ह वै तमश्व इत्याचक्षते परोऽक्षम् । श० ६. १. १. ११ । यद्वै तदश्रु संचरितमासीदेव सोऽश्वः । श० ६. ३. १. २८ । अप्सुजा उ वाऽअश्वः । श० ७. ५. २. १८ । अप्सुयोनिर्वा अश्वः । तै० ३. ८. ४. ३ । अद्भ्यो ह वाऽअग्रेऽश्वः सम्बभूव सोऽद्भ्यः सम्भवन्नसर्वः समभवदसर्वो हि वै समभवत्तस्मान्न सर्वैः पद्भिः प्रतितिष्ठत्येकैकमेव पादमुदच्य तिष्ठति । श० ५. १. ४. ५ । अश्वोऽस्यत्योऽसि मयोऽस्यर्वासि वाज्यसि सप्तिरस्यर्वासि वृषासि । तां० १. ७. १ । (हेऽश्व त्वं) अर्वासि । तां० १. ७. १ । अत्योऽसीत्याह । तस्मादश्वः सर्वान् पशूनत्येति । तै० ३. ८. ९. १ । तस्मादश्वः सर्वेषां पशूनां श्रैष्ठ्यं गच्छति । तै० ३. ८. ९. १ । तस्मादश्वः पशूनां जविष्ठः । ऐ० ५. १ । आशुः सप्तिरित्याह । अश्व एव जवं दधाति । तस्मात्पुराशुरश्वोऽजायत । तै० ३. ८. १३. २ । अश्वः पशूनां त्विषिमान् हरस्वितमः । तै० ३. ८. ७. ३ । अश्वः पशूनामाशुः सारसारितमः । तै० ३. ८. ७. २ । तस्मादश्वः पशूनामाशिष्ठः । श० १३. १. २. ७ । अश्वः पशूनां यशस्वितमः । श० १३. १. २. ८ । तस्माद्‌ हैतदश्वः पशूनां भगितमः श० ६. ३. ३. १३ । परमोऽश्वः पशूनाम् । श० १३. ३. ३. १ । अन्तो वा अश्वः पशूनाम् । तां० २१. ४. ६ । अश्वः पशूनामपचिततमः । तै० ३. ८. ७. २ । तस्मादश्वः पशूनामोजस्वितमः । श० १३. १. २. ६ । अश्वः पशूनामोजिष्ठो बलिष्ठः । तै० ३. ८. ७. १ । तस्मादश्वः पशूनां वीर्यवत्तमः । श० १३. १. २. ५ । अश्वः पशूनामन्नादो वीर्यावत्तमः । तै० ३. ८. ७. १ । वीर्यं वा अश्वः । श० २. १. ४. २४ । क्षत्रं वा ऽअश्वः । श० ६. ४. ४. १२ । क्षत्रं वाऽअश्वो विडितरे पशवः । श० १३ २. २. १५ । यजमानो वा अश्वः । तै० ३. ९. १०. ५ । वज्रो वाऽअश्वः । श० ४. ३. ४. २७ । वज्रोऽश्वः । श० १३. १. २. ९ । वज्री वा एषः । यदश्वः । तै० १. १. ५. ५ । वज्री वा अश्वः प्राजापत्यः । तै० ३. ८. ४. २ । इन्द्रो वा अश्वः । कौ० १५. ४ । असौ वा आदित्योऽश्वः तै० ३. ९. २३. २ । असौ वाऽआदित्य एषो (शुक्लः) ऽश्वः । श० ७. ३. २. १० । तस्मा (आयास्यायोद्गात्रे) अमुमादित्यमश्वं श्वेतं कृत्वा (आदित्याः) दक्षिणामानयन् । तां० १६. १२. ४ । तेऽङ्गिरस आदित्येभ्य अमुमादित्यमश्वं श्वेतं

भूतं दक्षिणामनयन् । तै० ३. ९. २१. १ । ते (आदित्याः) अश्वं श्वेतं दक्षिणां निन्युरेतमेव य एष (सूर्यः) तपति । कौ० ३०. ६ । अश्वः तस्य (सौर्यस्य हविषः) श्वेतो दक्षिणा । तदेतस्य रूपं क्रियते य एष (सूर्यः) तपति यद्यश्वꣳ श्वेतं न विन्देदपि गौरेव श्वेतः स्यात् । श० २. ६. ३. ९ । अथ योऽसौ (सूर्यः) तपतीꣳ३ एषो ऽश्वः श्वेतो रूपं कृत्वाऽश्वाभिधान्यपिहितेनात्मना प्रतिचक्राम । ऐ० ६. ३५ । अग्निर्वा अश्वः श्वेतः । श० ३. ६. २. ५ । अग्निरेष यदश्वः । श० ६. ३. ३. २२ । सोऽग्निरश्वो भूत्वा प्रथमः प्रजिगाय । गो० उ० ४. ११ । अश्वो न देववाहनः इति । अश्वो ह वाऽएष (अग्निः) भूत्वा देवेभ्यो यज्ञं वहति । श० १. ४. १. ३० । यस्मात्प्रजापतिरालब्धोऽश्वोऽभवत् । तस्मादश्वो नाम । तै० ३. ९. २१. ४ । प्राजापत्यो ऽश्वः । श० ६.५. ३.९ । प्राजापत्यो वा अश्वः । श० १३. १. १. १. । सौर्यो वा अश्वः । गो० उ० ३. १९ । वारुणो हि देवतयाऽश्वः तै० १. ७. २. ६ । वारुणो वा अश्वः तै० २. २. ५. ३ । वारुणो ह्यश्वः । श० ७. ५. २. १८ । वैश्वदेवो वा अश्वः । श० १३. २. ५. ४ । अश्वे वै सर्वा देवता अन्वायत्ताः । तै० ३. ८. ७ ३ । अश्वस्तूपरो गोमृगः ... अश्वस्तुत्रिꣳशः । तै० २. ७. १. ३ । अश्वस्तुत्रिꣳशो दक्षिणानाम् । तां० १७. ११. ३ । अश्वो (भूत्वा) मनुष्यान् (अवहत्) श० १०. ६. ४. १ । अपूतो वाऽएषोऽमेध्यो यदश्वः । श० १३. १. १. १ । तस्मादश्वस्त्रिभिः (पद्भिः) तिष्ठंस्तिष्ठति । श० १३. २. ७. ६ । तस्मादश्वः शुक्रः उदुष्टमुख इवायो ह दुरवो भावुकः श० ७. ३. २. १४ । रश्मिना वा अश्वो यत ईश्वरो वा अश्वोऽयत-ऽप्रतिष्ठितः परां परावतं गन्तोः । श० १३. २. ३. ६ । ईश्वरो वा अश्वः प्रमुक्तः परां परावतं गन्तोः । तै० ३. ८. ९. ३ । यद्युनर्माशीत्याह । एतद्वा अश्वस्यप्रियं नामधेयम् । तै० ३. ८. ९. २ । अश्वो वै बृहद्वयः । तै० ३. ९. ५. ३ । (हे ऽश्व त्वं) हयोऽसि । तां० १. ७. १ । (हे ऽश्व त्वं) सप्तिरसि । तां० १. ७. १ । (हे ऽश्व त्वं) वृषासि । तां० १. ७. १ । वाजिनो ह्यश्वाः । श० ५. १. ४. १५ । (अश्वो) वाजी (भूत्वा) गन्धर्वान् (अवहत्) । श० १० ६. ४. १ । (हे ऽश्व त्वं) वाज्यसि । तां० १. ७. १ । ते (आदित्याः) अश्व वन् । यम् (अश्वम्) तोऽनेन । सवर्यो ऽभूदिति । तस्मादश्वꣳ सवर्येत्याचक्षते । तै० ३. ९. २१. १ । समुद्र एवास्य (अश्वस्य मेध्यस्य) बन्धुः समुद्रो योनिः श० १०. ६. ४. १ । न वै मनुष्यः स्वर्गं लोकमञ्जसा वेद । श० १३. २. ३. १ । तस्य (अश्वस्य श्वेतस्य) रुक्मः पुरस्ताद्भवति । तदेतस्य रूपं क्रियते य एष (आदित्यः) तपति । श० ३. ५. १. २० । जागतो ऽश्वः प्राजापत्यः । तै० ३. ८. ८. ४ । (प्रजापतिः) वारुणमश्वं (आलिप्सत) । श० ६. २. १. ५ । स हि वारुणो यदश्वः । श० ५. ३. १. ५ । सोमो वै वृष्णो अश्वस्य रेतः । तै० ३. ९. ५. ५ । अश्वस्य वा आलब्धस्य रेत उदक्रामत् । तत्सुवर्णꣳ हिरण्यमभवत् । तै० ३. ८. २. ४ । अश्वमालभते ......ग्रीवा एकशफम् । श्रियमेवावरुन्धते । तै० ३. ९. ९. २ । अश्वं चार्वि चोभयतः, एतस्यां तद्दिश्येतौ पशू दधाति तस्मादेतस्यां दिश्येतौ पशू भूयिष्ठौ । श० ७. ५. २. १५ ॥

अश्वकः अश्व इव गन्ता जनः २३. १८ ॥

अश्वश्चन्द्राः अश्वाश्चन्द्राणि सुवर्णानि येषां ते ६. ३९. ४ ॥

अश्वऽजितं योऽश्वैर्जयति तस्मै २. २१. १ ॥

अश्वत्थः योऽश्नुते सः ६. ४७. २४ ॥

अश्वत्थम् पिप्पलम् १. १३५ ॥ अश्वत्थे

श्वः स्थाता न स्थाता वा वर्तते तादृशे देहे १२. ७९ । श्व स्थास्यति न स्थास्यति वा तस्मिन्ननित्ये संसारे ३५. ४ ॥

प्रजापतिर्देवेभ्योऽनिलायत । अश्वो रूपं कृत्वा । सोऽश्वत्थे संवत्सरमतिष्ठत् । तदश्वत्थस्याश्वत्थत्वम् । तै० ३. ८. १२. २ । अग्निर्देवेभ्यो निलायत । अश्वो रूपं कृत्वा । सोऽश्वत्थे संवत्सरमतिष्ठत् । तदश्वत्थस्याश्वत्थत्वम् । तै० १. १. ३. ९ । त्वच एवास्यापचितिरस्रवत्सोऽश्वत्थो वनस्पतिरभवत् । श० १२. ७. १. ९ । तेजसो वा एष वनस्पतिरजायत यदश्वत्थः । ऐ० ७. ३२ । साम्राज्यं वा एतद्वनस्पतीनाम् (यदश्वत्थः) । ऐ० ७. ३२. ८. १६ । आश्वत्थं (पात्रं) भवति । तेन वैश्योऽभिषिञ्चति स यदेवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत । श० ५. ३. ५. १४ । आश्वत्थेन (पात्रेण) वैश्यः (अभिषिञ्चति) तै० १. ७. ८. ७ ॥

अ॒श्व॒ऽदाः य अश्वादीन् पशून् प्रददति १. ११६. १८ । अश्वानग्न्यादीन् तुरङ्गान् वा ददति ५. ४२. ८ ॥

अ॒श्व॒ऽदा॒वन् ! योऽश्वान् व्याप्तिकरान् विज्ञानादिगुणान् ददाति तत्सम्बुद्धौ ५. १८. ३ ॥

अश्वंपतिभ्यः अश्वानां पालकेभ्यः १६. २४ ॥

अ॒श्व॒पम् अश्वानां रक्षकं शिक्षकम् ३०. ११ ॥

अश्वंऽपर्णाः अश्वानां पर्णानि पालनानि यासु सेनासु ताः २६. ५७ ॥ अश्वऽपर्णैः अग्न्यादीनामश्वानां पतनैः सह वर्तमानैः १. ८८. १ ॥

अश्वंऽपेशसम् शीघ्रगन्तृ पेशो रूपमिव रूपं यस्यां ताम् २. १. १६ । अश्वादीनां पेशो रूपं यस्य ताम् २. २. १३ ॥

अश्वंऽबुध्यम् अश्वा बुध्यन्ते सुशिक्षन्ते येन तम् १. ९२. ८ ॥ अश्वऽबुध्यान् अश्वान् वेगवतस्तुरंगान् वा वोधयन्त्यवगमयन्त्येषु तान् [अत्रान्तर्गतोण्यर्थो बाहुलकादौणादिकोऽधिकरणे ल्यप् च] १. ९१. ७ । अश्वानन्तरिक्षे भवानग्न्यादींश्चालयितुं वर्धितुं बुध्यन्ते तान् १. १२१. १४ ॥

अ॒श्व॒मे॒धः राष्ट्रम् १८. २२ ॥ अश्वमेधाय आशुपवित्राय ५. २७. ४ ॥

अश्वंऽमेधस्य चक्रवर्तिराज्यपालनस्य विद्यायाः ५. २७. ५ ॥

प्रजापतिरश्वमेधः श० १३. २. २. १३ । अग्निर्वा अश्वमेधस्य योनिरायतनम् । तै० ३. ९. २१. २, ३ । सोऽश्वमेधेनेष्ट्वा स्वराडिति नामाधत्त । गो० पू० ५. ८ । सर्वस्यैव न वेद यो ब्राह्मणः सन्नश्वमेधस्य न वेद, सोऽब्राह्मणः । श० १३. ४. २. १७ । ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् । श० १०. ६. ५. ७ । असावादित्योऽश्वमेधः । श० ९. ४. २. १८ । असौ वाऽआदित्य एकविंशः सोऽश्वमेधः । श० १३. ५. १. ५ । एष वाऽअश्वमेधो य एष (सूर्यः) तपति । श० १०. ६. ५. ८ । एष एवाश्वमेधो यच्चन्द्रमाः । श० ११. २. ५. १ । राष्ट्रमश्व-

मेधः । श० १३. २. २. १६ । राष्ट्रं वा अश्वमेधः । श० १३. १. ६. ३ । श्रीर्वै राष्ट्रमश्वमेधः । श० १३. २. ९. २ । यजमानो वाऽश्वमेधः श० १३ २. २. १ । राजा वाऽएष यज्ञानां यदश्वमेधः श० १३. २. २. १ । वृषभ एष यज्ञानां यदश्वमेधः । श० १३. १. २. २. । ऋषभ एष यज्ञानाम् । यदश्वमेधः । तै० ३. ८. ३. ३ । अश्वमेधे सर्वा देवता अन्वायत्ताः । श० १३. १. २. ९ । प्राणापानौ वा एतौ देवानाम् । यदर्काश्वमेधौ । तै० ३. ९. २१. ३ । ओजो बलं वा एतौ देवानाम् । यदर्काश्वमेधौ । तै० ३. ९. २१. ३ । एष (अश्वमेधः) वै ब्रह्मवर्चसी नाम यज्ञः । तै० ३. ९. १९. ३ । एष (अश्वमेधः) वै तेजस्वी नाम यज्ञः । तै० ३. ९. १९. ३ । एष (अश्वमेधः) वा अतिव्याधी नाम यज्ञः । तै० ३. ९. १९. ३ । एष (अश्वमेधः) वा ऊर्जस्वान्नाम यज्ञः । तै० ३. ९. १९. १ । एष (अश्वमेधः) वै प्रतिष्ठितो नाम यज्ञः । तै० ३. ९. १९. २ । एष (अश्वमेधः) वै क्लृप्तो नाम यज्ञः । तै० ३. ९. १९. ३ । एष (अश्वमेधः) वै दीर्घो नाम यज्ञः । तै० ३. ९. १९. ३ । एष (अश्वमेधः) वै विधृतो नाम यज्ञः । तै० ३. ९. १९. २ । एष (अश्वमेधः) वै व्यावृत्तो नामयज्ञः तै० ३. ९. १९. २ । एष (अश्वमेधः) वै पयस्वान्नाम यज्ञः । तै० ३ ९. १९. १ । एष (अश्वमेधः) वै विभूर्नाम यज्ञः । तै० ३. ९. १९. १ । एष (अश्वमेधः) वै प्रभूर्नाम यज्ञः । तै० ३. ९. १९. १ । प्रजापतिꣳ सर्व्वङ्करोति योऽश्वमेधेन यजते । तां० २१.४.२ । तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते । श० १३. ३. १. १. । योऽश्वमेधेन यजते । देवानामेवायनेनैति । तै० ३. ९. २२. ३ । तेजसा वा एष ब्रह्मवर्चसेन व्यृध्यते । योऽश्वमेधेन यजते । तै० ३. ९. ५. १ । स यो हैवं विद्वानग्निहोत्रं च जुहोति दर्शपूर्णमासाभ्यां च यजते मासि मासि हैवास्याश्वमेधेनेष्टं भवति । श० ११. २. ५. ५ ।

अश्वऽयते अश्वमिवाचरते ६. ४५. २६ ॥

अश्वऽयन्तः आत्मनोऽश्वानिच्छन्तः ४. १७. ११ । महतो विदुषः कामयमानाः ७. ३२. १३ ॥

अश्वऽयुः आत्मनो ऽश्वानिच्छुः १. ५१. १४ । ४. ३१. १४ । बह्वश्वबलयुक्तः ४. ३१. १४ ॥

अश्वऽयुजः येऽश्वान् सद्योगामिनः पदार्थान् योजयन्ति ५. ५४. २ ॥

अश्विनोरश्वयुजौ (नक्षत्रौ) तै० १. ५. १. ५ ॥

अश्वऽयूपाय अश्वानां बन्धनाय १. १६२. ६ । अश्वस्य बन्धनार्थाय स्तम्भाय २५. २६ ॥

अश्वंऽयोगाः येऽश्वान् योजयन्ति ते १. १८६. ७ ॥

अश्वंऽराधसः विद्युदादिपदार्थसंसाधिकाः ५. १०. ४ ॥

अश्वंऽवत् बहवः प्रशस्ता वेगप्रदाऽश्वा अग्न्यादयः सन्ति यस्मिंस्तत् १. ४८. १२ । बह्वश्वयुक्तम् । ५. ५७. ७ । अश्वेन तुल्यौ २. ४१. ७ । अश्वादिभिः समानम् ८. ६३ ॥

अश्वंऽवतीः प्रशस्ताऽश्वा व्याप्तयो विद्यन्ते यासां ताः [अत्र मतौ पूर्वपदस्य दीर्घः] १. १२३. १२ । अश्वा महान्तः पदार्थाः

विद्यन्ते यासु ताः ७. ४१. ७ ॥
अश्वऽवत्या वेगादिगुणसहितया १. ३०. १७ ॥
अश्वऽवन्तम् प्रशस्ता अश्वा विद्यन्ते यस्मिँस्तम् १. ८३. ४ । प्रशस्ताश्वादिसहितम् ४. ४६. ४ ॥
अश्वनिः अश्वानामग्न्यादि पदार्थानां वा सनिर्दाता ८. १२ ॥
अश्वऽसातमः योऽश्वान् सनति सम्भजति सोऽतिशयितः १. १७५. ५ ॥
अश्वसादम् [अश्वसादम्] योऽश्वान् सादयति तम् ३०. १३ ॥
अश्वऽसाम् अश्वानां संविभाजिकाम् ६. ५३. १० ॥
अश्वऽसूनृते अश्वा महती सूनृता प्रिया वाग्यस्यास्तत्सम्बुद्धौ ५. ७६. १ ॥
अश्वऽमिष्टे यो ऽश्वमिच्छति तत्सम्बुद्धौ [अत्र-बहुलं छन्दसीति सुमागमः] २. ६. २ ॥
अश्वा आशुगमनशीला वडवा २१. २३ ॥
अश्वाजनि याश्वान् जनयति सुशिक्षितान् करोति तत्सम्बुद्धौ २६. ५० ॥

अश्वाजनीं कशेत्याहुः नि० ९. २० ॥

अश्वाजनीऽइव विद्युदिव ५. ६२. ७ ॥
अश्वापयः शापयः ७. १६. ४ ॥
अश्वायन्तः आत्मनोऽश्वमिच्छन्तः २७. ३६ ॥
अश्वावत् प्रशस्ततुरङ्गयुक्तम् २०. ८१ ॥
अश्वावतीः प्रशस्तान्यश्वानि व्याप्तिशीलान्युदकानि विद्यन्ते यासु ताः ३४. ४० ॥
अश्वावतीम् प्रशस्तगुणयुक्ताम् १२. ८१ ॥
अश्विनंकृतस्य यौ सद्गुणमश्नुवाते तावश्विनौ ताभ्यांकृतस्य (अत्राश्विन् शब्दात् स्वार्थेऽण् वृद्ध्यभावस्त्वार्षः) २०. ३५ ॥
अश्विना [अश्विना अश्विनौ] अध्यापकोपदेशकौ ५. ७८. ३ । जलाग्नी [अत्र सुपामित्याकारादेशः; अश्विनाविति पदनामसु पठितम् । निघ० ५. ६ । अनेनापि गमनप्राप्तिनिमित्ते अश्विनौ गृह्येते] १. ३. १ । प्रकाशितगुणयोरध्वर्य्योः १. २२. १ । यजमानर्त्विजौ ९. ७८. २ । शिल्पविद्याध्यापकऽध्येतारौ स्वामिसेवकौ वा ३. ५८. ७ । सूर्य्याचन्द्रमसौ १. १५. ११ । सूर्य्यवायुसदृक् कर्मकारिणौ सभासेनेशौ १. ४७. ३ । सर्वासकलविद्याव्याप्तौ ३. ५८. ८ । सर्वाधीशसेनाधीशौ ३. ५८. ६ । सूर्य्यचन्द्रवत्प्रकाशमानौ ७. ११ । सुशिक्षितौ स्त्रीपुरुषौ २८. १२ । आयुर्वेदाङ्गव्यापिनौ १६. १२ । अग्निजलादिगुणवत् ... ३ । गृहा-

श्रमव्यवहारव्यापिनौ १६. ८८ । द्यावापृथिव्यौ २१. ३२ । प्राणापानौ २१. ६० । व्याप्तशुभगुणकर्मस्वभावौ २०. ५६ । वायुविद्युतौ २१. ५८ । वायुजले १. ४४. ८ । व्यापिनौ ७. ३५. ४ । व्याप्तसुखौ ५. ७६. ३ । सिद्धसाधकौ १६. ६३ । सद्गुणकर्मस्वभावव्यापिनौ २०. ९६ । सुसत्कृतौ पुरुषौ २१. ४२ । सकलविद्याव्याप्तौ ४. १४. ६ । सूर्य्योषसौ ९. ७७. २ । विद्याज्योतिर्विस्तारमयौ १. ३४. ६ । क्षत्रधर्मव्यापिनौ १. ४७. ४ । आश्विमावग्निवायू १. ६२. १७ । वन्हिजलवद्यानसिद्धिं संपाद्य प्रेरकचालकावध्वर्यू [अश्विनावध्वर्यू शत० १.१.२७ ।] १. ३४. ३ । विद्यादाताग्रहीतारावध्वर्यू १. ३४. ४ । कृषिकर्मविद्याव्यापिनौ १. ११६. ५ । भूगर्भविद्याविदौ स्त्रीपुरुषौ १. ११७. २० । मनस्विनौ १. ११७. २ । व्यवहारव्यापिनौ १. ४६. ७ । वायुविद्युदादिरिव व्याप्तैश्वर्य्यौ १. ४७. ६ । वायुसूर्य्याविव वर्तमानौ धर्मन्यायप्रकाशकौ १. ४१. १० । पशुपालककृषीवलौ २१. ४१ । जलाग्नी इव निर्मातृवोढारौ १. १८२. ७ । शत्रुसेनाव्यापिनौ १. ११६. १८. । शरीरात्मबलयुतौ १. ११७. १३ ॥ अश्विनोः द्यावापृथिव्योराकर्षणधारणाभ्यामिव ११. २८ । प्रकाशभूम्योः [द्यावापृथिव्यावित्येके । नि० १२. १ ।] १. २१. प्राणोदानयोः ६. १ । सद्वैद्य और सत्योपदेशक [विधि० १४८] अथर्व० १४. १. ५४ ॥

इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्वमाश्नुवातां पुष्करस्रजावित्यग्निरेवास्यै (पृथिव्यै) पुष्करमादित्योऽमुष्यै (दिवे) श० ४. १. ५. १६ । श्रोत्रे अश्विनौ । श० १२. ९. १. १३ । नासिके अश्विनौ । श० १२. ९. १. १४ । तद्यौ ह वाऽइमौ पुरुषाविवाक्ष्योः । एतावेवाश्विनौ । श० १२. ९. १. १२ । अश्विनावध्वर्यू । ऐ० १. १८ । अश्विनौ वै देवानां भिषजौ । १. १८ । मुखशी वाऽश्विनौ (यज्ञस्य) । श० ४. १. ५. १९ । श्वेताविव ह्यश्विनौ । श० ५. ५. ४. १ । सयोनी वाऽअश्विनौ । श० ५. ३. १. ८ । अश्विनाश्विव रूपेण (भूयासम्) मं० २. ४. १४ । आश्विनं द्विकपालं पुरोडाशं निर्वपति । श० ५. ३. १. ८ । आश्विनो द्विकपालः (पुरोडाशः) तां० २१. १०. २३ । वसन्तग्रीष्मावेवाश्विनाभ्याम् (अवरुन्धे) । श० १२. ८. २. ३४ । अश्विभ्यामन्धानाः तै० १. ५. ११. ३ । अथ यदेनं(अग्निं) द्वाभ्यां बाहुभ्यां द्वाभ्यामरणीभ्यां मन्थन्ति द्वौ वा अश्विनौ तदस्याश्विनं रूपम् । ऐ० २. ४ । देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् तै० २. ६. ५. २ । गर्दभरथेनाश्विना उदजयताम् । ऐ० ४. ९ । तदश्विना उदजयतां रासभेन । कौ० १८. १ । इममेव लोकमाश्विनेन (अवरुन्धे) । श० १२. ८. २. ३२ । आश्विममन्वाह

तदमुं लोकं (दिवं) आप्नोति। कौ० ११. २. १८. २॥

अश्विनी आशुगागिनः स्त्री ५. ४६. ८॥

अश्विनी अश्विनोः पत्नी निघ० १२. ४६॥

अश्विया अश्वादियुक्तानि ४. १७. ११॥

अश्वी बह्वश्वः ४. २. ५। बहवो महान्तोऽश्वा वेगादयो गुणा विद्यन्ते यस्मिन्त्सोऽग्निः ७. १. १२॥

अश्वीऽइव यथा वडवा २. २७. १६॥

अश्नैत् व्याप्नोति १. ६२. १२। वर्धते १. १२४. ११॥

अश्व्यः योऽश्वेषु वेगादिगुणेषु साधु १. ३२. १२। अश्वेषु आशुगच्छत्सु साधुरत्यन्तवेगकारी १. ७४. ७॥ अश्व्यम् अश्वेषु भवम्। १. ११७. २२। अश्वेषु व्याप्तविद्येषु साधुम् १. ११६. ६। अश्वेभ्यो हितम् २७. २७॥ अश्व्या (अश्व्यानि) महत्सु भवानि ७. १६. १०। अश्वानां महतामिमानि ७. १८. १६॥ अश्व्यैः अश्वेषु भवैर्गुणैः ६. ६०. १४॥

अषंऽतरा प्राप्ततराणि [अत्र क्षष धातोः रेफस्य लोपः] १. १७३. ४॥

अषाढम् सोढुमनर्हम् ३४. २०॥

अषाढाः असहमानाः ३. १५. ४। असोढव्याः शत्रुसेनाः ७. २८. २॥

अषाढा (इष्टका) (देवाः) तां (इष्टकां) उपधायासुरान्त्सपत्नान् भ्रातृव्यानस्मादसहन्त यदसहन्त तस्मादषाढाः। श० ७. ४. २. ३३। तऽएते सर्वे प्राणा यदषाढाः। श० ७. ४. २. ३६। ग्रीवा अषाढाः। श० ७. ५. १. ३५। इयं (पृथिवी) वाऽअषाढा। श० ६. ५. ३. १। वागषाढा। श० ६. ५. ३. ४। वाग्वाऽअषाढा। श० ७. ४. २. ३४। (नक्षत्रम्) यन्नासहन्त। तदषाढाः। तै० १. ५. २. ८। अपां पूर्वाषाढाः। तै० १. ५. १. ४। विश्वेषां देवानामुत्तराः (अषाढाः)। तै० १. ५. १. ४॥

अष्टधा अष्टप्रकारः ८. ६२॥

अष्टमम् अष्टसंख्यापूरकम् २. ५. २॥

अष्टमी अष्टानां पूरणा २५. ४॥

अष्टमे आठवें २६. ६॥

अष्टवे व्याप्तुम् ४. ३०. १६॥

अष्टा व्यापकः १. १२१. ८॥

अष्टाकपालः अष्टसु कपालेषु संस्कृतः २६. ६०॥

अष्टाक्षरेण याजुष्याऽनुष्टुभा ६. ३२॥

अष्टाचत्वारिंशः अष्टाचत्वारिंशद्वा १४. २३॥

अष्टाचत्वारिंशत् अष्टाधिका चत्वारिंशत् १८. २५॥

अष्टादशः अष्टादशधा १४. २३॥

अष्टापक्षाम् चारों ओर दो दो [विधि० २०४] ६. ३. २१ अथर्व०॥

अष्टाऽपदी वेदोपवेदविद्यायुक्ता १. १६४. ४१॥ अष्टापदीम् अष्टौ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासाश्चत्वार आश्रमाः पदानि

प्राशव्यानि यस्यास्ताम् ८. ३० ॥ अष्टाऽपदीभिः अष्टौ पादौ यासां ताभिर्वाग्भिः २. ७. ५ ॥

अष्टाविंश्ँशतिः अष्टाविकाविंशतिः १८. २५ ॥

अष्टाऽविंशानि अष्टाविंशानि [भूमिका १६१] अथर्व० १६. ८. २ ॥

अष्टु व्याप्नोतु ७. २ । प्राप्नोतु ७. ९ ।

अष्टौ अष्टौ [चतस्रो दिश उपदिशश्च] १. ३५. ८ । अष्टौ १. १२१. ५ ॥

अष्ट्री व्यापिका १. ५३. ६ ॥ अष्ट्राम् कृषिसाधनावयवम् ४. ५७. ४ ॥

अष्ठीवन्तौ ष्ठीवनं कफादिकमत्यजन्तौ ७. ९०. २ ॥

असः भवेत् १. १६. ५ । भवेः ७. २४. १ । प्राप्नुयाः [भूमिका २१६] १०. ४४. ४ ॥

असकौ असौ १३. २२ ॥

असक्त सज्ज [अत्र सज्ज धातोर्बहुलं छन्दसीति शपोलुक् लोडर्थेलङ् व्यत्ययेनात्मने पदञ्च] १. ३३. ३ ॥

असंक्राम् या सहनं क्रामति ताम् १. ६३. ८ ॥

असंक्राम् असंक्रमणीत् नि० ६. २९ ॥

असंघ्नोः हिंस्याः १. ३१. ३ ॥

असंङ्ख्याता संख्यारहितानि १६. ५४ ॥

असचन्त समवयन्ति ३. ३१. ४ ॥

असंजातः यथा यः सह न जातः ५. २३ ॥

असत् [असत्] भवेत् [असधातोर्लेट् प्रयोगः] १. ६. ५ । अनित्यम् [भूमिका ३२८] अथर्व० १०. ७. १० । असता अवर्तमानेन ४. ५. १४ । असतः निन्द्यात् ५. १२. ४ । अविद्यमानस्यादृश्यस्याव्यक्तस्य कारणस्य १३. ३ ॥

मृत्युर्वाऽअसत् । श० १४. ४. १. ३१ । तदाहुः किं तदसदासीदित्यषयो वाव तऽग्रेऽसदासीत् । श० ६. १. १. १ । अथ यदसत्स्वर्क् सा वाक् सोऽपानः । जै० उ० १. ५३. २ ॥

असति [असति] स्यात् १. १२४. ११ । भवानि ५. ५३. १५ ॥

असत्याः असत्याचरणाः ४. ५. ५ ॥

असथ [असथ] भवथ ५. ६१. ४ । भवत १७. ४६ ॥

असथः भवथः १. १३. १ ॥

असदः [असदः] प्राशव्यम् ७. ११. २ । जानीहि जानीया वा ५. २१. ४ । आस्व १२. १७ । प्राप्नोषि १२. ३८ ॥

असदत् [असदत्] स्वकक्ष्यायां भ्रमति [अत्रापि लडर्थे लुङ्] ३. १ । प्राप्नुयात् ११. ४८ । आसीदतु ३. ६२. १५ । उपसीदति ६. ५७. २ । सीदति २. ६. १ । आसीदति २८. ४ ।

तिष्ठेत्‌ । २६. २६ । सीदेत्‌ ११. ३७. सीद ११. ४० ॥

असदन्‌ सीदन्ति १. १६१. ४ । भवेयुः [अत्र लिङर्थे लङ्‌ वा छन्दसि सर्वे विधयो भवन्तीति सीदादेशो न] २. ६ ॥

असन्‌ [असन्‌] भवन्ति ५. २३. ३ । भवन्तु २५. १४ । सन्ति ३५. १० । भवेयुः [लेट्‌ प्रयोगः] १. ३८. १५ । प्रक्षिपन्ति ४. ३. ११ ॥

असनत्‌ विभजति ५. ३०. १४ ॥

असनम्‌ सम्भजेयम्‌ १. १२०. १० ॥

असनाम्‌ प्रक्षेपणाम्‌ क्रियाम्‌ १. १४८. ४ ॥

असनाय प्रक्षेपणाय १. ११०. ४ ॥

असनोत्‌ सुनुयात्‌ ३. ३४. १० ॥

असन्दितः अखण्डितः १३. १० ॥

असन्वन्‌ याचन्ते ७. १८. १ ॥

असपत्नाः अजातशत्रवः ७. २५ ॥

असपर्यन्‌ सेवन्ते ३. ६. ६ । सेवेरन्‌ ३३. ७ ॥

असबन्धुः असमाना बन्धवो यस्य सः ५. २३ ॥

असम्‌ भवेयम्‌ ३४. ५२ ॥

असमः नान्यः समः सदृशो यस्य १. ३६. ४ ॥ असमा अतुल्यौ सर्वेभ्योऽधिकौ १. १७. १ ॥ ६

असमनाः असमानमनस्काः १. १४०. ४ । पृथक्‌ पृथग्‌ वर्तमानाः ७. ९. ३ ॥ असमने अविद्यमानं समनं संग्रामो यस्मिँस्तस्मिन्‌ ६. ४६. १३ ॥

असमष्टऽकाव्यः असमष्टं न सम्यग्‌ व्याप्तं काव्यं कवेः कर्म यस्य सः २. २१. ४ ॥

असमरथः अविद्यमानः समो रथो यस्य सः १५. १७ ॥

असमरथ॰ तस्य (आदित्यस्य) रथप्रोतश्चासमरथश्च सेनानी ग्रामण्याविति वार्षिकौ तावृतू । श० ८. ६. १. १८ ॥

असमा अविद्यमाना समा साऽनुपमा १. ५४. ८ ॥

असमानः असदृशः ५. २३ ॥

असमातिऽओजाः असमाति अतुल्यमोजो यस्य सः १. २६. ६ ॥

असम्भवात्‌ अनुत्पन्नात्‌ कारणात्‌ ४०. १० ॥

असम्भूतिम्‌ अनाद्यनुत्पन्नं प्रकृत्याख्यं सत्त्वरजस्तमोगुणमयं जडं वस्तु ४०. ६ ॥

असंऽदितः अखण्डितः ४. ४. २ ॥

असंऽमृष्टः सम्यगशुद्धः ५. ११. ३ ॥

असंऽयत्तः अजितेन्द्रियः १. ८३. ३ ॥

असरत्‌ सरति गच्छति ४. ३. ६ । सरेत्‌ प्राप्नुयात्‌ २. २४. १४ ॥

असर्जि [असर्जि] सृज्यते [अत्र लङर्थे लुङ्‌] १. २८. ... । रश्मी गई १.

१८१. ७। सृजति ४. २६. ५। सृज्येत ६. ६३. ७ ॥

असश्चतः विभागं प्राप्ताः। अत्र सस्जगताविन्यस्य व्यत्ययेन जकारस्य चकारः १. १३. ६। असमवेताः १. ११२. २। परस्परं विलक्षणाः १. १४२. ६। असज्यमानाः २. २५. ४॥

असश्चतम् [असश्चतम्] जानीतम्, अप्राप्तम् अत्र लोडर्थे लङ् २. ३२. ३॥ (सश्चतीति-गतिकर्मा निघं. २ १४.) १. ११२. ६॥

असश्चन्ती असमवयन्ती ३. ५७. ६॥

असश्चन्ती असजयमाने इति वा। अन्युदस्यन्त्याविति वा नि० ५। २।

असंसन्तः जागृताः १. १४३. ३॥

असंसि स्याः २. २६. २॥

असंस्तन हिंसत १. १६१. ११॥

असस्तन अस्वपथ नि० ११। १६।

असहन्त सहन्ते ३. २६. ६॥

असादयन्त नियोजयत ३. ६. ६। स्थापयन्तु ३३. ७॥

असादि [असादि] आसद्यते ७. ७. ५॥ साद्यते १. ६०. २। सीदेत् ५. ४६. ७॥

असानिषम् सम्भज्य प्राप्नुयाम् ६. ४७. २३॥

असाम भवेम १. ५३. ११॥

असामि सम्पूर्णम् (सामीति खण्डवाची न सामि असामि) १. ३६. ६॥ [असामिऽभिः] क्षयरहिताभिः रीतिभिः (अत्र षै क्षये इत्यस्माद् बाहुलकादौणादिको मिः प्रत्ययः) १. ३६. ६॥

असामि सामि स्यतेः असुसमाप्तम् नि० ६। २३।

असामिऽशवसः अखण्डितबलाः ५. ५२. ५॥

असावि उत्पाद्यते १. ८४. १॥

असावीत् सुनोति १. १२४. १। प्रसुवति १. १५७. १॥

असि [असि] अस्ति १. ६१. ५। अस्तु ७. १७। भवसि ८. ३८। भव ३. ४८।

असिक्नीः रात्रीः ७. ५. ३॥

असिक्नी रात्रिनाम निघं. १। ७। असिक्न्यशुक्लाऽसिता नि ६। २४॥

असिश्चत् सिश्चति ३. ४८. २॥

असिश्चतम् सिश्चतम् १. ११६. ७॥

असिश्चन् सिश्चन्ति १. ८५. ११॥

असितः [असितः] अबद्धः १. ४६. १०। (पञ्च० १८) बन्धनरहितः अथर्व ३. २७. १॥ कृष्णगुणः पशुविशेषः २४. ३७॥ असितम् कृष्णम् १६. ८६। कृष्णं तमः ४. १३. ४। निकृष्टवर्णं तमः ४. ५१. ६॥

असितो धान्वो राजेत्याह तस्यासुरा विशः। श. १३। ४। ३। १॥

असितग्रीवः असिता कृष्णा ग्रीवा शिखा यस्य सः २३. १३॥

अग्निर्वाऽअसितग्रीवः। श. १३। २। ७। २॥

असिना खड्गेन १. १६२. २०॥

वज्रो वा असिः। श. ३। ८। २। १२। असिं वै शास इत्याचक्षते। श. ३। ८। १। ४॥

असिन्वन् बध्नन्ति २. १३. ४॥

असिन्वम् अबद्धम् ५. ३२. ८॥

असिमद्भ्यः प्रशस्ता असयः खड्गानि विद्यन्ते येषां तेभ्यः १६. २१॥

असिष्यन् बन्धनमप्राप्नुवन् ६. ३५॥

असिसासन् विभक्तुमिच्छन्तु ३. ३१. ६॥

असीदः तिष्ठेः ६. १. २ ॥

असीदत् [असीदत्] निषीदेत् ५. १. ६ । सीदाति १७. १७ । सादयसि सादयत्यवस्थापयति वा ४. ३० । "अवस्थित है" (२६४ आर्य०) ॥

असीषदन् प्रापयन्तु १२. ५४ । सादयन्तु १५. ५६ ॥

असुः प्राणः २७. २५ । नागादिर्मरुत् १८. २ । असुम् प्राणमन्नमयं बलञ्च १०. ५६. ७ । प्रज्ञाम् । (असुरिति प्रज्ञानामसु पठितम् निघं० ३ । ६ । अस्यति दोषाननेन सोऽसुः प्रज्ञा ताम्) ८. १६ ॥

असु-असुरा असुरताः स्थानेष्वस्ता स्थानेभ्य इति वा । अपि वासुरिति प्राणनामास्तः शरीरे भवति तेन तद्वन्तः नि० ३ । ८ । असुरिति प्रज्ञानाम, अस्यत्यनर्थान्, अस्ताश्चास्यामर्थाः नि० १० । ३४ । प्राणम् नि० ११ । १८ ।

तस्या एतस्यै वाचः प्राणा एवाऽसुः । एषु हीदं सर्वमसूतेति । जै० उ० १ । ४० । ७ ॥ प्राणो वाऽसुः । श० ६ । ६ । २ । ६ ॥

असुतः अनुत्पन्नः ७. २६. १ ॥

असुतृपः येऽसुषु प्राणेषु तृप्यन्ति ते १७. ३१ । "केवल स्वार्थ साधक, प्राणपोषण मात्र में ही प्रवृत्त ।" (३०६ आर्य०) ॥

असुनीतिम् याऽसून् प्राणान् नयति प्राप्नोति ताम् १६. ६० । "प्राणनीतिम्" (२७८ भूमि०) ॥ असुनीते असवः प्राणाः नीयन्ते येन सोऽसुनीतिस्तत्सम्बुद्धौ हे असुनीते ईश्वर १०. ५६. ६ (२११ भूमि०) ॥

असुनीतिः (मध्यमस्थानीयो देवता) असून्नयति । नि० १० । ३६ ॥

असुनोत् सुनोति १६. ३४ ॥

असुन्वन्तम् अभिषवादिनिष्पादनपुरुषार्थरहितम् १. १७६. ४ ॥

असुन्वता अपुरुषार्थिना ४. २५. ७ ॥

असुन्वतः यज्ञकर्तृविरोधिनः १. १०१. ४ । अयजमानस्य ५. ३४. ६ ॥

असुन्वताम् स्वैश्वर्यविरोधिनाम् शत्रूणाम् १. ११०. ७ ॥

असुम्नाः दुःखानि ३५. १ ॥ (सुम्नमिति सुख नाम । निघं० ३ । ६) ।

असुरः सर्वेभ्यः प्राणदः (सूर्यः), सूर्योदये मृता इवोत्तिष्ठन्तीत्यतः, असुषु प्राणेषु रमते वा १. ३५. ७ ॥ असून् प्राणान् राति ददाति, अविद्यमानरूपगुणो वा सोऽसुरो वायुः (आतोऽनुपसर्गे कः ३ । २ । ३ । इत्यसूपपदाद्रा धातोः कः) १. ३५. १० । प्राणेषु सुखदाता ५. २५. १ । असुषु प्राणेषु रममाणो विद्युदग्निरिव ७. ५६. २४ । प्रक्षेप्ता ३४. २६ । मेघो वा यः प्रज्ञां राति ददाति सः (असुर इति मेघनाम । निघं० १ । १० । असुर इति प्रज्ञा नाम निघं० ३ । ६) १. ५४. ३ । प्रकाशरहितो वायुः २७. १२ ॥ असुरो (असुरा) प्राणवद्बलिष्ठो (अत्राकारादेशो बहुलं छन्दसीति ह्रस्वश्च) १. १५१. ४ ॥ असुराः प्रकाशरहिताः १. ६४. २ । अविद्वांसो दुष्टस्वभावाः प्राणिनः २. २६ । धर्मच्छादकाः २. ३० ॥ असुरम् मेघमिव वर्तमानम् ७. २. ३ ॥ असुरैः अविद्वद्भिः अन्तकरूपाभिः प्रजाभिर्वा १७. २६ ॥ असुरस्य योऽस्यति दोषान्, प्राणेषु रममाणो वा तस्य ३. ३८. ४ । विदुषः शत्रोः २. ३०. ४ । हिंसकस्य विद्युदाख्यस्याग्नेः ३३. २२ ॥ असुर अविद्यमाना सुरा मद्यपानं यस्य तत्सम्बुद्धौ २. २७. १० ॥

असुरः मेघनाम निघ० १ । १० ॥

असुरः, देवाश्च वा असुराश्च प्रजापतेर्द्वयाः पुत्रा आसन् । तां० १८ । १ । २ ॥ असुरः, तेऽसुरा भूयांसो

बलीयाꣳस (प्रजापतेः पुत्राः) आसन् । तां० १८ । १ । २ ॥ असुरः, कनीयस्विन इव वै तर्हि (युद्धसमये) देवा आसन् भूयस्विनोऽसुराः । तां० १२ । १३ । ३१ ॥ असुरः, कानीयसा एव देवा ज्यायसा असुराः श० १४ । ४ । १ । १ ॥ असुरः, (असुराः) स्वेष्वे वास्येषु जुह्वतश्चेरुः । श० ११ । १ । ८ । १ ॥ असुरः, मायेत्यसुराः (उपासते) । श० १० । ५ । २ । २० ॥ असुरः, असुरमायया । कौ० २३ । ४ ॥ असुरः, आसुरी माया स्वधया कृतासीति प्राणो वाऽसुस्तस्यैषा माया स्वधया कृता । श० । ६ । ६ । २ । ६ ॥ असुरः, (प्रजापतिः) तेभ्यः (असुरेभ्यः) तमश्च मायां च प्रददौ । श० । २ । ४ । २ । ५ ॥ असुरः, अहर्वै देवा अश्रयन्त रात्रीमसुराः । ऐ० ४ । ५ ॥ असुरः, अहर्वै देवा आश्रयन्त रात्रीमसुराः । गो० उ० ५ । १ ॥ असुरः, (असुराः प्रजापतिमब्रुवन्) दयध्वमिति न आत्थेति । श० १४ । ८ । २ । ४ ॥ असुरः, योऽपक्षीयते तं (अर्धमासं) असुराः उपायन् । श० १ । ७ । २ । २२ ॥ असुरः, असुरा वा एषु लोकेष्वासꣳस्तान्देवा ऊर्द्धसन्नेन (साम्ना) एभ्यो लोकेभ्यः प्राणुदन्त । तां० ६ । २ । ११ ॥ असुरः, ततोऽसुरा एषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिँल्लोके रजतामन्तरिक्षे हरिणीं (सुवर्णमयीं) दिवि । श० ३ । ४ । ४ । ३ ॥ असुरः, अर्वा (भूत्वा) असुरान् (अवहत्) । श० १० । ६ । ४ । १ ॥ असुरम्, मनो वा असुरम् । तद्ध्यसुषु रमते । जै० उ० ३ । ३५ । ३ ॥

असुरघ्निः दुष्टकर्मकारिणां हन्ता ६.२२.४ ॥

असुरऽत्वम् यदसुषु प्राणेषु रमते तत् ३. ५५. १ ॥

असुरत्वमेकं प्रज्ञावत्त्वं वा, अनवत्त्वं वा । असुरिति प्रज्ञा नाम, अस्यत्यनर्थान् अस्ताश्चास्यामर्थाः । अपि वा असुरत्वमादिलुप्तम् । नि० १० । ३४ ॥

असुर्यः असुभ्यः प्राणेभ्योहितः ३३. ४० ॥

असुर्याः असुराणां प्राणपोषणतत्पराणामविद्यादियुक्तानामिमे सम्बन्धिनस्तत्सदृशाः पापकर्माणः ४०. ३ ॥

असुर्यम् असुरस्य मेघस्येदं स्वकीयं स्वरूपम् ७. ५.६ । असुरेषु मेघेषु प्राणक्रीडासाधनेषु भवं द्रव्यम् ८. २४ । असुरसम्बन्धिनम् ५. १०. २ । असुरेभ्यो विद्वद्भ्यो हितम् ५. ६६. २ । असुराणामविदुषां स्वं धनम् २. २७. ४ । असुराणां मूढानां पापिनामिदमैश्वर्यम् ६. २०. २ । असुरेषु अविद्वत्सु भवम् ६. ३६. १ ॥ असुर्याणि असुराणां मेघादिनामिमानि चिह्नानि ४. ४२. २ ॥ असुर्यात् असुराणां दुष्टानां निजव्यवहारात् १. १३४. ५ ॥ असुर्ये असुरेषु प्रवासरहितेषु साधो २. २३. २ ॥

असुवत् ऐश्वर्ययोगं कुर्यात् १. ११०. ३ ॥

असुस्वीन् येऽसूनभिषुन्वन्ति तान् ४. २४. ५ । अभिषवस्याकर्तॄन् ६. ४४. ११ ॥

असुस्वेः अलसस्याऽनिष्पादकस्य ४. २५. ६ ॥

असूत [असूत] सूते जनयति ३. ३६. ३ । ५. ७. ८ ॥

असूदयत् सूदयत् क्षरयेत् ३. ३१. ७ ॥

असूदयतम् सञ्चालयेयुः १. ७२. ३ ॥

असूम् याऽस्यति प्रक्षिपति ताम् ३०. १४ ॥

असूर्त्ते अप्राप्ते परोक्षे (अत्र सृधातोः क्तान्तं निपातनम् । न सत्तनिषत्तेत्यनेन निपात्यते अ. ८।२।६१) १७. २८ ॥

असूर्त्ते असुसमीरिताः वातसमीरिता माध्यमिका देवगणाः । नि० ६ । १५ ॥

असूर्ये अविद्यमानः सूर्यो यस्मिँस्तस्मिन् ५. ३२. ६ ॥

असृक् रुधिरम् १. १६४. ४ ॥

असृक्षत सृजेयुः १. १३५. ६ । सृजन्तु ५. ५२. ६ ॥

असृक्षि सृजामि २. ३५. १ ॥

असृज्महि संसृजेम (व्यत्ययेनात्मनेपदम्) २०. २२ ॥

असृग्रम् सृजामि विविधतया वर्णयामि (बहुलं छन्दसि अ० ७ । १ । ८ अनेन सृज-धातोरुडागमः । वर्णव्यत्ययेन जकार-स्थाने गकारः लडर्थे लङ् च) १. ६. ४ ॥

असृजः [असृजः] सृजाति १. ३२. १२ । सृजेः १. १३०. ५ । सृजेत् ६. १७. ६ ।

असृजत् सृजाति १०. ३३. १३ । सृजते ३. १. ९ ।

असृजत युक्त करो १. ११०. ८ ॥

असृजन्त सृजन्ते ४. १६. २ ॥

असृज्यन्त सृज्यन्ते १४. २८ । उत्पादिताः १४. २६ ॥

असृज्येताम् रचे हैं १४. ३० ॥

असृपत् सर्पति १३. ३१ ॥

असेधः निवारयतु ५. ३१. ७ ॥

असेधत् सेधते ६. ४७. २१ ॥

असौ यह ५. १७. ३ । यह अज्ञान रूप शत्रु ७. ३ । वह दुष्ट ६. ३८ । सः १०. २० । वह

असौ अदोनामा ६. ३० ॥

अस्कन्नम् अविक्षुब्धम् २. ८ ॥

अस्कभायत् स्तभ्नाति १. १५४. १ । प्रति-बध्नाति ५. १८ ॥

अस्कभ्नाः प्रतिबध्नासि प्रतिबध्नाति वा ५. १६ ॥

अस्कृधोयु य आत्मनः कृधु ह्रस्वत्वं नेच्छति (अत्र सुपां सुलुगिति सुलोपः) ६. ६७. ११ । अस्थूलम् ७. ५३. ३ ॥

अस्कृधोयु अकृध्वायुः कृध्विति ह्रस्वनाम निकृत्तं भवति नि० ६ । ३ ।

अस्कृधोयुः अपरिच्छिन्नः ६. २२. ३ ॥

अस्तंऽतातिं गृहस्थम् ५. ७. ६ ॥

अस्तभायः स्तभान १. ६२. ५ ॥

अस्तभायत् स्तभ्नाति स्थिरीकरोति ६. ४४. २२ ॥

अस्तभ्नाः स्तभ्नाति २. १३. १० ॥

अस्तंभ्नात् [अस्तभ्नात्] स्तभ्नासि स्तभ्नाति धरति वा (अत्र लडर्थे लङ्) ४. ३० ॥ स्तम्भितवानस्ति (१४४ भूमि) ६. ४७. ५ ॥

अस्तम् अस्यन्ति दूरीकुर्वन्ति दुःखानि यस्मिँस्तद् गृहम् (अस्तमिति गृह नाम निघं० ३ । ४) १. ११६. ५ । प्रक्षिप्ताम् ४. १६. १० । प्रेरणा किये गये को ५. ६. १ ।

अस्तम् गृहनाम निघं० ३ । ४ ॥ गृहा वा अस्तम् । श. २ । ५ । २ । २१ ॥

अस्तंऽइव गृहं प्राप्येव १. ११६. २५ ॥

अस्तंऽईके समीपे १. १२६. ६ ॥

अस्तमीके अन्तिकनाम निघ० २ । १६ ॥

अस्तंभीत् उत्तभ्नाति ३. ५. १० ॥

अस्तारित्यस्तः योऽस्यति सः ७. १८. ११ ॥

अस्तवे असितुं प्रक्षेप्तुं (अत्र अस धातोः तुमर्थे तवेन् प्रत्ययः) १६. ३ ॥

अस्ता प्रक्षेप्ता १३. ६ ।

अस्ताऽइव गृहाणीव ४. ३१. १३ । प्रक्षेप्ता इव ६. ३. ५ । प्रेरकः सारथिरिव ६. २०. ६. । शस्त्रास्त्राणां प्रक्षेप्तेव ६. ६४. ३ ॥

अस्तारि तीर्यते ६. ६३. ३ ॥

अस्तावि [अस्तावि] स्तूयते १. १४१. १३ ॥

अस्ति भवति १. २२. ४ । वर्तते १. । ३३ २ ॥

अस्तुतः अप्रशंसितः ५. ६१. ८ ॥

अस्तुवत स्तुवन्तु १४. २८ ॥

अस्तृणन् [अस्तृणन्] विस्तारयन्ति ३. ६. ६ । आच्छादयन्तु ३३.७ । आच्छादयन्ति १. १८८. ४ ॥

अस्तृतः अहिंसितस्सन् १. ४१. ६ ॥

अस्तृतम् हिंसारहितम् १. १५. ५ ॥

अस्तोढ्वम् स्तुवत १. १६४. १३ ॥

अस्तोभयत् वन्धयति १. ८८. ६ ॥

अस्तोषत (१) स्तुत १. ८२. २ । (२) स्तुवन्ति (अत्र लडर्थे लुङ्) ३.५१ ॥

अस्तोषि (१)स्तौमि १. १२२. १ । (२)प्रशंससि ५ । ४१ । १० ॥

अस्तोष्ट स्तौति १. ७७. ५ ॥

अस्थन्वन्तम् अस्थियुक्तम् देहम् १.१६४.४॥

अस्थात् [अस्थात्] स्थितवानस्ति १.३५. १० ॥ तिष्ठति १. ६५. ४ ॥ तिष्ठेत् १. १४१. ७ ॥ तिष्ठते २. ४. ७. ॥ उत्तिष्ठति, उदेति ३४. २६. । वर्तते ४. ५१. १ ॥

अस्थापयन्त स्थापित करते १. १६७. ६ ॥

अस्थाम् तिष्ठेयम् ४. २८ ॥

अस्थि हाड़ १६. ८२ ॥ अस्थभिः अस्थिरैश्चञ्चलैः किरणचलनैः (अत्र छन्दस्यपि दृश्यते। अ १. ७. । अनेनानङादेशः) १. ८४. १३ ॥ अस्थभ्यः शरीरस्थकठिनावयवेभ्यः ३६. १० ॥

न ह्युर्वस्थात्किंचन वर्षीयोऽस्त्यस्ति । श० ८. ७. २. १७ ॥ षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि । श० १०. ५. ४. १२ ॥ सप्त च ह वै शतानि विंशतिश्च सवत्सरस्याहानि च रात्रयश्चाहानि च रात्रयश्चेत्येतावन्त एव पुरुषस्यास्थीनि च यज्जानश्चेत्यत्र तत्समम् । गो० पू० ५. ५ ॥ अस्थि वा एतत् । यत्समिधः । तै० १. १. ६. ४ ॥ अस्थीनि वै समिधः । श० ६. २. ३. ४६ ॥ अस्थीष्टकाः । श० ८. १. ४. ५ । ८. ७. ४. १६ ॥ अस्थि प्रतिहारः । जै० उ० १. ३६. ६ ॥

अस्थित [अस्थित] तिष्ठते १. ४०. ७ ॥

अस्थिरन् [अस्थिरन्] तिष्ठेरन् (अत्र लिङर्थे लुङ् वाच्छन्दसीति झस्य रनादेशः छान्दसो वर्णलोप इति सिचः सलोपः) १. ६४. ११. ॥ तिष्ठन्ति १. ८०. ८ । स्थिराः स्युः १. १३५. १ ॥

अस्थुः [अस्थुः] तिष्ठन्ति १. ११५. ३ । तिष्ठन्तु १. १२३. ६ । उत्तिष्ठन्तु ७. ६०. ४ ॥ तिष्ठेयुः १. १६०. ६ ॥ प्राप्नुवन्तु ४. ४१. ८ ॥ सन्ति ५. ७६. १ ॥

अस्थूरि (१) अस्थिरं यानम् ६. १५. १६. । (२) तिष्ठन्ति यस्मिन् आलस्ये तत् स्थूरि, तन्निन्दितं विद्यते यस्मिन् तत् स्थूरि; न स्थूरि यथास्यात्तथा (अत्र निन्दार्थ इनिः) २. २७ ॥

अस्ना रुधिराणि २५. ६ ॥

अस्नातारा स्नानादिकर्मरहितौ ४. ३०. १७ ॥ [अस्नातॄन्] अस्नातकान् २. १५. ५ ॥

अस्नाविरम् नाड्यादिसम्बन्धबन्धरहितम् ४०. ८. (१६२ सत्य) ॥

अस्पन्दमानः किञ्चिच्चलितस्सन् ४. ३. १० ॥

अस्पारित्यस्पः प्रीणय ५. १९. ५ ॥

अस्पष्ट स्पशते (अत्र लडर्थे लङ् बहुलं

छन्दसीति शपो लुक्) १. १०. २ ॥

अस्पृक्षः स्पृश (अत्र सर्वत्र लोडर्थे लङ्) ६. २ ॥

अस्पृक्षत् [अस्पृक्षत्] स्पृहेत् २८. १८ ॥

अस्पृध्रन् स्पर्धन्ताम् ६. ६६. ११ । स्पर्धन्ते ७. ५६. ३ ॥

अस्पृशत् स्पृशति ६. ८. २ ॥

अस्पृशन्त स्पर्श करते हैं (१४. २. ३२ ॥ अथर्व १७० विधि) ॥

अस्फुरत् स्फुरति सञ्चालयति वा २. १२. १२ ॥

अस्फुरत् वर्धयति २. ११. ६ ॥

अस्मऽत्रा अस्मासु १. १३२. २ ॥

अस्मत्रांचः ये शत्रुभ्यो अस्माँस्त्रायन्ते तान-ञ्चन्ति प्राप्नुवन्ति ते ६. ४४. १६ ॥

अस्मत्ऽसखा अस्माकं मित्रम् ६. ४७. २६ ॥ वयं सखायो यस्य सः ८. ५० ॥

अस्मद्र्यक् [अस्मद्र्यक्] योऽस्मानञ्चति प्राप्नोति सः ४. २२. ८ । योऽस्मानञ्चति जानाति ज्ञापयति वा ५. ४. २ । अस्माकं सम्मुखीभूतः ६. १६. १ ॥

अस्मद्राता येऽस्मभ्यं रान्ति शुभान् गुणान् ददति ते ७. ४६ ॥

अस्मऽध्रुक् अस्मान् द्रुह्यति यः सः १. ३६. १६ ॥

अस्मयुः अहमिवाचरन् १. १३५. २२ । अस्मान्कामयमानः १. ४२. १० । अस्मास्वात्मानमिच्छुः १.१३१.७ । आत्मनोऽस्मानिच्छुरिव ३. ४२. १ । योऽस्मान् पाति सः ५. ७४. ८ ॥ अस्मयुम् अस्मान्पाययितारम् (अत्रास्मदुपपदाद्या धातोरौणादिकः डुः । छान्दसो वर्णलोपो वेति द् लोपः) ११. १३ ॥

अग्निं भरन्तमस्मयुमित्यग्निं भरन्तमस्मत्प्रेप्सितमित्येतत् । श. ६ । ३ । २ । ३ ॥

अस्माकम् अस्माकम् (अत्र छान्दसो वर्णलोपो वेति म लोपः) १. १७३. १० (ऋक्) ॥

अस्माकासः येऽस्माकं मध्ये वर्तमानाः । (अत्रापि वाच्छन्दसि सर्वे विधयो भवन्तीति वृद्ध्यभावः) १. ६७. ३ । अस्मदीयाः ६. २५. ७ ॥

अस्मात् [अस्मात्, अस्मात्] इस से २. २३. ५ । इस लोक से

अस्मात् इस लोक से ३५. २२ ॥

अस्मिन् इस में ३. १. । इस जगत् में ६. ७ । १२. ३० ॥

अस्मे अस्माकम् (अत्र सुपां सुलुगित्यमः स्थाने शे आदेशः) ३. ११ । अस्मासु ४.२२२ । अस्मभ्यम् (अत्र भ्यसः स्थाने सुपां सुलुगिति शे इत्यादेशः) ८. १८ ।, मह्यम् १. ११४. ६ । अस्मान् ४. ५०. ११ । अस्माभिः १०. ३० ॥

अस्मे इति अस्मभ्यम् ।

अस्मे वयमित्यर्थः, अस्मानित्यर्थः, अस्माभिरित्यर्थः, अस्मभ्यमित्यर्थः, अस्मदित्यर्थः, अस्माकमित्यर्थः, अस्मास्वित्यर्थः । नि० ६ । ७ ॥

अस्मेराः या अस्मानीरयन्ति ताः (अत्र पृषोदरादिना तलोपः) २. ३५. ४. । (१२४ विधि०) ।

अस्मै (१६. ४१. १ अथर्व २३० विधि)
इसके लिये।
अस्य अस्य ५. १५।
अस्य दूरीकुरु ३. ८४. १। प्रक्षिप ६. ३७।
अस्यताम् पटकें १७. ६४॥
अस्यति प्रक्षिपति ३. ५३. २२॥
अस्यतु प्रक्षिपतु १. ११४. ४॥
अस्यथ प्रक्षिपत १. ३६. १॥
अस्यथ प्रचालयत ५. ५५. ६॥
अस्यन् प्रक्षिपन् ४. २२. २॥
अस्यसि प्रक्षिपसि ५. ८४. २ (ऋक्)॥
अस्रत् स्रंसताऽधः स्रवतु (लोडर्थे लङ्) ८. २८॥
अस्रवः स्रावयः ६. ६१. ३॥
अस्रवन्तीम् छिद्रादि दोषरहिताम् २१. ७॥
अस्राक् यः सृजति ४. ५३. ३। सृजति ४. ५३. ४॥
अस्रिधः अक्षयविज्ञानवन्तः (क्षयार्थस्य नञ् पूर्वकस्य स्रुधेः क्विबन्तस्य रूपम्) १. ३. ६। अहिंसनीयः १. १३. ६। अहिंसिताः ४. ४५. ४॥ अहिंसकः ५. ४६. ४॥
अस्रीवयः यदस्यति कामयते च तदस्रीवयो ऽन्नादिकम् १४. १८॥
अस्रेधन्तः (१) अक्षीणोत्साहाः ३. २६. ६। (२) अहिंसन्तः ७. ५६. ६॥ अस्रेधता (१) अक्षीणेन ३. १४. ५। (२) इतस्ततो गमनरहितेन स्थिरेण १८. ७५॥

अस्रेधन्ती साधयन्ती ५. ८०. ३॥
अस्रेमाणम् अक्षयम् ३. २६. १३॥
अस्रमाः प्रशस्य नाम। निघ. ३. ८॥
अस्वदयत् स्वादयति २. ४. ७॥
अस्वनीत् शब्दयेदुपदिशेत् ४. २७. ३॥
अस्वप्नजौ स्वप्नो न जायते ययोस्तौ ३४.५५॥
अस्वप्नऽजः (१) विद्याव्यवहारे जागृता अविद्या निद्रा रहिताः २. २७. ६। (२) जागरूकाः ४. ४. १२॥
अस्वं या दुष्कर्म न सूते, नोत्पादयति ताम् १. ११२. ३॥
अस्वरन् स्वरन्ति शब्दयन्ति ५. ५४. ८॥
अस्वेऽवेशं न स्वकीयो वेशो यस्य तम् ७. ३७. ७॥
अस्वापयत् स्वापयेत् ४. ३०. २१॥
अस्वार्ष्टा शब्दयन्तः २. ११. ७॥
अह निश्चये १. ११६. ८। निरोधे १. १४०. ६। विशेषेण ग्रहणे ५. ३४. ३। इस के अनन्तर ६. ३८. ४॥
अह अह इति च ह इति च विनिग्रहार्थीयौ। नि० १। १५॥
अहऽइव अहानीव ७. ३४. ५॥
अहः दिने ३. ४८. २॥ व्याप्ति शीलम् ६. ६. १॥ दिनम् १५. ६.। प्रतिदिनम् ३८. १२॥ अहनी रात्रिदिने १. १२३. ७॥
अहः (दिनम्) उपाहरन्त्यस्मिन् कर्माणि। नि० २। २१ अहनी अहोरात्रे। नि० ३. २२॥
अहर्म्मित्रः। तां० २५। १०। १०॥ अहर्वै मित्रः। ऐ० ४। १०॥ अहरेव सविता। गो० पू० १। ३३॥ अहः यज्ञो वै स्वः (यजु० १। ११) अहर्देवाः सूर्यः। श० १। १। २। २॥ अहः स्वर्गः। श०

१३ । २ । १ । ६ ॥ अहर्वै स्वर्गो लोकः । ऐ० ५ । २४ ॥ अग्निर्वाऽहः, सोमो रात्रिः । श० ३ । ४ । ४ । १५ ॥ अहः यजुष्मत्यः (इष्टकाः) ज्योतिस्तद्ध्यह्नो रूपम् । श० १० । २ । ६ । १७ ॥ अहर्वै पान्तम् (ऋ० ८ । ६२ । १ ॥) । तां० ६ । १ । ७ ॥ अहर्वै शबलो रात्रिः श्यामः । कौ० २ । ६ ॥ अहर्व्युष्टिः । तै० ३ । ८ । १६ । ४ ॥ अहर्वै वियच्छन्दः (यजु० १५ । ५) । श० ८ । ५ । २ । ५ ॥ अहः सब्दामहः (सब्द=ऋतुविशेषः, तैत्तिरीय संहितायाम् ४ । ४ । ७ । २ ॥ सायणभाष्येऽपि) श० १ । ७ । २ । २६ ॥ अहः (पूर्वपक्षापरपक्षयोः) यान्यहानि ते मधुवृषाः । तै० ३ । १० । १० । १ ॥ अहर्वै विष्णुक्रमाः । श० ६ । ७ । ४ । १२ ॥ अहः ब्राह्मणो वाऽएतद्रूपं यदहः । श० १३ । १ । ५ । ४ ॥ अहः ब्रह्मणो वै रूपमहः क्षत्रस्य रात्रिः । तै० ३ । ६ । १४ । ३ ॥ अहः अहर्वार्हितम् । ऐ० ५ ३० ॥

अहः॒ऽअहः प्रतिदिनम् २. ३०. १. ॥

अहः॒ऽविदः य अहर्विज्ञान प्रकाशं विन्दन्ति प्राप्नुवन्ति ते १. २. २ ॥ [अहर्विदं] योऽहानि विन्दति तम् १. १५६. ४ ॥

अहतं हन्यातम् १. ११६. २१ ॥

अहतौ न हतौ हिंसितौ १६. ११ ॥

अहन् [अहन्] हंसि १. ६३. ३ । दूरी कुर्य्याः ६. २६. ३ । हतवान् हन्ति हनिष्यति वा १. ३२. २ (३०२ भूमि) । जहि १. ३२. ४ । हन्यात् १. १०१. २ । हन्याः ४. ३०. ५ ॥

अहन् अहनि दिने १. ३४. ३ ॥ [अहना] दिवसेन व्याप्त्या वा (अत्र वाच्छन्दसीत्यल्लोपो न) १. १२३. ४ ॥

अहना उषोनाम । निघ० १ । ८ ॥

अहनी इति अहर्निशम् १. १८५. १

अहन्त्यै या कश्चिन्न हन्ति तस्यै १६. १८ ॥

अहन्यः अहनिभवाः १. १६८. ५ ॥ [अहन्यैभिः] दिनैः ५. ४८. ३ ॥

अहम् अहम् १. ५ । २. २७. २८ । ३. १६ । ४. २३ । ५. ११, २२, २३, ४, २६, ३६ । ६. १ । ६. १६. २ । ८. ६, १३, ३७. ३८, ३६, ४० । ६. ४, १०.४, १३ । १०. २३ । ११. ४६, ७१, ८१, ८२ । १२. ६४, ७५, ८५, ६५, १००, १०५ । १५. ४६ । १६. ८ । १७. ६७, २. ७४ । १८. ३५ । १६. ३५, ४७, (२१३ भू०) ५६ । २०. २४, ३२ । (२२६ विधि) २३. १६ । २३, ६० । ३१. १८ । ३६. १८ (२६२ विधि) । (६८ भूमि) (१८२ आर्य्य) ३७. २० । ४०. १७ ।

अहंऽपूर्वः अयमहमित्यात्मज्ञानेन पूर्णः १. १८१. ३ ।

अहंऽयुः अहं विद्यते यस्मिन्त्सः १. १६७. ७ ।

अहये मेघाय ५. ३१. ४ ।

अहरहः प्रतिदिनम् ११. ७५ ।

अहरिति व्यापनशीलं दिनम् १. ७१. २ । दिनम् ६. ६. १ । ६. ४८. १७ ।

अहर्पतये पुरुषार्थेन गणितविद्यया दिवसपालकाय ६. ३० ॥

अहविः अविद्यमानं हविरादानमदनं वा यस्य सः १. १८२. ३ ॥

अहस्तः अविद्यमानौ हस्तौ यस्य सः १. ३२. ७ ॥

अहाऽइव अहानीव ४. ३३. ६ ॥

अहाः त्यजति (अत्र ओहाक् त्यागे इत्यस्माल्लुङि प्रथमैक वचने आगमानुशासनस्य नित्यत्वात् सगिटौ न भवतः) १. ११६. ३ (१६८ भूमि) ॥

अहार्षम् हरेयम् १२. ११ ॥

अहाबि (अहा+वि) अह्न=अह्नानि ५. ८६. ६८ । ह्रूयेत २०. ७६ ॥

अहासत ज्ञापयन्ति (अत्र ओहाङ् गतावित्यस्माल्लडर्थे लुङ्) १. ६. ४ ॥

अहिंसानस्य हिंसा रहितस्य ५. ६४. ३ ॥

अहिंस्यमानः अहिंसितः सन् १. १४१. ५ ॥

अहिः मेघः ३४. ५३ । समस्तविद्यासु व्यापनशीलः ५. ३३ । सर्पवत् ६. १२ । क्रुद्धो विषधरः ८. २३ ॥ अहिम् सर्पं शत्रुं वा १०३. ७ । मेघमिव चेष्टमानसुन्नतम् ६. १६ ॥ अहीन् सर्पवत् प्राणान्तकान् रोगान् १६. ५ ॥

अहिः मेघनाम । निघ० १ । १० ॥ उदकनाम । निघ० १ । १२ ॥ अहिः अयनात्, एति अन्तरिक्षे । अयमपीतरोऽहिरेतस्मादेव, निर्ह्रसित उपसर्ग आहन्तीति । नि० २ । १७ ।

अही गो नाम । नि० २।११। द्यावापृथिव्योर्नाम । निघ० ३ । ३० ॥ अथ (वृत्रः) यदपात्समभवत्तस्मादहिस्तं दनुश्च दनायुश्च मातेव च पितेव च परिजगृहतुस्तस्माद्दानव इत्याहुः । श० १ । ६ । ३ । ६ ॥

अहिःऽइव मेघ इव ६. ७५. १४ ॥

अहिऽगोपाः अहिना मेघेन गोपा गुप्ता आच्छादिताः १. ३२. ११ ।

अहिगोपाः अहिना गुप्ताः । नि० २ । १७ ॥

अहिऽघ्ने योऽहिं हन्ति तस्मै सूर्याय ६. १८. १४ ॥ २. ३०. १ ॥

अहिन्वन् वर्धयन्ति ३. ३१.५ ॥

अहिऽभानवः अहेर्मेघस्य प्रकाशकाः १. १७२. १ ॥

अहिऽमन्यवः येऽहिं मेघं मानयन्ति ज्ञापयन्ति ते १. ६४. ८ ॥

अहिऽमायस्य अहेर्मेघस्य मायाच्छादनमिव कापट्यं यस्य तस्य ६. २०. ७ ॥

अहिऽमायाः मेघस्य मायाः कुटिलगतयः ६. ५२. १५ ॥

अहिऽमायान् अहेर्मेघस्य माया इव माया प्रज्ञा येषां तान् १. १६०. ४ ॥

अहिऽशुष्म योऽहिं मेघं शोषयति स सूर्यस्तद्वद्वर्तमानः ५. ३३. ५ ॥

अहिंसतीम् हिंसादि दोष रहित (६. ३. २२ अथर्व २०५ विधि) ॥

अहिंसन् अनाशयन् रक्षन्सन् ३. ६१ ॥

अहिऽहत्याय मेघहननाय १. १३०.४ ॥

अहिहत्ये अहेर्मेघस्य हत्या हननं पतनं येन तस्मिन् (निमित्तार्थे अत्र सप्तमी) ३. ३२. १२ ॥

अहिऽहा मेघस्य हन्ता २. १६. ३ ॥

अहुतादः येऽहुतमदन्ति ते १७. १३ ॥

अहुतादो हि प्राणः । श० ६ । २ । १ । १४ । अथैता (प्रजाः) अहुतादो यद्राजन्यो वैश्यः शूद्रः । ऐ० ७ । १६ ॥

अहुवे जुहोमि (अत्र वहुलं छन्दस्यमाङ् योगेपीत्यडागमः) २. ३७. २ ॥

अहूमहि प्रशंसेम ६. ४५. १०. १० ॥

अहूपत आह्वयन्ति, शिल्पार्थं स्पर्धयन्ति वा । (अत्र लडर्थे लुङ् वहुलं छन्दसीति सम्प्रसारणं च) १. १४. २ । स्पर्द्धन्ताम् १. ४६. ४ । उपादिशत १.४५. ४ ॥

अहृणीयमाना क्रोधरहिताचरणौ सन्तौ ५. ६२. ६ ॥

अहृषत हरत ३५. १८ ॥

अहेडन् अनादरमकुर्वन् १५. १ ॥ अहेडता अनादृतेन २. ३२. ३ ॥

अहेडमानः सत्कृतः १८. ४६ ॥

अहेडमानः अक्रुध्यन्। नि० ४।२५ ॥ अहेडमानो वरुणेह बोधीत्यक्रुध्यन्तो वरुणेह बोधीत्येतत्। श० ६।४।२।१७ ॥

अहेम व्याप्नुयाम् २. १६. ७ ॥

अहोरात्रे अहश्च रात्रिश्चाहोरात्रे (हेमन्तशिशिरावहोरात्रे च छन्दसि। अ. २।४। २८ इत्यनेन नपुंसकत्वम्) ६. २१ ॥

अहोरात्रे स (प्रजापतिः) एतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयत्। तां० ४।१।१४॥ अहोरात्रे वा अश्वस्य मेध्यस्य लोमनी। तै० ३।६।२३।१॥ एते ह वै संवत्सरस्य चक्रे यदहोरात्रे। ऐ० ५।३०॥ अहोरात्रे परिवेष्ट्री। श० ११।२।७।५॥ तमस्मा अक्षितिमहोरात्रे पुनर्दत्तः। जै० उ० ३।२२।८॥ मृत्योर्ह वा एतौ व्राजबाहू यदहोरात्रे। कौ० २।६॥ अहोरात्राणीष्टकाः (संवत्सरस्य)। तै० ३।११।१०।४॥

अहोरात्रे वा उषासानक्ता। ऐ० २।४॥ अहोरात्रे वै नक्तोषासा (यजु० १२।२ ॥)। श० ६।७।२।३॥ अहोरात्रे वै गोआयुषी। कौ० २६।२॥ अहोरात्रे वै नृवाहसा। तै० ३।६।४।३॥ (आदित्यस्य) प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ (यजु० १५।१७) इति दिक् चोपदिशा चेति ह स्माह माहित्थिरहोरात्रे तु ते, ते हि प्र च म्लोचतो ऽनु च म्लोचतः। श० ८।६।१।१८॥ अहोरात्रे तद्वाऽ अहोरात्रेऽ एव विष्णुक्रमा भवन्ति। श० ६।७।४।१०॥ अहोरात्रे वात्सप्रम् (सूक्तम्)। श० ६।७।४।१०॥ यौ द्वौ स्तोभावहोरात्रे एव ते। जै० उ० १।२१।५॥ अहोरात्रे वै रौहिणौ (पुरोडाशौ)। श० १४।२।।२॥ अहोरात्रौ वै मित्रावरुणौ। तां० २५।१०।०॥ अहोरात्रे वै पिशंगिले। श० १३।२।६।१७॥ अहोरात्राणि वाऽ उपसदः। श० १०।२।५।४॥ अहोरात्राणि हिङ्कारः। ष० ३।१॥ अहोरात्राणि वै वरूत्रयोऽहोरात्रैर्हीदं सर्वं वृतम्। श० ६।५।४।८॥ अहोरात्राणां वाऽ एतद्रूपं यद्धानाः। श० १३।२।१।४॥

अह्यन् व्याप्नुवन् ६. ४०. २ ॥

अह्यर्षूणां येऽर्हिं मेघं प्राप्नुवन्ति तेषाम् २. ३८. ३ ॥

अह्रयः ये सद्योऽन्हुवन्ति व्याप्नुवन्ति यानानि मार्गास्ते १. ७४. ८ ॥ आरुहन्ति व्याप्नुवन्ति सर्वा विद्याः ये ते विद्वांसः (अत्राह व्याप्तावित्यस्माद् बाहुलकेनौणादिकः क्रिः प्रत्ययः। महीधरेणायं ह्री लज्जायामित्यस्य प्रयोगऽशुद्ध एव व्याख्यात इति) ३. १६ ॥

[अह्रयम्] लज्जादि दोष रहितम् ५.७६.५ ॥

अह्रयाणम् विगतलज्जम् प्रकाशितम् (अत्र नञ् पूर्वाद्ध्रीधातोर्बाहुलकादौणादिक आनच् प्रत्ययः) १. ६२. १० ॥

अह्रयाणः अह्रीतयानः। नि० ५।१५ ॥

अह्रुतः अकुटिलः सरलः ६. ६१. ८ ॥

अह्रुतऽप्सवः अह्रुतं कुटिलं सूर्य्यरूपं यासां ताः (अत्र ह्वृह्वरच्छन्दसि। अ० ७।२।३६। अनेन ह्रुरादेशः। प्सिवति रूप नाम। निघं० ३।७) १. ५२. ४।

अह्वत् [अह्वत्] आह्वयति (अत्र लडर्थे लङ्) १. २४. १२. आह्वयेत् १. १०६. ६ ॥

अह्वन्त आह्वयन्ते ४. ६. ६ ॥

अह्वयत् उपदिशेत् १. ११७. १८। आह्वये १. ११७. १६ ॥

अव्हाम इच्छेम । ६. ५०. ४ ॥

अव्हे अन्हुवन्ति व्याप्नुवन्ति यस्मिन् व्यवहारे तस्मिन् १. ६६. ३ ॥

अव्हे आह्वयामि १. ५२. ३ । आह्वयेयम् ३. ५६. ४ ॥

अह्वताम् आह्वयतः २८. १४ ॥

आ

आ समन्तात् १. २१. ४ । क्रियार्थे १. ३२. ३ । धात्वर्थे १. १०. २ । आधारार्थे १. २६. २ । मर्यादायाम् १. ३०. २१ । आभिमुख्ये १. ४२. ५ । अनन्तरे १. ६७. ४ ॥

अर्वागर्थे। नि० १।३। एतस्मिन्नेवार्थे (समुच्चयार्थे) देवेभ्यश्च पितृभ्य एत्याकारः॥ नि० १. ४। उपमार्थे दृश्यते। नि० ३। १६ ॥ अध्यर्थे दृश्यते। नि० ५। ५ ॥

आऽअये यत्समन्तादय्यते तस्मिन् २. ३८. १० ॥

आऽरणे सर्वतो युद्धभावे १. ११२. ६ ॥

आऽईता एतौ वर्त्तमानौ ३. ३६. ३ ॥

आऽइष्टौ समान्तादृयज्ञक्रियायाम् ६. २१. ८ ॥

आऽईयुषीणां समन्तादतीतानामुषसाम् १. १२४. ४ ॥

आऽईरिरे समन्तात्प्राप्नुवन्तः । (ईर गतौ कम्पने चेत्यस्यामन्त्र इति प्रतिषेधादामोऽभावे प्रयोगः) १. ६. ४ । समन्ताज्जानीयुः १. १४३. ४ ॥

आऽउक्ता समान्तादुक्तानि प्रशंसितानि १. ६३. ६ ॥

आऽकरः समूहः ५. ३४. ४ ॥

आऽकार्य्यस्य समन्तात्कार्ये भवस्य ४. २६. ५ ॥

आकीम् समन्तात् १. १४. ६ ।

आकीम् सर्वपदसमाम्नानाय । निघ० ३ । १२ ॥

आकूतात् उत्साहात् १८. ५८ ॥

आऽकूतिः अध्यवसायः उत्साहः १०. १६१. ४. (६१ भूमि०) ॥ (आकूतिम्) उत्साहकारिकां क्रियाम् ११. ६६ ॥

आके समीपे २. १. १० ॥

आके अन्तिक नाम। निघ० २। १६। दूर नाम। निघ० ३। २६ ॥

आकेऽनिपासः य आके समीपे नितरां पान्ति ते किरणाः ४. ४५. ६ ॥

आकेनिपः मेधावि नाम । निघ० ३ । १५ ॥

आक्रन्दयते यो दुष्टानाक्रन्दयते रोदयति तस्मै न्यायाधीशाय १६. १६ ॥

आक्रमः समन्तात्क्रमन्ते पदार्था यस्मिन्नन्तरिक्षे तस्य विज्ञापकः १५. ६ ॥

आक्रमाय 'अन्तरिक्ष को जानने के लिये, १५।६॥

आक्रमणम् 'चाल को' २५. ३. फ ॥

आक्रम्य 'पादाक्रान्त करके' ११. १६ ॥

आक्रयायै आक्रमन्ति प्राणिनो यस्यां तस्यै हिंसायै ३०. ५ ॥

आऽक्षित् यः समन्तात् क्षियति सर्वत्र वसति सः ३. ५५. ५ ॥

आऽक्षितम् समन्तादनष्टमिव ५. ७. ७ ॥

आक्षिषुः व्याप्नुवन्ति १. १६३. १० । प्राप्नुयुः २६. २१ ॥

आक्षिपुः आपन् । नि० ४ । १३ ॥

आखरेष्ठः समन्तात् खनति यं तस्मिन् तिष्ठतीति सः (खनोडडरेकेकवकाः । अ०

३ । ३ । १२५ अनेन वार्तिकेनाऽऽस्वरः सिद्ध्यति) २. १ ॥

आखिदते आ समन्ताद्दीनायैश्वर्योपक्षीणाय १६. ४६ ॥

आखुः समन्तात्खनति अवदृणाति येन भाजन साधनेन सः (अत्र आङ् परयोः खनि शृभ्यां डिच्च। उ० १. ३३. इति कु प्रत्ययो डित् संज्ञा च) ३. ५७ । मूषकः २४. ३८ ॥

आगः अपराधम् १. १७६. ५ ॥

आग आङ् पूर्वाद्गमेः।नि० ।२१॥

तद्यास्तिस्र आगा इम एव ते लोकाः । जै. उ. १।२०।७॥

आगच्छात् समन्तात्प्राप्नुयात् १८. ६० ॥

आगच्छेत् गच्छेत् (१५. ११. १ अथर्व २८६ भूमि) ॥

आगतः समन्तात्प्राप्तः सहायकारी पुरुष इव ८. ५६ ॥

आगतम् आगच्छतम् (गम्लृ गतावित्यस्माद् बहुलं छन्दसीति शपो लुकि सति ङित्वा-भावाच्छस्याभावोऽनुदात्तोपदेशेत्यादिना मलोपश्च) ७. ८ ॥

आगतिः आगमनम् २०. १३ ॥ [आऽगतौ] समन्तात्प्राप्तौ २. ५. ६ ॥

आऽगत्य प्राप्त होकर (अत्र संहितायामिति दीर्घः) ३. ३५. ८ ।

आऽगधिता समन्ताद्गृहीता (गध्यं गृह्णातेः । नि० ५. १५) १. १२६. ६ ॥

आगधिता गध्यतिर्मिश्रीभावकर्मा । नि० ५।१५॥

आऽगमत् आगच्छतु ३. ४२. ४ । आगच्छेत ५. ४२. ७ ॥

आऽगमन् आगच्छन्तु ५. ५६. २ । आगच्छन्ति १७. ७. ८ ॥

आऽगमिष्ठः अतिशयेनाऽऽगन्ता ३. ५८, ६ ॥

आगमिष्ठाः आगच्छन्तु (अत्र लोडर्थे लुङ् पुरुष व्यत्ययः) १६. ५६ ॥

आग्नावैष्णवाः अग्निवायुदेवताकाः । २४. ८ ॥

आग्निमारुताः अग्निवायुदेवताकाः। २४. ७ ॥

आग्निऽवेशिं योऽग्निं प्रवेशयति तम् ५. ३४. ६ ॥

आग्नीध्रम् ऋत्विजः शरणम् १६. १८ ॥

आग्नीध्रात् अग्निरिध्यते प्रदीप्यते यस्मिंस्तस्यदं शरणं आश्रयणं तस्मात्। (अग्नीधः शरणे रञ् भं च। अ० ४ । ३ । १२० अनेन वार्तिकेणाधिकरणवाचिनः क्विबन्ताद्ग्नीध्र प्रातिपदिकादम् प्रत्ययः) २. १० । अन्नाशयात् २. ११ । अग्निं धरति यस्मात्तस्मात् २. ३६. ४ ॥ आग्नीध्रे प्रदीपनसाधन इन्धनादौ ८. ५६ । अग्नीधः शरणे ३८. १८ ॥

द्यावापृथिव्यौ वाऽएष यदाग्नीध्रः। श० ११ । ८ । ४ । ४१ । वसन्त आग्नीध्रस्तस्माद्वसन्ते दावाश्चरन्ति तद्ध्यग्निरूपम् । श० ११ । २ । ७ । ३२ ॥ अन्तरिक्षमाग्नीध्रम् । तै० २ । १ । ५ । १ । अन्तरिक्षं वाऽआग्नीध्रम् । श० ६ । २ । ३ । १५ ॥

आग्नेयी अग्निदेवता वाली २४. ३१ ॥

सा या मन्द्रा साऽऽग्नेयी (आगा) । जै० उ० १ । १ । २७ । २ ॥

आग्रयणः समन्तादग्राणि विज्ञानयुक्तानि प्रशस्तानि कर्माण्यस्य सः (शकन्ध्वादिषु पररूपं वाच्यम् । इति पररूपम्) ७. २० । अगति प्राप्नोति येन तस्यायम्

१३. ५८ । मार्गशीर्षादिमासनिष्पन्नो यज्ञ विशेषः १८. २० ।

यां वाऽग्रमुं ग्रावाणमाददानो वाचं यच्छत्यत्र वै साग्रेऽवदत्तथत्साग्रेऽवदत्तस्मादाग्रयणो नाम । श० ४ । २ । २ । ६ ॥ आत्मा वा आग्रयणः । ४ । २ । २ । ५ । ४ । ५ । ४ । ६ ॥ संवत्सराद्वा एतदधिप्रजायते यदाग्रयणम् । गो० उ० १ । १७ ॥

आघृणिः समन्ताद् घृणयो दीप्तयो यस्य सः १. २३. १४ ॥

आघृणे समन्तात् पशु विद्याप्रकाशक ६. ५२. ६ । समन्ताद्देदीप्यमान ६. ५५. १ । सर्वतो न्यायकारिन् ६. ५३. ८ ॥

आघृणिः आगतहृणिः । नि० ५ । ६ ॥

आऽघोषते उच्चरति १. ८३. ६ ॥

आङ्गिरसः योऽङ्गिरसां वायुविद्युतामयमुत्पन्नः ६. ७३. १ । अंगिरसो विदुषा कृतो विद्वान् १६. ७३ ॥ [आङ्गिरसान्] अङ्गिरस्सु प्राणेषु साधून् ६. ३५. ५ ॥ [आङ्गिरसस्य] अंगिरस्सु प्राणेषु भवस्य ४. ४०. १ ॥

सोऽयास्य आङ्गिरसः । अङ्गाना ँ हि रसः प्रारम्भे वाऽअङ्गाना ँ रसः । श० १४ । ४ । १ । २१ । स एष वाऽऽङ्गिरसः (अन्नाद्यम्) । अतो हीमान्यङ्गानि रसं लभन्ते । तस्मादाङ्गिरसः । जै० उ० २ । ११ । ६ ॥

आङ्गिरसि यांगिरोभिरग्न्यादिभिर्निर्वृत्ता सिद्धा सा (ऊव्वटमहीधराभ्यामिदं निघातत्वात्सम्बोधनान्तं पदमबुद्ध्वा व्याख्यातमत एतयोः स्वरज्ञानमपि नास्ति अर्थ ज्ञानस्य तु का कथा) ४. १० ॥

आङ्गूषः विद्वान् ३. ५८. ५ । अंगेषु भवा प्रशंसा ५. ७४. ८ ॥

आङ्गूषम् युद्धं प्राप्तं शत्रुम् १. ६१. २ । स्तुतिं प्राप्तम् १. ६१. ३ ।

विज्ञानं स्तुति समूहं वा (अत्र बाहुलकाद्गिधातोरौणादिक ऊषन् प्रत्ययः । अङ्गूषाणां विदुषामिदं विज्ञानमयं स्तुतिसमूहो वेति तस्येदमित्यण् । अङ्गूष इति पद नाम । निघं० ४ । २) १. ६२. १ । अङ्गूषाणां विद्यानां विज्ञापकमिदम् (अत्रांगिधातोरूषन्तस्तस्येदमित्यण् १. ११७. १० । प्राप्तव्यम् ६. १४. ५ । प्राप्नवन्तम् ७. २४. ३ । विद्याशास्त्रबोधम् (आंगूष इति पद नाम । निघं० ४ । २) ३४. १६ ।

आङ्गूषैः [आङ्गूषेभिः] स्तावकैः ४. २६. १ । समन्तात् घोषैः ३३. ७६ ॥

आङ्गूषः स्तोम आघोषः । नि० ५ । ११ ।

आङ्गूष्यम् [आङ्गूष्यम्] अंगूषाणां विज्ञानानां भावस्तम् १. ६२. २ । [आङ्गूषाय] सत्काराय बलाय वा हितम् ३४. १७ ॥

आऽचके सर्वतः सुखैस्तर्पयेत् १. ४०. २ ॥

आचके कान्ति कर्मा । निघं० २ । ६ ॥

आचक्रे सेवते (अत्र गन्धनावक्षेपण अ० १ । ३ । ३२ इति करोतेः सेवनात् आत्मनेपदम्) ३३. ८७ ॥

आऽचक्रिः समन्तात्कर्ता ६. २४. ५ ॥

आऽचखाद स्थिरीकरोति ६. ६१. १ ॥

आऽचरणेषु समन्ताच्चरन्ति जानन्ति व्यवहरन्ति येषु तेषु १. ४८. ३ ॥

आचरिक्रत् करोति (११. ५. ६ अथर्व २५१ भूमि०) ॥

आऽचरन्ती सत्याचरणं कुर्वती १. १६४. ४० ॥ समन्तात्प्राप्नुवत्यौ २६. ४१ ॥

आचरन्ती [इत्याचरन्ती] समन्तात्प्रिया-

चरणं कुर्वन्त्यौ ६. ७५. ४ ॥
आचार्यः विद्याऽध्यापकः (११. ५. ३ अथर्व २४६ भूमि०) ॥
आऽचिकेतत् समन्ताद्विजानाति ७. ४२. ४ ॥
आऽचितं सहितम् १. १८. २. २ ॥
आच्य अधोनिपात्य १६. ६२ ॥
आच्छत् दोषापवरणम् १५. ४ । समन्तातपापनिवारकं कर्म १५. ५ ॥
आछ्यति समन्ताच्छिनत्ति २३. ३६ ॥
आजः प्रापयसि ७. ५. ६ ॥
आजगन्थ आगच्छेः १२. १६ ॥
आऽजगन्वान् समन्तादगन्ता ७. ७. ५ ॥
आजग्म प्राप्नुवन्तु ८. १८ ॥
आजत् अजत्याकर्षणेन प्रक्षिपति वा १. ८३. ५ । प्राप्नोति ४. ५०. ५ ॥
आजत विजानीत १. १६१. ६ । प्रक्षिपति ३. ४४. ५ ॥
आजतम् जानीतम् १. ११२. १६ ॥
आजन् प्राप्नुवन्ति ४. १. १३ ॥
आऽजनिष्ठाः समन्ताज्जायसे ५. ३०. ५ ॥
आऽजभार समन्ताद्विभर्ति ७. ३३. १० ॥
आजऽमीळहासः येऽजान् विद्यया सिञ्चन्ति तदपत्यानि ४. ४४. ६ ॥
आऽजयन् समन्ताद्विजयमानः २. २७. १५ ॥
आऽजरसाय 'जरावस्था पर्यन्त जाने के लिये' १०. ८५. ४३ (१६४ विधि)

आऽजातः सर्वतः प्रसिद्धः १. १७६. ४ ॥
[आजाता] समन्ताज्जातौ ४. ४३. ३ ॥
आजानम् समन्ताज्जनानां मनुष्याणामिदं कर्तव्यं कर्म ३१. १७ ॥ [आजानेषु] समन्ताज्जायन्ते विद्वांसो यैस्तेषु पठनपाठनादिव्यवहारेषु ३३. ७२ ॥
आऽजानीः समन्तात्प्रसिद्धाः ३. १७. ३ ॥
आऽजिगाति समन्तात्प्रशंसयति १. ११७. २ ॥
आजिम् [आजिम्] प्रसिद्धम् ४. ५८. १० । अजन्ति जानन्ति सुकर्माणि येन तं संग्रामम् । (इणजादिभ्यः इतीण् प्रत्ययः) १७. ६८ ॥
आजिः संग्राम नाम । निघं० । २. १७ ॥
आऽजुहोति समन्तात् प्रक्षिपति स्थिरीकरोति ७. १. २३ ॥
आऽजुह्वानः कृतहोमः कृताऽऽमन्त्रणो वा १. १८८. ३ । कृताह्वानः ५. ३७. १ । समन्तात् स्पर्धमानः २६. २८ ॥ आजुह्वानाः समन्ताद्धोमस्य कर्तारः ७. २. ४ ॥ आजुह्वानस्य समन्तात्प्राप्तहुतद्रव्यस्य ७. १६. ३ ॥
आजुह्वाना समन्तात् शब्दायमाना २०. ५८ ॥
आज्यपाः य आज्यं विज्ञानं पान्ति रक्षन्ति ते २१. ४० । य आज्यं पातुमर्हं रसं पिबन्ति ते २१. ५८ । आज्यं पिबन्ति वाऽऽज्येन रक्षन्ति ते २८. ११ ॥
प्रयाजाऽनुयाजा वै देवा आज्यपाः । श० १ । ५ । ३ । २३ ॥
आज्यपानाम् गत्या पालकानाम् २१. ४६ ।

ज्ञातव्यरक्षकाणां रसानां वा २१. ४७ ॥

आज्यम् घृतादिकम् २. ८ । ज्ञातव्यं घृतवत्सारभूतम् १०. १०३. ३ (१५२ भूमि०) ॥ [आज्यस्य] यज्ञ सामग्रीम् (सुपां सुलुगिति द्वितीया स्थाने षष्ठी) २. १३ । विज्ञानस्य ५. ३५ । स्नेह द्रव्यस्य ६. १६ । घृतादेर्हविषः १०. २६ । घृतम् (अत्र कर्मणि षष्ठी) २१. २६ ॥

आज्यम् महिष्यभ्यनक्ति । तेजो वा आज्यम् । तै० ३ । ६ । ४ । ६ ॥ तेजो वा आज्यम् । तां० १२ । १० । १८ ॥ तेज आज्यम् । तै० १ । ६ । ३ । ४ ॥ २ । १ । ५ । ५ ॥ २ । ७ । १ । ४ ॥ अग्नेर्वा एतद्रूपम् । यदाज्यम् । तै० ३ । ८ । १४ । २ ॥ देवलोको वा आज्यम् । कौ० १६ । ५ ॥ एतद्वै देवानां प्रियतमं धाम (यजु० १ । ३१) यदाज्यम् । श० १ । ३ । २ । १७ ॥ एतद्वै देवानां प्रियं धाम यदाज्यम् । श० १३ । ३ । ६ । २ ॥ आज्यम् (= विलीनं सर्पिः) वै देवानां सुरभिः । ऐ० १ । ३ ॥ एषा हि विश्वेषां देवानां तनूः यदाज्यम् । तै० ३ । ३ । ४ । ६ ॥ एतद्वै जुष्टं देवानां यदाज्यम् । श० १ । ७ । २ । १० ॥ एतद्वै संवत्सरस्य स्वं पयः यदाज्यम् । श० १ । ५ । ३ । ५ ॥ रस आज्यम् । श० ३ । ७ । १ । १३ ॥ आज्यꣳह वाऽअनयोर्द्यावापृथिव्योः प्रत्यक्षꣳरसः । श० २ । ४ । ३ । १० ॥ पशव आज्यम् । तै० १ । ६ । ३ । ४ ॥ यज्ञो वा आज्यम् । तै० ३ । ३ । ४ । १ ॥ यजमानो वा आज्यम् । तै० ३ । ३ । ४ । ४ ॥ वज्रो ह्याज्यम् । श० १ । ३ । २ । १७ ॥ वज्रो वाऽआज्यं वज्रेणैवैतद्रक्षाꣳसि नाष्ट्रा अपहन्ति । श० ७ । ४ । १ । ३४ ॥ वज्रो वा ऽ आज्यं तद्वज्रेणैवैतन्नाष्ट्रारक्षाꣳस्यवबाधते । श० ३ । ६ । ४ । १५ ॥ वज्रो वा आज्यम् । कौ० १३ । ७ ॥ श० १ । ५ । ३ । ४ ॥ ३ । ३ । १ । ३ ॥ ३ । ४ । ३ । ११ ॥ तै० ३ । ८ । १५ । १ ॥ काम आज्यम् । तै० ३ । १ । ४ । १५ ॥ ३ । १ । ५ । १५ ॥ सत्यमाज्यम् । श० ११ । ३ । १ । १ ॥ प्राणो वा आज्यम् । तै० ३ । ८ । १५ । २३ ॥ रेतो वाऽआज्यम् । श० १ । ६ । २ । ७ ॥ ३ । ६ । ४ । १५ ॥ ६ । ३ । ३ । १८ ॥ रत आज्यम् । श० १ । ३ । १ । १८ ॥ १ । ५ । ३ । १६ ॥ तै० ३ । ८ । २ । ३ ॥ छन्दाꣳसि वा आज्यम् । तै० ३ । १ । ५ । ३ ॥ अयातयाम ह्याज्यम् । श० १ । ५ । ३ । २५ ॥ त्रैष्टुभमयनं भवत्योजस्कामस्याथकारणिधनमाज्येनामुष्मिँल्लोक उपतिष्ठते । तां० १३ । ४ । १० ॥ ईश्वरो वा एषोऽन्धो भवितोः । यच्चक्षुषाज्यमवेक्षते । निमील्यावेक्षेत । तै० ३ । ३ । ५ । २ ॥ आज्यानि (शास्त्राणि, स्तोत्राणि) आज्येन वै देवाः सर्वान् कामान जयन्त्सर्वममृतत्वम् । कौ० १४ । १ । ते वै प्रातराज्यैरेवाजयंत आयन् यदाज्यैरेवाजयंत आयंस्तदाज्यानामाज्यत्वम् । ऐ० २ । ३६ ॥ ते (देवाः) आजिमायन्यदाजिमायꣳस्तदाज्यानामाज्यत्वम् । तां० ७ । २ । १ ॥ तद्वा इदं षड्विधमाज्यं तूष्णींजपस्तूष्णींशंसः पुरोरुक्सूक्तमुक्थवीर्यं याज्येति । कौ० १४ । १ ॥ आत्मा वै यजमानस्याज्यम् । कौ० १४ । ४ ॥ वागेवाज्यम् । कौ० २ । ६ ॥ सर्वाणि स्वराण्याज्यानि (स्तोत्राणि) । तां० ७ । २ । ५ ॥

आज्यम् तेज आज्यम् । तै० ३ । ३ । ४ । ३ ॥ ३ । ३ । ६ । ३ ॥ (यजु० १ । ३१) तेजोऽसि शुक्रमस्यमृतमसि (आज्य !) । श० १ । ३ । १ । २८ ॥ एतद्वै मेध्यं वा द्वेतः । यदाज्यम् । तै० १ । १ । ६ । ४ ॥ मेधो वा एतद्वै मधुदैव्यं आज्यम् । तै० ३ । ६ । १२ । १ ॥ (= विलीनं सर्पिः) यदाज्यम् । ऐ० २ । २ ॥ तदाहुः । किन्देवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि । श० १ । ६ । १ । २० ॥ आज्यम् अथैषाज्याहुतिर्यद्धविर्यज्ञो यत्पशुः (= पशुयज्ञः) । श० १ । ७ । २ । १० ॥

आञ्जन् कामयन्ते ९. ६३. ३ ॥

आञ्जनीकारीम् आञ्जनीः प्रसिद्धाः क्रियाः कर्तुं शीलं यस्यास्ताम् ३०. १४ ॥

आडम्बराघातम् आडम्बरस्याघातकं कोलाहलकर्त्तारम् ३०. १६ ॥

आणिः कीलकम् ५. ४३. ८ ॥ [आणौ] संग्रामम् (आणाविति संग्राम नामसु पठितम् । निघं० २ । १७) १ । ३५ । ६ ॥

आणिः संग्राम नाम। निघं० २। १७। अरणात्। नि० ६। ३२॥

आण्डा अण्डवत् गर्भे स्थितान् १. १०४. ८ (१४८ आर्य्या०)। [आण्डौ] अण्डाकारौ वृषणौ २०. ६॥

आण्डौ आणी इव व्रीडयति तस्तम्भे। नि० ६। ३२॥ आण्डौ वै रेतः सिचौ, यस्य ह्याण्डौ भवतः स एव रेतः सिञ्चति। श. ७। ४। २। २४॥

आत् आनन्तर्यार्थे २. ५. ७। नैरन्तर्ये २. २४. ६। समन्तात् २. १७. ४। अद्भुते १. ३२. ४॥

२८ आत् अथ। नि० ४। ११॥

आऽततः व्याप्तः ६. २. ६॥

आऽततन्थ समन्तात्तनोति ३. २२. २। समन्तात्तनु १२. ४८।

आऽततन्वान् समन्ताद्विस्तारितवान् । ३. १. ५॥

आततम् समन्तात्ततं विस्तृतम् १. २२. २०॥

आऽततानं आतनोति विस्तृणाति ७. ४७. ४॥

आततान आतनोति। नि० १०। ३१॥

आततायिनें समन्तात्ततं विस्तृतं शत्रुदलमेतुं शीलमस्य तस्मै १६. १८॥

आतन्वन्ति समन्ताद्विस्तृणवन्ति १३. २२॥

आतन्वानेभ्यः समन्तात् सुखविस्तारकेभ्यः १६. २२॥

आऽतनिः विस्तारकः २. १. १०॥

आऽतपः [आऽतपः] समन्तात्प्रताप युक्तः १. ५५. १॥

आतपति समन्तात्तपति ३१. २०॥

आतप्याय आतपेषु भवाय १६. ३८॥

आतस्थिऽवांसः समन्तात्स्थिताः ५. ४७. २॥

आताः व्याप्ता दिशः। (आता इति दिङ्नाम निघं० १। ६) ३. ४३. ६॥

आता दिङ् नाम निघं० १। ६॥

आतान समन्तात्सुखं तनितः ६. १२॥

आत्ताम् २१. ४३ ॥ लेट्॥

आतिः पक्षि विशेषः २४. ३४॥

आतिथ्यम् यदतिथेर्भावः सत्काराख्यं कर्म वा ५. १। अतिथिवत्सत्कारम् ४. ४. १०॥

आतिथ्यरूपम् अतिथीनां भावः कर्म वाऽऽतिथ्यं तद्रूपं च तत् १६. १४॥

आतिष्ठन्तम् समन्तात् स्थिरम् ३३. २२। समन्तात् स्थितम् ३. ३८. ४॥

आऽतुजे बलकारकाय ७. ३२. ६॥

आतैः सततं गमकैः २६. ५॥

आत्मकृतस्य स्वयमाचरितस्य ८. १३॥

आत्मदाः य आत्मानं ददाति सः २५. १३॥

आत्मन्ऽवतीभिः प्रशस्ताऽऽत्मन्वन्तो विचारवन्तः क्रियाकुशलाः पुरुषा विद्यन्ते यासु ताभिः १. ११६. ३। स्वयं स्थिताभिः स्वात्मीयस्थिताभिर्वा (१६८ भूमि०)॥

आत्मन्ऽवन्तम् स्वकीयजनयुक्तम् १. १८२. ५॥

आत्मसनि आत्मानं सनति सम्भजति येन तत् १९. ४८॥

आत्महनः ये आत्मानं घ्नन्ति तद्विरुद्धमाचरन्ति ते ४०. ३॥

आत्मा अतति सर्वत्र व्याप्नोतीति सर्वान्त-
—
र्यामी परमात्मा स्वस्वभावे वा ४. १५।
७.४२। अतति शरीरमिन्द्रियाणि प्राणांश्च
व्याप्नोति सः १८. २६। स्वरूपम् ११. २०।
१. १५४.४। स्वयम्भुर्जीवः २०. ७। आत्म-
वत् ४०. ७। (२६२ विधि). तत्त्वमूलम्
१२. ८५॥ आत्मना स्वस्वरूपेणान्तःकर-
णेन च ३२. ११॥

आत्माऽततेर्वा, आप्तेर्वा, अपि वा आप्त इव स्याद्
व्याप्तिभूत इति। नि० ३।१५॥ आत्मा हृदये
(श्रितः)। तै० ३।१०।८।६॥ आत्मा वै तनूः।
श० ६।७।२।६॥ मध्यतो ह्ययमात्मा। श०।
६।२।२।१३॥ ८।१।४।३॥ आत्मनो ह्येवाध्य-
ङ्गानि प्ररोहन्ति। श० ८।७।२।१५॥ आत्मनो
वाऽइमानि सर्वाण्यङ्गानि प्रभवन्ति। श० ४।२।
२।५॥ सप्तपुरुषो ह्ययं पुरुषो यच्चत्वार
आत्मा त्रयः पक्षपुच्छानि। श० ६।१।१।६॥
चतुर्विधो ह्ययमात्मा। श० ७।१।१।१८॥
(=शरीरम्) पाङ्क्त इतर आत्मा लोमत्वङ्मांसं
समस्थि मज्जा। तां० ५।१।४॥ षडङ्गोऽयमात्मा
षड्विधः। कौ० २०।३॥ स पञ्चविंशः आत्मा।
श० १०।१।२।८॥ तस्मादितर आत्मा
मेद्यति च कृश्यति च। तां० ५।१।७॥ आत्मा हि
प्रथमः सम्भवतः सम्भवति। श० १०।१।२।
४॥ आत्मा ह्येवाग्रे सम्भवतः सम्भवति। श० ७।
१।१।२१॥ आत्मा ह्येवाग्रे सम्भवतः सम्भवत्यथ
दक्षिणं पक्षमथ पुच्छमथोत्तरम्। श० ८।७।२।
१३॥ (=शरीरम्) तस्मादिमान्यन्वाञ्चि च तिर्यञ्चि
चात्मनोऽस्थीनि। श० ८।७।२।१०॥ भूमोऽ-
एषोऽङ्गानां यदात्मा। श० ६।६।१।१०॥
सर्वं ह्ययमात्मा। श० ४।२।२।१॥ (=शरी-
रम्) तस्मादयं सर्वं एवात्मोऽप्यस्तद्वैतदेव
जीविष्यतश्च मरिष्यतश्च विज्ञानमुष्ण एव
जीविष्यञ्छीतो मरिष्यन्। श० ८।७।२।११॥
(=शरीरम्) तत्सर्वं आत्मा वाचमप्येति वाङ्मयो
भवति। कौ० २।७॥ एतन्मयो वाऽअयमात्मा
वाङ्मयो मनोमयः प्राणमयः। श० १४।४।३।
१०। वाह्यो ह्यात्मा। श० ६।६।२।१६॥ आत्मा

यजमानः। कौ० १७।७॥ गो० उ०। ५।४॥
आत्मैवोखा। श० ६।५।३।४॥ ६।६।२।
१५॥ अविनाशी वाऽअरेऽयमात्मानुच्छित्तिधर्मा।
श० १४।७।३।१५॥ यथा व्रीहिर्वा यवो वा
श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरा-
त्मन्पुरुषो हिरण्मयो यथा ज्योतिरधूममेवं ज्या-
यान्दिवो ज्यायानाकाशाज्ज्यायानस्यै पृथिव्यै
ज्यायान्त्सर्वेभ्यो भूतेभ्य स प्राणस्यात्मैष मऽआ-
त्मैतमित आत्मानं प्रेत्याभिसम्भविष्यामीति
यस्य स्यादद्धा न विचिकित्सास्तीति। श० १०।
६।३।२॥ अथ यो हैवैतमग्निं सावित्रं वेद।
स एवास्माल्लोकात्प्रेत्य। आत्मानं वेद। अयमह-
मस्मीति। तै० ३। १०।११।१॥ आत्मनो वाऽ-
अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं
विदितम्। श० १४।५।४।५॥ यश्चायमध्या-
त्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स
योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्। श० १४।
५।५।१॥

आत्मा ह्ययं प्रजापतिः। श० ४।६।१।१॥
आत्मा वै तनूः। श० ७।३।१।
११।५।६।१॥ आत्मा (=शरीरम्) वै
२३॥ ७।५।२।३२॥ आत्मा (=शरीरम्) वै
पूः। श० ७।५।१।२१॥ 'अन्तरिक्षं यच्छान्त-
रिक्षं दृंहान्तरिक्षं मा हिंसीः' (यजु० १४।
१२) इत्यात्मानं यच्छात्मानं दृंहात्मानं मा
हिंसीरित्येतत् (अन्तरिक्षम्=आत्मा)। श०
८।३।१।६॥ आत्मा वै वृषाकपिः। ऐ० ६।
२६॥ गो० उ० ६।८॥ (होता) यदि वृषाक-
पिम् (वृषाकपिदृष्टम्—ऋ० १०। ८६। १—२३
एतत्सूक्तमन्तरियात्—लोपयेत्तदानीम्) आत्मा-
नम् (=मध्यदेहमिति सायणः) अस्य (यज-
मानस्य) अन्तरियात्। ऐ० ५। १५॥ आत्मा वै
वेनः (ऋ० १०। १२३। १)। कौ० ८। ५॥
आत्मा वै समस्तः सहस्रवांस्तोकवान् पुष्टिमान्।
ऐ० २। ४०॥ आत्मा सूक्तम्। कौ० १४।४॥
१५।३॥ १६।४॥ २३।८॥ आत्मा वै स्तोत्रम्।
श० ५।२।२। २०॥ आत्मैव स्तोत्रियः। जै०
उ० ३।४।३॥ आत्मा वै स्तोत्रियः। कौ० १५।
४॥ २२।८॥ ऐ० ३।२३, २४॥ ६। २६॥ गो०
उ० ३।२२॥ आत्मा वै स्तोत्रियानुरूपौ। कौ०।
३०।८॥ आत्मा महदुक्थम्। श० १०। १। २।
५॥ आत्मा उपांशुसवनः। ऐ० २।२१॥ आत्मा

लोकम्पृणा (इष्टका)। श० ८। ७। २। ८॥ आत्मा वै बृहती। ऐ० ६। २८॥ गो० उ० ६। ८॥ आत्मा त्रिष्टुप्। श० ६। २। १। २४॥ ६। ६। २। ७॥ आत्मा वै होता। कौ० २६। ८॥ ऐ० ६। ८॥ गो० उ० ५। १४॥ आत्मा वै यज्ञस्य होता। कौ० ६। ६॥ आत्मा होतृचमसः। ऐ० २। ३०॥ आत्मा वै ब्राह्मणाच्छंसी। कौ० २८। ६॥

आत्माऽईव आत्मनः शीघ्र गमनवत् १. ३४. ७. (२०५ भूमि)। आत्मा इव १. ७३. २॥

आथर्वणः अथर्वणोऽहिंसकस्यापत्यम् १. ११६. १२॥ [आथर्वणाय] छिन्न संशयस्य पुत्राय १. ११७. २२॥ भेषजं वा आथर्वणानीति। तां० १२. ६. १०॥ भेषजं वै देवानामाथर्वणो (अथर्वणा ऋषिणा ......मन्त्राः) भैषज्यायै वारिष्ट्यै। तां० ६. १०. १०.॥

आर्दः अत्ता (अत्र कृतो बहुलमिति कर्तरि घञ्। बहुलं छन्दसीति घस्लृादेशो न) १.१२१. ८.॥ आदम् अत्तुं योग्यम्॥ १२. १०५॥

आदत् आयात् १. १२७. ६. आदत्ते १.१२.४ आदद्यात् ५. २. ८.॥

आददाथे इत्याददार्थे ग्रहण करो १. १३६. २.॥

आऽददानः गृह्णन् ४. ११. ६॥

आऽददिः आदाता १. १२७. ६॥

आऽददे गृह्णाति अत्रात्मने पदे त लोपः) १. १६१. १२॥

आऽदर्धते समान्ताद्धरन्ति ६. ४८. १७॥

आदधर्षत् (१) आदधर्षीत्, समन्तात् धृष्णुयात् २०. ८२।
(२) प्रगल्भो भवेत् २. ४१. ८॥

आऽदधुः समन्तात् धरन्तु ५. १६. ३॥

आदधे धारण करता हूँ १२. ८५॥

आदने अत्तव्ये, घासे ६. ७६. ३॥

आऽदभत् हिंस्यात ७. ५६. १५॥

आऽदभुः समन्ताद्धिसन्तु ३. १६. २। समन्ताद्धिंसान्ति ६. ४६. १०॥

आदम् आददामि १. १२६. २॥

आऽदर्ता समन्ताच्छत्रूणां विदारकः ४. २०. ६॥

आदाम समन्ताद्द्याम ५. ३०. १५॥

आऽदार्य गृहीत्वा ४. २६. ७॥

आऽदारः समन्ताच्छत्रूणां दारणकर्ता गुणः १. ४६. ५॥

आदाराः यत्र वाऽएनं (विष्णुं=यज्ञं) इंद्र ओजसा पर्यगृह्णात्तदस्य परिगृहीतस्य रसो व्यक्षरत्स पूयन्निवाशेत सोऽब्रवीद् दीर्येव बत मऽएष रसोऽस्तोषीदिति तस्मादादारा अथ यत्पूयन्निवाशेत तस्मात्पूतीकास्तस्मादन्नावाहुतिरिवाभ्याहिता ज्वलन्ति तस्मादु सुरभयो यज्ञस्य हि रसात्सम्भूताः। श० १४। १। २। १२॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत तस्य यो रसो व्यप्रुष्यत्तत आदाराः समभवन्। श० ४। ५। १०। ४॥ गायत्रीयं सोममाहरत् तस्य योऽशुः परापतत् त आदारा अभवन्। तै० १। ४। ७। ५-६॥

आदित्यः सूर्यः १. १६१. ६। सूर्यवद्विद्यया प्रकाशितः २६. १४। सूर्यइव शुभगुणप्रकाशकः ३. ५६. ५। अदितावन्तरिक्षे भवः १. १६३. ३। विनाशरहितः परमेश्वरो, जीवः, कारणरूपेण प्राणो वा १. २५. १२। विनाश-

रहितः १. ५०. १३।
अविनाशी स्वप्रकाशस्वरूपः परमात्मा ३२. १ (१८५ आर्य्य०)
प्रलयः सर्वस्यादातृत्वात् ३२. १ ॥ आदित्यौ (आदित्या) अविनाशिनौ ५. ६७. १। सूर्यप्राणौ १. १३६. ३ ॥
आदित्या द्वादश मासाः (कतम आदित्या इति द्वादश मासाः संवत्सरस्य, एत आदित्याः, एते हीदं सर्वमाददाना यन्ति तस्मादादित्या इति। श. १४. ६. ७. ६) २. ५। समाचारितेनाष्टचत्वारिंशद्वर्षपरिमितब्रह्मचर्येण गृहीतसमस्तविद्याः ६. ३४। विद्युद्युक्ताः प्राणावयवाः १५. १२। किरणाः १४. १. २ अथर्व। (१४७ भूमि)। वरुणादयो विद्वांसः १. ४१. ५॥ आदित्यानाम् अखंडितन्यायाधीशानाम् २५. ६॥

आदित्यः आदत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्र इतिवा। नि० २। १३ यदस्य दिवि तृतीय तदसावादित्य इति हि ब्राह्मणम्। नि० ७। २८॥
आदित्यः यदसुराणां लोकानादत्त। तस्मादादित्यो नाम। तै० ३। ६। २१। २॥ तेषां (नक्षत्राणां) एष (आदित्यः) उद्यन्नेव वीर्य्यं क्षत्रमादत्त तस्मादादित्यो नाम। श० २। १। २। १८॥ तस्य यद् (प्रजापतेः) रेतसः प्रथममुददीप्यत तदसावादित्योऽभवत्। ऐ० ३। ३४॥ तस्य (प्रजापतेः) शोचत आदित्यो मूर्धनोऽसृज्यत। तां० ६। ५। १॥ तत् (छिन्नं विष्णोः शिरः) पतित्वासावादित्योऽभवत्। श० १४। १। १। १०॥ आदित्यो वा अर्कः। श० १०। ६। २। ६॥ पर्जन्य आदित्यः। गो० पू० ४। ३॥ ज्योतिः शुक्रमसौ (आदित्यः) ऐ० ७। १२॥ (हे आदित्य त्वं) व्युषि सविता भवस्युदेष्यन् विष्णुरुद्यन्पुरुष उदितो बृहस्पतिरभिप्रयन्मघवेन्द्रो वैकुण्ठो माध्यन्दिने भगोऽपराह्ण उग्रो देवो लोहितायन्नस्तमिते यमो भवसि॥ अक्षसु सोमो राजानिशायाम्पितृराजस्स्वप्ने मनुष्यान्प्रविशसि पयसा पशून्॥ विरात्रे भवो भवस्य पररात्रेऽङ्गिरा अग्निहोत्रवेलायाम्भृगुः। जै० उ० ४। ५। १-३॥ स वा एष इन्द्र वैमृध उद्यन् भवति स वितोदितो मित्रस्संगवकाल इन्द्रो वैकुण्ठो माध्यन्दिने समावर्त्तमानश्शर्व उग्रो देवो लोहितायन् प्रजापतिरेव संवेशेऽस्तमितः। जै० उ० ४। १० । १०॥ असौ वाऽआदित्योऽश्मा पृश्निः। श० ६। २। ३। १४॥ अप्रतिधृष्या (=प्रजापतेस्तनूविशेषः) तदादित्यः। ऐ० ५। २५॥ एष (आदित्यः) वा अब्जा अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति। ऐ० ४। २०॥ असौ वा आदित्य एषोऽश्वः। श० ६। ३। १। २६॥ आदित्यश्चिपात्तस्येमे लोकाः पादाः। गो० पू० २। २। ८ (६)॥ अथ यत्तच्चक्षुरासीत् स आदित्योऽभवत्। जै० उ० २। २। ३॥ चक्षुरादित्यः। श० ३। २। २। १३॥ आदित्यो वा उद्गाताऽधिदैवं चक्षुरध्यात्मम्। गो० पू० ४। ३॥ किं नु ते मयि (आदित्य) इति। ओजो मे बलम्मे चक्षुर्मे। जै० उ० ३। २१। ८॥ प्राण आदित्यः। तां० १६। १३। २॥ अथैष वाव यशः य एष (आदित्यः) तपति। श० १४। १। १। ३२॥ एष (आदित्यः) वै यशः। श० ६। १। २। ३॥ आदित्योऽसि दिविश्रितः। चन्द्रमसः प्रतिष्ठा। तै० ३। ११। १। ११॥ एष (आदित्यः) स्वर्गो लोकः। तै० ३। ८। १०। ३॥ ३। ८। १७। २॥ ३। ८। २०। २॥ (आदित्य लोकं प्रशंसति-) तद्दैव्यं क्षत्रम्। सा श्रीः। तद्ब्रह्मस्य विष्टपम्। तत्स्वाराज्यमुच्यते। तै० ३। ८। १०। ३॥ देवलोको वा आदित्यः। कौ० ५। ७॥ गो० उ० १। २५॥ आदित्य एषां भूतानामधिपतिः। ऐ० ७। २०॥ असावादित्यः शिरः प्रजानाम्। तै० १। २। ३। ३॥ सर्वतोमुखो वा ऽअसावादित्य एष वाऽइद ँ सर्वं निर्द्धयति यदिदं किञ्च पुष्यति तेनैष सर्वतोमुखस्तेनान्नादः। श० २। ६। ३। १४॥ आदित्य आदित्यो वा उद्गाता। गो० पू० २। २४॥ आदित्य उद्गीथः ज० उ० १। ३३। ५॥ आदित्य उदयनीयः। श० ३। २। ३। ६॥ असौ वा आदित्य एकाकी चरति। तै० ३। ६। ५। ४॥ आदित्यस्त्वेव सर्वऽऋतवः। यदैवोदेत्यथ वसन्तो यदा संगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमन्तः। श० २। २। ३। ८॥ आदित्यः त्रिर्ह वा एष (मघवान्=इन्द्रः=आ-

दित्यः) एतस्या मुहूर्त्तस्येमाम्पृथिवीं समन्तः पर्येति। जै० उ० १।४४।६॥ एष ह वा अह्नां विचेता योऽसौ (सूर्यः) तपति। गो० उ० ६। १४॥ एष (आदित्यः) ह वा अह्नां विचेतयिता। ऐ० ६।३५॥ असौ वाऽआदित्यः पाप्मनोऽपहन्ता। श० १३।८॥१।११॥ स वा एष (आदित्यः) न कदाचनास्तमेति नोदेति। तद्यदेनं पश्चादस्तमयतीति मन्यन्ते अह्न एव तदन्तं गत्वाथात्मानं विपर्यस्यतेहरेवाधस्तात्कृणुते रात्रीं परस्तात्। गो० उ० ४।१०॥ स वा एष (आदित्यः) न कदाचनास्तमेति नोदेति तं यदस्तमेतीति मन्यंतेऽह्न एव तदन्तमित्वाऽथात्मानं विपर्यस्यते रात्रिमेवावस्तात् कुरुतेऽहः परस्तादथ यदेनं प्रातरुदेतीति मन्यंते रात्रेरेव तदन्तमित्वाथात्मानं विपर्यस्यतेऽहरेवावस्तात्कुरुते रात्रिं परस्तात्स वा एष न कदाचन निम्रोचति। ए० ३।४४॥ तस्य (अर्कस्य=आदित्यस्य) एतदन्नं क्यमेष चन्द्रमास्तदन्नं यजुष्टः। श० १०।४।१।२२॥ प्राङ् चार्वाङ् चादित्यस्तपति। तां० १२।१०।६॥ यस्माद्वायत्रोत्तमस्तृतीयः (त्रिरात्रः) तस्मादर्वाङादित्यस्तपति। तां० १०।५।२॥ सहस्रं हैत आदित्यस्य रश्मयः। जै० उ० १।४४।५॥ स एष (आदित्यः) एकशतविधस्तस्य रश्मयः शतं विधा एष एवैकशततमो य एष तपति। श० १०।२।४।३॥ षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मयः। श० १०।५।४।४॥ षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाड्यः समन्तं परियन्ति। श० १०।५।४।१४॥ शतयोजने ह वा एष (आदित्यः) इतस्तपति। कौ० ८।३॥ तं (सावित्रमग्निं) स (भरद्वाजः) विदित्वा। अमृतो भूत्वा। स्वर्गं लोकमियाय। आदित्यस्य सायुज्यम्। तै० ३।१०।११।५॥ असौ वाऽ आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष (मृत्युः) वस्ते सर्वतो ह्येनेन परिवृतः। श० १०।५।२।४॥ विवस्वन्नादित्यैष ते सोमपीथः। श० ४।३।५।१८॥ यं (मार्तण्डं) उ ह तद्विचक्रुः (देवा आदित्याः,) स विवस्वानादित्यस्तस्येमाः प्रजाः। श० ३।१।३।४॥ असौ वाऽ आदित्यः सूर्यः (यजु० १८।५०)। श० ६।१।२।२३॥ असावादित्यो देवः सविता। श० ६।३।१।१८॥ आदित्य एव सविता। गो० पू० १।३३॥ जै० उ० ४।२७।११॥ धातासौ स आदित्यः। श० ६।५।१।३७॥ स एष (आदित्यः) सप्तरश्मिर्वृषभस्तुविष्मान् (ऋ० २।१२।१२)। जै० उ० १।२८।२॥ "यस्सप्तरश्मिः" (ऋ० २।१२।१२) इति। सप्त ह्येत आदित्यस्य रश्मयः। जै० उ० १।२६।८॥ "युक्ता ह्यस्य (इन्द्रस्य) हरयश्शतादश" (ऋ० ६।४७।१८) इति सहस्रं हैत आदित्यस्य रश्मयः। ते ऽस्य युक्तास्तैरिदं सर्वं हरति। तद्यदेतैरिदं सर्वं हरति। तस्माद्धरयः (=रश्मयः)। जै० उ० १।४४।५॥ स यः स विष्णुर्यज्ञः सः। स यः स यज्ञोऽसौ स आदित्यः (विष्णुः=आदित्यः)। श० १४।१।१।६॥ एष वै वृषा हरिः (यजु० ३८।२२) य एष (आदित्यः) तपति। श० १४।३।१।२६॥ असौ वै वैश्वानरो यो ऽसौ (आदित्यः) तपति। कौ० ४।३।१६।२॥ स यः स वैश्वानरः। असौ स आदित्यः। श० ६।३।१।२५॥ चक्षुस्त्वाऽएतद्वैश्वानरस्य (यदादित्यः)। १०।६।१।८॥ एष वै सुततेजा वैश्वानरः (यदादित्यः)। श० १०।६।१।८॥ "वृषभः" (ऋ० २।१२।१२) इति। एष (आदित्यः) ह्येवाऽऽसां प्रजानामृषभः। जै० उ० १।२६।८॥ आदित्यो वाजी। तै० १।३।६।४॥ असौ वाऽ आदित्यो ब्रध्नोऽरुषः। श० १३।२।६।१॥ असौ वा आदित्यो ब्रध्नः। तै० ३।६।४।१॥ आदित्यो वै वृषाकपिः। गो० उ० ६।१२॥ असावादित्यो वेनो यद्धै प्रजिजनिषमाणो ऽवेनत्तस्माद्वेनः। श० ७।४।१।१४॥ स य स कूर्मोऽसौ स आदित्यः। श० ७।५।१।६॥ ६।५।१।६॥ असौ वै षोडशी यो ऽसौ (आदित्य) तपति। कौ० १७।१॥ असावादित्यः षोडशी (यजु० १५।३)। श० ८।५।१।१०॥ एवं (आदित्यः) दीक्षितः (अथर्व० ११।५।६॥)। गो० पू० २।१॥ असौ वाऽ आदित्यो दिव्यः रोचनम्। श० ६।२।१।२६॥ असौ वा आदित्यो दिव्यो गन्धर्वः (यजु० ११।७॥)। श० ६।३।१।१६॥ असौ वाऽ आदित्यो विश्वव्यचाः (यजु० १३।५६॥ १५।१७) यदा ह्येवैष उदेत्यथेदं सर्वं व्यचो भवति। श० ८।१।२।१॥८।६।१।१८॥ असौ वाऽ आदित्यो व्यचच्छन्दः (यजु० १५।४) श० ८।५।२।३॥ असौ वा आदित्यो भा इति। जै० उ० १।४।१॥ असौ वा आदित्यो

हꣳसः शुचिषत् (यजु० १२ । १४) । श० ६ । ७ । ३ । ११ ॥ एष (आदित्यः) वै हंसः शुचिषद् (ऋ० ४ । ४० । ५) । ऐ० ४ । २० ॥ असौ वा आदित्यस्तपः । श० ८ । ७ । १ । ५ ॥ (आदित्यस्थः) पुरुषो यजूꣳषि । श० १० । ५ । १ । ५ ॥ अथ य एष एतस्मिन् (आदित्य-) मण्डले पुरुषः सोऽग्निस्तानि यजूꣳषि स यजुषां लोकः । श० १० । ५ । २ । १ ॥ असौ वा आदित्य एषोऽग्निः (यजु० ११ । ३१) । श० ६ । ४ । १ । १ ॥ ६ । ४ । ३ । ९, १० ॥ आदित्यो वाऽ अस्य (अग्नेः) दिवि वर्चः । श० ७ । १ । १ । २३ ॥ अयं वाऽ अग्निर्ऋतमसावादित्यः सत्यं यदि वासावृतमयꣳ (अग्निः) सत्यमुभयम्वेतदयमग्निः । श० ६ । ४ । ४ । १० । एष (आदित्यः) वै सत्यम् । ऐ० ४ । २० ॥ सत्यमेष य एष (आदित्यः) तपति । श० १४ । १ । २ । २२ ॥ असावादित्यः सत्यम् । तै० २ । १ । ११ । १ ॥ तद्यत्तत्सत्यम् । असौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषः । श० १४ । ८ । ६ । २३ ॥ सत्यꣳ हैतद्यद्रुक्मः ।... तद्यत्तत्सत्यम् । असौ स आदित्यः । श० ६ । ७ । १ । १-२ ॥ तस्य (अश्वस्य श्वेतस्य) रुक्मः पुरस्ताद्भवति । तदेतस्य रूपं क्रियते य एष (आदित्यः) तपति । श० ३ । ५ । १ । २० ॥ असौ वाऽ आदित्य एष रुक्मः । श० ६ । ७ । १ । ३ ॥ आदित्यस्य (रूपं) रुक्मः । तै० ३ । ९ । २० । २ ॥ असौ वाऽ आदित्य एष रुक्म एष हीमाः सर्वाः प्रजा अतिरोचते । श० ७ । ४ । १ । १० ॥ आदित्यो वै भर्गः । जै० उ० ४ । २८ । २ ॥ आदित्य एव चरणं यदा ह्येवैष उदेत्यथेदꣳ सर्वं चरति । श० १० । ३ । ५ । ३ ॥ आदित्यः असौ वाऽ आदित्यो हृदयम् । श० ९ । १ । २ । ४० ॥ असौ वाऽआदित्यो द्रप्सः (यजु० १३ । ५ ॥) । श० ७ । ४ । १ । १० ॥ असौ वाऽ आदित्यः सꣳहितः (यजु० १८ । ३९) एष ह्यहोरात्रे संदधाति । श० ९ । ४ । १ । ८ ॥ असौ वाऽ आदित्य एष रथः । श० ९ । ४ । १ । १५ ॥ तस्य (आदित्यस्य) रथप्रोतश्चासमरथश्च (यजु० १५ । १७) सेनानीग्रामण्याविति वार्षिकौ तावृतू । श० ८ । ६ । १ । १८ ॥ तद्यदेष (आदित्यः) सर्वैर्लोकैस्समस्तस्मादेष (आदित्यः) एव साम । जै० उ० १ । १२ । ५ ॥ (प्रजापतिः) स्वरित्येव सामवेदस्य रसमादत्त । सोऽसौ द्यौरभवत् । तस्य यो रसः प्राणेदत् स आदित्योऽभवद्रसस्य रसः । जै० उ० १ । १ । ५ ॥ साम्नामादित्यो दैवतं तदेव ज्योतिर्जागतच्छन्दो द्यौः स्थानम् । गो० पू० १ । २९ ॥ यदनुदितः (आदित्यः) स हिङ्कारः । जै० उ० १ । १२ । ४ ॥ असावादित्यस्तोमभागाः । श० ८ । ५ । ४ । २ ॥ स यः स यज्ञोऽसौ स आदित्यः । श० १४ । १ । १ । ६ ॥ एष वै संवत्सरो य एष (आदित्यः) तपति । श० १४ । १ । १ । २७ ॥ स यः स संवत्सरोऽसौ स आदित्यः । श० १० । २ । ४ । ३ ॥ आदित्य एव प्रायणीयो भवति । श० ३ । २ । ३ । ६ ॥ तदसौ वा आदित्यः प्राणः । जै० उ० ४ । २२ । ९ ॥ आदित्यो वै प्राणः । जै० उ० ४ । २२ । ११ ॥ उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राण इत्याचक्षते । ऐ० ५ । ३१ ॥ असौ वाऽआदित्यः कविः । श० ६ । ७ । २ । ४ ॥ आदित्यो वै घर्मः । श० ११ । ६ । २ । २ ॥ असौ वै घर्मो योऽसौ (आदित्यः) तपति । कौ० २ । १ ॥ आदित्यो निवित् । जै० उ० ३ । ४ । २ ॥ यन्महान्देव आदित्यस्तेन । कौ० ६ । ६ ॥ असौ वाऽ आदित्यः शुक्रः (यजु० १८ । ५०) । श० ९ । ४ । २१ ॥ एष वै शुक्रो य एष (आदित्यः) तपति । श० ४ । ३ । १ । २६ ॥ ४ । ३ । ३ । १७ ॥ यद्वाऽएष एव शुक्रो य एष (आदित्यः) तपति तद्यदेष तपति तेनैष शुक्रः । श० ४ । २ । १ । १ ॥ तत्र ह्यादित्यः शुक्रश्चरति । गो० पू० २ । ९ ॥ असौ वा आदित्यः शुक्रः । तां० १५ । ५ । ९ ॥ आदित्यो वाव पुरोहितः । ऐ० ८ । २७ ॥ आदित्यो वै देवसंस्फानः । गो० उ० ४ । ९ ॥ असौ वा आदित्यो लोकम्पृणा (इष्टका) । श० ८ । ५ । ४ । ८ ॥ असौ वाऽ आदित्यो लोकम्पृणैष हीमांल्लोकान्पूरयति । श० ८ । ७ । २ । १ ॥ वायुर्वा एतं (आदित्यं) देवतानामानशे । तां० ४ । ६ । ७ ॥ तदसावादित्य इमांल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्रं वायुः सः । श० ८ । ७ । ३ । १० ॥ सा या सा वागसौ स आदित्यः । श० १० । ५ । १ । ४ ॥ आदित्य एव यशः । गो० पू० ५ । १५ ॥ आदित्यो यशः । श० १२ । ३ । ४ । ८ ॥ आदित्यो यूपः । तै० २ । १ । ५ । २ ॥ असौ वा अस्य (अग्निहोत्रस्य कर्त्तुः) आदित्यो यूपः । ऐ० ५ । २८ ॥ अथ यद्विषुवन्तमुपयन्ति । आदित्यमेव देवतां यजन्ते ।

शा० १२।१।३।१४॥ आदित्यो बृहत्। ऐ० ५। ३०॥ असौ वाऽ आदित्यो ब्रह्म (यजु० १३।३) श० ७।४।१।१४॥ १४।१।३।३॥ आदित्यो वै ब्रह्म। जै० उ० ३।४।६॥ असावादित्यः सुब्रह्म। ष० १।१॥ आदित्यः हन्तेति चन्द्रमा ओमित्यादित्यः। जै० उ० ३।६।२॥ ओमित्यादित्यः। जै० उ० ३।१३।१२॥ ओमित्यसौ योऽसौ (आदित्यः) तपति। ऐ० ५।३२॥ यदेतत् (आदित्य-) मण्डलं तपति। तन्महदुक्थं ता ऋचः स ऋचां लोकः। श० १०।५।२।१॥ (आदित्यस्य) मण्डलमेवऽर्चः। श० १०।५।१।५॥ अग्निश्च ह वा आदित्यश्च रोहिणावेताभ्या ९ हि देवताभ्यां यजमानाः स्वर्गं लोक ९ रोहन्ति। श० १४।२।१।२॥ छन्दोभिर्वै देवा आदित्य ९ स्वर्गं लोकमहरन्। तां० १२।१०।१०।६॥ त्रैष्टुभो वा एष य एष (आदित्यः) तपति। कौ० २५।४॥ त्रैष्टुब्जागतो वा आदित्यः। तां० ४।६।२३॥ जगती छन्द आदित्यो देवता श्रेणी। श० १०।३।२।६॥ स (आदित्यः) उद्यन्नेवामूम् (दिवम्) अधिद्रवत्यस्तं यन्निमाम् (पृथिवीम्) अधिद्रवति। श० १।७।२।११॥

आदित्यवते पूर्णविद्यायुक्तपाण्डित्यवते ३८. ८॥

आदित्यवनिः आदित्यान् मासान् वनति सम्भजति सः ५. १२॥ (यजु०)

आदित्यवर्णम् आदित्यस्य वर्णं स्वरूपमिव स्वरूपं यस्य तं स्वप्रकाशम् ३१. १८। स्वप्रकाशविज्ञानस्वरूपम् ३१. १८। (१३३ भूमि०)। 'आदित्य का बनाने वाला और प्रकाशक परमात्मा' (१६८ आर्य)॥

आदित्या याऽऽदित्यवदर्थविद्याप्रकाशिकाऽष्टचत्वारिंशत्संवत्सरपर्यन्तानुष्ठित ब्रह्मचर्यैः स्वीकृता सा ४. २१॥

आदित्याः अष्टौ ह वै पुत्रा अदितेः। यांस्त्वेतद्देवा आदित्या इत्याचक्षते सप्त ह वै तेऽविकृत९ हाष्टमं जनयांचकार मार्तण्डम्। श० ३।१।३।३॥ तदभ्यनूक्ता। अष्टौ पुत्रासो अदितेर्ये जातास्तन्वं परिदेवा९ उपप्रैत् सप्तभिः परा मार्तण्डमास्यदिति। तां० २४।१२।४-६॥ एताभिर्वा आदित्या द्वंद्वमार्ध्नुवन्मित्रश्च वरुणश्च धाता चार्य्यमा चा९ंशश्च भगश्चेन्द्रश्च विवस्वांश्च। तां० २४।१२।४॥ कतमऽआदित्या इति। द्वादश मासाः संवत्सरस्यैतऽआदित्या एते हीद९ सर्वमाददाना यन्ति ते यदिद९ सर्वमाददाना यन्ति तस्मादादित्या इति। श० ११।६।३।८॥ सप्तादित्याः॥ तां० २३।१५।३॥ भूमोऽएष देवानां यदादित्याः। श० ६।६।१।८॥ प्राणा वा आदित्याः। प्राणा हीदं सर्वमाददते। जै० उ० ४।२।६॥ घृतभाजना ह्यादित्याः। श० ६।६।१।११॥ आदित्यास्त्वा जागतेन छन्दसा संमृजन्तु। तां० १।२।७॥ वर्षाभिर्ऋतुनादित्याः स्तोमे सप्तदशे स्तुतं वैरूपेण विशौजसा। २।६।१६। १-२॥ सर्वं वाऽआदित्याः। श० ५।५।२।१०॥ आदित्या वै प्रजाः। तै० १।८।८।१॥ एते खलु वादित्या यद्ब्राह्मणाः। तै० १।१।६।८॥ पशव आदित्याः। तां० २३।१५।४॥ सर्प्या वा आदित्याः। तां० २५।१५।४॥ आदित्याः अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्। तस्या उच्छेषणमददुः। तत्प्राश्नात् सा रेतो ऽधत्त। तस्यै धाता चार्यमा चाजायेताम्। ...मित्रश्च वरुणश्चाजायेताम्। ...अंशश्च भगश्चाजायेताम्। ...इन्द्रश्च विवस्वांश्चाजायेताम्। तै० १।१।६।१-३॥ अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमाश्नात् सा गर्भमधत्त तत आदित्या अजायन्त। गो० पू० २।१५॥ (प्रजापते रेतस उत्पन्नं) यत्तृतीयमदीदेदिव त आदित्या अभवन्। ऐ० ३।३४॥ द्वयो ह वा इदमग्रे प्रजा आसुः। आदित्याश्चैवाङ्गिरसश्च। श० ३।५।१।१३॥ विश्वकर्मा त्वादित्यैरुत्तरतः पातु। श० ३।५।२।७॥ वरुण आदित्यैः (उदक्रामत्)। ऐ० १।२४॥ वरुण आदित्यैः (व्यद्रवत्)। श० ३।४।२।१॥ आदित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसा। तै० २।७।१५।५॥ अथैनं (इन्द्रं) प्रतीच्यां दिश्यादित्या देवाः... अभ्यषिञ्चन्...स्वाराज्याय। ऐ० ८।१४॥ गावो वा आदित्याः। ऐ० ४।१७॥ आदित्या एव यशः। गो० पू० ५।१५॥ आदित्यानीमानि यजू९षी-

त्याहुः । श० ४ । ४ । ५ । १६ ॥ आदित्यानीमानि शुक्लानि यजू ँ षि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते । श० १४ । ६ । ४ । ३३ ॥ आदित्यानां तृतीयं सवनम् । कौ० १६ । १ ॥ ३० । १ ॥ श० ४ । ३ । ५ । १ ॥ आदित्यं हि तृतीयसवनम् । तां० ६ । ७ । ७ । ॥ अथेमं विष्णुं यज्ञं त्रेधा व्यभजन्त । वसवः प्रातःसवन ँ रुद्रा माध्यन्दिन ँ सवनमादित्यास्तृतीयसवनम् । श० १४ । १ । १ । १५ ॥ जगत्यादित्यानां पत्नी । गो० उ० २ । ६ ॥ आदित्यानां वा एतद्रूपम् यल्लाजाः । तै० ३ । ८ । १४ । ४ ॥ वसवो वै रुद्रा आदित्याः स ँ स्नावभागाः । तै० ३ । ३ । ६ । ७ ॥ तान् हादित्यानङ्गिरसो याजयाञ्चक्रुः । गो० उ० ६ । १४ ॥ त एतेन सद्यःक्रियाङ्गिरस आदित्यानयाजायन् । श० ३ । ५ । १ । १७ ॥ आदित्याश्चाङ्गिरसश्चैतत् सत्र ँ समदधतादित्यानामेकवि ँ शतिरङ्गिरसां द्वादशाहः । तां० २४ । २ । २ ॥ आदित्या वा इत उत्तमां सुवर्गं लोकमायन् । ते वा इतो यन्तं प्रतिनुदन्ते । तै० १ । १ । ६ । ८ ॥ (आदित्याः) स्वर्गं लोकमायन्नहीयन्ताङ्गिरसः । तां० १६ । १२ । १ ॥ ते हादित्याः पूर्वे स्वर्गं लोकं जग्मुः पश्चेवाङ्गिरसः षष्ट्यां वा वर्षेषु । ऐ० ४ । १७ ॥ तत उ हादित्याः स्वरीयुः । कौ० ३० । ६ ॥ तऽआदित्याः । चतुर्भि स्तोमैश्चतुर्भिः पृष्ठैर्लघुभिः सामभिः स्वर्गं लोकमभ्यप्लवन्त । श० १२ । २ । २ । १० ॥ तस्य (स्वर्गस्य लोकस्य) आदित्या अधिपतयः । तै० ३ । ८ । १८ । २ ॥

आऽदिदेशति (१) अतिसृजेदस्मानतिदेश्य पीडयेत् १. ४२. २. ।
(२) समन्तात् सम्यगुपदिशति ६. ५६. १ ।

आदिनवदर्शम् य आदौ नवान् पश्यति तम् ३०. १८ ॥

आदिशः आभिमुख्या दिशः ६. १६ ॥ आदिशे आज्ञापालनाय ६. ४८. १४ ॥ [आऽदिशाम्] समन्ताद्दीपमानानाम् ६. ४. ५ ॥

आदिशम् दिशमाभिव्याप्यैव ७. १७ ॥

आऽदिशे अभिप्रशंसे ६. ५६. १ ॥

आऽदुरे शत्रूणां विदारक ४. ३०. २४ ॥

आदुरि आदरणात् । नि० ६ । ३१ ।

आऽदृत्य आदरं कृत्वा १. १०३. ६ ॥

आऽदेदिशानान् भृशं आज्ञाकर्तॄन् ६. ४४. १७ ॥

आऽदैवम् समन्ताद्विद्याप्रकाशयुक्तम् ४. १. १ ॥

आऽदैवीः समन्ताद्देदीप्यमाना विदुषी ६. ४६. १५ ॥

आधवनीयः आधवनसाधनपात्रविशेषः १८. २१ ॥

आऽधवे समन्तात्प्रक्षेपणे १. १४१. ३ ॥

आधवः आधवनात् नि० ६ । २६ ॥

आऽधाय लिए हुए ११. ११ ॥

आधिपत्यम् आधिपतेर्भावः १८. ४ ।

आधीतम् [आऽधीतम्] (१) सर्वतो धारितम् १५. ७ । (२) समन्ताद् धृतिर्निश्चयवृत्तिः १८. २ ॥ आधीताय समन्तात् विद्यावृद्धये २२. २० ॥

आधीतम् आध्यातम् । आध्यातमभिप्रेतम् । नि० १ । ६ ॥

आऽधृषः समन्ताद्धर्षणं कुर्वतः २. १. ६ ॥ आधृषे समन्तात् धृष्णुवन्ति यस्मिन् व्यवहारे तस्मै १. ३६. ४ । समन्ताद् धृषाय ५. ६. ५ ॥

आऽधृषे आधर्षितुम् ॥ ५ । ८७ । २ ॥

आऽध्यः (१) समन्ताद् ध्यायन्ति चिन्तयन्ति ये ते १. १०५. ७ । (२) परस्य मनसि शोकादिजनकाः १. १०५. ८ ॥

आधिम् यः समन्ताद्दधाति तम् २२. २० ॥

आध्यक्षाय अध्यक्षाणां भावाय ३०. ११ ॥

आध्रः (१) यः सर्वैः समन्ताद् ध्रियते ७. ४१. २ (२) सब ओर से धारणकर्ता (१६० विधि)। (३) अपुत्रस्य पुत्रः ३४. ३५ ॥

आध्रः आढयालुः । नि० १२ । १४ ॥

आध्वम् उपविशत १७. ६५ । (उप—) उपासना करो । ७. ३३. १४ ॥

आध्वर्यवम् (अध्वर्यवम्) य आत्मनोऽध्वरमिच्छति तम् [अत्र वाच्छन्दसीत्यम्यपि गुणावादेशौ] २८. १६ ।

आनंश प्राप्नोति ४. २३. २ ॥

आनजाना प्रसिद्धौ, प्रसिद्धिं कारकौ [अञ्चु धातोर्लिटः स्थाने कानच्] १. १०८. ४ ॥

आनजे [आनजे] सर्वैः काम्यते प्रकटयते विज्ञायते [अत्राञ्जु धातोः कर्मणि लिट्] १. १०२. १। व्यनक्ति ३३. २६ । अस्येच्चालेयत् १. १६१. ४ ॥

आनञ्ज अञ्जेयत्, कामयेत [अत्र लिङर्थे लिट्] ८. ३० ॥

आनञ्जे अजन्तु शत्रून् क्षिपन्तु [व्यत्ययेनात्मने पदम्] १. ८७. १ ॥

आनट् [आनट्] व्याप्नोति [अत्र व्यत्ययेन परस्मैपदम् श्नश्च] १. ७१. ८। (२) प्राप्नोति [अत्र नक्षतेर्गतिकर्मणो लिङि छन्दस्यपि दृश्यन्त इत्याडागमः] १. १६३. ७। (३) अश्नुवीत १. १२१. १ ॥

आनट् व्याप्तिकर्मा निघं०२ । १८ ॥

आनतिः आनमन्ति यया सा २०. १३ ॥

आनन्दम् आनन्दम् (६. ११३. ६–२३८ वि०)॥

आनन्दनन्दौ आनन्देन सम्भोगजनित सुखेन नन्दतस्तौ २०. ६ ॥

आनम् अनन्ति येन तज्जीवनम् १. ५२. १५ ॥

आऽनमम् समन्तात् सत्कृतिं कर्तुम् ४. ८. ३ ॥

आनवाय समन्तान्नवीनाय ६. ६२. ८ ॥

आनश [आनश] आनशिरे व्याप्नुवन्ति [अत्र व्यत्ययेन परस्मैपदं पुरुषव्यत्ययश्च] ३. ६०. १। (१) सम्यग् व्याप्नुत ३. ६०. २। (२) प्राप्नुयुः ४. ३६. ४।

आनशानाः (१) प्राप्नुवन्तः ३२. १०। (२) प्राप्य (विधि)॥

आनशुः [आनशुः] अश्नुवन्ति १. ११०, ४। (२) प्राप्नुवन्ति २. २३. २। (३) सम्यक् प्राप्नुयुः (अत्र व्यत्ययेन परस्मैपदम्) ३. ६०. ३.। (४) व्याप्नुवन्ति १. १५१. ६ ॥

आनशे [आनशे] प्राप्नोति ५. ७. ८। व्याप्नोति १. ८४. ६ ॥

आनशे व्याप्तिकर्म । निघ० ११२८ ॥

आनश्याम् प्राप्नुयाम् ६. २६. ७ ॥

आनाश व्याप्नुयात् ६. १६. २६. २६ ॥

आनिर्हतेभ्यः ये समन्तान्निर्हतास्तेभ्यः १६. ४६ ॥

आनीयमाने समन्तात्प्राप्ते ३६. ५ ॥

आनुषक् (१) अनुकूलतया १. ८. ३५ (२) आनुकूल्ये १. ७२. ८। आनुकूल्येन वर्तमानः ३. ११. १। अभितो यदनुषक्कि तत् १. १३. ५। (४) अनुसक्त अर्थात् उसमें व्याप्त होते हैं (५२ आर्य्य) (५) व्याप्त्यानुषक्तमुत्कृष्टगुणैरनुरक्तमाकर्षणेनानुयुक्तं वा १. ५२. १४। (६) योऽनुसजति। ६. ५. ३॥

आनुषक् नामानुपूर्वस्यानुषक्तं भवति। नि० ६। १४॥

आनुष्टुभम् अनुकूलतया स्तोभते सुखं वध्नाति येन तत् १२. ५॥ [आनुष्टुभेन] अनुष्टुब्विहितार्थयुक्तेन ११. ११। आनुष्टुभेन छन्दसा ११. ५८। विद्यां गृहीत्वा पश्चाद्दुःखं विस्तभ्नुवन्ति येन तेन ११ ६५॥

आनूकम् आनुकूल्यम् ७. ३३. ६॥

आनृचुः (१) स्तावयन्ति तद्गुणान् प्रकाशयन्ति। [अपस्पृधेमानृचु० अ. ६।१।३६॥ अनेनार्चधातोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातितः] १. १६. ४। (२) अर्चामः ५. ६. ८॥

आनृचे स्तौमि १. १६०. ४॥

आन्तरिक्षः अन्तरिक्षदेवताकः २४. ३४॥

आन्त्याय अन्तेभवाय १८. २८॥

आन्त्यायनाय (१) अन्त्यं नीचं अयनं प्रापणं यस्य तस्मै ६. २०॥

आन्त्राणि उदरस्था अन्नपाकाधारा नाडीः १६. ८६॥

आन्दम् बन्धितारम् ३०. १६॥

आप आप्नोति १. १२२. ६॥

आप प्राप्नुयात् ४. ४१. १। व्याप्नोति। ५. ४२. ६॥

आपः [आपः] आकाशः ३२. ७। वाष्परूपाणि जलानि १. ११६. ६। पवित्रजलानीव सकलशुभगुणव्यापिकाः कन्याः १२. ३५। कारणाख्याः प्राणा जीवा वा १७. ३०। जलानि वा ऽऽप्नुवन्ति शब्दोच्चारणादिव्यवहारान् याभिस्ता आपः प्राणाः (आप इत्युदकनामसु पठितम्। निघं० १. १२। आप इति पदनामसु पठितम्। निघं० ५. ३। आभ्यां प्रमाणाभ्यां अप्शब्देनात्रोदकानि सर्वचेष्टाप्राप्तिनिमित्तत्वात् प्राणाश्च गृह्यन्ते) १. ८. ८। अन्तरिक्षं प्राणा वा १. १००. १५। (१०० आर्य्य)। प्राणबलानि १. १७८. १। सर्वव्यापकत्वात् परमात्मा ३२. १॥ जलवद्वर्तमाना मातरः ४. १८. ८ व्याप्तिशीलानि १. ८३. २। प्राणप्रदवायुः (६. ११३. ८-२३६ विधि) प्राणा जलानीव विद्वांसः २०. २२। व्याप्तिशीलाः सूक्ष्मास्तन्मात्राः २७. २६। आप्नुवन्ति व्याप्नुवन्ति शरीरमित्यापः ३४. ५५। जलानीव शान्ताः १०. ७। सर्वव्यापकः (३२८ भूमि० ३६. १२) (आप्लृ व्याप्तौ अस्माद्धातोरप्शब्दः सिध्यति स नियतस्त्रीलिङ्गो बहुवचनान्तश्च) जलानीव शान्तशीला विदुष्यः ३६. १४।

आपः आप्ताः प्रजाः ६. २७। आप्नुवन्ति सद्गुणान् यास्ताः ६. १३॥

आपः अन्तरिक्षनाम। निघं० । १। ३। आप उदकनाम। निघं०। १। १२। तथा एताश्चान्द्रमस्य भागा-

मिन्य आपो भवन्ति रश्मयस्ताः। नि० ५।४२॥ आपः आयनाः (आयनानि वा)। नि० १२।३५॥ आपः तद्यदब्रवीत् (ब्रह्म) आभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किंचेति तस्मादापोऽभवंस्तदपामप्त्वमाप्नोति वै स सर्वान् कामन् यान् कामयते। गो० पू० १।२॥ सेदꣳसर्वमाप्नोद्यदिदं किं च यदाप्नोत्तस्मादापः। श० ६।१।१।९॥ अद्भिर्वाऽइदꣳ सर्वमाप्तम्। श० १।१।१।१४॥ २।१।१।४॥४।५।७।७॥ आपो ह वाऽइदमग्रे सलिलमेवास। ता अकामयन्त कथं नु प्रजायेमहीति। श० ११।१।६।१॥ अश्मनो ह्यापः प्रभवन्ति। श० ६।१।१।४॥ तस्मात्पुरुषात्तस्मादापो जायन्ते। श० ६।१।३।१॥ ता वाऽएताः (सारस्वतीः,ऊर्मीः, स्यन्दमानाः, आपयतीः, समुद्रियाः, निवेष्याः, स्थावराः, आतपवर्ष्याः, वैशन्तीः, कूप्याः, प्रुष्वाः, मधव्याः, गोरुल्ब्याः, पयस्याः, विश्वभृतः. मरीचीः) सप्तदशापः सम्भरति। श० ५।३।४।२२॥ प्राणा वा आपः। तै० ३।२।५।२॥ तां० ६।६।४॥ आपो वै प्राणाः। श० ३।८।२।४॥ प्राणो ह्यापः। जै० उ० ३।१०।६॥ तस्मादिमा उभयत्रापः प्राणेषु चात्मंश्च। श० ७।२।४।१०॥ अमृतं वाऽआपः। श० १।६।३।७॥४।४।३।१५॥ अमृतत्वं वा आपः। कौ० १२।१॥ अमृता ह्यापः। श० ३।६।४।१६॥ अमृतं वा एतदस्मिन् लोके यदापः। ऐ० ८।२०॥ आपो वाऽउरसः (उरसः-यजु० १२।१६)। श० ६।७।४।४॥ आपो ऽक्षितिर्या इमा एषु लोकेषु याश्चेमा अध्यात्मन्। कौ० ७।४॥ शान्तिरापः। श० १।२।२।११॥१।७।४।६, १७॥१।६।३।२,४॥ २।६।२।१८॥३।३।१।७॥ शान्तिर्वा आपः। ऐ० ७।५॥ आपो हि शान्तिः। तां० ८।७।८॥ शान्तिर्वै भेषजमापः। कौ० ३।६, ७, ८, ६॥ गो० उ० १।२५॥ आपो ह वाऽओषधीनाꣳ रसः। श० ३।६।१।७॥ रसो वाऽआपः। श० ३। ३।३। १८॥ ३।६।४।७॥ आपो वै सर्वस्य शान्तिः प्रतिष्ठा। ष० ३।१॥ आपो वा ऽअस्य सर्वस्य प्रतिष्ठा। श० ४।५।२। १४॥६।८।२।२॥१२।५।२।१४॥ आपः सत्ये (प्रतिष्ठिताः)। ऐ० ३।६॥ गो० उ० ३।२॥ श्रद्धा वा आपः। तै० ३।२।४।१॥ मेध्या वा आपः। श० १।१।१।१॥ ३।१।२।१०॥ मेध्या वाऽएता आपो भवन्ति या आतपति वर्षन्ति। श० ५।३।४।१३। पवित्रं वाऽआपः। श० १।१।१।१॥ ३।१।२।१०॥ आपो वै क्षीररसा आसन्। तां० १३।४।८॥ ऊर्ग्वा आपो रसः। कौ० १२।१॥ अन्नं वा ऽआपः। श० २।१।१।३॥७।४।२।३७॥८।२।३।६॥ तै० ३।८। २।१॥ ३।८। १७।५॥ अन्नमापः। कौ० १२।३, ८॥ आपोऽन्नम्। ऐ० ६।३०॥ तद्यास्ता आपोऽन्नं तत्। जै० उ० १।२५।६॥ तद्यत्तदन्नमापस्ताः। जै० उ० १। २६। ५॥ आपो वै रक्षोघ्नीः। तै० ३। २। ३।१२॥३।२।४।२॥३।२। ६। १४॥ (इन्द्रः) एताभिः (अद्भिः) ह्येनं (वृत्रं) अहन्। श० १।१।३।८॥ वज्रो वाऽआपः। श० १।१।१।१७॥३।१।२।६॥७।५।२।४१॥ तै० ३।२।४।२॥ वीर्यं वा ऽआपः। ५०५।३।४।१॥ आपो वा ऽअर्कः। श० १०।६।५।२॥ तद्यथा भोक्ष्यमाणोऽप एव प्रथममाचामयेदप उपरिष्टात्। गो० पू० २।६॥ मरुतोऽद्भिरग्निमतमयन्। तस्य तान्तस्य हृदयमाच्छिन्दन् साऽशनिरभवत्। तै० १।१।३।१२॥ अप्सुयोनिर्वाऽअश्वः। ०१३।२।२।१६॥ तै० ३।८।४।३॥३।८। १६।२॥३।८।२०।५॥ अद्भ्यो ह वाऽअग्रेऽश्वः सम्बभूव सोऽद्भ्यः सम्भवन्नसर्वः समभवदसर्वो हि वै समभवत्तस्मान्न सर्वैः पद्भिः प्रतितिष्ठत्येकैकमेव पादमुदच्य तिष्ठति। श० ५। १।५।५॥ आपो वा ऽअवकाः। श० ७।५।१। ११॥८।३।२।५, ६॥ यदापोऽसौ (द्यौः) तत्। श० १४।१।२।६॥ देव्यो ह्यापः। श० १।१।३।७॥ यज्ञो वा आपः। कौ० १२।१॥ श० १।१।१।१२॥ तै० ३।२।४।१॥ आपो वै यज्ञः। ऐ० २।२०॥ आपो हि यज्ञः। श० ३।१।४।१५॥ आपो रेतः। श० ३। ८। ४।११॥३।८।५। १॥ रेतो वा आपः। ऐ० १।३॥ पशवो वा एते यदापः। ऐ० १।८॥ तेजश्च ह वै ब्रह्मवर्चसं चातपवर्ष्या आपः। ऐ० ८। ८॥ आपो वै सर्वा देवताः। ऐ० २।१६॥ कौ० ११।४॥ तै० ३।२।४।३॥३।३। ४। ५॥३।७।३।४॥ ३।६। ७।५॥ आपो वै सर्वे कामाः। १०।५।४।१५॥ आपो वै सर्वे देवाः। श० १०।५।४।१४॥ आपो वै देवानां प्रियं धाम। तै० ३।२।४।२॥ सौम्या

ह्यापः । ऐ० १ । ७ ॥ तस्मात्प्रतीच्योऽप्यापो बह्व्यः स्यन्दन्ते, सौम्या ह्यापः । ऐ० १ । ७, १२ ॥ वरुणाय वै सुषुवाणस्य भर्गो ऽपाक्रामत्स त्रेधापतद् भृगुस्तृतीयमभवच्छ्रायन्तीयं तृतीयमपस्तृतीयं प्राविशत् । तां० १८ । ६ । १ ॥ आपो वरुणस्य पत्न्य आसन् । तै० १ । १ । ३ । ८ ॥ अग्निना वाऽआपः सुपत्न्यः । श० । ६ । ८ । २ । ३ ॥ अस्ति वै चतुर्थो देवलोक आपः । कौ० १८ । २ ॥ अप्सु पृथिवी (प्रतिष्ठिता) । जै० उ० १ । १० । २ ॥ आपः स्थ समुद्रे श्रिताः । पृथिव्याः प्रतिष्ठा । तै० ३ । ११ । १ । ५ ॥ प्रातःसवनरूपा ह्यापः । कौ० १२ । ३ ॥ अथ यदापः शूद्राणां स भक्षः । ऐ० ७ । २६ ॥ योषा वाऽआपो वृषाग्निः । श० १ । १ । १ । १८ ॥ २ । १ । १ । ४ ॥ आपो वै सरिरम् (यजु० १३ । ४२) । श० ७ । ५ । २ । १८ ॥ आपो वा इदमग्रे सलिलमासीत् । तै० १ । १ । ३ । ५ ॥ आपो वा इदमग्रे महत्सलिलमासीत् । जै० उ० १ । ५६ । १ ॥ आपो ह वाऽ इदमग्रे सलिलमेवास । ता (आपः) अकामयन्त (ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति । छान्दोग्योपनिषदि ६ । २ । ४ ॥ कथन्नु प्रजायेमहीति ता अश्राम्यँस्तास्तपो ऽतप्यन्त तासु तपस्तप्यमानासु हिरण्मयमाण्डꣳ सम्बभूवाजातो ह तर्हि संवत्सर आस तदिदꣳ हिरण्मयमाण्डं यावत्संवत्सरस्य वेला तावत्पर्यप्लवत ॥ ततःसंवत्सरे पुरुषः समभवत् । स प्रजापतिः ("According to the writings of the Egyptians, there was a time when neither heaven nor earth existed, and when nothing had being except the boundless primeval water, which was, however, shrouded with thick darkness. [नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्- ऋ० १० । १२६ । १ ॥ तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्—ऋ० १० । १२६ । ३ ॥] ....

At length the spirit of the primeval water felt the desire for creative activity, and having uttered the word, the world sprang straightway into being in the form which had already been depicted in the mind of the spirit before he spoke the word which resulted in its creation. [सो ऽपो ऽसृजत । वाच एव लोकाद्वागेवास्य सासृज्यत श० ६ । १ । १ । ९ ॥ सो ऽकामयत । आभ्यो ऽद्भ्यो ऽधिप्रजायेयेति सो ऽनया त्रय्या विद्यया सहापः प्राविशत्तत आण्डꣳ समवर्तत तदभ्यमृशदस्त्वित्यस्तु भूयो ऽस्त्वित्येव तदब्रवीत्ततो ब्रह्मैव प्रथममसृज्यत त्रय्येव विद्या–श० । ६ । १ । १ । १०] The next act of creation was the formation of a germ, or egg, from which sprang Ra, the Sun-god, within whose shining form was embodied the almighty power of the divine spirit." See "Egyptian Ideas of the Future Life" by E. A. Wallis Budge, pages 22 and 23. [Sun=सविता=प्रजापतिः-प्रजापतिर्वै सविता । तां० १६ । ५ । १७ ॥] श० ११ । १ । ६ । १-२ ॥ आपः एष वै रयिर्वैश्वानरः (य आपः) । श० १० । ६ । १ । ५ ॥ वस्तिस्त्वाऽएष वैश्वानरस्य (यद.पः) । श० १० । ६ । १ । ५ ॥ आपो व्यानः । जै० उ० ४ । २२ । ६ ॥ शुक्रा ह्यापः । तै० १ । ७ । ६ । ३ ॥ चन्द्रा ह्यापः । तै० १ । ७ । ६ । ३ ॥ आपो वै जनयो (यजु० १२ । ३५) ऽअद्भ्यो हीꣳ सर्वं जायते । श० ६ । ८ । २ । ३ ॥ यद्भव आपस्तेन (भवः= जन्म—अमरकोषे, ३ काण्डे, नानार्थवर्गे, २०५ श्लोके ॥ जन्म=आपः—वैदिकनिघण्टौ १ । १२) । कौ० ६ । २ ॥ आपस्सावित्री । जै० उ० ४ । २७ । ३ ॥ आपो वै पुष्करम् । श० ६ । ४ । २ । २ ॥ ७ । ४ । १ । ८ ॥ आपो वै पुष्करपर्णम् । श० ७ । ३ । १ । ६ ॥ आपः पुष्करपर्णम् । श० ६ । ४ । १ । ६ ॥ १० । ५ । २ । ६ ॥ आपो वै प्रजापतिः परमेष्ठी (यजु० १४ । ६ ॥) ता हि परमे स्थाने तिष्ठन्ति । श० ८ । २ । ३ । १३ ॥ आपः स (परमेष्ठी प्राजापत्यः) आपो ऽभवत्......परमाद्वाऽएतस्थानाद्वर्षति यद्दिवस्तस्मात्परमेष्ठी नाम । श० ११ । १ । ६ । १६ ॥ आपो हि पयः । कौ० ५ । ४ ॥ गो० उ० १ । २२ ॥ अपामेष ओषधीनाꣳ रसो यत्पयः । श० १२ । ८ । २ । १३ ॥ वाग्देवत्यं साम वाचो मनो देवता मनसः पशवः पशूनामोषधय ओषधीनामापः । तदेतद्ब्रह्म जावं सामाऽप्सु प्रतिष्ठितमिति । जै० उ० १ । ५६ । १४ ॥ ओषधयो वा ऽ अपामोघ्र (यजु० १३ । ५३) । यत्र ह्याप उन्दन्त्यस्तिष्ठन्ति तदोषधयो जायन्ते । श० ७ । ५ । २ । ४७ ॥ आपो ह्येतस्य

(सोमस्य) लोकः । श० ४ । ४ । ५ । २१ ॥ आपो
हि रेतः । तां० ८ । ७ । ६ ॥ आपो रेतः प्रजननम्
। तै० ३ । ३ । १० । ३ ॥ आपो मे रेतसि श्रितः ।
त० ३ । १० । ८ । ६ ॥ धर्मो ह्यापः । श० ११ । १ ।
६ । २४ ॥ आपः प्रोक्षण्यः । ऐ० ५ । २८ ॥ दिव्या
आपः प्रोक्षण्यः । तै० २ । १ । ५ । १ ॥ आपो वै
सूदो ऽन्नं दोहः । श० ८ । ७ । ३ । २१ ॥ आपः
स्वरसामानः । कौ० २४ । ४ ॥ अथ यत् स्वरसाम्न
उपयन्ति । अप एव देवतां यजन्ते । श० १२ । १ ।
३ । १३ ॥ रेवत्यः (यजु० १ । २१) आपः । श० १ ।
२ । २ । २ ॥ आपो वै रेवत्यः । तां० ७ । ६ । २० ॥
१३ । ६ । १६ ॥ आपो वै रेवतीः । तै० ३ । २ । ८ ।
२ ॥ अपां वा एष रसो यद्रेवत्यः । तां० १३ । १० ।
५ ॥ वज्रो वाऽ आपः । श० १ । ७ । १ । २० ॥ आप
इति तत् प्रथमं वज्ररूपम् । कौ० १२ । २ ॥ आपो
ह वै वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते । श०
३ । ६ । ४ । १४ ॥ वृत्रतुरः (यजु० ६ । ३४) इति
वृत्र ँ ह्येताः (आपः) अघ्नन् । श० ६ । ६ । ४ ।
१६ ॥ आपो वै विधाः (यजु० १४ । ७) अद्भिर्हीद
ँ सर्वं विहितम् । श० ८ । २ । २ । ८ ॥ आपो वै
द्यौः । श० ६ । ४ । १ । ६ ॥ द्यौर्वाऽ अपा ँ सद-
नम् (यजु० १३ । ५३) । श० ७ । ५ । २ । ५६ ॥
आपो दिव ऊधः (यजु० १२ । २० ॥) । श० ६ ।
७ । ४ । ५ ॥ आपो वै दिव्यं नभः । श० ३ । ८ ।
५ । ३ ॥ आपो वै वरेण्यम् । जै० उ० ४ । २८ । १ ॥
वायुरापश्चन्द्रमा इत्येते भृगवः । गो० पू० २ । ८ ।
(६) ॥ आपो वै सर्वः (=शर्वः=रुद्रः) अद्भ्यो
हीद ँ सर्व जायते । श० ६ । १ । ३ । ११ ॥ आप
एव सर्वम् । गो० पू० ५ । १५ ॥ एष वाऽ अपा ँ
रसो यो ऽयं (वायुः) पवते । श० ५ । १ । २ । ७ ॥
वायुर्वाऽअपामेम (यजु० १३ । ५३) यदा ह्येवैष
इतश्चेतश्च वात्यथापो यन्ति । श० ७ । ५ । २ । ४६ ॥
अपः श्लाघा (गच्छति) । गो० पू० २ । २ ॥ स
वा एषो (सूर्यः)ऽपः प्रविश्य वरुणो भवति ।
कौ० १८ । ६ ॥ अथ यदप्सु वरुणं यजति स्व
एवैनं तदायतने प्रीणाति । कौ० ५ । ४ ॥ अप्सु वै
वरुणः । तै० १ । ६ । ५ । ६ ॥ यो ह वाऽ अयमपा-
मावर्त्तः स हावभृथः स हैष वरुणस्य पुत्रो वा
भ्राता वा । श० १२ । ६ । २ । ४ ॥ वरुणस्य वा
अभिषिच्यमानस्यापः इन्द्रियं वीर्यं निरघ्नन् ।
तत्सुवर्ण ँ हिरण्यमभवत् । तै० १ । ८ । ६ । १ ॥

अग्निर्ह वा ऽ अपो ऽभिदध्यौ मिथुन्याभिः स्या-
मिति ताः सम्बभूव तासु रेतः प्रासिञ्चत्तद्धिरण्य-
मभवत्तस्मादेतदग्निसंकाशमग्नेर्हि रेतस्तस्मादप्सु
(हिरण्यं) विन्दन्त्यप्सु हि (रेतः) प्रासिञ्चत्
श० २ । १ । १ । ५ ॥ अद्भ्यो वा एष (अग्निः)
प्रथममाजगाम । श० ६ । ७ । ४ । ४ ॥ आपो वाऽ
अस्य (अग्नेः) दिवो ऽर्णः । श० ७ । १ । १ । २४ ॥
अन्तरिक्षं वाऽ अपा ँ सधस्थम् (यजु० १३ । ५३) ।
श० ७ । ५ । २ । ५७ ॥ आपो वै मरुतः । ऐ० ६ ।
३० ॥ कौ० १२ । ८ ॥ अप्सु वै मरुतः श्रितः
(श्रिताः) । गो० उ० १ । २२ ॥ अप्सु वै मरुतः
शिताः (? श्रिताः) । कौ० ५ । ४ ॥ अथ यत्कृष्णं
तदपां रूपमन्नस्य मनसो यजुषः । ज० उ० १ ।
२५ । ६ ॥ अन्नं वाऽ अपां पाथः (यजु० १३ । ५३) ।
श० ७ । ५ । २ । ६० ॥ आपो वै सहस्त्रियो वाजः
(यजु० १३ । ४७) । ७ । १ । ? । २२ ॥ गिरिबुध्ना
उ वा आपः । श० ७ । ५ । २ । १८ ॥ वैराजीर्वा
आपः । कौ० १२ । ३ ॥ अद्भिर्यज्ञः प्रणीयमानः प्राङ्
तायते । तस्मादाचमनीयं पूर्वमाहारयति ।
गो० पू० १ । ३६ ॥ अप्सुयोनिर्वै वेतसः ।
श० १२ । ८ । ३ । १५ ॥ अप्सुजा वेतसः । श० १३ ।
२ । २ । १६ ॥ अप्सुजो वेतसः । तै० ३ । ८ । ४ ।
३ ॥ ३ । ८ । १६ । २ ॥ ३ । ८ । २० । ४ ॥ तद्यत्तत्स-
त्यम् । आप एव तदापो हि वै सत्यम् । श० ७ ।
४ । १ । ६ ॥ तदेतत्सत्यमक्षरं यदोमिति । तस्मि-
न्नापः प्रतिष्ठिताः । जै० उ० १ । १० । २ ॥ पृथिव्य-
प्सु श्रिता । तै० ३ । ११ । १ । ६ ॥ पृथिव्यप्सु
(प्रतिष्ठिता) । ऐ० ३ । ६ । गो० उ० ३ । २ ॥
इयं (पृथिवी) वाऽ अपामयनम् (यजु० १३ ।
५३) अस्या ँ ह्यापो यन्ति । श० ७ । ५ । २ । ५० ॥
समुद्रो वाऽ अपां योनिः (यजु० १३ । ५३) । श०
७ । ५ । २ । ५८ ॥ समुद्रोऽसि तेजसि श्रितः ।
अपां प्रतिष्ठा । तै० ३ । ११ । १ । ४ ॥
विद्युद्वाऽ अपां ज्योतिः (यजु० १३ । ५३) । श०
७ । ५ । २ । ४६ ॥ अभ्रं वाऽ अपां भस्म (यजु०
१३ । ५३) । श० ७ । ५ । २ । ४८ ॥ सिकता वा
अपां पुरीषम् (यजु० १३ । ५३) । श० ७ । ५ ।
२ । ५६ ॥ चक्षुर्वाऽ अपां क्षयः (यजु० १३ । ५३) तत्र
हि सर्वदैवाप क्षियन्ति । श० ७ । ५ । २ । ५४ ॥
श्रोत्रं वा अपा ँ संधि (यजु० १३ । ५३) श० ।
७ । ५ । २ । ५५ ॥

आपः॒ऽइव जलानीव ३. ५. ८ ॥

आपतये समन्तात्पतिः पालको यस्मिँस्तस्मै ५. ५ ॥

आऽपथयः समन्तादभिमुखः पन्था येषान्ते ५. ५२. १० ॥

आऽपथ्यः पथि भवः पथ्यः सर्वतः पथ्यः आपथ्यः १. ६४. ११ ॥

आपन् आप्नुवन्ति ६. १. ४ ॥

आऽपनीफनत् अत्यन्तं गच्छति ४. ४०. ४ ॥

आऽपप्रिवान् सर्वतो व्याप्तवान् १. ७३. ८ ॥

आऽपप्रुषी समन्तात् सर्वा विद्या व्याप्नुवती ४. ५२. ६ । समन्ताद् व्याप्ता ६. ६१. ११ ॥

आपानम् व्यापकम् (आपानमिति व्याप्तिकर्मा । निघं० २ । १८) २. ३४. ७ ॥

आपानः व्याप्ति कर्म । निघं० २ । १८ ॥ आप्नुवानः नि० ३ । ११ ॥

आपाम व्याप्नुयाम १२. ७३ ॥

आपिः सुख प्रापकः (अत्र आप्लृ व्याप्तावित्यस्मात् इणजादिभ्यः अ० ३ । ३ । १०८ इतीण प्रत्ययः) १. २६. ३ । यः प्रीत्या प्राप्नोति सः १. ३१. १६ । यः समन्तात् पिबति शुभगुणव्याप्तो वा ३. ५१. ९ । यः सर्वानाप्नोति ४. २५. ६ ॥ [आपयः] विद्या व्याप्तुकामाः १. ११०. २ । मित्रतां व्याप्ताः २. ३४. १० ॥ आपेः प्राप्तधनात् २. २८. ११ ॥

आऽपिप्यानम् सर्वतो वर्धमानम् ४. २७. ५ ॥

आपिपर्ष समन्तात् पिनिष्टि १९. ११ ॥

आपुः प्राप्नुवन्ति (अत्र वर्तमाने लडर्थे लिट्) १. २४. ६ ॥

आऽपूर्णः समन्तात्पूरितः ३. ३२. १५ ॥

आऽपृचे समन्तात्संपर्काय ५. ५०. २ ॥

आऽपृच्छ्यः समन्तान्निश्चयार्थं प्रष्टुं योग्यः १. ६०. २ ॥

आऽपृणन् समन्तात्पूरयन् ४. ५३. २ ॥

(आपृणस्व) आपृणस्वेत्याप्रजायस्वेत्येतत् । श० ६ । २ । ३ । ४४ ॥

आप्तः सर्वाविद्यादिसद्गुणव्याप्तः सत्योपदेष्टा १. ३०. १४ ॥ [आप्तम्] व्याप्तम्, प्राप्तम् १९. २६ ॥

आप्नुवन् प्राप्नुवन्ति ४०. ४ ॥

आप्नोति प्राप्नोति १६. १९ ॥

आप्त्यः य आप्तेषु भवः सः १. १०५. ९ ॥

आप्त्या आप्नोतेः । निघं० ११ । २० । आप्त्यम् आप्तव्यम् । निघं० ११ । २१ ॥

आप्त्याः (देवाः) साध्याश्च त्वा ऽऽप्त्याश्च देवा; पाङ्क्तेनच्छंदसा त्रिणवेन स्तोमेन शाक्करेण साम्ना ऽऽरोहन्तु तानन्वारोहामि राज्याय । ऐ० ८ । १२ ॥ अथैनं (इन्द्रं) अस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाऽऽप्त्याश्च देवाः .... अभ्यषिञ्चन् .... राज्याय । ऐ० ८ । १४ ॥

आप्यम् आप्तुं प्राप्तुं योग्यम् सखित्वम् (अत्र आप्लृ व्याप्तावित्यस्मादौणादिको यत् । अत्र सायणाचार्येण प्रमादादुदुपधत्वाभावेऽपि पोरदुपधादिति कर्मणि यत् । यतोनाव इत्याद्युदात्तत्वम् यच्च छान्दसमाद्युदात्तत्वमित्यशुद्धमुक्तम् । औणादिकस्य यत्प्रत्ययस्य विद्यमानत्वात्) १.

३६. १२ ॥

आप्यः आप्यमाप्नोतेः। निघं० ६। १४ ॥

आप्यते प्राप्यते १९. १७ ॥

आप्यन्ते प्राप्यन्ते १६. २८ ॥

आप्यायमानः [आप्यायमानः] समन्ताद्वर्धमानः १२. ११३ । पुष्टः पुष्टिकारकः १. ९१. १८ । वृद्ध इव ८. ५७ ॥

आप्रस्य पूर्णबलस्य १. १३२. २ ॥

आप्रीभिः या समन्तात् प्रीणन्ति ताभिः १६. १६ ॥

आप्रियः (ऋचः) तद्यदाप्रीणाति तस्मादाप्रियो नाम। कौ० १०। ३ ॥ आप्रीभिराप्नुवन् तदाप्रीणामाप्रीत्वम्। तै० २। २। ८। ६॥ तद्यदेनं (पशुं) एताभिराप्रीभिराप्रीणात्तस्मादाप्रियो नाम । श० ११। ८। ३। ५॥ यदेतान्याप्रिय आज्यानि भवन्त्यात्मानमेवैतैराप्रीणाति । तां० १५। ८। २॥ १६। ५। २३॥ प्राणा वा आप्रियः। कौ० १८। १२॥ तेजो वै ब्रह्मवर्चसमाप्रियः। ऐ० २। ४॥

आबबन्ध समन्ताद् बध्नामि १०. ६५ ॥

आबभूव समन्ताद्भवति ३२. ५ ॥

आऽभुवः समन्ताद्भवन्ति ये या वा, तान् ता वा १. ६४. १. ६ ॥ [आऽभुवम्] यत्र समन्ताद्भवति सुखं तम् १. १३३. ७। समन्ताद्भवनशीलम् १. १५१. ४ ॥

आऽभूभिः समन्ताद्भवन्ति वीरा यासु प्रशासनक्रियासु ताभिः १. ५१. ६ । ये समन्ताद्भवन्ति तैः सह ५. ३५. ३ ॥

आऽभूषति समन्तादाप्नोति १. १३६. ५ ॥

आऽभूषन्तीः समन्ताद् भूषणयुक्ताः १. ४३. ६ ॥

आभूषु समन्ताद् भूषिता जना येन तत् १. ५६. ३ ॥

आऽभूषेण्यम् अलङ्कर्तव्यम् ५. ५५. ४ ॥

आऽभृतः समन्तात् पोषितः २. ३६. ५ । समन्ताद् धृतः ४. ५८. ११ ॥ आभृतम् आभिमुख्येन धृतम् ६. ४७. २७ ॥

आऽभोगयम् आ समन्तात् भोगेषु साधुं व्यवहारम्। (अत्रोभयसंज्ञान्यपि छन्दांसि दृश्यन्त इति भसंज्ञानिषेधादल्लोपाभावः) १. ११०. २ ॥ [आ ऽ भोगये] समन्तात् भुञ्जते सुखानि यस्यां तस्यै पुरुषार्थयुक्तायै (अत्र बहुलवचनादौणादिको यिः प्रत्ययः) १. १३३. ५ ॥

आममत् रोगी करे (अम रोगे अमागमः लङि रूपम्) १६. ४७ ॥

आमयति रोगयति १२. ८३ ॥

आऽमरीता समन्ताद्विनाशकः ४. २०. ७ ॥

आमादम् आमानपक्वानत्ति तम् १. १७ ॥

अयं (अग्निः) वाऽ आमाद्येनेदं मनुष्याः पक्त्वाऽश्नन्ति। श० १। २। १। ४॥

आमा आमानि ३. ३०. १४ । अपरिपक्वम् (अत्र विभक्तेराकारादेशः) ४. ३. ६ ॥

[आमायाम्] अप्रौढायाम् १. १८०. ३ ॥

[आमासु] गृहे भवासु २. ३५. ६ ॥

आमिक्षा दधिदुग्धमिश्रैर्निर्मिता १६. २१ । मधुराम्लादि संयोगयुक्ता १६. २३ ॥

आण्डस्य वा ऽ एतद्रूपं यदामिक्षा । तै० १। ६। २। ४॥

आमित्रः शत्रुः ६. २८. ३ ॥

आऽमिनाना समन्तार्द्धिसन्तौ (मीञ् हिंसाया-मित्यस्य रूपम्) १. ६२. १० ॥

आमिनाने इत्याऽमिनाने परस्परं प्रक्षिपन्तौ १. ११३. २ ॥

आमिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे।

आमिश्लऽतमः समन्तादतिशयेन मिश्रितः ६. २१. ४ ॥

आमिषि मांसे ६. ४६. १४ ॥

आऽमुरः समन्ताद्रोगकारिणः ४. ३१. ६।

आऽमुष्य चोरयित्वा (अत्र संहितायामिति दीर्घः) ३. ४८. ४ ॥

आऽमेन्यस्य समन्तान्मेयस्य ५. ४८. १ ॥

आमेन्याने इत्याऽमेन्याने पुनः पुनरहिंसन्त्यौ १. ६६. ५ ॥

आयच्छद्भ्यः निगृहीतृभ्यः १६. २२ ॥

आऽयजन्ते समन्तात् संगच्छन्ते ३. ४. २ ॥

आऽयजसे समन्तात्सुखं ददते १. ६४. २ ॥

आऽयजाते समन्ताद्यजते संगच्छते ७. ६०. ११ ॥

आऽयजिष्ठः समन्तादतिशयितो यष्टा २. ६. ६ ॥

आयजी इत्याऽयजी समन्ताद्यज्यन्ते संगम्यन्ते पदार्था याभ्यां तौ स्त्रीपुरुषौ (अत्र बाहुलकादौणादिकः करणकारके इः प्रत्ययः) १०. २८. ७ ॥

आऽयत् प्राप्नुवत् ३. ५५. ८ ॥ आयताम् आगच्छताम्, आगच्छन्तीनां वा १०. १६६. ७ ॥

आयत समन्ताद्धन्ति (अत्र यमो गन्धने अ. १।२।१५ सिचः कित्त्वम्) १. ८०. १२॥

आयतने आयन्ति आगच्छन्ति प्राणिनो यस्मिँस्तज्जगत्तस्मिन् जगति स्थाने यज्ञे वा ५. २८ ॥

मनो वा ऽ आयतनम्। श० १४।६।२।५॥

आऽयता विस्तृतानि ५. ४४. ९ ॥

आऽयतिः समन्ताद् विस्तृतिः १. १३६. ६ ॥

प्राणो वा आयतिः। गो० उ० २।३॥

आऽयती समन्तात् प्राप्यमाणा १. १६१. २॥

आयत्याः पश्चाद् भवाः ५. ४५. १ ॥

आऽयतीनाम् आगच्छन्तीनाम् १. १२४. २ ॥

आयती बाहुनाम। निघ० २।४॥

आयन् प्राप्नुवन्ति २. २४. ६। प्राप्नुयुः ३. ३३. ७। गच्छन्ति ३. ३६. ६. ॥

आयनाय समन्ताद् विज्ञानाय २२. ७ ॥

आऽयन्तम् आगच्छन्तम् १. १२५. २ ॥

आऽयान्ति आगच्छन्ति ५. ६. २ ॥

आयम् [आयम्] आगच्छेयम् प्राप्नुयाम् १. १२५. ३ ॥

आऽयय आगच्छत १. १६८. ६ ॥

आऽययुः जानीयुः प्राप्नुयुर्वा ५. ५३. ३ ॥

आयवः प्राप्तसत्यासत्यविवेचनाः १. ६०. ३। प्राप्नुवन्तः १. १३९. २। मनुष्याः (आयव इति मनुष्यनाम। निघं० २. ३) २. ३१. ७। ये सत्यं यान्ति ते मनुष्याः। ३३. २८। ये स्वकर्मफलानि यान्ति ते मनुष्याः ३३. ९७॥

आयवः प्राप्ताः २. ५. ५ । समन्तात् संयोजका वियोजकाश्च १८. ३६ ॥ आयुम् यन्तं गच्छन्तम् १. ३१. ११ । जीवनम् ६. ११. ४॥ आयुना जीवनेन प्रापकत्वेन वा ५. ६ ॥ आयवे प्रायणाय १. १४०. ८ । विज्ञानाय १. ३१. ११ ॥ आयोः सनातनात्कारणात् १. ६६. २ (१२६ आर्य०) । प्राप्तुं योग्यस्य (छन्दसीणः उ० १ । २) १. १०४. ४ । प्रापकस्य १. १७४ । प्राप्तस्य २. ४. २ ॥ आयुनि प्राप्ते ३. ३. ७ ॥

आयुः वायुरयनः । नि० ६ । ३ ॥

आयवसस्य पूर्णसामग्रीकस्य १. १२२. १५ ॥

आयसः विज्ञानात् १. ५६. ३ । आयसा निष्पन्नस्तेजोमयो वा १. ८०. १२ । आयसम् अयोनिर्मितं शस्त्रास्त्रादिकम् १. १८१. ६ ॥

आयसी अयोमयी दृढा ७. १५. १४ ॥ [आयसीः] सुवर्णलोहनिर्मिताः २. २०. ८ ॥ [आयसीभिः] अयसः सुवर्णनिर्मितान्याभूषणानीवेश्वरेण रचिताभिः १. ५८. ८ ।

आयासाय समन्तात्प्रापणाय ३६. ११ ॥

आयुः जीवनहेत्वन्नम् १. ११३. १७ । जीवनं प्राप्तव्यं वस्तु वा १. ७३. ५ । ज्ञानं जीवनम् वा १. ६४. १६ । एति जीवनं येन तत् १८. २६ ॥ वयः १. २४. ११ । ज्ञाता १. १६२. १ ॥

आयुस् अन्ननाम । निघ० २ । ७ ॥

आयुः (एकाहः)—आयुषा वै देवा असुरानायुवतायुते भ्रातृव्यं य एवं वेद । तां० १६ । ३ । २ ॥ आयुः उर्वशी वाऽअप्सराः पुरूरवा पतिरथ यत्तस्मान्मिथुनादजायत तदायुः । श० ३ । ४ । १ । २२ ॥ वरुण एवायुः । श० ४ । १ । ४ । १० ॥ (यजु० १२ । ६४) अग्निर्वाऽआयुः । श० ६ । ७ । ३ । ७ ॥ ७ । २ । १ । १५ ॥ अग्निर्वाऽआयुष्मानायुष ईष्टे । श० १३ । ८ । ४ । ८ ॥ संवत्सर आयुः । श० ४ । १ । ४ । १० ॥ ४ । २ । ४ । ४ ॥ यज्ञो वा आयुः । तां० ६ । ४ । ४ ॥ असौ लोक (=द्युलोकः) आयुः । ऐ० ४ । १५ ॥ असावुत्तमः (लोकः=स्वर्लोकः) आयुः (स्तोमः) । तां० ४ । १ । ७ ॥ अन्नमु वाऽ आयुः । श० ६ । २ । ३ । १६ ॥ आयुर्वा उद्गाता । आयुः क्षतसंग्रहीतारः । तै० ३ । ८ । ५ । ४ ॥ प्राणो वा आयुः । ऐ० २ । ३८ ॥ यो वै प्राणः स आयुः । श० ५ । २ । ४ । १० ॥ आयुर्वा उष्णिक् । ऐ० १ । ५ स यो हैवं विद्वान्त्सायम्प्रातराशी भवति सर्वं हैवायुरेति । श० २ । ४ । २ । ६ ॥ य एवं विद्वान्त्सग्नं मृण्मये भुञ्जीत । तथा हास्यायुर्न रिष्येत तेजश्च । आ० १ । १ ॥ आयुर्वै विकर्णी (इष्टका) । श० ८ । ७ । ३ । ११ ॥ आयुर्वै सहस्रम् । तै० ३ । ८ । १५ । ३ ॥ ३ । ८ । १६ । २ ॥ विदेदग्निर्नभो नामाग्नेऽअङ्गिर आयुना नाम्नेत्याह (यजु० ५ । ६) इति । श० ३ । ५ । १ । ३२ ॥ अमृतमायुर्हिरण्यम् । श० ३ । ८ । २ । २७ ॥ ४ । ५ । २ । १० ॥ ४ । ६ । १ । ६ ॥ आयुर्हि हिरण्यम् । श० ४ । ३ । ४ । २४ ॥ आयुर्वै हिरण्यम् । तै० १ । ८ । ६ । १ ॥ यद्धिरण्यं ददाति आयुस्तेन वर्षीयः कुरुते । गो० उ० ३ । १६ ॥

आयुष्मतीं आयुष्मतीम् (३. १०. ३ अथर्व ३२० भूमि०)

आयुष्मान् बह्वायुर्विद्यते यस्य सः ३५. १७ ॥

आयुष्यम् आयुषे जीवनाय हितम् ३४. ५० ॥

आऽयूय सम्मेल्य (अत्र निपातस्य चेति दीर्घः) २. ३७. ३ ॥

आऽयजे समन्ताद्याजयति १. ११४. २ । संगत और अनेक विधि ताड़न करता है (१३४ आर्य) ॥

आऽयेमिरे विस्तृणन्ति ३. ६. ८ ॥

आऽयै एतुं, गन्तुम् २. १८. ३ ॥

आयुधम् आयुधमिव २. १५. ४। समन्तात् युध्यन्ति येन तत् ३. ४४. ४। असि भुशुण्डि शतघ्न्यादिकम् १६. ५१। धनुर्वाण-शक्तिपद्मपाशादि २६. ४५॥
आयुधाय यः समन्ताद् युध्यते तस्मै (अत्र इगुपधेति कः) १६. १४॥
आयुधम् उदकनाम। निघ० १। १२॥
आयुधानीऽइव यथा वीरैर्युद्धविषया प्रक्षिप्तानि शस्त्राणि गच्छन्त्यागच्छन्ति तथा १. ६२. १॥
आयुधिनै ये शतघ्न्यादिभिः समन्ताद्युध्यन्ते ते प्रशस्ता विद्यन्ते यस्य तस्मै १६. ३६॥
आयुनक् युनक्ति २६. १३॥
आऽयुयुज्रे समन्तात् युञ्जते ५. ५८. ७॥
आऽयुयुवे समन्ताद्बध्नाति १. १३८. १॥
आयुर्दाः आयुप्रदाः ३. १७॥
आयुर्युधः ये आयुषा सह युध्यन्ते तेषाम् १६. ६०॥
आयुष्पाः यः आयुः पाति सः २२. १॥
आऽयोयुवानः समन्ताद् भृशं मिश्रयिता विभाजको वा ४. १. ११॥
आर गच्छति ३. ३०. १०॥
आरण्यः अरण्ये भवः ६. ६.॥ आरण्यानाम् वनानाम् १६. २०॥
आरत् प्राप्नोति १७. ८६॥
आरत गच्छन्तु। (व्यवहिताश्चेत्युपसर्ग-व्यवधानम् अत्र व्यत्ययः) १. ४. ५॥
प्राप्नुत (अत्र लोडर्थेलङ्) १. ३६. ५॥ प्राप्नुते १. ५४. १॥
आरन् प्रापयति १. ४६. ३॥
आरपन्ति व्यक्तशब्दं वदन्ति २२. २॥
आऽरभम् आरब्धुम् ५. ३४. ५॥
आरभम् आरब्धुम्। नि० १२। ३२॥
आऽरभे आरब्धव्ये व्यवहारे (अत्र कृत्यार्थे तवकेन् केन्यत्वनः, अ० ३.४.१४। अनेन रभ धातोः केन् प्रत्ययः) १. २४. ५॥ आरब्धव्ये गमनागमने १. ४. २। आरब्धुम् १. १८२. ७॥
आऽरभ्य त्वत्सामर्थ्यमाश्रित्य १. ५७. ४॥
आरम्भणम् आरभते यस्मात्तत् १७. १८।
आरात् निकटे २६. १७। दूरात् समीपाद्वा १. १६३. ६॥
आरात्तात् दूरात् १. १६७. ९। दूरे ७.३२.१॥
आराम् काष्ठविभाजिकाम् ६. ५३. ८। आरया प्रतोदेन ६. ५३. ५॥
आरितः सभया विज्ञापितः १. १०१. ४। प्राप्तः २. २१. ३॥
आरितः प्रत्यृतः (स्तोमान्), नि० ५। १५॥
आऽरिशामहे समन्तात्प्राप्नुयाम (अत्र लिश गतावित्यस्य वर्णव्यत्ययेन लस्य स्थाने रेफादेशः) १. १८७. ८॥
आरीः ज्ञानवत्यः (अत्र ऋधातोः सर्वधातुभ्य इन्नितीन्। कृदिकारादक्तिन इति ङीप् पूर्वसवर्णादेशश्च) १. ७७. ३। आप्तुं योग्याः १. ६६. ३। प्राप्त होवें (१२० आर्य.)॥

आरुः गच्छेयुः ३. ७. १ ॥

आरुः प्राप्नुवन्तु ३. १. ४ ॥

आरुजे समन्ताद्रोगाय २७. ४० । दुःख भञ्जक जीवाय ३६. ५ ॥

आरुजत्नुऽभिः समन्ताद् भञ्जद्भिः । (आङ्‌ पूर्वाद्रुजो भङ्ग इत्यस्माद्धातोरौणादिकः क्नुः प्रत्ययः) १. ६. ५ ॥

आरुणीषु गच्छन्ति प्राप्नुवन्ति ....यैस्तान्यरुणानि यानानि तेषामिमाः क्रियास्तासु १. ६४. ७ ॥

आऽरुन्धानः समन्ताच्छत्रून्निरुन्धानः ४. ३८. ४ ॥

आरे समीपे दूरेच १. ११४. १० ॥

आरे दूरनाम । निघ० ३ । २६ ॥

आरेऽअघाः आरे दूरेऽघानि पापानि यासान्ताः ६. १. १२ ॥ [आरेऽअघाम्] आरे दूरे अघं पापं यस्याम् ६. ५६. ६ ॥

आऽरोधनम् निरोधनम् ४. ८. २ । निरोधकम् ४. ८. ४ ॥

आऽरोहन् समारूढः सन् जगत्यारोहणं कुर्वन् वा १. ५०. ११ ॥

आऽरोहन्तम् आरोहणं कुर्वन्तम् २. १२. १२ ॥

आऽरोहयन्ति चढ़ाते हैं ४. १३. २ ॥

आर्चत् सत्कुर्यात् १. १२०. ३ ॥

आर्चत्ऽकस्य अर्चतः सत्कुर्वतः शिष्टस्यानुकम्पकस्य । (अत्रार्च धातोर्बाहुलकादौणादिकोऽतिः प्रत्ययस्ततोऽनुकम्पायां कः) १. ११६. २२ ॥

आर्चन् अर्चन्तु १. ५२. १५ ॥ सत्कुर्वन् ५.

आर्जुनेयम् अर्जुनेन रूपेण निर्वृत्तम् । (अत्र चातुरर्थिको ठक्) १. ११२. २३ । अर्जुनेनार्जुनविदुषा निष्पादितामिव ४. २६. १ ॥ [आर्जुनेयाय] अर्जुन्याः सुरूपवत्या विदुष्याः पुत्राय ७. १६. २ ॥

आर्त प्राप्नुयाः ४. १. १२ ॥ प्राप्नोति ७. ३४. ७ ॥

आर्तनासु या आर्तयन्ति सत्ययन्ति १. १२७. ६ ॥

आर्त्तवाः ऋतुषु भवा गुणाः १४. २६ ॥ [आर्त्तवेभ्यः] ऋतुजातेभ्यः २२. २८ ॥

आर्त्नी प्राप्यमाने २६. ४१ ॥ गच्छन्त्यौ ६. ७५. ४ ॥ [आर्त्न्योः] पूर्वापरयोः १६. ६ ॥

आर्त्नी अर्त्तन्यौ वारण्यौ वारिपण्यौ वा । नि० ६ । ३६ ॥

आर्त्यै कामपीड़ायै (प्रवृत्तम्) ३०. ६ ॥ पीड़ा निवृत्तये ३०. १७ ॥

अनार्त्यै त्वेत्येवैतदाह यदाह व्यथायै त्वेति (व्यथा आर्तिः)। श० ५ । ४ । ३ । ७ ॥

आर्त्विज्या ऋत्विजां गुणप्रकाशकानि कर्माणि १. ६४. ६ ॥

आर्दन् हिंसन्ति ४. १७. २ ॥

आर्द्रदानुः य आर्द्राणां गुणानां दानुर्दाता सः १८. ४५ ॥

आर्द्रदानुः एष (वायुः) ह्यार्द्रं ददाति । श० ६ । ६ । १ । २६ ॥

आर्दयः आर्दयति नयति ६. १७. १२ ॥

आर्द्रात् गीले पदार्थ से २. १३. ६ ॥

[आर्द्रस्य] सपङ्कस्य सागरस्य १. ११६. ४ ॥ जलेन पूर्णस्य समुद्रस्य (१६८ भूमि०) ॥

आर्पिता स्थापितानि १. १६४. १४ ॥

आर्यः ब्राह्मणक्षत्रियवैश्यवर्णाः ५. ३४. ६ । धर्म्यगुणकर्मस्वभावः ३३. ८२ ॥

[आर्यम्] आर्याणामर्याणां वा इदम् १. १०३. ३ ॥ आर्येण उत्तमविद्याधर्मसामर्थ्येन २. ११. १६ ॥

आर्यः ईश्वरपुत्रः । नि० ६ । २६ ॥

आर्षेय ऋषिषु साधुः तत्सम्बुद्धौ (अत्र छान्दसो ठक्) २१. ६१ ॥

आलऽअक्ता आलेन विषेन दिग्धा गुप्ता ६. ७५. १५ ॥

आव रक्ष २. ११. ११ ॥

आवः प्रापय १. ३३. १५ । रक्षति ५. ७७. २ । रक्ष १. १७६. ५ । रक्षेः ३. ५०. २ । रक्षेत् (अत्र लिङर्थे लङ्) १. ३३. १४ ॥

[आवः] अवति, अवेत्, आवृण्वन्ति स्वव्याप्त्याच्छादयान्त ताः १३. ३ । रक्ष प्राप्नुहि वा १. ३३. ७ । प्राणिनः सुखे प्रवेशयेत् १. ३३. १४ ॥

आवत् रक्षणादिकं कुर्यात् १. ८५. ७ ॥

आवृत् रक्षति प्रीणाति १. ३६. १७ । रक्षेत् १. ९१. १५ ॥

आवत [आवत] विजानीत १. ६४. १३ । पालयत १. १६६. ८ । रक्षेत १. १६६. १३ ॥

आवतम् [आवतम्] कामयतम् १. १२२. १५ । पालयतम् १. ४७. ५ । रक्षतम् १. ११२. ६ । विजानीतम् १. ११२. १३ ॥

आवतुः कामयेताम् १. १६१. १० ॥

आवथुः रक्षेथाम् १०. ३४ । रक्षताम् (पुरुषव्यत्ययः) २०. ७७ ॥

आऽवदन् ब्रुवन् १. ११. ६ ॥ समन्तादुपदिशन् २. ४३. ३ ॥

आवदानि समन्तादुपादिशेयम् २६. २ ॥

आवन् प्राप्नुयामः ४. ४४. ६ ॥

आवन् प्रकर्षेण रक्षन्ति ३. ३. १० ॥

आवपनम् समन्तात् वपति यस्मिँस्तत् २३. ६ । समन्तात् सर्वाधारम् २३. ४५ ॥

अयं वै (भू) लोक आवपनं महत् । तै० ३ । ६ । ५ । ५ ॥

आवम् रक्षयेयम् ४. २६. ३ ॥

आवयाः [आऽवयाः] येनावयजन्ति सः २५. २८ ॥ यः समन्ताद्यजाति संगच्छते सः १. १६२. ५ ॥

आवयाः उदकनाम । निघ० १ । १२ ॥

आऽवरत् आवृणुयात् १. १४३. ६ । आवृणोति ३. ५. १ । निवारयति १. ११३. १४ । विवृणोतीव १. ११३. ४ ॥

आवरित्यावः वृणोति १. ६२. ४ । रक्षति ६. ४४. ८ ॥

आऽवर्जते समन्तात् वर्जयति त्याजयति

(अत्राङ् पूर्वाद् वृजो धातोर्लट् बहुलं छन्दसीति शपो लुङ् न। अन्तर्गतोण्यर्थश्च) १. ३३. १ ॥

आ ऽ ववर्तत् समन्तात् वर्तयते २. ३४. १४॥ समन्तात् वर्तते ६. ६८. १॥

आ ऽ ववर्तति भृशं वर्तते ५. ७३. ७ ॥

आवसथान् निवासस्थानों को (६. ६. ७। अथर्व २५५ विधि) ॥

आ ऽ वहन्ती सर्वतः प्रापयन्ती १. ४८. ६ ॥

आवहात् समन्तात् प्राप्नुयात् १८. ५६ ॥

आविः प्रसिद्धार्थे (?) १. ३१. ३ ॥ प्रकटीभावे १. ८६. ६ ॥

आविस् आविष्कुरुते। नि० ५। १६ ॥ आवेदनात्। नि० ८। १५ ॥

आविः ऽ ऋजीकः प्रसिद्धसरलस्वभावः ४. ३८. ४ ॥

आविः ऽ कृण्वानः प्राकट्यं कुर्वन् ४. १७. ३ ॥

आविः ऽ कृण्वाना प्राकट्यं सम्पादयन्ती ५. ८०. ४ ॥

आविः ऽ त्यः आविर्भूतेषु व्यवहारेषु प्रसिद्धः १. ६५. ५ ॥

आविरावेदनात्, तत्त्यः। नि० ८। १६ ॥

आवित्तः प्राप्तपूर्णभोगोलब्धप्रतीतो वा। (विदो भोग प्रत्यययोः अ० ८। २। ५८ ॥ अनेनायं निपातितः) १०. ९ ॥

आविथ रक्षेः, पालय १. १३१. ५ ॥ अवति २. १३. ६ ॥

आविथ रक्ष १. ५१. ५ ॥ रक्षसि १.५३.१० ॥

आ ऽ विद्वान् यः समन्तात् सर्वं वेत्ति ४. ९. १० ॥

आऽविवासति समन्तात् सेवते। (विवासतीति परिचरणकर्मसु पठितम्। निघं० ३। ५) १. १२. ९ ॥

आऽविवासन् समन्तात् परिचरन् १. १५२. ६ ॥

आ ऽ विवासात् समन्तात् सेवेत ७. २०. ६ ॥

आऽविवासान् समन्तात् सेवन्ते २. ११. १६ ॥

आ ऽ विविद्रे समन्ताल्लभन्ते ३. ५४. ४ ॥

आ ऽ विवेश आविशति ६. ७४. २ ॥

आ ऽ विशन् आविष्टः सन् ५. २५. ४। आविशन्ति ७. ५५, १ ॥

आविशन्ती समन्तात् प्रविशन्ती १६: ७ ॥

आ ऽ विशम् आविशन्ति यस्मिँस्तम् २. २४. ६ ॥

आविषुः प्राप्ताविद्यं कुर्वन्तु ४. ३६. ६ ॥ व्याप्नुयुः २३. २९ ॥ [आविषुः] अभितः व्याप्नुवन्ति (अत्र लडर्थे लुङ्। अयं व्याप्त्यर्थस्याऽवधातोः प्रयोगः) १. ११. ५ ॥

आवीत् रक्षेत् ७. २०. २ ॥ प्राप्नुयात् २६. ८ ॥

आ ऽ वृणानः समन्तात्स्वीकुर्वन् ४. १. २० ॥

आ ऽ वृणीमहे स्वीकुर्महे ६. १६. ६ ॥

आ ऽ वृं युक्तः १. ८७. ४ ॥ ढका हुआ १६. ७६ ॥ आवृत्तिरूपाः क्रियाः १२. ८ ॥

आवृतः निवृत्यागतः ३४. ४६ ॥

आवृता युक्ता (१२. ७. २ अथर्व १०१ भूमि.) ॥

आ ऽ वृंतम् समन्तादाच्छादितम् १. १६४. १४। संयुक्तम् १. ५१. २ ॥

आ ऽ वृत्य आच्छाद्य १. ५६. १ ॥

आव्र्य रक्षित्वा १. १६६. १३ ॥

आव्याधिनीः समन्ताद् बहुरोगयुक्तास्ताडितुं शीला वा ११. ७७ ॥

आव्याधिनीनाम् समन्तात् शत्रुसेना व्यद्धुं शीलं यासां तासां स्वसेनानाम् १६. २० ॥

आशं अश्नाति १. १६२. ६ ॥

आशत [आशत] व्याप्तवन्तो भवेयुः। (अशूङ् व्याप्तावित्यस्माल्लिङर्थे लुङ् प्रयोगः। वा च्छन्दसि सर्वे विधयो भवन्तीति च्लेरभावः) १. ८. ६। प्राप्नुत १. ८७. ५ ॥

आशतः प्राप्नुवन्ति (अत्र व्यत्ययो लडर्थे लङ् बहुलं छन्दसीति शपो लुकि श्नोरभावश्च) १. २०. २। व्याप्नुवन्ति (आशत) (अत्र बहुलं छन्दसीति श्नो-र्लुक्) १. ८५. २ ॥ व्याप्नुत ३. ४५. ३ ॥

आ ऽ शयानम् आस्थितम् २. ११. ६। समन्तात्प्राप्तनिद्रम् १. १२१. ११ ॥

आ ऽ शसः काममिच्छन्तः ५. ३२. ११। य आशंसन्ति ते ५. ५६. २ ॥

आ ऽ शसां समन्तात् प्रशंसितेन ४.५.११ ॥

आशाः दिशः। (आशा इति दिङ्नामसु पठितम्। निघं० १। ६.) १. ३६. ३। प्राप्तीच्छाः १. १६२. ७ ॥

आशा दिङ्नाम। निघं० १।६ ॥ आशा दिशो भवन्त्यासदनात्। आशा उपदिशो भवन्त्यभ्यशनात्। नि० ६।१ ॥

आशाते इतिं [आशाते इतिं] व्याप्नुतः ५. ६६. २ ॥ १. २५. ६ ॥

आशाथे इतिं व्याप्नुतः। (छन्दसि लुङ्लङ्लिटः। अ० ४।३।६ इति वर्तमाने लिट्। वाच्छन्दसि सर्वे विधयो भवन्तीति नुडभावः) १. २. ८। प्राप्नुथः १. १५१. ८ ॥

आशापालाः य आशा दिशः पालयन्ति २२. १६ ॥

शतं वै तल्प्या राजपुत्रा आशापालाः। श० १३। १।६।२ ॥ अथैते देवा (आशापालाः) आप्याः साध्या अन्वाध्या मरुतः। श० १३।४।२।१६ ॥

आशिनेभ्यः सकल विद्याव्यापकेभ्यः १.२७. १३ ॥

आ ऽ शिरम् समन्ताद् भोगम् १. १३४. ६। यदश्यते तत् क्षीरादिकम् ३. ५३. १४ ॥

आशिर आशीराश्रयणाद्वा ऽऽश्रपणाद्वा। नि० ६।८ ॥

आशिक्षायै समन्ताद् विद्योपादानाय ३०. १० ॥

आ ऽ शिषः सिद्धा इच्छाः १. १७६. ६ ॥

आशीर्वादान् ३. ४३. २ ॥ [आशिषा] आसीर्वाद से, "सामर्थ्य से" (२६४

आर्य०) ॥

आशिषः अध्येषणाकर्म । निघं० ३ । २१ । अथैय मितराशीराशास्तेः । नि० ६ । ८ ॥

आशीर्दाः य इच्छासिद्धिं ददाति सः १८. ५६ ॥

आशिष्ठाः अतिशयेनाशुगामिनः २. २४. १३ ॥

आशीःऽवन्तः आशिषः प्रशस्ताः कामना भवन्ति येषान्ते (अत्र शास इत्वे आशासः क्वावुपसंख्यानम् । अ० । ६ । ४ । ३४ ॥ अनेन वार्तिकेनाशीरिति सिद्धम् । ततः प्रशंसार्थे मतुप् छन्दसीर इति वत्वञ्च । सायणाचार्येण श्रीञ् पाक इत्यस्मादिदं पदं साधितम् । तदिदं भाष्यविरोधादशुद्धमस्तीति बोध्यम्) १. २३. १ ॥

आशु सद्यः १. ८४. १८ ॥ [आशुम्] शीघ्रम् ७. १२ । मार्गान् सद्यो ऽ श्नुवन्तम् ३४. २१ ॥

आशु क्षिप्रनाम । निघं० २ । १५ ॥ आशु इति शु इति च क्षिप्रनामनी भवतः । नि० ६ । १ ॥ आशवः क्षिप्रकारिणः । नि० ६ । ६ ॥

आशु ऽ अश्वाः आशुगामिनो ऽग्न्यादयो ऽश्वा येषान्ते ५. ५८. १ ॥

आशु ऽ अश्व्यम् आशवो वेगादयो गुणा अश्वा इव यस्मिँस्तम् ५. ६. १० ॥

आशुः शीघ्रं गन्ता ४. १. ४ । शीघ्रगाम्यश्वः ४. २२. ८ । सद्यः ७. १८. ६ ॥ आशवः शीघ्रगामिनो ऽ श्वा इवाग्न्यादयः (आशुरित्यश्वनाम नि० १ । १४) १. ११८. ४ । ये अश्नुवन्ति ते १. १३५. ६ । वेगादिगुणसहिताः सर्वक्रियाव्याप्ताः १. ५. ७ । शुभगुणव्यापिनः १. १४०. ४ ॥ आशुम् वेगादिगुणवन्तमाग्निवाय्वादिपदार्थसमूहम् (आशिवत्यश्वनामसु पठितम् निघं० १ । १४ । कृवापा० १ । १ अनेनाशूङ् धातोरुण् प्रत्ययः) १. ४. ७ ॥ आशुभिः आशुकारिभिर्गुणैः ५. ६१. ११ । शीघ्रं गमनागमनकारकैर्विमानादियानैः १. ३७. १४ । शीघ्रं गमयितृभिर्विद्युदादिपदार्थैः २. १६. ३ ॥ आशवे व्याप्तये १. ४. ७ । व्याप्ताय १६. ३१ ॥

आशुः अश्वनाम । निघं० १ । १४ ॥

आशुः प्राप्नुवन्ति ४. ३३. ४ ॥

आशुऽपत्वा सद्यः पतित्वा ४. २६. ४ ॥

आशुऽया [आशुया] क्षिप्राणि ४. ४. २ । आशुगैरश्वैः ६. ४६. १४ । शीघ्रगमनाः (अत्र जसः स्थाने यादेशः) १३. १० ॥

आशुरथाय आशु शीघ्रगामिनो रथा यानानि यस्य तस्मै १६. ३४ ॥

आऽशुशुक्षणिः [आशुशुक्षणिः] शीघ्रकारी २. १. १ । शीघ्रं २ क्षिणोति हिनस्ति ११. २७ ॥

आशुशुक्षणिः आशु इति च शु इति च क्षिप्रनामनी भवतः, क्षणिरुत्तरः क्षणोतेः । आशु शुचा क्षणोतीति वा सनोतीति वा । आ इत्याकार उपसर्गः पुरस्ताच्चिकीर्षितो ज उत्तरः, आशुशोचयिषुरिति । नि० ६ । १ ॥

आशुषाणः व्याप्नुवन् सन् ५. ३६. ४ ॥

[आशुषाणाः] सद्यः कुर्वाणाः, २. १९. ७ । समन्तात् प्राप्नुवन्तो ब्रह्मचर्येण शुष्कशरीरा वा ४. १. १३ । आशु विभाजकाः १. १४७. १ ॥

आशुषेणाय आशु शीघ्रगामिनी सेना यस्य

तस्मै १६. ३४॥

आशुहेमऽभिः शीघ्रं गमयाद्भिः १. ११६. २॥

आशुऽहेमा आशून् शीघ्रकारिणो जनान्हि-
नोति वर्धयति सः २. १. ५। शीघ्रं वर्ध-
मानः २. ३१. ६। शीघ्रं वर्धको गन्ता वा
७. ४७. २॥

आऽशृण्वतीः याः समन्ताच्छ्रूयन्ते ताः ५.
४५. १०॥

आऽशृण्वते समन्ताच्छ्रवणं कुर्वते ४.
३. ३॥

आऽशृण्वन्ति समन्तात्प्रशंसां कुर्वन्ति १.
१६०. १॥

आऽश्रवयति सब प्रकार से सुनाता है ५.
८२. ६॥

आश्रवयन्तःऽइव समन्ताच्छ्रवणं कारय-
न्त इव १. १३६. ३॥

आश्रुत्ऽकर्णं श्रुतौ विज्ञानमयौ श्रवणहेतू
कर्णौ यस्य तत्सम्बुद्धौ। (अत्र सम्पदा-
दित्वात् करणे क्विप्) १. १०. ९॥

आश्रुतिः समन्ता च्छ्रवणं यस्याः सा ३७.
१२॥

आश्विनः आश्विनोः सूर्याचन्द्रमसोरयं म-
ध्यवर्ती १८. १६। अश्विदेवताकः २४.
३६। अश्विनोः प्राणापानगत्योरयं
सम्बन्धी ३६. ५॥

आश्विनः (ग्रहः) श्रोत्रमाश्विनः। कौ० १३। ५॥
श्रोत्रं चात्मा चाश्विनः। ऐ० २। २६॥ [आश्विनम्]
(शस्त्रम्) यदश्विना उदजयतामाश्विनावाश्नु-
वातां तस्मादेतदाश्विनमित्याचक्षते। ऐ० ४। ८॥
तेषां (देवानां) अश्विनौ प्रथमावधातान्तावब्रू-
वदन् सह नोऽस्त्विवति। तावब्रूताङ्किन्नो ततः स्या-
दिति यत्कामयेथे इत्यब्रुवंस्तावब्रूतामस्मद्देव-
त्यमिदमुक्थमुच्याता इति तस्मादाश्विनमुच्यते।
तां० ६। १। ३६॥ द्वाभ्यां ह्याश्विनमित्याख्यायते।
कौ० १८। ५॥

आश्वश्वऽतमाः आशवःसद्यो गामिनोऽश्वा
विद्यन्ते येषान्ते ५. ४१. ४॥

आष्ट अश्नुवीत (अत्र लिङि लुङ् विकरण-
स्य लुक्) १. १२१. ६॥

आष्ट व्याप्तिकर्मा। निघ० २. १८॥

आस भवति ५. २. ५। अस्ति ७. १. २॥

आस आस्ते ५. ५३. १। अस्याति ७. ३२.
१०। आस्ति। (अत्र छन्दस्युभयथेति
लिट् आर्धधातुकसंज्ञाभावः) ३३. ८०.
भवेयम् ४. २७. २।

आसत् [आसात्] समीपात् २०. ४८॥

आसते उपविशन्ति २३. १६॥

आसतुः निरन्तर वसें १. १६१. १२॥

आसते [आसते] सन्ति १. १६. ६। स्थि-
त हैं (९. ११३. ११—२५० विधि)॥
उपविशन्ति १. ३६. ७। स्थिर होते हैं
१. ४८. ६।

आऽसत्सि समन्तात्सीदासि (अत्र बहुलं
छन्दसीति शपो लुक्) ३. ३०. १८॥

आऽसदम् आसीदन्ति सर्वे यस्मिँस्तम्
३. ६२. १३। य आसीदति तम् ४. ९. १।
[आऽसदे] आसादनीयाय ३. ४१. ६।
आसत्तुमुपवेष्टुम् ५. ४६. ५। समन्ता-
त्सीदन्ति प्राप्नुवन्ति सुखानि यस्यां सा
ऽऽ सत्तस्यै १. १३. ७। समन्तात् स्थि-

त्यर्थं गमनार्थं वा ५. २६. ८ ॥
आ ऽ सद्यं [आसद्यं] उववविश्य ६. ६८. ११। प्राप्य ७. ३६. २ । आगत्य १२. ३१। समन्ताद् विज्ञाय स्थित्वा वा । २.१८।
आसन् [आसन्] सन्ति ६. ७. १ । भवन्ति ७. २६. ४ । १४. २६ । भवेयुः ५. ५२. १२ । सन्तु ३३. ७४ ।
आसन् ऽ इषून् आसने प्राप्ता बाणा यैस्तान् १. ८४. १६ ॥
आस ऽ भिः स्वकीयैरास्यवच्छेदक गुणैः । १. ३४. १० ।
आसन्दी समन्तात् सन्यते सेव्यते या सा । (सन् धातोरौणादिको द प्रत्ययस्ततो ङीप्) १६. १६ । समन्ताद्रसप्रापिका १९. ८६ । [आसंद्याम्] यानासनाविशेषे ८. ५६ ॥
सैषा (आसन्दी) खादिरी वितृणा भवति । श. ५. ४. ४. १। इयं (पृथिवी) वा ऽ आसन्द्यस्या ९ होद ९ सर्वमासन्नम् । श. ६. ७. १. १२ ।
आसन्नः सर्वेषां निकटः ८. ५५ ।
आसया मुखेन (अत्र छन्दसो वर्णलोपो वेत्यास्य शब्दस्य य लापः, सुपां सु लुगिति विभक्तेर्याजादेशः) १.२०.१ । उपवेशनेन १.१२७.८ ॥
आसवम् समन्तादैश्वर्ययुक्तम् २२. १३ ॥
आऽसस्राणासः समन्ताद् गतिमन्तः ६. ८७. ३ ॥
आसा आस्येन १. १४०. २ । मुखेन (अत्र छान्दसो वर्णलोप इति यलोपः) २. १. १४ । अन्तिके १. १२६. ५ । अस्यन्ते वर्णा येन तेन मुखेन १. ७६. ४ । उपवेशनेन ५. १७. ५ ॥
आसात् समीपात् १. २७. ३ ।
आसात् समीपात् । निघं० २. १६ ॥
आसाते इति उपविशतः २. ४१. ५ ॥
आसाथे इति उपविशथः १. १८२. ३ ।
आसानः आसीनः ६. १०. ६ ॥
आसानेभिः आसीनैर्ऋत्विग्भिस्सह ६. ५१. १२ ॥
आ ऽ सिचम् समन्तात् सेचकम् २. ३७. १ । समन्तात् सिक्ताम् ७. १६. ११ ।
आ ऽ सिञ्चन्तीम् समन्तात् सिंचन्त्यः ५. ८५. ६ ॥
आसिथ थे ६.४५. ११ । भवसि ६.४५. १७ ॥
आसीत् (आसीत्) अस्ति (अत्र वर्तमाने लङ्) १. ३२. ११ ।
आसीत स्थित हो ७. २०. ७ ॥
आसीनः उपविष्टस्सन् २. ४३. ३ (१५१ आर्य०) (आसीनाः) स्थिराः ३. ३१. १२ ॥ (आसीनासः) उपस्थिताः सन्तः १६. ६३ ॥ (आसीनाय) स्थिताय २२. ७ ॥
आसीनेभ्यः आसनोपरि स्थितेभ्यः १६.२३ ॥
आसुः भवन्ति ६. १६. ४ । सन्ति ६. २१.५ ॥
आसुः आसन् ४. ५१. ७ ॥
आसुतः समन्तात् सेवितः १९. ५ ॥ [आसुता] समन्तान्निष्पादिता १९. १४ ॥
आऽसुतिम् प्रजाम् १. १०४. ७ । समन्ता-

जन्मभावम् २. १. १४॥
आसुरः असुरे प्रकाशरूपरहिते वायौ भवः ३. २६. ११। अनुद्भूतरूपः ५. ४०. ५॥
[आसुरात्] असुरस्य मेघस्यायं तस्मात् १९. ३४। मेघात् २०. ६७॥
[आसुरे] असुरस्य मेघस्यायं व्यवहारस्तस्मिन्। (असुरे इति मेघनाम निघं० १।१०) १०. ३३। असुरो मेघ एव तस्मिन् २०. ७६॥
आसुरी ये ऽसुषु प्राणेषु रमन्ते तेषां स्वा ११. ६६॥
आऽसुवन्ति उत्पादयन्ति ४. ५४. ६॥
आसे मुखे ७. २०. ३॥
आऽसेचनानि समन्तात् सेचनाऽधिकरणानि १. १६२. १३॥
आसेचनानि समन्तात् सिञ्चन्ति यैस्तानि २५. ३६॥
आस्कन्दम् समन्तादुत्प्लुत्य गमनम् २३.२५।
[आस्कन्दाय] समन्ताच्छोषणाय ३०. १८॥
आस्क्राः शत्रुबलस्य क्रमितारः १. १८६. २। समन्तादाहूताः ७. ४३. ५॥ [आस्क्रे] आक्रमणस्वभावे ३. ६. ४॥
आस्तम् आसाथाम् (व्यत्ययेन परस्मैपदम्)। १. १२०. ७॥
आस्ताम् उपविशतु ३. ४. ११। भवतः १४. ३०॥
आस्तृता सम्यगाच्छादिता १३. १६॥
आस्ते तिष्ठति १७. ५६॥
आस्तै उपविशति ७. ५५. ६॥
आऽस्थाता आस्थायुक्तः ६. ४७. २६। समन्तात् स्थिरः २६. ५२॥
आस्थानात् निवासस्थानस्य सकाशात् ११. २१। आस्थायाः ११. ३८॥
आस्थितम् निश्चितम् ६. १५॥
आस्महे कुर्महे (१२. ४. ४७ अथर्व १६६ भूमि०)॥
आस्माकः योऽस्माकमयमुपदेष्टाऽधिपतिः सः ४. २४॥
आस्यत् व्यसेत् छिन्द्यात् ४. ३०. २०॥
आस्यम् मुखम् २. १३. ८। मुखमिव प्रमुखम् २. १. १३॥ आस्येन आस्यन्दन्ति क्लेदीभवन्ति यस्मिंस्तेन २५. १। आस्ना आस्येन ५. ७३. ६॥ आसन् (आसनि) व्याप्त्याख्ये मुखे (अत्र पदन्नासस० अ० ६।१।६३ इति सूत्रेण आसन्नादेशः) १. ७५. १॥ आस्ये प्रज्वलिते ज्वालासमूहेऽग्नौ ११. ७७॥
आस्यमस्यतेः, आस्यन्दत एतदन्नमिति वा। नि० १।६॥
आह उपदिशति ५. ३७. १। प्रतिवदेत् २. २८. १०॥
आहनन्याय वीररसाय वादित्रवादनेषु साधवे १६. ३५॥
आहनाः व्याप्ताः २. १३. १। या आहन्यन्ते ताः, ५. ४२. १३॥
आहलक् समन्ताद्धलं विलेखनमञ्चति सः

२३. २२। समन्ताद् विलिखितं यथा स्यात्तथा २३. २३॥

आऽह्वनानि समन्ताद्दानानि ७. १. १७। संत्कारपूर्वकनिमन्त्रणानि ७. ८. ५॥

आहवनीयः आहवनीय अग्नि अर्थात् जिसमें ब्रह्मचर्य आश्रम में ब्रह्मचारी हवन करता है (६. ६. १३ अथर्व २५६ विधि)॥

आहवनीयः (अग्निः) द्यौराहवनीयः। श० ८। ६। ३। १४॥ यद्वाऽऽहवनीयमुपतिष्ठते। दिवं तदुपतिष्ठते। श० २। ३। ४। ३६॥ एष वै स यज्ञः। येन तद्देवा दिवमुपोदक्रामन्नेष आहवनीयोऽथ य इहाहीयत स गार्हपत्यस्तस्मादेतं (आहवनीयं) गार्हपत्यात्प्राञ्चमुद्धरन्ति। श० १। ७। ३। २२॥ यज्ञो वा आहवनीयः स्वर्गो लोकः। ऐ० ५। २४, २६॥ स्वर्गो वै लोक आहवनीयः। ष० १। ५॥ तै० १। ६। ३। ६॥ देवयोनिर्वाऽएष यदाहवनीयः। श० १२। ६। ३। १०॥ इन्द्रो ह्याहवनीयः। श० २। ६। १। ३८॥ तस्य (राज्ञः) पुरोहित एवाहवनीयो भवति। ऐ० ८। २४॥ शम इत्याहवनेय:। जै० उ० ४। २६। १५॥ प्राणोदानावेवाहवनीयश्च गार्हपत्यश्च। श० २। २। २। १८॥ यज्ञ आहवनीयः। श० १। ७। ३। २६॥ यजमान आहवनीयः। तै० ३। ३। ७। २॥ एतदायतनो यजमानो यदाहवनीयः। तां० १२। १०। १६॥ यजमानदेवत्यो वा आहवनीयः। तै० १। ६। ५। ३॥ यद्वा आहवनीयमुपतिष्ठते। पशूंस्तद्याचते। श० २। ३। ४। ३२॥ योनिर्वै पशूनामाहवनीयः। कौ० १८। ६॥ गो० उ० ४। ६॥ आहवनीयो वा आहुतीनां प्रतिष्ठा। श० २। ४। ३। १०॥ सामवेदादाहवनीयः (अजायत)। ष० ४। १॥ शिरो वै यज्ञस्याहवनीयः पूर्वोऽर्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्य कल्पयात। श० १। ३। ३। १२॥ आहवनीयो वै यज्ञस्य शिरः। श० ६। ५। २। १॥ (पुरुषस्य) मुखमेवाहवनीयः। कौ० १७। ७॥ मुखमेवास्य (यज्ञस्य) आहवनीयः। श० ३। ५। ३। ३॥

आऽह्वम् प्रतिष्ठाह्वानम् १. १५५. ६। संग्रामम्। २. २३. ११।

आऽहावाः निपानसदृशा मार्गा जलाधारा वा। (निपानमाहावः अ० ३।३।७४ इति निपातनम्) १. ३४. ८॥ [आऽहावम्] समन्तात् स्पर्धनीयम् ६. ७. २॥

वागाहावः। ऐ० ४। २१। ब्रह्म वा आहावः। ऐ० २। ३३॥

आहितः समन्ताद् धृतः २८. ११॥ [आऽहितम्] स्थितम् १. १६४. २३। ६. ६. ६॥

आहुः [आहुः] उपदिशन्ति १. ११८. ३। कथयन्ति १. १६२. १२॥ कथयन्तु ३. ४. ७। कथयेयुः ५. ११. ६।

आऽहुतः स्वीकृतः १. ३६. ८। आमन्त्रितः २. ७. ४। समन्तात्कृतसत्कारः ६. १६. ३४। कृताह्वानः। ३३. ९। संगृहीतः १५. ३८। समन्तात्तर्पितो हुतो वा १८. ५७।

आऽहुतम् सत्कृतम् १. ६६. ३ (१२० आर्य) समन्तात् प्रक्षिप्तम् २. ३२. ६। समन्तात् प्रदत्तम् ३. २८. ३। स्पर्धितं समन्ताच्छब्दितम् ५. ८. ६। आहुतस्य सर्वतः कृतप्रियस्य ७. ३. ५॥

आहुतम् अभिहुतम्॥ नि० ७। २५॥

आऽहुतिः होमः, प्रलयः १. १०५. ५॥

आहुतिर्हि यज्ञः। श० ३। १। ४। १। द्वे वा आहुती सोमाहुतिरेवान्याज्याहुतिरन्या। श० ११। ७। २। १०। तद् यदाह्वयति तस्मादाहुतिर्नाम। श० ११। २। २। ६। आहूतयो वै नामैता यदाहुतय एताभिर्वै देवान् यजमानो ह्वयति तदाहुतीनामाहुतित्वम्। ऐ० १। २। तास्मिन्नग्नौ यत्किञ्चाभ्यादधात्याहितय एवास्य ता आहितयो ह वै ता आहुतय इत्याचक्षते परोक्षम्। श० १०। ६। २। २॥

आहुतीः या आहूयन्ते प्रदीयन्ते ताः १६. १६। २१. ५२। आदातव्ये [आऽहुतिम्]

समन्ताद्धूयन्ते गृह्यन्ते शुभानि यया ताम् १. ३१. ५। घृतादिसुसंस्कृताम् १. ६३. ३। समन्ताद् ग्रहणम् १. १३५. ८। वेद्यां प्रक्षिप्ताम् २. ३७. ६॥

आऽहुवध्यै आह्वयितुम् ६. ६०. १३॥ [आ-हुवध्यै] शब्दयितुम्, उपदेष्टुं श्रोतुं वा। (अत्र ह्वेञ् इत्यस्मात्तुमर्थे सेसेन० इति कध्यै प्रत्ययः) ३. १३॥

आऽहूर्यः आह्वातव्यः। (अत्र ह्वेञ् धातोर्बाहुलकाद्यक् रुडागमश्च) १. ६६. २॥

इ

इक्षवः इक्षुदण्डाः २५. १॥

इङ्गय गमय ४. ५७. ४॥

इङ्गयति चेष्टते १. १६४. ४५॥

इच्छ इच्छ ६. ४७. १०॥

इच्छति काङ्क्षति १. ८०. ६॥

इच्छतु चाहे ३५. २॥

इच्छत इच्छेत (११. ५. १७ अथर्व २५१ भूमि०)॥

इच्छन् इच्छन् १. ८४. १४॥

इच्छन्त इच्छन्तु (अत्र व्यत्ययेनात्मनेपदम्) १. ६८. ४॥

इच्छन्तः श्रद्धालवो भूत्वा १. ७२. २। चाहते हैं १. ११०. २।

इच्छन्तः इच्छन्तः (१६. ४१. १ अथर्व २३० विघि)॥

इच्छन्ति इच्छन्ति ३. ३०. १॥

इच्छन्ती इच्छन्ती १. १६४. २७॥

इच्छन्तीः इच्छन्त्यः (अत्र सुपांसुलुगिति पूर्वसवर्णः १. २५. १६॥

इच्छमानः इच्छमानः (व्यत्ययेनात्रात्मनेपदम्) १. १२६. १॥

इच्छामि इच्छामि ३. २८. ५॥

इडः अन्नम् ११. २६। प्रशंसनीयस्य (इड इति पदनाम निघं ५. २। अत्रेडधातोर्बाहुलकादौणादिकः क्विप्। आदेर्ह्रस्वश्च) १५. ३०। वाण्याः [अत्र जसादिषु छन्दसि वा वचनमिति याडभावः] २८. १। स्तोतुमर्हः। २. ३॥

इडः (बहु व०)—अन्नं वा इडः। ऐ० २। ४॥ ६। १५॥ प्रजा वाऽइडः। श० १। ५। ४। ३॥ वर्षा वा इड इति हि वर्षा इडा यदिदं क्षुद्रं सरीसृपं ग्रीष्महेमन्ताभ्यान्नित्यक्तं भवति तद्वर्षा ईडितमिवान्नमिच्छमानं चरति तस्माद्वर्षा इडः। श० १। ५। ३। ११॥ इडो यजति वर्षा एव वर्षाभिरीडितमन्नाद्यमुत्तिष्ठति। कौ० ३। ४॥

इळा प्रशंसितुमर्हा २८. ८। भूमिः २१. १९। प्रशंसितया वाचा २१. ३२। प्रशंसनीया वाणी २८. १८। सुशिक्षिता मधुरा वाक् २६. ३३॥ इळाभिः भूमिवाणिनीतिभिः [पदनाम निघं० ५। ५। अनेन प्राप्तुं योग्या नीतिर्गृह्यते] १. ४८. १६। अन्नादिभिः ५. ५३. २॥

पृथिवीनाम। निघं० १। १। वाङ्नाम। निघं० १। ११। अन्ननाम। निघं० २। ७। गोनाम। निघं० २। ११॥ इडा इयं (पृथिवी) वा इडा।

कौ० ६।२॥ गौर्वाऽइडा । श० ३।३।१।४॥ या वा सः (इडा-) सीद्गोर्वै सासीत् श० १।८।१।२४॥ (यजु० ३८।२)—इडाहि गौः। श० २।३।४।३४॥१४।२।१।७॥ (यजु० १२।५१) पशवो वा इडा। कौ० ३। ७॥५।७॥२६।३॥ श० १।८।१।२२॥ ७।१।१।२७॥ ष० २।२॥ तां० ७। ३।१५॥१४।५।३१॥ गो० उ० १।२५॥ तै० १।६।६।६॥ ऐ० २। ६, १०, ३०॥ (=पशवः)—अथेडां पशून्त्समवद्यति। श० १।७।४।६॥ अन्नं पशव इडा। कौ० १३।६॥ अन्नं वा इला। ऐ० ८।२६॥ कौ० ३।७॥ श्रद्धेडा। श० ११।२।७।२०॥ उत मैत्रावरुणी (इडा) इति। यदेव (इडा) मित्रावरुणाभ्या-ऽसमगच्छत। श० १।८।१। २७॥ यदेवास्यै (इडायै) घृतं पदे ऽतिष्ठत तस्मादाह घृतपदी (इडा) इति। श० १।८।१। २६॥ इडा वै मानवी यज्ञानूकाशिन्यासीत्। तै० १।१।४।४॥ सा (मनोर्दुहिता) एषा निदानेन यदिडा। श० १।८।१।११॥ एतद्ध वै मनुर्बिभयांचकार। इदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया। श० १। ८। १। १६॥ मनुर्ह्येतामग्रेऽजनयत तस्मादाह मानवी (इडा) इति। श० १।८।१।२६॥ सा (इडा) वै पश्चावत्ता भवति। श० १।८।१।१२॥

इत् चार्थे १. २१. १। इत ईयते प्राप्यते सोऽयमिद्देशः। (अत्रकर्मणि क्विप्। ततः सुपां सुलुगिति ङसेर्लुक्) १. ४. ५। पादपूरणे १. ६१. ८। निश्चये १. २८. ४॥

इत् पदपूरणः। नि० १।६। महान्। नि० ६।१॥

इत [इत] प्राप्नुत २. २१। प्राप्नुवन्ति ३. ४७। यन्तु प्राप्नुवन्तु ३. २७॥

इतऽऊति इतः ऊतिः रक्षा यस्मात्तत् १. १५१. ६॥

इतः अस्मात् १. ६. १०। अस्मात् (स्थानात्) २. ८। अस्मात् कारणात् १.६८.१। प्राप्ताः १. १३०. ५। प्राप्तः ६. ३८. १॥

इतः ऊतिः इत ऊती रक्षणाद्या क्रिया यस्मात्सः १. १४६. २॥

इतन प्राप्नुत ३. २६. ६। (अत्रेण गतावित्यस्माल्लोटि युष्मद् वहुवचने तप्तनप्तनथनाश्च अ० ७।१।४५ इति तनबादेशः) ५. ८७. ८।

इत्था सत्यनाम। निघ० ३।१०। अमुत्र। नि० ४।२४॥

इत्थाऽधीः इत्थाऽनेन हेतुना धीर्धारणावती बुद्धिर्यस्य २. २०. २॥ [इत्थाऽधिये] अनेन प्रकारेण धीर्यस्य तस्मै ४. ११. ३॥

इत्य आगत्य (१५. ११. २ अथर्व २८९ भूमि)॥

इत्या प्राप्तुं योग्या १. १६७. ५। एतुमर्हा क्रिया १२. ६२। एमि जानामि यया रीत्या सा १८. १५। इत्यै संगत्यै प्राप्तये वा १. ११३. ६॥

इत्वा प्राप्य ३२. १२॥

इथः प्राप्नुथः १०. १६॥

इदम् जलम् १६. ७२। इदं प्रत्यक्षम् १. १३. ७॥

इदम् उदक नाम। निघ० १।१२॥

इदम् प्रत्यक्षम् १. १३. ७।

इदा एव ४. १०. ५। इदानीम् २. ३३ ११॥

इदा नवनाम। निघ० ३।२८॥

इदानीम् अस्मिन्त्समये १. ३५. ७॥

इदानीम् नवनाम। निघ० ३।२८॥

इदावत्सरः निश्चयेन समन्ताद्वर्तमानः संवत्सरः २७. ४५॥ [इदावत्सराय] इदावत्सरस्तृतीयस्तत्र कार्यसम्पादनाय (अत्र

वर्णव्यत्ययः) ३०. १५ ॥ चन्द्रमा इदावत्सरः। तां० १७. १३. १७ । चन्द्रमा वा इदावत्सरः। तै० १. ४. १०. १ ॥

इद्वत्सरः निश्चितसंवत्सरः २७. ४५ ॥

[इद्वत्सराय] पञ्चमाय वर्षाय ३०. १५ ॥

इधीमहि जीवेम ३. १८ ॥ दीपयेम १६. ७० । प्रकाशयेमहि (अत्र बहुलं छन्दसीति श्नमोलुक्) २. ४ ॥

इद्धऽअग्नयः इद्धाः प्रदीप्ता मानसवाह्याग्नयो यैस्ते १. ८३. ४ ॥

इद्धः प्रदीप्तः १२. ६ ।

इधते प्रदीपयति ७. १. ८ ॥

इधानः इन्धनैः पावकवद्विद्यया प्रदीप्तः १. ७६. ५ । प्रकाशमानः २. २. ८। दीपयन् ६. १०. २ ॥

इधीमहि प्रकाशयेम ३. २७. १५ । प्रदीपयेम ५. ६. ४ ॥

इध्मः प्रदीपकः ३१. १४ (१२६ भूमि) प्रदीप्तः ३३. २४॥ इध्मम् इन्धनम् १. ९४. ४ ॥

इध्मः तासाम् (आप्रीदेवतानां) इध्मः प्रथमागामी भवति। इध्मः समिन्धनात्। यज्ञेध्म इति कात्थक्यः, अग्निरिति शाकपूणिः । नि० ८। ५ ॥ इन्धे ह वा एतदध्वर्युः । इध्मेनाग्निं तस्मादिध्मो नाम। श० १।३।५।१ । वनस्पतय इध्माः। ऐ० ५। २८। वनस्पतय इध्माः। तै० २। १।५। २। आत्मा वा इध्मः। तै० ३।२।१०।३॥

इध्मऽभृतिः इध्मानां धारकः ६. २०. १३ ॥

इध्यते प्रकाश्यते प्रदीप्यते वा ३. १. २१ ॥

इध्यमानः देदीप्यमानः ५. ३. ८ ॥

इध्यसे प्रदीप्यसे ५. २१. २ ॥

इध्यस्व प्रदीप्तो भव २७. २ ।

इनः ईश्वरः १. ५३. २ । ७. २०. ५. । स्वामी सूर्यः १. १६४. २१ । समर्थः २. २०. २ ॥

इनः ईश्वरनाम। निघ० २। २२॥

इनक्षत् व्याप्नुयात् १. १३२. ६ ॥

इनक्षन् व्याप्नुवन् १२. २४ ॥

इनऽतमः अतिशयेनेश्वरः समर्थः ३. ४६. २॥

इनतमः ईश्वरतमः। नि० ११। २१।

इनधिते इनं ईश्वरं दधाति यस्मिँस्तस्मिन् ४. २. ७। ईश्वरेण संगमयेत् ४. १२. १ ॥

इनुहि व्याप्नुहि ६. १०. ७ ॥

इनोति प्राप्नोति ६. ४. ३ ॥

इनोषि व्याप्नोषि ४. १०. ७ ॥

इनोषि प्रेरयसि ६. ५. ३ ॥

इन्दुः आनन्दकरः ६. ४४. २२ । चन्द्र इवार्द्रस्वभावः १८.५३ । ऐश्वर्य्ययुक्तः २.२२.३। ऐश्वर्यकरः १. १७५. १ ।चन्द्रः २. २२. १ । सोमः ६.४४.२१ ।सुस्नेहयुक्तः १६. ६५ ॥

[इंदवः] आर्द्रीभूताः १. १३४. २। ऐश्वर्याणि४.५०.१०। जलानि । (उन्दन्ति आर्द्रीकुर्वन्ति पदार्थास्ते । अत्र उन्देरिच्चादेः । उ० १. १२ । इत्युः प्रत्ययः आदेरिकारादेशश्च) १.१५.१ । संगन्तारः पूजनीयाः । ४. ४७. २ । जलानि क्रियामया यज्ञा प्राप्तव्या भोगाश्च । उन्दन्ति स्नेहयन्ति सर्वान् पदार्थाँस्ते रसाः १. १. ६ ॥

[इन्दून्] आह्लादान् ६. ४७.१४ ॥ [इन्दवे] ऋजवे ३३. ६२ ॥ [इन्दोः] सोमगुणसम्पन्नस्य ८. ६ ॥ [इन्दो] चन्द्रवत् प्रियदर्शनः १६. ५४ ॥

इन्दुः उदकनाम । निघ० १ । १२ । यज्ञनाम । निघ० ३ । १७ । इन्दुरिन्धेरुनत्तेर्वा । नि० १० । ४१ ॥ सोमो वाऽइन्दुः । श० । २ । २ । ३ । २३ । सोमो वै राजेन्दुः । ऐ० १ । २६ ॥

इन्द्रऽइषिता इन्द्रेण स्वामिना प्रेरिताः ५.३१.५

इन्द्रः अग्निर्विद्युत्सूर्य्यो वा १.१७.५ । अध्यापको राजा वा ४. २३. ३. । परमेश्वरः सभाप्रबन्धो वा (२३४ भूमि ६. ६८. १. अथर्व) । ऐश्वर्य्यमिच्छुः १. १७३. ४. । दुःखच्छेत्ता १. १६५. १०. । सर्वपदार्थच्छेत्ता । २. १५. ४. मेघस्य छेत्ता २. ३०.३. । इन्द्रियवान् जीवः १. १०१. ५. पराक्रमवान्सूर्य्य इव तेजस्वी ३. ४६. ३ । सुखानां धाता १०. २८ । सत्यन्यायधर्ता ४. २६. ३ । दाता ६. ३४. २ । ५. ३६. १ । १. ८०. ६ । परमैश्वर्य्यवान् सभाशालासेना न्यायाधीशः १. ५१. ९ । पुरुषार्थी २. २०. ५ । परमैश्वर्य्यवान् सूर्य्य इव पिता ४. ४८. ११ । ऐश्वर्य्ययुक्तो मित्रः १. १३०. ६ । समर्थो राजा ७. ३२. १२ । दुःखविदारकः ६. २७. १ । शत्रूणां विदारकः ७. २७. ३ । दुष्टानां विदारकः ७. ३२. १० । सूर्य्य इव विपश्चित् २. २०. ६. । पूर्णविद्यो वैद्यः ६. २७. २ । विद्युदिव व्याप्तविद्यः ७. २७. ४ । रूपविच्छेदकः १६. ८५. परमैश्वर्य्ययोगारूढो वृद्धः ६. ३९ । सभाध्यक्षः १. ६१. १५ । शत्रुविदारकः सेनाधीशः १०. ६ । परमेश्वरः सूर्य्यो वा (अत्राह यास्काचार्य्यः । इन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैधँस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायत इदं करणादित्याग्रायण इदं दर्शनादित्यौपमन्यव इन्दतेर्वैश्वर्य्यकर्मण इन्दञ्छत्रूणां दारयिता वा द्रावयिता वादारयिता च यज्वनाम् निरु १०. ८ । इन्द्राय साम गायत नेन्द्रादृते पवते धाम किंचनेन्द्रस्य नु वीर्य्याणि प्रवोचामिन्द्रे कामा अयंसत । निरु ७. २ । इराशब्देनान्नं पृथिव्यादिकमुच्यते । तद्दारणात्तद्दानात्तद्धारणात् । चन्द्रलोकस्य प्रकाशाय द्रवणात्तत्र रमणादित्यर्थेनेन्द्रशब्दात्सूर्य्यलोको गृह्यते । तथा सर्वेषां भूतानां प्रकाशनात् प्राणैर्जीवस्योपकरणादस्य सर्वस्य जगत उत्पादनाद्दर्शनहेतोश्च सर्वैश्वर्य्ययोगाद् दुष्टानां शत्रूणां विनाशकाद्दूरे गमकत्वाद्यज्वनां रक्षकत्वाच्चेत्यर्थादिन्द्रशब्देनेश्वरस्य ग्रहणम् । एवं परमेश्वराद्विना किंचिदपि वस्तु न पवते । तथा सूर्य्याकर्षणेन विना कश्चिदपि लोको नैव चलति तिष्ठति वा । प्रतुंविद्युम्नस्य स्थविरस्य घृष्वेर्दिवोररप्शे महिमा पृथिव्याः नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥ १ ऋ० ६. १८. १२ । यस्यायं महाप्रकाशस्य वृद्धस्य सर्वपदार्थानां जगदुत्पत्तौ संघर्षकर्तुः सहनशीलस्य बहुपदार्थनिर्मातुरिन्द्रस्य परमैश्वर्य्यवतः परमेश्वरस्य सूर्य्यलोकस्य सृष्टेर्मध्ये महिमा प्रकाश्यते तस्यास्य न कश्चिच्छत्रुः । न किञ्चित्परिमाणसाधनमर्थादुपमानं नैकत्राधिकरणं चास्ति इत्यनेनोभावर्थौ गृह्येते ।) १.३.४ ।

महायशः सर्वविभागकारकेश्वरः । सर्वविभक्तरूपदर्शकः सूर्यलोको वा १. १०. ७। सर्वेश्वर इव वर्तमान २. २१. ६। सुखेच्छाविधैश्वर्ययुक्तजन २०. २९। दोषविनाशक ४. ३०. ८। विद्यैश्वर्यमिच्छुक ३. ४०. २। स्तोतुमर्ह दातः १. १०. ४। सर्वार्थस्य सुखस्य धर्तः ६. ४७. १०। प्रजापालनतत्पर ६. ४५. २५। ऐश्वर्येण सुखप्रद ३. ३७. ११। मृदूग्रस्वभाव ३. ५३. ५। सर्वान्तर्यामिन् सर्वतः भ्रोतः १. १०. ६। शुभगुणानां धर्तः ६. ४६. ५। ऐश्वर्याय द्रवन् । ऐश्वर्ये रममाण वा ८. ३६। परमैश्वर्ययुक्त गृहपते ८. १५। अन्नदातः ६. २०. ४। न्यायाधीश ६. २५. १। विवाहितपते १०. ८५. ४५. २२४ भूमि) परमपूजनीय ३. ४३. ६। पूर्णायुः कामुक ३. ४०. ५। प्रयतमान १. १६९. ६। परमैश्वर्ययुक्त सम्राट् १. १६७. १। बलप्रद २. ११. ४। ऐश्वर्यप्राप्तये तत्कर्मानुष्ठातर्मनुष्य १. २८. १। अन्तःकरणबहिष्करणशरीरादिसाधनैश्वर्यवान् मनुष्य १. २८. २। योगैश्वर्यजिज्ञासो १. १७६. ६। योगैश्वर्यमिच्छुक ५. ३०. ४। अविद्यानिद्रादोषविदारक विद्वन् १. २६. ३। शिल्पक्रियाविद्वन् १. ५१. १३। वीराणां रक्षक १. १०२. ५॥ [इन्द्रम्] परमेश्वरं विद्युदादियुक्तं वायुं वा। (इन्द्र इति पदनामसु पठितम्। निघं० ५। ४। विद्याजीवनप्रापकत्वात् इन्द्रशब्देनात्र परमात्मा वायुश्च गृह्यते। विश्वेभिः सोम्यमध्वग्न इन्द्रेण वायुना॥ ऋ० १। १४। १०। इन्द्रेण वायुनेति वायोरिन्द्रसंज्ञा) १. ५. १। विद्यैश्वर्ययुक्तम् ५. १९. १२। ६. २७। २०. ७२। दातारम् ३. ३०. २२। धारकम् १. ९. ९। प्रशंसितगुणधरम्। ४. २०. ५। परमैश्वर्य्यवन्तं धनिकम् १०. ३३। विद्युत्वत्तीव्रबुद्धिम् ६. ४८. १४। वायुम् १. १३। सर्वदुःखविदारकम् १. १३१. १। अविद्याविदारकमाप्तं विद्वांसम् ७. २१. १२। परमैश्वर्य्यवन्तं शालाध्यक्षम् १. १०६. ६। शूरवीरम् ७. २३. १। सत्यं धर्मन्यायं यो दधाति तम् ६. ३६. ३। ऐश्वर्यप्रदं सोमरसम् २०. ६२। नीत्या सुशोभमानम् २८. ४। इन्द्रेण विद्युता तद्वच्चितेन विदारकेण शस्त्रेण वा १. ५३. ४॥ [इन्द्राय] परमोत्तमव्यवहाराय २०. ३३। सर्वशुभलक्षणान्विताय २. २१. २। परमानन्दप्राप्तये ८. ४४॥ [इन्द्रस्य] परमेश्वरस्य यज्ञस्य वा १. ४॥

इन्द्रः इरां दृणातीति वा, इरां ददातीति वा, इरां दधातीति वा, इरां दारयत इति वा, इरां धारयत इति वा, इन्दवे द्रवतीति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा "तद्यदने प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वम्" इति विज्ञायते। इदं करणादित्याग्रायणः, इदं दर्शनादित्यौपमन्यवः, इन्दतेर्वैश्वर्यकर्मणः, इन्दन् शत्रूणां दारयिता वा द्रावयिता वा, आदरयिता च यज्वनाम्। नि० १०। ८॥ इन्द्रः इन्धो वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वाऽएतमिन्ध ९ सन्तमिन्द्र इत्याचक्षते परोऽक्षेणेव। श० १४। ६। ११। २॥ अस्मिन्वा इदमिन्द्रियं प्रत्यस्थादिति । तदिन्द्रस्येन्द्रत्वम्। तै० २। २। १०। ४॥ तस्य (क्षत्रियस्य) ह दीक्षमाणस्यैंद्र एवेंद्रियमादत्ते । ऐ० ७। २३॥ इन्द्रस्येन्द्रियेणाभिषिंचामि। ऐ० ८। ७॥ इन्द्रस्येन्द्रियेण (त्वाभिषिञ्चामि) । श० ५। ४। २। २॥ (देवस्य त्वा सवितुः प्रसवे) इन्द्रस्येन्द्रियेण। तै० २। ६। ५। ३॥ इन्द्रस्येन्द्रियेण। तां० १। ३। ५॥ इन्द्रियं (आत्मन्धत्ते) ऐन्द्रेण

(पशुना)। तै० १।३।४।३॥ इन्द्रमच्छसुता इम इतीन्द्रियस्य वीर्यस्यावरुध्यै । तां० ११। १०।४॥ (यजु० ३८।१६)—मधु हुतमिन्द्र-तमेऽग्नावश्याम ते मधु हुतमिन्द्रियतमेऽग्नावित्येवै-तदाह। श० १४।२।२।४२॥ (=इन्द्रियवान्) सखाय इन्द्रमूतयऽइतीन्द्रियवन्तमूतयऽइत्येतत्। श० ६।३।२।४॥ इन्द्रः (एवैनं) इन्द्रियेण (अवति)। तै० १।७।६।६॥ इन्द्रस्य त्वेन्द्रि-येण व्रतपते व्रतेनादधामि । तै० १।१।४।८॥ दधात्विन्द्र इन्द्रियम्। तां० १।३।५॥ मयीद-मिन्द्र इन्द्रियं दधातु । श० १।८।१।४२॥ ('इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रदत्तमिति वा' इति पाणिनीयाष्टाध्याय्याम् ५।२।९३॥ 'इन्द्र आत्मा' इति काशिकायाम्) युक्ता ह्यस्य (इन्द्रस्य) हरयः शतादशेति। सहस्रं हैत आदित्यस्य रश्मयः (इन्द्रः=आदित्यः) । जै० उ० १।४४।५॥ इन्द्र इति ह्येतमाचक्षते य एष (सूर्यः) तपति । श० ४।६।७।११॥ एष वै शुक्रो य एष (सूर्यः) तपत्येष (सूर्यः) उ एवेन्द्रः । श० ४।५।५।७॥४।५।९।४॥ स यस्स इन्द्र एष एव स य एष (सूर्य्यः) एव तपति। जै० उ० १।२८।२॥१।३२।५॥ अथ यः स इन्द्रोऽसौ स आदित्यः । श० ८।५।३। २॥ एष वाऽइन्द्रो य एष (सूर्य्यः) तपति। श० २।३।४।१२॥३।४।२।१५॥ एष एवे-न्द्रः। य एष (सूर्य्यः) तपति। श० १।६।४। १८॥ (इन्द्रः सूर्य्य इति सायणः । तां० १४। २।५ भाष्ये।) स यस्स आकाश इन्द्र एव सः। जै० उ० १।२८।२॥१।३१।१॥१।३२।५॥ अथ यत्रैतत्प्रदीप्तो भवति । उच्चैर्धूमः परमया जूत्या बल्बलीति तर्हि हैष (अग्निः) भवतीन्द्रः। श० २।३।२।११॥ इन्द्रो वागित्यु वाऽआहुः। श० १।४।५।४॥ तस्मादाहुरिन्द्रो वागिति। श० ११।१।६।१८॥ अथ य इन्द्रस्सा वाक्। जै० उ० १।३३।२॥ वाग्वा इन्द्रः । कौ० २। ७॥१३।५॥ वागिन्द्रः । श० ८।७।२।६॥ (यजु० ३८।८) अयं वाऽइन्द्रो योऽयं (वातः) पवते। श० १४।२।२।६॥ यो वै वायुः स इन्द्रो य इन्द्रः स वायुः । श० ४।१।३।१९॥ सर्वं वाऽइदमिन्द्राय तस्थानमास यदिदं किंचापि योऽयं (वायुः) पवते । श० ३।९।४।१४॥ स एष एवेन्द्रः। योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमि-न्द्राणी (योऽयं सव्येऽक्षन्पुरुषः)। श० १०।५।२।९॥ योऽयं चक्षुषि पुरुष एष इन्द्रः। जै० उ० १।४३।१०॥ ततः प्राणोऽजायत स (प्राणः) इन्द्रः। श० १४।४।३। १९॥ प्राण एवेन्द्रः। श० १२।९।१। १४॥ प्राण इन्द्रः। श० ६।१। २।२८॥ स योऽयं मध्ये प्राणः। एष एवेन्द्रस्ता-नेष प्राणान्मध्यत इन्द्रियेणैन्द्ध यदैन्द्ध तस्मा-दिन्ध इन्धो ह वै तमिन्द्र इत्याचक्षते परोऽक्षम्। श० ६।१।१।२॥ हृदयमेवेन्द्रः। श० १२। ९। १।१५॥ यन्मनः स इन्द्रः। गो० उ० ४।११॥ मन एवेन्द्रः। श० १२।९।१।१३॥ रुक्म एवेन्द्रः श० १०।४।१।६॥ एष वा एतर्हीन्द्रो यो यजते। तै० १।३।६।३॥ इन्द्रो वै यजमानः। श० २। १।२।११॥४।५।४। ८॥५। १।३।४॥ एष वाऽअत्रेन्द्रो भवति यद्यजमानः। श० ३।३। ३।१०॥ यजमानो वै स्वे यज्ञऽइन्द्रः। श० ८। ५।३।८॥ द्वयेन वाऽएष इन्द्रो भवति यच्च क्षत्रियो यदु च यजमानः। श० ५।३।५।२७॥ ऐन्द्रो वै राजन्यः। तै० ३।८। २३।२॥ इन्द्रः क्षत्रम्। श० १०। ४।१।५॥ क्षत्रं वा इन्द्रः। कौ० १२।८॥ तै० ३।९।१६।३॥ श० २।५। २।२७॥२।५।४। ८॥ ३।९।१।१६॥४। ३।२।६॥ अश्वरथेनेन्द्र आजिमधावत्तस्मात्स उच्चैर्घोष उपब्दिमान्क्षत्रस्य रूपम्। ऐ० ४।९॥ अथ या घोषिण्युपब्दिमती सैन्द्री (आगा)। तया माध्यन्दिनस्योद्गेयम्। जै० उ० १।३७।३॥ अथ यदुच्चैर्घोषः स्तनयन्बबबा कुर्वन्निव दहति यस्माद्भूतानि विजन्ते तदस्य (अग्नेः) ऐन्द्रं रूपम्। ऐ० ३।४॥ यदशनिरिन्द्रस्तेन। कौ० ६। ९॥ स्तनयित्नुरेवेन्द्रः। श० ११।६।३।९॥ तस्मा-दाहेन्द्रो ब्रह्मेति। कौ० ६। १४॥ यत्परं भाः प्रजापतिर्वा स इन्द्रो वा। श० २। ३।१।७॥ देवलोको वा इन्द्रः। कौ० १६।८॥ इन्द्रो बलं बलपतिः। श० ११।४। ३।१२॥ तै० २।५। ७।४॥ इन्द्रो मे बले श्रितः। तै० ३।१०।८।८॥ वीर्यं वा इन्द्रः। तां० ९।७।५, ८॥ गो० उ० ६।७॥ वीर्यमिन्द्रः। तै० १।७।२।२॥ इन्द्रियं वीर्यमिन्द्रः। श० २।५।४।८॥ इन्द्रियं वै

वीर्यमिन्द्रः । श० ३ । ६ । १ । १५ ॥ ५ । ४ । ३ । १८ ॥ शिश्नमिन्द्रः । श० १२ । ६ । १ । १६ ॥ रेत इन्द्रः । श० १२ । ६ । १ । १७ ॥ वृषा वा इन्द्रः । कौ० २० । ३ ॥ अर्जुनो ह वै नामेन्द्रः (महाभारतस्य कुम्भघोणसंस्करणे पाण्डवोऽर्जुनोऽपि इन्द्रपुत्रत्वेन प्रसिद्धः—आदिपर्वणि अ० ६३ श्लो० ६५ ॥)। श० २ । १ । २ । ११ ॥ अर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नाम । श० ५ । ४ । ३ । ७ ॥ एष एवेन्द्रः यदाहवनीयः । श० २ । ३ । २ । २ ॥ स इन्द्रो आहवनीयः । श० २ । ६ । १ । ३८ ॥ स यस्स इन्द्रस्सामैव तत् । जै० उ० १ । ३१ । १ ॥ ऋचश्च सामानि चेन्द्रः (स्वभागरूपेणाभजत) श० ४ । ६ । ७ । ३ ॥ सः (इन्द्रः) अब्रवीदुभे साम्नो वृणे श्रियमिति । जै० उ० १ । ५१ । ८ ॥ इन्द्र एष यदुद्गाता । जै० उ० १ । २२ । २ ॥ स यः स इन्द्रः । एष सोऽप्रतिरथः । श० ६ । २ । ३ । ५ ॥ इन्द्र आसीत्सीरपतिः शतक्रतुः । तै० २ । ४ । ८ । ७ ॥ स प्रजापतिरिन्द्रं ज्येष्ठं पुत्रमपन्यधत्त नेदेनमसुरा बलीयाꣳसोऽहनन्निति । तै० १ । ५ । ६ । १ ॥ ते (देवाः) होचुः । इन्द्रो वै नो वीर्यवत्तमः । श० ४ । ६ । ६ । ३ ॥ स (इन्द्रः) एतमिन्द्राय ज्येष्ठायै (=ज्येष्ठानक्षत्राय) पुरोडाशमेकादशकपालं निरवपन्महाव्रीहीणां । ततो वै स ज्यैष्ठ्यं देवानामभ्यजयत् । तै० ३ । १ । ५ । २ ॥ इन्द्रः (एवैनं) ज्येष्ठानां (सुवते)। तै० १ । ७ । ४ । १ ॥ सो (प्रजापतिः) ऽकामयतेन्द्रो मे प्रजायाꣳ श्रेष्ठः स्यादिति तामस्मै अजं प्रत्यमुञ्चत्ततो वा इन्द्राय प्रजाः श्रैष्ठ्यायातिष्ठन्त तच्छिल्पं पश्यन्त्यः । तां० १६ । ४ । ३ ॥ इन्द्रः खलु वै श्रेष्ठो देवतानामुपदेशनात् । तै० २ । ३ । १ । ३ ॥ इन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवाः । श० ३ । ४ । २ । २ ॥ अथ यदिन्द्रे सर्वे देवास्तत्स्थानाः । तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा देवा इति । श० १ । ६ । ३ । २२ ॥ ततो वा इन्द्रो देवानामधिपतिरभवत् । तै० २ । २ । १० । ३ ॥ सो (इन्द्रः) ऽग्रं देवतानां पर्यैत् । स अगच्छत् स्वाराज्यम् । तै० १ । ३ । २ । २ ॥ स (इन्द्रः) वै देवानां वसुर्वीरो ह्येषाम् । श० १ । ६ । ४ । २ ॥ इन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमः । ऐ० ७ । १६ ॥ ८ । १२ ॥ इन्द्रो वै देवानामोजिष्ठो बलिष्ठः । कौ० ६ । १४ ॥ गो० उ० १ । ३ ॥ इन्द्रौजसां पते । तै० ३ । ११ । ४ । २ ॥ इन्द्रो मृधां विहन्ता । कौ० ४ । १ ॥ इन्द्रायाꣳहोमुचे । तै० १ । ७ । ३ । ७ ॥ इन्द्राय सुत्राम्णे । तै० १ । ७ । ३ । ७ ॥ वृद्धानामिन्द्रः प्रदापयिता । तै० १ । ७ । २ । ३ ॥ ओकःसारी हैवैषामिन्द्रो भवति यथा गौः प्रज्ञातं गोष्ठम् । गो० उ० ६ । ४ ॥ ओकःसारी वा इन्द्रः । ऐ० ६ । १७, २२ ॥ गो० उ० ५ । १५ ॥ इन्द्रो वै त्रिशिरसं त्वाष्ट्रमहन् । तां० १७ । ५ । १ ॥ इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्धत । तै० १ । ६ । १ । ७ ॥ इन्द्रो मरुद्भिः (व्यद्रवत्)। श० ३ । ४ । २ । १ ॥ इन्द्रो रुद्रैः (उदक्रामत्)। ऐ० १ । २४ ॥ इन्द्रस्य पुरोडाशः । श० ४ । २ । ५ । २२ ॥ यदिन्द्रोऽपिबच्छचीभिः । तै० १ । ४ । २ । ३ ॥ इन्द्रो यज्ञस्य नेता । श० ४ । १ । २ । १५ ॥ तदाहुः किन्देवत्यो यज्ञ इति । ऐन्द्र इति ब्रूयात् । गो० उ० ३ । २३ ॥ इन्द्रो यज्ञस्यात्मेन्द्रो देवता । श० ६ । ५ । १ । ३३ ॥ ऐन्द्रो वै यज्ञः । ऐ० ६ । ११ ॥ ऐन्द्रो हि यज्ञक्रतुः । कौ० ५ । ५ ॥ २८ । २, ३ ॥ इन्द्रो यज्ञस्य देवता । ऐ० ५ । ३४ ॥ ६ । ९ ॥ श० २ । १ । २ । ११ ॥ इन्द्रो वै यज्ञस्य देवता । श० १ । ४ । १ । ३३ ॥ १ । ४ । ५ । ४ ॥ २ । ३ । ४ । ३८ ॥ न ह वा इन्द्रः कञ्चन भ्रातृव्यम्पश्यते । जै० उ० १ । ४५ । ६ ॥ ऋक्सामे वा इन्द्रस्य हरी । ऐ० २ । २४ ॥ तै० १ । ६ । ३ । ९ ॥ इन्द्रस्य वै हरी बृहद्रथन्तरे । तां० ९ । ४ । ८ ॥ सेनेन्द्रस्य पत्नी । गो० उ० २ । ९ ॥ यत्साकमेधैर्यजतऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकतां जयति । श० २ । ६ । ४ । ८ ॥ ऐन्द्रा वै पशवः । ऐ० ६ । २५ ॥ एतद्वा इन्द्रस्य रूपं यदृषभः । श० २ । ५ । ३ । १८ ॥ (प्रजापतिः) ऐन्द्रमृषभं (आलिप्सत)। श० ६ । २ । १ । ५ ॥ ऐन्द्रमृषभꣳ सेन्द्रत्वाय (आलभते)। तै० १ । ८ । ५ । ६ ॥ स ह्यैन्द्रो यदृषभः । श० ५ । ३ । १ । ३ ॥ इन्द्रो वा अश्वः । कौ० १५ । ४ ॥ ऐन्द्रं माध्यन्दिनम् । गो० उ० १ । २३ ॥ ऐन्द्रो मध्यन्दिनः । कौ० ५ । ५ ॥ २२ । ७ ॥ ऐन्द्रो वै मध्यन्दिनः । ऐ० ६ । ३० ॥ ऐन्द्रो वै माध्यन्दिनः । गो० उ० ६ । ९ ॥ मध्यस्थो वा इन्द्रः । कौ० ५ । ४ ॥ (अन्तरिक्षस्थानः—) इन्द्रो ज्योतिर्ज्योतिरिन्द्र इति तदन्तरिक्षलोकं लोकानामोति माध्यन्दिनं सवनं यज्ञस्य । कौ० १४ । १ ॥ स (इन्द्रः) एतं माहेन्द्रं ग्रहमभूत माध्यन्दिनं सवनानां

निष्केवल्यमुक्थानां त्रिष्टुभं छन्दसां पृष्ठं साम्नाम्। ऐ० ३ । २१ ॥ ऋभवो वा इन्द्रस्य प्रियं धाम। तां० १४ । २ । ५ ॥ ऐन्द्रं वै सुत्यमहः। कौ० ४ । ४ ॥ (प्रजापतिः) अग्निहोत्रेण दर्शपूर्णमासाभ्यामिन्द्रमसृजत। कौ० ६ । १५ ॥ ऐन्द्र एकादशकपालः (पुरोडाशः)। तां० २१ । १० । २३ ॥ ऐन्द्रमेकादशकपालं पुरोडाशं निर्वपति। श० ५ । ३ । १ । ३ ॥ हेमन्तशिशिरावैन्द्राभ्याम् (अवरुन्धे।) श० १२ । ८ । २ । ३४ ॥ दिवमैन्द्रेण अवरुन्धे। श० १२ । ८ । २ । ३२ ॥ अथैन्द्राय ज्येष्ठाय। हायनानां चरुं निर्वपति। श० ५ । ३ । ३६ ॥ यद्वै किञ्चन पीतवत्पदं तदैन्द्रं रूपम्। ऐ० ६ । १० ॥ यत् (अक्ष्योः) शुक्लं तदैन्द्रम्। श० १२ । ६ । १ । १२ ॥ इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु। श० ३ । ५ । २ । ४ ॥ स वा एष (आदित्यः) इन्द्रो वै मृध उद्यन् भवति ...... इन्द्रो वैकुण्ठो मध्यंदिने। जै० उ० ४ । १० । १० ॥ इन्द्रमदेव्यो माया अवचन्त स प्रजापतिमुपाधावत्तस्मा एतं विघनं (क्रतुं) प्रायच्छत्तेन सर्वा मृधो व्यहत। तां० १६ । १६ । १ ॥ इन्द्रो वै मघवान्। श० ४ । १ । २ । १५, १६ ॥ स उ एव मखः स विष्णुः। तत इन्द्रो मखवानभवन्मखवान्ह वै तं मघवानित्याचक्षते परोऽक्षम्। श० १४ । १ । १ । १३ ॥ इन्द्रो वसुधेयः। १ । ८ । २ । १६ ॥ इन्द्र उ वै वेनः। (ऋ० १० । १२३ । १)। कौ० ८ । ५ ॥ इन्द्रो वै वेधाः। (ऋ० ८ । ४३ । ११)। ऐ० ६ । १० ॥ गो० उ० २ । २० ॥ इन्द्रो हि षोडशी। श० ४ । २ । ५ । १४ ॥ इन्द्रो ह वै षोडशी। श० ४ । ५ । ३ । १ ॥ इन्द्र उ वै षोडशी। कौ० १७ । १ । ४ ॥ एतद्ध वा इन्द्राग्न्योः प्रियं धाम यद्वागिति। ऐ० ६ । ७ ॥ गो० उ० ६ । १३ ॥ वाग्घ्यैन्द्री। ऐ० २ । २६ ॥ वाक् च प्राणश्चेन्द्रवायवः (ग्रहः। इन्द्रः=वाक्; वायुः=प्राणः)। ऐ० २ । २६ ॥ अथैतद्वामे ऽक्षणि पुरुषरूपम्। एषास्य (दक्षिणे ऽक्षणि वर्त्तमानस्य पुरुषस्येन्द्राख्यस्य) पत्नी विराट्। श० १४ । ६ । ११ । ३ ॥ इन्द्रो वृषा। श० १ । ४ । १ । ३३ ॥ इन्द्रो वै वृषा। तां० ६ । ४ । ३ ॥ इन्द्रो वै वाजी। ऐ० ३ । १८ ॥ इन्द्रो वै गोपाः (ऋ० १ । ८६ । १)। ऐ० ६ । १० ॥ गो० उ० २ । २० ॥ इन्द्र उ वै परुच्छेपः। कौ० २३ । ४ ॥ एतेन (पारुच्छेपेन रोहितास्येन छन्दसा) वा इन्द्रः सप्त स्वर्गाँल्लोकानरोहत्। ऐ० ५ । १० ॥ इन्द्रो वै चतुर्होता। तै० २ । ३ । १ । ३ ॥ इन्द्रः सप्तहोता। तै० २ । ३ । १ । १ ॥ इन्द्रः सप्तहोत्रा। तै० २ । २ । ८ । ५ ॥ यन्मनः स इन्द्रः। गो० उ० ४ । ११ ॥ इन्द्रो वै प्रदाता स एवास्मै यज्ञं प्रयच्छति। कौ० ४ । २ ॥ यो ह खलु वाव प्रजापतिः स उ वावेन्द्रः। तै० १ । २ । २ । ५ ॥ इन्द्रो वै त्वष्टा (ऋ० १ । २२ । ६ ॥)। ऐ० ६ । १० ॥ इन्द्र उ वै वातापिः स हि वातमाप्त्वा शरीराण्यर्हन्प्रतिप्रैति। कौ० २७ । ४ ॥ कतमत्तदक्षरमिति। यत्क्षरत्नाऽक्षीयतेति। इन्द्र इति। जै० उ० १ । ४३ । ८ ॥ इन्द्र उ वै वरुणः स उ वै पयोभाजनः। कौ० ५ । ४ ॥ इन्द्रो वै वरुणः स उ वै पयोभाजनः। गो० उ० १ । २२ ॥ इन्द्रस्य (="वरुणस्य" इति सायणः) शतभिषक् (नक्षत्रम्)। तै० १ । ५ । १ । ५ ॥ इन्द्रो लोकम्पृणा। श० ८ । ७ । २ । ६ ॥ यत्पुरस्ताद्वासीन्द्रो राजा भूतो वासि। जै० उ० ३ । २१ । २ ॥ दक्षिणा दिक्। इन्द्रो देवता। तै० ३ । ११ । ५ । १ ॥ अथ यद्विश्वजितमुपयन्ति। इन्द्रमेव देवतां यजन्ते। श० १२ । १ । ३ । १५ ॥ इन्द्रो विश्वजिदिन्द्रो हीदं सर्वं विश्वमजयत्। कौ० २४ । १ ॥ ततो वा इदमिन्द्रो विश्वमजयद्यद्विश्वमजयत्तस्माद्विश्वजित्। तां० १६ । ४ । ५ ॥ इन्द्रो वै युधाजित्। तां० ७ । ५ । १४ ॥ वृषणश्वस्य ह मेनस्य मेनका नाम दुहितास ता ँहेन्द्रश्चकमे। ष० १ । १ ॥ इन्द्रो वै प्रासहस्पतिस्तुविष्मान्। ऐ० ३ । २२ ॥ सेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम। ऐ० ३ । २२ ॥ सेना ह नाम पृथिवी (=विस्तीर्णेति सायणः) धनञ्जया विश्वव्यचा अदितिः। सूर्य्यस्त्वक्। इन्द्राणी देवी प्रासहा ददाना। तै० २ । ४ । २ । ७ ॥ वैखानसा वा ऋषय इन्द्रस्य प्रिया आसन्। तां० १४ । ४ । ७ ॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत्सो ऽशुद्धो ऽमन्यत स एतच्छुद्धाशुद्धीयमपश्यत्तेनाशुध्यत् (इन्द्रो यतीन्त्सालावृकेभ्यः प्रायच्छत्तान्दक्षिणत उत्तरवेद्या आदन्—तैत्तिरीयसंहितायाम् ६ । २ । ७ । ५ ॥ अथर्ववेदे २ । २७ । ५ :—तयाहं शत्रून्त्साक्षे इन्द्रः सालावृकाँ इव ॥ ऋ० १० । ७३ । ३ :—त्वमिन्द्र सालावृकान्त्सहस्रमासन्दधिषे ॥)। तां० १४ । ११ । २८ ॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत्सो ऽशुद्धो ऽमन्यत स एते शुद्धाशुद्धीये

(सामनी) अपश्यत्ताभ्यामशुध्यत्। तां० ११।
४।७॥ यत्रेन्द्रं देवताः (यज्ञेषु) पर्यवृञ्जन्, (यतः स इन्द्रः) विश्वरूपं त्वाष्ट्रमभ्यमंस्त वृत्रमस्तृत यतीन्त्सालावृकेभ्यः प्रादादरुर्मघानवधीद् बृहस्पतेः प्रत्यवधीदिति तत्रेन्द्रः सोमपीथेन व्यार्ध्यत [तं (प्रतर्दनं) हेन्द्रः उवाच मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयात्त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छं बह्वीः सन्धा अतिक्रम्य दिवि प्रह्लादीयानतृणमहमन्तरिक्षे पौलोमान् पृथिव्यां कालकाञ्जांस्तस्य मे तत्र न लोम च नामीयत स यो मां (इन्द्रं) वेद न ह वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्यया न मातृवधेन न पितृवधेन नास्य पापं चकृषो मुखान्नीलं वेतीति—शंकरानन्दीयटीकायुतायां कौषीतकीब्राह्मणोपनिषदि ३।१॥]। ऐ०७।
२८॥ कालकञ्जा वै नामासुरा आसन्। ते सुवर्गाय लोकायाग्निमचिन्वत। पुरुष इष्टकामुपादधत् पुरुष इष्टकाम्। स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त। एषा मे चित्रा नामेति। ते सुवर्गलोकमाप्रारोहन्। स इन्द्र इष्टकामवृहत्। ते ऽवाकीर्यन्त ये ऽवाकीर्यन्त। त ऊर्णनाभयो ऽभवन्। द्वावुदपतताम्। तौ दिव्यौ श्वानावभवताम् (पश्यत—मैत्रायणीसंहिता १।६।६॥ काठक संहिता ८।१)। तै० १।१।२।४-६॥ इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत्तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत्तस्मा एतमुपहव्यं प्रायच्छत्। तां० १८।१।६॥ इन्द्रो यतीन् सालावृकेभ्य प्रायच्छत्तेषां त्रय उदशिष्यन्त रायोवाजो बृहद्गिरिः पृथुरश्मिः। तां० ८।१।४॥ इन्द्रो यतीन् सालवृकेयेभ्यः प्रायच्छत्तेषां त्रय उदशिष्यन्त पृथुरश्मिर्बृहद्गिरी रायोवाजः। तां० १३।४।१७॥ युवं सुराममश्विना नमुचावासुरे सचा। विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् (ऋ० १०।१३१।४॥ यजु० १०।४३॥) इत्याश्राव्याहाश्विनौ सरस्वतीमिन्द्रं सुत्रामाणं यजेति। श० ५।५।४।२५॥ (नमुचिः) तस्य (इन्द्रस्य) एतयैव सुरयेन्द्रियं वीर्यं सोमपीथमन्नाद्यमहरत्स ह न्यर्णः शिश्ये। श० १२।७।१।१०॥ 'अपां फेनेन नमुचे (:) शिर इन्द्रोदवर्तय' विश्वा यदजय (:) स्पृधः (ऋ० ८।१४।१३) इति पाप्मा वै नमुचिः। श० १२।७।३।४॥ इन्द्रश्च वै नमुचिश्चासुरः समदधाताम् नौ नक्तं न दिवाहनन्नार्द्रेण न शुष्केणेति तस्य व्युष्टायामनुदित आदित्येऽपां फेनेन शिरो ऽच्छिनत्। तां० १२।६।८॥ नमुचिर्ह वै नामासुर आस तमिन्द्रो निविव्याध तस्य पदा शिरोऽभितष्ठौ स यदभिष्ठित उदबाधत स उच्छ्वङ्कस्तस्य पदा शिरः प्रचिच्छेद ततो रक्षः समभवत्। श० ५।४।१।६॥ तं (त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं) इन्द्रो द्विद्वेष तस्य तानि शीर्षाणि प्रचिच्छेद। श० १।६।३।२॥ स (इन्द्रः) यत्र त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं जघान। श० १।२।३।२॥ इन्द्रो वै वृत्रहा। कौ० ४।३॥ महानाम्नीभिर्वा इन्द्रो वृत्रमहन्। कौ० २३।२॥ इन्द्रो वा एष पुरा वृत्रस्य वधादथ वृत्रं हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रो ऽभवत्। श० १।६।४।२१॥ ४।३।३।१७॥ इन्द्रो वै वृत्रं हत्वा विश्वकर्मा ऽभवत्। ऐ० ४।२२॥ तस्य (इन्द्रस्य) असौ (द्यु-) लोको नाभिजित आसीत्तं (इन्द्रः) विश्वकर्मा भूत्वाभ्यजयत्। तै० १।२।३।३॥ मरुतो ह वै क्रीडिनो वृत्रं हनिष्यन्तमिन्द्रमागतं तमभितः परिचिक्रीडुर्महयन्तः। श० २।५।३।२०॥ ते (मरुतः) एनं (इन्द्रं) अध्यक्रीडन्। तै० १।६।७।५॥ इन्द्रो वै मरुतः क्रीडिनः। गो० उ० १।२३॥ इन्द्रो वै मरुत सान्तपनाः। गो० उ० १।२३। इन्द्रस्य वै मरुतः। कौ० ५।४, ५॥ धर्म इन्द्रो राजेत्याह तस्य देवा विशः। श० १३।४।३।१४॥ एतद्वाऽ इन्द्रस्य निष्केवल्यं सवनं यन्माध्यन्दिनं सवनं तेन वृत्रमजिघांसत्तेन व्यजिगीषत। श० ४।३।३।६॥ ऐन्द्रं वै माध्यन्दिनं सवनम्। जै० उ० १।३७।३॥ इन्द्रस्य माध्यन्दिनं सवनम्। कौ० १४।५॥ ऐन्द्रं हि त्रैष्टुभं माध्यन्दिनं सवनम्। कौ० २६।२॥ ऐन्द्र त्रैष्टुभं माध्यन्दिनं सवनम्। गो० उ० ४।४॥ त्रैष्टुभ इन्द्रः। कौ० ३।२॥ २२।७॥ इन्द्रः (श्रियः) बलम् (आदत्त)। श० ११।४।३।२॥ तान् (पशून्) इन्द्रः पञ्चदशेन स्तोमेन नाप्नोत्। तै० २।७।१४।२॥ ऐन्द्रो राजन्यः। तां० १५।४।८॥ (राजन्यस्य) इन्द्रो देवता। तां० ६।१।१०॥ हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ... हरति।

ष० १।१॥ ऐन्द्री द्यौः। तां० १५।४।८ ॥ द्यौरिन्द्रेण गर्भिणी। श० १४।६।४।२१॥ ऐन्द्रꣳ हि पुरीषम्। श० ८।७।३।७॥ अथ यत्पुरीषꣳ स इन्द्रः। श० १०।४।१।७॥ ऐन्द्रयो बालखिल्याः (ऋचः)। ऐ० ६।२६॥ ऐन्द्रो वा एष यज्ञक्रतुर्यत्साकमेधाः। कौ० ५।५॥ गो० उ० १।२३॥ इन्द्रो ज्येष्ठामनु नक्षत्रमेति। तै० ३।१।२।१॥ इन्द्रस्य रोहिणी (=ज्येष्ठानक्षत्रमिति सायणः)। तै० १।५।१।४॥ एता वाऽ इन्द्रनक्षत्रं यत्फल्गुन्यः। श० २।१।२।११॥ ऐन्द्रꣳ साम्नाय्यम् (हविः)। श० २।४।४।१२॥ ऐन्द्रं वै दधि। श० ७।२।१।४२॥ ऐन्द्रो ब्राह्मणाच्छंसी। श० ६।४।३।७॥ तै० १।७।६।१॥ ऐन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भवति। गो० उ० ४।१४, १६॥ ऐन्द्रो वाऽ एष यज्ञो यत्सौत्रामणी। श० १२।८।२।२४॥ ऐन्द्रो वा एष यज्ञक्रतुर्यत् सौत्रामणी। कौ० १६।१०॥ गो० उ० ५।७॥ ऋषभमिन्द्राय सुत्रामणऽ आलभते। श० ५।५।४।१॥ तस्मात्सदस्यृक्सामाभ्यां कुर्वन्त्यैन्द्रꣳ हि सदः। श० ४।६।७।३॥ ऐन्द्रꣳ हि सदः। श० ३।६।१।२२॥

इन्द्रघोषः इन्द्रस्य परमेश्वरस्य वेदाख्याया विद्युतो वा घोषो विविधशब्दार्थसम्बन्धो यस्य यस्या वा स सा वा वाक्। ५. ११॥

इन्द्रऽजूतः इन्द्रो विद्युदिव प्रतापयुक्तः ३. ३३. ११॥

इन्द्रऽजूतम् सभाध्यक्षेण प्रेरितम्। १. ११८. ६॥

इन्द्रज्येष्ठः इन्द्रः सभापतिर्ज्येष्ठो येषु। ३३. ५०॥ [इन्द्रऽज्येष्ठाः] इन्द्रः सूर्यो ज्येष्ठः प्रशंस्यो येषान्ते। १. २३. ८॥ इन्द्रः परमविद्यैश्वर्य प्रधानमेषां ते। २. ४१. १५॥ [इन्द्रऽज्येष्ठासः] इन्द्रो राजा ज्येष्ठो येषान्ते। ७. ११. ५। [इन्द्रऽज्येष्ठान्] इन्द्रो विद्युत् सूर्यो

वा ज्येष्ठो येषान्तान्। ४. ५४. ५॥

इन्द्रऽतमा अतिशयेनैश्वर्ययुक्तौ। १. १८२. २॥ [इन्द्रतमे] अतिशयेनैश्वर्यकारके विद्युद्रूपे। ३८. १६॥

इन्द्रत्वाऽऊता इन्द्रेण त्वया पालिताः। १. १३२. १॥

इन्द्रपत्नीः इन्द्रस्य जीवस्य पत्नीः स्त्रीवद् वर्तमानाः। २८. ८॥

इन्द्रऽपानाः य इन्द्रं परमैश्वर्यहेतुं सवितारं पान्ति ते। (अत्र नन्द्यादित्वाल्ल्युः प्रत्ययः)। १. ५४. ६॥ [इन्द्रऽपानम्] इन्द्रस्यौषधिरसस्यैश्वर्यस्य वा पानं रक्षणं वा। ६. ४४. १६॥ इन्द्रस्य जीवस्य पातुमर्हम्। ७. ४७. १॥

इन्द्रपीतस्य सूर्येण जीवेन वा पीतस्य। ३८. २८॥

इन्द्रम्ऽइव सूर्यप्रकाशमिव सद्यो गन्तारम् १. ११६. १०॥ सूर्यवत् दूरस्थमपि व्यवहारप्रकाशनसमर्थम्। २०६॥ विद्युतमिव। ४. ३९. ५॥

इन्द्रयन्ते इन्द्रं स्वामिनं कुर्वते। ४. २४. ४॥

इन्द्रवत् विद्युद्वत्। ३८. ४३॥

इन्द्रवत्या इन्द्रो बह्वी विद्युद् विद्यते यस्यां तया। (अत्र भूम्न्यर्थे मतुप्। स्तनयित्नुरेवेन्द्रः। शतपथ १४. ५. ७. ७)। सूर्यप्रकाशसहितयोषसा वा। ३. १०॥

इन्द्रऽवन्तः परमैश्वर्ययुक्त इन्द्रस्तद्वन्तः। १. १०५. १६॥ बह्विन्द्र ऐश्वर्यं विद्यते येषान्ते। ५. ५७. १॥

इन्द्रवायुभ्याम् विद्युत् प्राणाभ्यामिव योगा-

कर्षणनिष्कर्षणाभ्याम् । ७ । ८ ॥

इन्द्रवायू प्राणसूर्यसदृशौ योगस्योपदेष्टृ-
भ्यासिनौ । ७ । ८ । विद्युत्पवनविद्या-
विदौ । ३३ । ५६ ॥

इन्द्रवायू विद्युत्पवनौ । ३३ । ४५ ॥ राज-
प्रजाजनौ । ३३ । ८६ ॥

इन्द्रवायू इति वायुविद्युद्वच्छीघ्रकारिणौ
शिल्पविद्याऽध्यापकोपदेशकौ । ४ । ४६ ।
४ ॥ सूर्य्यवायू इवाध्यापकोपदेशकौ ।
४ । ४६ । ६ ॥ वायुविद्युद्वद्वर्तमानौ राजा-
मात्यौ । ४ । ४६ । ७ ॥ वायुविद्युदग्नी
इव राजसेनेशौ । ४ । ४६ । ५ ॥ इमौ
प्रत्यक्षौ सूर्यपवनौ । १ । २ । ४ ॥

इन्द्रवायू इति अग्निपवनौ १. २३. २ । वि-
द्युत्प्राणौ १. १३६. १ ॥

इन्द्रऽवाहा याविन्द्रं विद्युतं परमैश्वर्यं व-
हतस्तौ (अत्राकारादेशः) १. १११. १ ॥

इन्द्रऽशत्रुः इन्द्रः शत्रुर्यस्य वृत्रस्य सः । १.
३२. ६ । इन्द्रः शत्रुर्यस्य स मेघः ।
१. ३२. १० ॥

इन्द्रशत्रुः इन्द्रोऽस्य शमयिता वा शातयिता
वा । नि० २ । १६ ॥

इन्द्रऽसखा इन्द्रः परमैश्वर्यो राजा सखा
यस्य सः ७. ३४. २४ ॥

इन्द्रस्यऽइव सूर्यस्येव ७. ६. १ ॥ यथा परमै-
श्वर्ययुक्तस्य राज्ञः ९. ८ ॥

इन्द्रस्वतम् परमैश्वर्ययुक्तस्वामिसाहितम् ४.
३७. ५ ॥

इन्द्रऽहूतिम् परमैश्वर्यप्रकाशिकाम् ६. ३८. १ ॥

इन्द्राकुत्सा इन्द्रश्च कुत्सश्चेन्द्राकुत्सौ

विद्युदाघातौ ५. ३१. ९ ॥

इन्द्राग्नी [इन्द्राग्नी, इन्द्राग्नी, इन्द्राग्नी]

इन्द्रो वायुर्विद्युदादिरूपोऽग्निश्च तौ ३.१३॥
इन्द्रः परमैश्वर्य्यश्चाग्निर्विज्ञाता च तौ
१५. ५६ ॥ संयुक्तौ विद्युदग्नी ३३. ४६ ॥
मातापितरौ १२. ५४ ॥ विद्युत्पावका-
विव सेनापती १७. ६४ ॥ सभासेनाधीशौ
३३. ६१ ॥ अध्यापकोपदेशकौ ३३. ६३ ॥
सूर्य्याग्नी इव प्रकाशमानौ सभापतिसभा-
सदौ ७. ३१ ॥ विद्युत्सूर्य्यवत् १३. २३ ॥
ऐश्वर्य विद्यायुक्तौ ३. १२. २ ॥ वायुवह्नी
इव वर्तमानौ राजप्रजाजनौ ६. ५६. २ ॥
प्राणविद्युतौ १. २१. ६ ॥ विद्युत्सूर्य्यौ
३. १२. ५ ॥ वायुवह्नी (यो वै वायुः स
इन्द्रो य इन्द्रः स वायुः । शतपथ ४. १.
३. १९) ॥ अध्येत्रध्यापकौ १. १०६. ७॥
उपदेश्योपदेष्टारौ १. १०६. ८ ॥ न्यायसेना-
ध्यक्षौ वायुविद्युतौ वा १. १०८. ६, १० ।
परमधनाढ्यो युद्धविद्याप्रवीणश्च १.
१०८. १३॥ स्वामिभृत्यौ १. १०८. ५ ॥

इन्द्राग्नी प्राणोदानौ वाऽइन्द्राग्नी । श० २ । ५ । २॥
८ ॥ इन्द्राग्नी हि प्राणोदानौ । श० । ४ । ३ । १ ।
२२ ॥ प्राणापानौ वा इन्द्राग्नी । गो० । २ । १ ॥ प्रा-
णापानौ वा एतौ देवानां यदिन्द्राग्नी । तै० १ ।
६ । ४ । ३ ॥ बलं वै तेज इन्द्राग्नी । गो० उ० १ ।
२२ ॥ ब्रह्मक्षत्रे वा इन्द्राग्नी । कौ० १२ । ८ ॥ अमृत ऽ
इन्द्राग्नी । श० १० । ४ । १ । ६ ॥ इन्द्राग्नी वै
देवान्.मयातयामानौ । तै० १ । १ । ६ । ५ ॥ १ ।
२ । ५ । १ ॥ इन्द्राग्नी वै देवानां मुखम् । कौ० ४ ।
१४ ॥ तस्मादाहुरिन्द्राग्नीऽएव देवानाऽ श्रेष्ठावि-
ति । श० ८ । ३ । १ । ३ ॥ इन्द्राग्नी वै देवानामो-
जस्वितमौ । श० १३ । १ । २ । ६ ॥ इन्द्राग्नी वै
देवानामोजिष्ठौ । तां० २५ । १७ । ३ ॥ ष० ३ । ७ ॥
इन्द्राग्नी इव बलेन (भूयासम्) । मं० २ । ४ ।
१४ ॥ ओजो बलं वा एतौ देवानां यदिन्द्राग्नी ।
तै० १ । ६ । ४ । ४ ॥ इन्द्राग्नी वै देवानामोजिष्ठौ

बलिष्ठौ सहिष्ठौ सत्तमौ पारयिष्णुतमौ । ऐ० २। ३६ ॥ इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ । तै० ३।८।७।१॥ एताभिर्वा इन्द्राग्नी अत्यन्या देवता अभवताम् । तां० २४। १७। २॥ इन्द्राग्नी वै विश्वेदेवाः । श० १०।४।१।६॥ इन्द्राग्नी वै सर्वे देवाः । कौ० १२। ६ ॥ १६। ११॥ श० ६। १।२।२८॥ इन्द्राग्नी वा इदꣳ सर्वम् । श० ४। २।२।१४॥ अस्ति वै छन्दसां देवतेन्द्राग्नी । श० ९।८।२।१६॥ प्रतिष्ठे वा इन्द्राग्नी । कौ० ३।६॥५।४॥ क्षत्रं वा इन्द्राग्नी । श० २।४। २।६॥ ज्योतिरिन्द्राग्नी । श० १०।४।१।६॥ ऐन्द्राग्नं वै सामतस्तृतीयं सवनम् । कौ० ४।४॥ तस्मादैन्द्राग्नौ द्वादशकपालः पुरोडाशो भवति। श० १।६।४।३॥ ऐन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । श० २।५।२।८॥ ऐन्द्राग्नानि ह्युक्थानि । श० ४।२।५।१४॥४।६।३। ३॥ दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नीऽएव। श० २।४।४।१७॥ इन्द्राग्नी वै विश्वेदेवाः। श० २।४।४।१३॥ इन्द्राग्नी हि विश्वेदेवाः। श० २।६।२।१४॥ नक्षत्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ । तै० ३। १।१।११॥ इन्द्राग्न्योर्विशाखे (=नक्षत्रविशेषः)। तै० १।५।१।३॥ एतद्ध वा इन्द्राग्न्योः प्रियं धाम यद्वागिति । ऐ० ६।७॥ गो० उ० ५।१३॥

इन्द्राणी इन्द्रस्य परमैश्वर्ययुक्तस्य स्त्री ५. ४६. ८ [इन्द्राणीम्] इन्द्रस्य सूर्यस्य वायोर्वा शक्तिं सामर्थ्यमिव वर्तमानाम् १. २२. १२ । परमैश्वर्ययुक्ताम् २. ३२. ८। [इन्द्राण्यै] इन्द्रस्य विद्युद्रूपस्य स्त्रीव वर्तमानायै दीप्त्यै २५. ४। परमैश्वर्यकारिण्यै राजनीत्यै ३८. ३।

इन्द्राणी इन्द्रस्य पत्नी । नि० ११। ३७॥ इन्द्राणी ह वाऽइन्द्रस्य प्रिया पत्नी, तस्या उष्णीषो विश्वरूपतमः । श० १४।२।१। ८। स एष एवेन्द्रः योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी (योऽयꣳ सव्येऽक्षन्पुरुषः)। श० १०।५।२।६॥

इन्द्रापर्वता [इन्द्रापर्वता] विद्युन्मेघाविव राज्यसेनाधीशौ . ५३. १॥ सूर्यमेघसदृशौ सेनापतिसेनाजनौ ८. ५३ । सूर्यमेघाविव वर्तमानौ १. १३२. ६॥

इन्द्रापूषणा विद्युद्वायू ७. ३५. १॥ विद्युत्पृथिव्यौ ३६. ११. (२४३। आर्य्य०)॥ [इन्द्रापूष्णोः] ऐश्वर्यवत्पुष्टिमतोः १. १६२. २॥

इन्द्राबृहस्पती वायुसूर्य्यौ २५. ६॥ अध्यापकोपदेशकौ ४. ४९. ५॥ [इन्द्राबृहस्पतिभ्याम्] राजानूचानाभ्याम् विद्वद्भ्याम् ७. २३॥

इन्द्राब्रह्मणस्पती इति राजधनपालकौ २. २४. १२॥

इन्द्रामरुतः इन्द्रश्च विद्युन्मरुतश्च वायवस्तान् २. २९. ३॥

इन्द्रावरुणा [इन्द्रावरुणा, इन्द्रावरुणा] वायुविद्युताविव ६. ६८. ३। विद्युज्जले ७. ३५. १। अग्निजले (अत्र सुपां सुलुगित्याकारादेशो वर्णव्यत्ययेन ह्रस्वत्वञ्च) १. १७. ३ । वायुजले १. १७. ८। विद्युद्वद्वर्तमानौ राजप्रजाजनौ ६. ६८. ११। विद्युद्वद्वर्तमानौ सभासेनेशौ ६. ६८. १०। अध्यापकोपदेशकौ ४. ४२. १०। सूर्य्यचन्द्रवद्वर्तमानौ राजप्रजाजनौ ६.६८. ८। प्राणोदानवत् प्रियवलिनौ ४. ४१. १। विद्युद्वायू इव वर्तमानौ ३. ६२. १। विद्युत्सूर्य्याविव ६. ६८. ४। वायुचन्द्रौ (२४३ आर्य्य०)॥ [इन्द्रावरुणयोः] इन्द्रश्च वरुणश्च तयोः सूर्याचन्द्रमसोः। (इन्द्र इति पदनामसु पठितम्। निघं० ५.

४। वरुण इति च। निघं० ५. ४। अनेन व्यवहारप्रापकौ गृह्येते) १. १७. १ ॥

इन्द्राविष्णू [इन्द्राविष्णू] विद्युत्सूत्रात्मानौ ४. २. ४। सूर्यविद्युतौ ६. ६६. २। विद्युत्सूर्याविव १. १५५. २. । ६. ६६. ७। विद्युद्वायू ४. ५५. ४ । वायुसूर्यौ ६. ६९. ४ । वायुविद्युताविव सभासेनेशौ ६.६६.३ ॥ [इन्द्राविष्णुभ्याम्] ईश्वरवेदज्ञानाभ्याम् ७. २३ ॥

इन्द्रासोमा [इन्द्रासोमा] विद्युदोषाधिगणौ ७. ३५. १। सेनापत्यैश्वर्यवन्तौ २. ३०. ६। विद्युच्चन्द्रमसौ ६. ७२. १। वायुविद्युतौ ६. ७२. ४। वायुविद्युद्वद् वर्तमानौ ६. ७२. ५ ॥

इन्द्रियम् इन्द्रियम् ४. ३०. २३. ॥ सर्वाणीन्द्रियाणि (७. ६७. १ अथर्व २१३ भूमि०) उपस्थः पुरुषलिङ्गम् १६. ७६ ॥ ऐश्वर्य्यम् २१. २२ ॥ प्रशस्तं बुद्ध्यादिकं चक्षुरादिकं वा १. ५७. ३ ॥ विज्ञानं धनं वा १. १११. २ ॥ मनः प्रभृतीन्द्रियमात्रम् २१. ४० ॥ इन्द्रस्य परमैश्वर्य्यवतस्तव ईश्वरस्य जीवस्य च लिङ्गम् १. १०३. १ ॥ इन्द्रस्यैश्वर्य्यप्राप्तेर्लिङ्गं चिह्नं, इन्द्रेण परमेश्वरेण दृष्टं, इन्द्रेण सृष्टं, प्रकाशितं, इन्द्रेण विद्यावता जीवेन जुष्टं, सम्प्रीत्या सेवितं, इन्द्रेण परमेश्वरेण यद्दत्तं सर्वसुखज्ञानसाधकम् ॥ (इन्द्रियमिन्द्रलिङ्ग० अ० ५. २. ६३ ॥ अनेनोक्तेष्वर्थेष्विन्द्रियशब्दो निपातितः) २. १० ॥ इन्द्रस्य जीवस्य लिङ्गम् २०. ८० ॥ [इन्द्रियाय] धनवर्धनाय १०. १८ ॥ धनायेन्द्रियबलाय वा १६. ३४ ॥ इन्द्रियम् धननाम। निघ० २। १० ॥ प्राणा इन्द्रियाणि। तां० २। १४। २। जायमानो ह वै ब्राह्मणः सप्तेन्द्रियाण्यभिजायते ब्रह्मवर्चसञ्च यशश्च स्वप्नं च क्रोधं च श्लाघां च रूपं च पुण्यमेव गन्धं सप्तमम्। गो० पू० २। २ ॥

इन्द्रियावत् प्रशस्तानि इन्द्रियाणि भवन्ति यस्मिन् तत् १९. ६५ ॥

इन्द्रियावान् प्रशस्तानीन्द्रियाणि यस्मिन्सः ६. २७ ॥

इन्द्रेषिते इन्द्रेण सूर्येण वर्षाद्वारा प्रेरिते ३. ३३. २ ॥

इन्धताम् दीप्यन्तु १. १६०. ४ ॥ प्रदीपयन्तु ११. ६१ ॥ प्रकाशयन्तु १२. ४४ ॥

इन्धते [इन्धते] प्रदीपयन्ति ७. ३२ ॥ प्रकाशयन्ति ३४. ४४ ॥ प्रदीप्यन्ते १. ४४. ७ ॥

इन्धन्वऽभिः प्रदीपिकाभिः। (अत्र वनिपि छान्दसो वर्णलोपो वेत्यलोपः) २. ३४. ५॥

इन्धानः प्रदीप्तः सन् १. १४३. ७। प्रदीपयन् १२. १८ ॥ [इन्धानाः] प्रकाशयन्तः ३. १८ ॥ प्रकाशमानाः १५. ४६ ॥ प्रकाशयितारः (१६. ५. ३ अथर्व-४१ पञ्च०)॥

इन्धे प्रकाशयते ७. १. १६। प्रदीपयामि ७. ८. १ ॥

इन्व व्याप्नुहि ५. ४. ७ ॥

इन्वतम् वर्धयतम् १. १६०. ५ ॥

इन्वतां व्याप्नुताम् ६. ७०. ६ ॥

इन्वति [इन्वति] प्राप्नोति १. १२८. ५ ॥ व्याप्नोति जानाति वा १. १८. ७ ॥

इन्वति गतिकर्म । निघ० २ । १४ ॥ व्याप्तिकर्म । निघ० २ । १८ ॥

इन्वतु प्राप्नोतु १. १६२. ६ ॥ व्याप्नोतु २५. २६ ॥ ददातु ४. ५३. ७ ॥

इन्वथः प्राप्नुतम् १. ११६. ७ ॥

इन्वन् प्राप्नुवन् ५. ३०. ७ ॥

इन्वन्तः व्याप्नुवन्तः ३. ४. ५ ॥ इन्वतः प्रियस्य १. १४१. ४ ॥

इन्वसि [इन्वसि] व्याप्नोति (व्यत्ययो बहुलमिति वचनव्यत्ययः) ५. २८. २ ॥ व्याप्नोषि १. १४१. १० ॥

इन्विरे व्याप्नुवन्ति ५. ६. ६ ॥

इभम् हस्तिनम् ६. २०. ८ ॥

इभेन इराभृता गणेन गतभयेन हस्तिना वा । निघ० ६ । १२ ॥

इभ्यान् य इभान् हस्तिनो नियन्तुमर्हन्ति तान् १. ६५. ४ ॥

इमः प्राप्नुमः ११. १६ ॥

इमऽथा [इमथा] इमामिव ५. ४४. १ ॥ इदानीन्तनानामिव ७. १२ ॥

इमसि प्राप्नुमः १. १. ७ ॥

इयक्षते यष्टुं सत्कर्तुमिच्छते । (अत्र छान्दसो वर्णलोप इत्यभ्यास यकारलोपः) ३३. ६२ ॥

इयक्षति गतिकर्म । निघ० २ । १४ ॥

इयक्षन् प्राप्तुमिच्छन् १. १५३. २ ॥ [इयक्षन्तः] सत्कुर्वन्तः २. २०१ । यष्टुं संगमयितुमिच्छन्तः ६. २१. ३ ॥

इयक्षमाणाः यज्ञं चिकीर्षमाणाः १७. ६६ ॥ [इयक्षमाणम्] अतिशयेन संगच्छमानम् १. १२३. १० ॥

इयक्षसि यष्टुं संगन्तुमिच्छसि ३३. ५५ । संगच्छसे प्राप्नोषि वा ६. ४६. ४ ॥

इयत् प्राप्नुवन् ४. १६ । एतावत्परिमाणम् । [इयति] एतावति ३७. ५ ॥

इयत्तकः कुत्सितः १. १६१. १५ ॥

इयत्तिका इयति प्रदेशे भवा बाला १. १६१. ११ ॥

इयत्यै सुखप्राप्तीच्छायै ७. ४२. ४ ॥

इयध्यै एतुं, प्राप्तुम् ६. २०. ८ ॥

इयर्ति [इयर्ति] उन्नयति ६. ४७. ३ । जानाति १. ११३. १७ । प्राप्नोति १. ७. ८ । गच्छति ४. १७. १२ । अर्पयति (अत्रान्तर्गतो णिच्) ३३. ७८ ॥

इयर्त्ति गतिकर्म । निघ० २ । १४ ॥

इयर्मि [इयर्मि] गच्छामि १. ११६. १ । प्राप्नोमि ३. १६. २ ॥

इयर्षि प्राप्नोषि १२. १०७ ॥

इयात् प्राप्नुयात् १२. ६८ ॥

इयाते गच्छतः ३३. ४४ ॥

इयानः सर्वाभीष्टाभिज्ञाता । (अत्रेङ् गतावित्यस्माच्छन्दसि लिट् । अ. ३. २. १०५ ॥ इति लिट् । लिटः कानज्वा । अ. ३. २. १०६ । इति कानच्) १. ३०. १४ । प्राप्नुवन् २. २०. ४ ॥ [इयानाः] अधीयमानाः ७. ५२. ३ । गन्त्यः १०. ११ ॥

[इयानम्] गच्छन्तम् १. १८०. १० ॥

इयाम [अति-] उल्लङ्घयेम त्यजेम ५. ५३. १४ ॥

इयाय प्राप्नोतु ४. ४. ११ । एति ७. ३३. १३ ॥

इये प्राप्नुयाम (अत्र व्यत्ययेनात्मनेपदम् । लडर्थे लिट् च) २. १७. ७ ॥

इयेर्थ एषि ४. ६. १ ॥

इरज्यति ऐश्वर्यं दातुं सेवितुञ्च योग्योऽस्ति । १. ७. ६ ॥

इरज्यति ऐश्वर्यकर्म । निघ० २ । २१ ॥ परिचरणकर्म । निघ० ३ । ५ ॥

इरज्यथः ऐश्वर्ययुक्तां कुरुथः १. १५१. ६ ॥

इरज्यन् ऐश्वर्यं कुर्वन् १२. १०६ ॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरिति । मनुष्या वै जन्तवो, दीप्यमानो अग्ने प्रथयस्व मनुष्यैरित्येतत् । श० ७ । ३ । १ । ३२ ॥

इरज्यन्त प्राप्नुवन्तु ७. २३. २ ॥

इरज्यसि ऐश्वर्यं प्राप्नोसि १. ५५. ३ ॥

इरधन्त य इरान् इलान् प्रेरकान् दधति त इरधास्त इवाचरन्तु १. १२६. २ ॥

इरध्यै ईरितुं प्राप्तुम् । (अत्र वर्णव्यत्ययेन ईकारस्थाने इः) १. १३४. २ ॥

इरम्मदम् य इरयाऽन्नेन माद्यति हृष्यति तम् । (उग्रंपश्येरम्मदपाणिन्धमाश्च । अ० ३. २. ३७ । इति खश् प्रत्ययान्तो निपातः) ११. ७६ ॥

इरस्यः प्राप्तुं योग्यः ७. ४०. ६ ॥

इरस्या अन्नेच्छया ५. ४०. ७ ॥

इरा अन्नादिकम् ५. ८३. ४ ॥ [इरायै] अन्नादिवृद्धये ३०. ११ ॥

इरा अन्ननाम । निघ० २ । ७ ॥

इराऽवत् अन्नाद्यैश्वर्ययुक्तम् ७. ४०. ५ ॥

इरावती इराः प्रशस्तान्यन्नानि विद्यन्ते यस्यां सा । (अत्र प्रशंसार्थे मतुप्) ५. १६॥

[इराऽवतीम्] इरा जलानि विद्यन्ते यस्यास्ताम् ५. ६३. ६ ॥

इरावती नदीनाम । निघ० १ । १३ ॥

इरिणम् कम्पितं जगत् १. १८६. ६ ॥

इरिण्याय इरिणे ऊषरभूमौ साधवे १६. ४३॥

इर्मा प्रेरकः ५. ८७. ३ ॥

इर्यम् प्रेरकम् ५. ५८. ४ (अत्र वर्णव्यत्ययेन दीर्घ इकारस्य ह्रस्वः) प्रेरणीयम् ६. ५४. ८ ॥

इलीबिशस्य इलायाः पृथिव्या बिले गर्ते शेते तस्य वृत्रस्य । (इलेति पृथिवीनामसु पठितम् निघं १. १ । इदमभीष्टं पदं पृषोदरादिना सिध्यति । इलीबिशस्य इलाबिलशयस्य निरु० ६. १६) १. ३३. १२ ॥

इलीबिशस्य इलाबिलशयस्य । नि० ६ । १६ ॥

इळाऽवान् बह्वन्नयुक्तः ४. २. ५ ॥

इव इव (३. ३०. ६ अथर्व १७४. विधि)

इवेत्युपमार्थः । निघं० ३ । १३ । इव इति पदपूरणः । नि० १ । १० । इवः परिभयार्थे त्रा । नि० ६ । २८ ॥

इषः इच्छा अन्नादीनि वा १. १२१. १५ । एषण्या रथ्याः १. १३०. ३ । अन्नाद्यान्योषधिगणानि ३. ६२. १४ । इष्यन्ते यास्ताः (अत्र कृतो बहुलमिति वार्तिकेन क्विप्) १. ६. ८ । विज्ञानानि ३. ५४. २२ । इष्टसाधकाः १.३४.३ । ज्ञातव्याः प्रजाः १. १८१.

६ । प्राप्तव्यान् रसान् ६. ३५.४॥ [इषम्] प्राप्तिम् १. १७७. ५ । प्रेरणम् १. १७८.५ ॥ [इषे] वृष्ट्यै ३३. ११ ॥ [इषाय] अन्नोत्पादकाय २२. ३१ ॥

इष् अन्न नाम । निघ० २ । ७ ॥ इषा अद्भिः सह । नि० १० । २६ ॥ प्रजा वाऽइषः । श० १ । ७ । ३ । १४ । अन्नं वा इषम् । कौ० २८ । ५ । अयं वै लोक इषमिति । ऐ० ६ । ७ ॥

इषऽस्तुतः अन्नादेः स्तावकः ५. ५०. ५॥

इषणः प्रेरयेः ४. १६. ६ ॥ प्रेरय ४. २२.१०॥

इषणत् इष्णाति प्राप्नोति ४. १७. १४ ॥

इषणन्त इच्छन्तु १. १३४. ५ ॥ प्राप्नुवन्ति ४. २३. ६ ॥

इषणि एषणायाम् २. २. ६ ॥

इषणय प्रेरय ३. ५०. ३ ॥

इषणयत प्राप्नुवन्ति ५. ५२. १४ ॥

इषणयन् आत्मन इषणं प्रेरणमिच्छन्निव ३. ६१. ७ ॥

इषणयन्ति अन्नादिकमिच्छन्ति ५. ६. ६ ॥

इषध्यै एष्टुं ज्ञातुम् ७. ४३. १ ॥

इषन्त प्राप्नुवन्तु १. १३४. ५ ॥

इषयध्यै एषयितुं गमयितुम् १. १८३. ३ ॥ गन्तुम् ६. ६४. ४ ॥

इषयन् प्रापयन् ६.१.२ ॥ [इषयन्तः] इषमन्नं कामयमानाः ६. १६. २७ ॥ प्राप्नुवन्तः प्रापयन्तो वा ५. ४६. ४ ॥ [इषयन्तम्] प्राप्नुवन्तं गच्छन्तं वा ६. १८. ५ ॥

इषयन्त एषयन्ति प्राप्नुवन्ति । (अत्र लङि वा छन्दसि सर्वे विधयो भवन्तीति गुणाभावोऽडभावश्च) १. ७७. ४. ॥ प्राप्नुयुः २. २. ११ ॥

इषयन्ती इतिं सुखं प्रापयन्त्यौ ४. ५६. ४ ॥

इषयन्तीः इषमन्नं कुर्वन्त्यः ३. ३३. १२ ।

इषऽयुः इष्यते सर्वैर्जनैर्विज्ञायते यत्तद्याति प्राप्नोतीति (इषधातोर्घञर्थे कविधानमिति कः तस्मिन्नुपपदे याधातोरौणादिकः कुः) १. १२०. ५ ॥

इषयेम प्राप्नुयाम १. १८५. ६ ॥

इषवः गतयः १३. ७ । वाणाद्याः शस्त्रविशेषाः २९. ४८ । प्राप्ताः १७.४३ । [इषुम्] प्राप्तिसाधनमिच्छाविशेषं वा १. ६४. १०॥ [इषवे] इष्णात्यभीक्ष्णं हिनस्ति शत्रुं येन तस्मै १६. १ ॥

इषुः ईषतेर्गतिकर्मणो वधकर्मणो वा । नि० ६ । १८ ॥ वीर्यं वाऽइषुः । श० ६ । ५ । २ । १० ॥ चतुः सन्धिर्ह्यिषुरनीकं शल्यस्तेजनं पर्णानि । ऐ० १ । २५ ॥ इषवो वै दिद्यवः । श० ५ । ४ । २ । २ ॥

इषव्यः इषुषु साधुः २१. २२ ॥

इषऽवान् ज्ञानवान् १. १२६. ६ ॥

इषाण प्रापय, कामय वा ३१. २२ । स्वेच्छया निष्पादय (१३६ भूमि०) ॥

इषितः प्रापयितव्यः १. ३. ५ । प्रेरितः ३. ३२. ४ । अन्वेषितः ३. ३. २ । इष्टः ७. ३९. १ । इच्छाप्रयुक्तः ३. ४. ३ ॥ [इषिता] प्रज्ञापकौ सन्तौ ३. १२. १ । इषितावध्यापकोपदेशकौ ७. ३३. १३ ।

प्रेषितौ प्रार्थितौ वा ७. ३१ ॥
इषितः प्रेषित इति वा, अधीष्ट इति वा । निघ० ८।८॥

इषिधः इच्छाप्रकाशिकाः ६. ६३. ७ ॥

इषिरः इच्छुः ३. ५. ४ । सद्यो गन्ता ७. ३५. ४ । गन्तव्यः ५. ४१. १२ । ज्ञानवान् ६. २९. ३ । येनेच्छन्ति सः १८. ४१ ॥ इषिरा गन्तारौ ५. ७५.५ ॥ [इषिरम्] पष्टव्यम् ३. २. १४ । प्राप्तव्यम् ५. ६८. ४ । गमनम् ५. ३७. २ ॥
इषिर इति क्षिप्र इत्येतत् । श० ६ । ४ । १ । १० ॥

इषिराम् प्राप्नुवन्तीम् ५. ३७. ३ । बहुपदार्थप्रापिकाम् ३. ३०. ६ ॥

इषुकारम् य इषून्बाणान् करोति तम् ३०.७॥

इषुकृद्भ्यः बाणनिर्मापकेभ्यः १६. ४६ ॥

इषुकृताऽइव बाणीकृताविव १. १८४. ३ ॥

इषुऽधिः इषवो धीयन्ते यस्मिन् ६. ७५. ५ ॥
इषुधिः इषूणां निधानम् । नि० ६ । १३ ॥

इषुधिमते प्रशस्तेषुधिधर्त्रे १६. २१ ॥

इषुध्यति शरादीनि शस्त्राणि धरेत् ११. ६७ । याचते शरान् धरतिवा २२. २१ ॥
इषुध्यति यच्ञाकर्म । निघ० ३ । १९ ॥

इषुध्यते इषुध इवाचरति तस्मै १. १२८. ६ ॥

इषुध्यवः य इषुभिर्युध्यन्ते ५. ४१. ६ ॥

इषुध्याऽइव इषवो धीयन्ते यस्यां तयेव १. १२२. १ ॥

इषुऽबलाः इषुभिः शस्त्रास्त्रैः बलं सैन्यं वा येषान्ते ६. ७५. ९ ॥

इषुऽमान् बाणवान् २. ४२. २ ॥

इषुऽयते इषुरिवाचरति १. १२८. ४ ॥

इषुहस्तेन इषवः शस्त्राणि हस्तयोर्यस्य तेन १७. ३४ ॥

इषे इच्छापूर्तये १७१. ८ अन्नाय १. १८०. २॥

इष्कर्तारम् निष्कर्तारं संसाधकम् (अत्र छान्दसो वर्णलोप इति नलोपः) १२. ११० ॥
इष्कर्तारमध्वरस्य प्रचेतसमिति । अध्वरो वै यज्ञः। प्रकल्पयितारं यज्ञस्य प्रचेतसमित्येतत् । श० ७ । ३ । १ । ३३ ॥

इष्कृतिः निष्कर्त्री १२. ८३ ॥

इष्टः कृतः १८. ५६ । सङ्गन्तुमर्हः २१. ५८ । सत्कृत आहुतिभिर्वर्धितो वा १८. ५७ । [इष्टौ] पूजनीयौ ४.६.७ ॥ [इष्टे] पूजितुं योग्य (अत्र संज्ञायां क्लिच्) १.१४३. ८॥ [इष्टम्] सुखं तत्साधनं वा१८.५७।अभीप्सितम् २५. ३७ । ब्रह्मोपासनं सर्वोपकारकं यज्ञानुष्ठानञ्च (१२.५. १० अथर्व १०३ भूमि०) यज्ञ करना और कराना (१२. ५. १० अथर्व १७६ विधि) ॥ येन इज्यते तम् १. १६२. १५ ॥
इष्टानि कान्तानि वा, क्रान्तानि वा, गतानि वा, मतानि वा, नतानि वा । नि० १० । २६ ॥

इष्टऽअश्वः इष्टाः संगता अश्वा यस्य सः १. १२२. १३ ॥

इष्टकाः इष्टसुखं साधिकाः १७. २ । वेद्यां चिता इष्टकाः ३५.८ ॥ [इष्टकाम्] इष्टं कर्म यस्यास्ताम् १४. ११ ॥ [इष्टका-

नाम्] इज्यन्ते सङ्गम्यन्ते कामाः यैः पदार्थैस्तेषाम् १३. ३१. [इष्टके] इष्टकेव शुभैर्गुणैः सुशोभिते १३. २१ ॥

तद्यदिष्टात्समभवंस्तस्मादिष्टकाः । श० ६।१।२।२२। तद्यदस्माऽइष्टे कमभवत्तस्माद्वेष्टकाः। श० ६।१।२।२३॥ अस्थीनि वाऽइष्टकाः। श० ८।७।२।१०। अहोरात्राणि वाऽइष्टकाः। श० ६।१।२।१८॥

इष्टनिः इच्छाविशिष्टः यष्टुं योग्यो वा (अत्रेषुधातोर्बाहुलकादौणादिकोऽनिः प्रत्ययस्तुगागमश्च) १. १२७. ६ ॥

इष्टयजुषः इष्टानि यजूंषि यस्य ८. १२ ॥

इष्टऽरश्मिः इष्टाः संयोजिता रश्मयो येन १. १२२. १ ॥

इष्टऽव्रताः इष्टकर्माणः ३. ५९. ६ ॥

इष्टापूर्ते इष्टं सुखं विद्वत्सत्करणमीश्वराराधनं सत्सङ्गतिकरणं सद्विद्यादिदानञ्च, पूर्तं पूर्णबलं ब्रह्मचर्यं विद्यालङ्करणं पूर्णं यौवनं पूर्णं साधनोपसाधनञ्च ते १५. ५४। इष्टं श्रौतं कर्म च, पूर्तं स्मार्तं कर्म च ते १८. ६० ॥

इष्टिः यजनक्रिया ४.४.७ ॥ [इष्टयः] सत्सङ्गतयः १. १४५. १ ॥ इष्टप्राप्तयः ६. ७४. १॥ [इष्टिम्] चाही हुई क्रिया को १. १६६. १४ ॥ [इष्टिऽभिः] होमैरिव सत्कारैः २. १. ६ ॥ सङ्गताभिः २. १८. १ ॥ [इष्टयै] इष्टसुखसिद्धये १. ३०. १२ ॥ इष्ट रूपायै १. ११३. ६ ॥ यजन्ति सङ्गच्छन्ते यस्मिन्यज्ञे तस्मै (अत्र बाहुलकादौणादिकस्तिः प्रत्ययः किच्च) १. ११३. ५॥ सङ्गतये ६. ७०. ४॥ [इष्टेः] इष्टस्य गृहाश्रमस्य स्थानात् १. १२५. ३॥ [इष्टौ] इष्टसाधिकायां नीतौ १. ६२. ३॥ गन्तव्यायाम् १. १४८. ३ ॥ विज्ञानवर्धके यज्ञे ६. ११. ३ ॥

इष्टिः यज्ञनाम। निघ० ३।१७॥

इष्णन् इच्छन् १. १८१. ६ ॥ प्राप्नुवन् ४. १७. ३ ॥

इष्णानः अभीक्ष्णं निष्पादयन् शोधयन् १. ६१. १३ ॥

इष्णासि अभीक्ष्णं प्राप्नोसि गच्छसि वा १. ६३. २ ॥

इष्मिणः इच्छान्नादियुक्ताः ७. ५६. ११ ॥ प्रशस्तविज्ञानगतिमन्तः १. ८७. ६ ॥

इष्मिन् इंषणिन इति वैषणिन इति वार्षणिन इति वा। नि० ४।१६॥

इष्यत विजानीत १. १५. ९ ॥ प्राप्नुत २६. २२ ॥

इष्यति गच्छति १. ३४. १० ॥

इष्यन् जानन् १. ६१. १२ ॥

इष्ये प्राप्नोमि ४. ३३. १ ॥

इष्वै गन्त्र्यै ६. ७५. १५ ॥

इह इह १. १. २ ॥

इहऽइव यथाऽस्मिन् स्थाने तथा १. ३७. ३ ॥

इहऽइह अस्मिन् जगति (अत्र वीप्सायां द्वित्वम्-प्रकर्षद्योतनार्थम्) १. १८१. ४ ॥

इहि याति २२. १९ । गच्छ १. १०. ४ । गच्छति (अत्र व्यत्ययः) ५. ८३. ६ । प्राप्नुहि जानीहि वा ८.५०. ३ । प्राप्नुहि प्रापयति वा १. ६. १ । प्राप्नोति १. १५ । प्राप्नुयात् ३. २७ ॥

इहेह अस्मिन् व्यवहारे संसारे वा···इत्यादि १०. ३२ ।

इहेहऽमातरा इहेह माता जननी ययोस्तौ ६. ५६. २ ॥

ई

ईक्षते देखता है (६. ६. ३ ॥ अथर्व २५४ विधि०) ॥

ईक्षध्वम् संप्रेक्षध्वम् ५. ३४ ॥

ईक्षन्ताम् प्रेक्षन्ताम् ३६. १८ ॥

ईक्षन्ते आलोकन्ते १७. ६८ ॥

ईक्षमाणाय दर्शकाय २२. ८ ॥

ईक्षयेत् दर्शयेत् १. १३२. ५ ॥

ईक्षामहे पश्येम ३६. १८ ॥

ईक्षिताय दृष्टाय २२. ८ ॥

ईक्षे पश्यामि ४. २०. ८ ॥

ईक्षे ईक्ष ईशिषे । नि० ६ । ६ ॥

ईखयन्ति छेदयन्ति निपातयन्ति १. १९. ७॥

ईजते कम्पते ५. ४८. २ ॥ दूरीकरोति ६. ६४. ३ ॥

ईजानः गमन करने वाला ४.५१.७ ॥ यजमानः ७. ५६. २ ॥ [ईजानाय] संगन्तुं शीलाय १. ११३. २० ॥

ईजे [ईजे] संगच्छते ६. ३. २ ॥ यजामि ६. १६. ४ ॥ संगच्छे ६. १. ६ ॥

ईट्टे स्तौति १. १८०. २ ॥ ऐश्वर्यवान् भवेत् ३. ५२. ५ ॥ ऐश्वर्ययुक्तं करोति ५. १२. ६॥ अधीच्छति ४. २५. ३ ॥ ऐश्वर्य्यं लभते ४. २५. १ ॥

ईट्टे ऐश्वर्यहेतुं विदधाति १. ८४. १८ ॥

ईडानः स्तुवन् २७. १४ ॥

ईडितः स्तुतः, अध्येषितः अध्येषितव्यो वा २. ३ ॥ प्रशंसितः २१. ३३ ॥ [ईडितम्] प्रशस्तम् २८. ३७. २६ ॥

ईडे स्तौमि ७. ३ ॥

ईडे अध्यन्विच्छामि १३. ४३ ॥

ईडेन्यः अन्वेषणीयः १५. ३६ ॥ [ईडेन्यम्] स्तोतुमर्हम् २८. २६ ॥

वाग्वाऽईडेन्या । श० १ । ४ । ३ । ५॥ मनुष्यो वाऽईडेन्या । श० १ । ५ । २ । ३ ॥ ईडेन्यो ह्यपः । श० । १ । ४ । १ । २३ ॥

ईड्यः अध्येषणीयः ३३. ६ ॥ स्तोतव्यः अन्वेष्टव्यश्च १. १. २ ॥ (२७ आर्य्ये) ॥

ईड्यः ईडितव्यः । नि० ८ । ८ । वन्दितव्यः । नि० ७ । १६ ॥ ईड्य इति यज्ञिय इत्येतत् । श० १ । २ । ३ । ६ ॥

ईदृक्षासः एतल्लक्षणसहिताः १७. ८४ ॥

ईदृङ् अनेन तुल्यः १७. ८१ ॥

ईधिरे प्रदीपयन्ति ५. २५. २ ॥

ईधिरे प्रदीपयेयुः ३. २६. १५ ॥

ईधे दीपयति (अत्र लडर्थे लिड् इजादेश्च गुरुमतो० अ० ३. १. ३६ ॥ इति प्रतिषेधादाङ्निषेधः ॥ इन्धिभवतिभ्याञ्च अ० १. २. ६ इति लिटः कित्त्वादनिदितामिति नलोपः गुणाऽभावश्च) १. ३६. ११ ॥ [ईधे] प्रदीपयेत् (अत्र लोपस्त आत्मनेपदेष्विति तकारलोपः) ११. ३३ ॥ प्रदीप्यताम् ११. ३४ ॥ प्रदीपये १२. २० ॥ प्रापयति ६. १६. १५ ॥

ईम् ज्ञातव्यं प्राप्तव्यं परमेश्वरं विद्युद्रूपमग्निं वा १. ६५ ३ ॥ विज्ञानमुदकं वा १. ६७. ४ ॥ एव १. ३८. ११ ॥ जलमन्नं पृथिवीं वा १. ५१. २ ॥ वैसे ही ५. ३. ५ ॥ दुग्धम् २. ३५. १३ ॥ प्रदातारम् १. ३६. ७ ॥ प्राप्तम् ५. १. ३; ४ ॥ प्राप्तव्यम् १. ८७. ५ ॥ प्राप्तव्यया १. १२९. ७ । प्रत्यक्षम्; सर्वतः १. १६७. ८ ॥ शास्त्रबोधम् १. ११६. १२ ॥ महान्तम् ४. १७. ४ ॥ विद्याम् ५. २. ५ ॥ प्राप्तं वस्तु ६. १७. २ ॥ प्राप्तव्यो विजयः १. ८१. १ ॥ समुच्चये २३. ५५ ॥

ईम् उदकनाम । निघं० १ । १२ ॥ पदपूरणः नि० १ । ६ ॥

ईमहे [ईमहे] प्राप्नुयाम ७. ५४. १ ॥ याचामहे १. १३६. ४२ ॥ विजानीमः (अत्र ईङ् गतौ । बहुलं छन्दसीति शपो लुकि श्यन्भावः) १. ६. १० ॥ जानीमः प्राप्नुमः १. १७. ३ ॥ जानीमं १. ४०. १ ॥ दूरीकुर्महे ७. ५८. ५ ॥

ईमहे याच्ञाकर्मणः । निघं० ३ । १९ ॥

ईयऽचक्षसा ईयं प्राप्तव्यं ज्ञातव्यं वा चक्षो दर्शनं कथनञ्च ययोस्तौ ५. ६६. ६ ॥

ईयतुः प्राप्नुतः ३. २. ६ ॥ गच्छतः ३३. ६७ ॥

ईयते [ईयते] गमयति १. ३०. १९ । गच्छति १. १४१. ८ ॥ गम्यते २१. ५९ ॥ प्राप्नोति १. ४८. ५ ॥

ईयथुः प्राप्नुयातम् (अत्र पुरुषव्यत्ययः) ५. ७३. ४ ॥

ईयन्ते प्राप्यन्ते ५. ५५. १ ॥

ईयमानाः प्राप्नुवन्तः ५. ४७. २ ॥ [ईयमानम्] गच्छन्तम् ५. ३०. १ ॥

ईयसे [ईयसे] गच्छसि १. १३३. ६ । प्राप्नोषि २. ६. ७ । विज्ञायसे विज्ञायते वा ४. ३२ ॥ व्याप्नोषि ६. १५. ६ ॥

ईयिऽवांसम् प्राप्नुवन्तम् ३. ६. ४ ॥

ईयुः [ईयुः] प्राप्नुयुः १. १३३. ११ । गच्छेयुर्वा ७. १८. ६; १० । यन्ति ३४. ५९ ॥

ईयुषीणाम् अतीतानाम् १. १२४. २ । गच्छन्तीनाम् १. ११३. १५ ॥

ईरताम् प्रेरयन्तु १. १२३. ६। प्राप्नुवन्तु ४. ८. ७॥

ईरते [ईरते] प्राप्नुवन्ति १२. ८२ । कम्पन्ते गच्छन्ति ४. ४५. २। कम्पयन्ति गच्छन्ति वा ५. ८३. ३। प्राप्नुयुः १. १८७. ५। जायन्ते ५. २. ७। प्रेरणा करते हैं १. १४०. ५। प्राप्नुवन्ति ७. ५६. १४॥

ईरय गमय १. ४८. २। प्रेरयत ५. ४२. ३। नियोजय ८. १६। प्रेरय १४. ८॥

ईरयथ प्रेरयथ ५. ५५. ५॥

ईरयध्यै प्रेरितुम् ४. २. १॥

ईरयध्वम् प्रापयतम् ४. ३४. २॥

ईरयन्ति प्रेरणा करते हैं ५. २०. २॥

ईरयन्ती प्रेरयन्ती १. ११३. १२।

ईरयस्व [ईरयस्व] प्रेरणा कर (१४. २. २८ अथर्व, १७० विधि)। प्रापय ७. ५. ८॥

ईरयामि प्रेरयामि २. ३३. ८॥

ईरिरे प्रेरयन्ति ३. ११. ६। प्राप्नुवन्ति ३. २९. १५॥

ईर्ध्वम् कम्पध्वम् १. ११३. १६॥

ईर्मऽअन्तासः कम्पतान्ताः १. १६३. १०॥

ईर्मान्तासः ईर्मः प्रेरितः स्थितिर्येषान्ते २६. २१॥

ईर्मा प्रेरकः ४. २७. २। निरन्तर चलने वाले ५. ६२. २। प्रासव्यं ज्ञातव्यं वा ५. ७३. ३॥

ईर्मे इह, ऋचो, अस्मिन् लोके इति वा। ईर्मं इति बाहुनाम समीरिततरो भवति। नि० ४। २५॥

ईर्यतायै कम्पनाय प्रवृत्तम् ३०. ८॥

ईळत स्तुत १. ६६. ३॥

ईळते स्तुवन्ति अध्येषन्ति वा १. १५. ७। प्रशंसन्ति ३. १३. २॥

ईळते याचन्ति, स्तुवन्ति, वर्द्धयन्ति, पूजयन्तीति वा। नि० ८। १॥

ईळाना प्रशंसन्ती ५. २८. १॥

ईळानाय स्तुवते २. ६. ६॥

ईळितः अध्येषितोऽधिष्ठितः १. १३. ४। प्रशंसितः १. १४२. ४। प्रशंसितगुणः ७. ७. ३। स्तुतः १. १३६. ७॥

ईळिष्व प्रशंसाऽध्यन्विच्छ वा ६. ६०. १०॥

ईळीत प्रशंसत ६. १६. ४६। प्रशंस्येत् ५. २१. ४। स्तौति ५. १७. १॥

ईळे [ईळे] अधीच्छामि ५. ६०. १। प्रशंसे ५. ६९. ३। अध्येषामि स्तौ ३. १. १५। स्तौमि प्राप्नोमि वा ४. ३३. १। सत्कुर्याम् १. ४४. ४। स्तुवे याचे अधीच्छामि प्रेरयामि वा १. १. १॥

ईळे याचामि। नि० ७। १५॥

ईळेन्यः स्तोतुमर्हः ७. ६. ४॥

ईवत् गतिरक्षणवत् ५. ४९. ५॥

ईवते विद्याव्याप्ताय ४. ४. ६। उपगताय ६. ७३. २॥

ईवतः प्रशस्तगमनकर्तुः ४. १५. ५। बहुगतिमतः ४. ४३. ३। सामीप्यं गच्छतः ७.

२३. १ ॥ [ईवत] उपगताय ६. ७३. २। व्याप्ताय ४. ४. ६ ॥

ईशत समर्थयत। (अत्र लडर्थे लोडन्तर्गतो एयर्थश्च)१. २३. ६। समर्थो भवतु १. ३६. १६ ॥

ईशा ईश्वरेण सकलैश्वर्यसम्पन्नेन सर्वशक्तिमता परमात्मना ४०. १ ॥

ईशानः अधिपतिः १. ६१. १५। ऐश्वर्यवान् ऐश्वर्यहेतुः स्रष्टः कर्ता प्रकाशको वा १. ७. ८। साधकः समर्थः १५. ३५ ॥ ईशानम् रचने समर्थं परमेश्वरं, तन्मध्यस्थविद्यासाधकं वायुं वा १. ५. २ ॥

आदित्यो वाऽईशान आदित्यो ह्यस्य सर्वस्येष्टे। श० ६।१।३। १७॥ एतान्यष्टौ (रुद्रः, सर्वंशर्वः, पशुपतिः, उग्रः, अशनिः,भवः, महान्देवः,ईशानः) अग्निरूपाणि। कुमारो नवमः। श० ६।१।३। १८। स ह स (असुः) ईशानो नाम। स दशधा भवति। स एष एतस्य (आदित्यस्य) रश्मिरसुर्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः। जै० उ० १। २६। ३॥ यदीशानोऽन्नं तेन ॥ कौ० ६।८॥

ईशानऽकृत् ईशानानैश्वर्यवतः करोतीति १. ६१. ११। य ईशानानीशञ्छीलान् पुरुषार्थिनः करोति २. १७. ४ ॥

ईशाना प्रभवित्री १. ११३. ७॥

ईशायै ययैश्वर्यं प्राप्नोति तस्यै २१. ५७ ॥

ईशिरे ऐश्वर्यं प्राप्नुवन्ति ५. ५८. १ ॥

ईशिषे [ईशिषि] ईशनं करोषि २. २४. १ ॥ स्वामी हो १. ६१.२३ ॥ ऐश्वर्य्यवान् भवेः २. ३. ६. १ ॥ इच्छासि ४. २५. ३॥ समर्थोऽसि २. १६. ६ ॥

ईशीत समर्थो भवेत् ४. १५. ५ ॥

ईशीय ईश्वरः समर्थो भवेयम् ७. ३२. १८ ॥

ईशे [ईशे,ईशें] ईष्टे (अत्र एकपक्षे लोपस्तआत्मनेपदेष्विति तलोपोऽन्यत्रोत्तमपुरुषस्यैकवचनम्) ३. १६. १। इच्छामि ३. १८. ३॥ ईश्वरो भवति ४. २१. ४। ईष्टे २०. ३२ ॥ ऐश्वर्यं करोति २५. ११ ॥ समर्थो भवामि ३. ३२॥ इच्छामि ६. ५१. ८॥ ऐश्वर्य्ययुक्तो भवति १. ७१. ६ ॥

ईषते [ईषते] इच्छेत् १. ८४. १७ प्राप्नोति १. १४६. १॥ हिनस्ति ५. ३४. ४ ॥ अभिगच्छति ५. ६७. ५ ॥पश्यन्ति १. १४१. ८॥

ईषते भीतः पलायते। नि० १०। ११॥

ईषथुः प्रापयितुमिच्छतम् १. ११२. १६ ॥

ईषन्ते हिंसन्ति ६. ६६. ४॥

ईषमाणः ऐश्वर्यं कुर्वन् (अत्र बहुलं छन्दसीति शपो लुक्) १. १७१. ४ ॥

[ईषमाणाः] गच्छन्तः ४. ५८. ६॥ पलायमानाः १७. ९४ ॥

ईषा हिंसकः ३. ५३. १७॥

ईषुः इच्छन्तु ३. १. २ ॥

ईषे प्राप्त होता हूं १. १८६. ४। इच्छामि ५. ४६. १ ॥

ईष्टे ईषणं करोति ५. ८७. ३॥

उ

उ वितर्के १. २८। समुच्चये १२. ५८। उत्तमे २१. ५। एव ३२. ४। निश्चयार्थे ३३. ८१ ॥

उ विनिग्रहार्थे, पदपूरणः। नि० १।५। एव। नि० ११।

उक्तः कथितः ४. ४१. १ ॥

उक्थऽअर्का उक्थानि प्रशंसितानि वचनान्यर्काणि पूजनीयानि च ६. ३४. १ ॥

उक्थ्ऽउक्थे वक्तुं योग्ये योग्ये व्यवहारे १२. २७ ॥

उक्थऽभृतम् यः ऋग्वेदं बिभर्ति ७. ३३. १४ ॥

उक्थपत्रः उक्थानि वक्तुं योग्यानि वेदस्तोत्राणि पत्राणि विद्यागमकानि यस्य सः १७. ५५ ॥

उक्थम् प्रशंसनीयमुपदेशम् १.२६.१। प्रशंसनीयं वचनं कर्म वा १. १००. १७। प्रशंसितम् ५. ३६. ५.। शास्त्रप्रवचनम् १. ८६. ४। वक्तुं योग्यम् १५. १३। वेदविद्याः १. १००. १४ ॥ उक्था उचितानि ४. ३. ४। परिभाषितुमर्हाणि वेदस्थानि सर्वाणि स्तोत्राणि (पातृतुदिविचि० उ० २. ७। अनेन वच्-धातोस्थक् प्रत्ययः, तेनोक्थस्य सिद्धिः। शेश्छन्दसि बहुलमिति शेर्लुक्) १. ५. ८ ॥ उक्थैः (उक्थेभिः) प्रशंसकैः ४. ४५. ४। प्रशंसितैर्गुणैः ४. १६. १५ ॥

उक्थम् प्राण उऽएवोक्तस्यान्नमेव थं तदुक्थमृक्तः। श० १०।४।१।२३ ॥ एष (आग्नेः) उऽएवोक्तस्यैतदन्नं थं तदुक्थमृक्तः। श० १०।४।१।४ ॥ अग्निर्वाऽउक्तस्याहुतय एव थम्। श० १०।६।२।८ ॥ आदित्यो वा उक्। तस्य चन्द्रमा एव थम्। श० १०।६।२।६ ॥ प्राणो वाऽउक्तस्यान्नमेव थम्। श० १०।६।२।१० ॥ (देवाः सोमं) उक्थैरुदस्थापयन्। तदुक्थानामुक्थत्वम्। तै० २।२।८।७ ॥ (वागिति) एतदेषां (नाम्नां) उक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति। श० १४।४।४।१ ॥ वागुक्थम्। ष० १।५ ॥ अन्नमुक्थानि। कौ० ११।८ ॥ १७।७ ॥ प्रजा वा उक्थानि। तै० १।८।७।२ ॥ पशव उक्थानि। ऐ० ४।१, १२ ॥ गो० उ० ६।७ ॥ तै० १।८।७।२ ॥ पशवो वा उक्थानि। कौ० २८।१० ॥ २६।८ ॥ ष० ३।११ ॥ तै० १।२।२।२ ॥ तां० ४।५।१८ ॥ १६।१०।२ ॥ १६।६।३ ॥ विडुक्थानि। तां० १८।८।६ ॥ १६।१६।६ ॥ ऐन्द्राग्नानि ह्युक्थानि। श० ४।२।५।१४ ॥ ४।६।३।३ ॥ (देवाः) अन्तरिक्षमुक्थेन (अभ्यजयन्)। तां० ६।२।६ ॥ (देवाः) उक्थैरन्तरिक्षं (लोकमभ्यजयन्)। तां २०।१।३ ॥ अपच्छिदिव वा एतद्यज्ञकाण्डं यदुक्थानि। तां० ११।११।२ ॥ १३।६।२ ॥ १४।६।३ ॥ यदुक्थानि भवन्त्यनुसन्तत्या एव। तां० १८।८।६ ॥ (तमेतम्पुरुषं) उक्थमिति बह्वृचाः (उपासते) एष हीद ँ सर्वमुत्थापयति। श० १०।५।२।२० ॥

उक्थऽवाहसा प्रशंसितविद्याप्रापकौ ६. ५९. १० ॥

उक्थऽशंसिनः वेदप्रकाशकरणशीलान् ६.४५. १६ ॥

उक्थऽशासः ये (योगाभ्यासं विहाय) उक्थानि वचनानि शंसन्ति तेऽर्थात् शब्दार्थयोः खण्डने रताः १७. २१ ॥ केवल विषयभोगों के लिये ही अवैदिक कर्म करने में प्रवृत्त हो रहे हो (३०६ आर्य)।

य उक्थानि वक्तुं योग्यानि वचनानि शंसन्ति १६. ६६ ॥ उक्थशसा उक्था उक्था शसा शासनानि ययोस्तौ २. ३६. १ ॥ उक्थशसः प्रशंसितशासनाः ४. २. १६ ॥

उक्थऽशुष्माः उक्थान्युक्तानि शुष्माणि बलानि याभिस्ताः ६. ३६. ३ ॥

उक्थाव्यम् प्रशंसार्हाणि स्तोत्राणि शस्त्रविशेषाणि वा तस्य तमिव सेनापतिम् ७. २२ ॥

उक्थाशस्त्राणि उक्थानि च तानि शस्त्राणि च (अत्रान्येषामपीति पूर्वपदस्य दीर्घः) १६. २८ ॥

उक्थिनम् [उक्थिनम्] प्रशस्तोक्थवाक्यजन्यबोधनिष्पादितम् २०. २१ ॥ उक्थानि वक्तुं योग्यानि प्रशस्तानि वचनानि यस्य तम् २८. ३३ ॥

उक्थ्यः प्रशंसितुं योग्यः २. १३. २ ॥ प्रशंसितो योग्यो विद्वान् ३. १०. ६ ॥ यानि विद्यासिद्ध्यर्थं वक्तुं वाचयितुं वार्हाणि तेषु साधुः १. १७ ५ ॥ [उक्थ्यम्] उक्थेषु प्रशंसनीयेषु भवम् १. १०५. १२ ॥ उच्यते प्रशस्यते यत्तस्मै हितम् १. ४८. १२ ॥ प्रशंसनीयं कर्म ५. २६. ४ ॥ प्रकृष्टविद्यावचः १. १०५. १३ ॥ प्रशंसनीयम् १. ५२. ६ ॥ वक्तुं श्रोतुं योग्येषु ऋग्वेदादिषु भवम् १. ४०. ५ ॥

उक्थ्यम् प्रशस्यनाम । निघं० ३ । ८ ॥ वक्तव्यप्रशंसम् । नि० ११ । ३१ ॥ अन्नं वा उक्थ्यम् । गो० पू० ४ । २० ॥ पशव उक्थ्यानि । कौ० २१ । ५ । यज्ञियं वै कर्मोक्थ्यं वचः । ऐ० १ । २६ ॥ उक्थ्या वाजिनः । गो० उ० १ । २२ ॥

उक्षत सिञ्चत १. ८७. २ ॥

उक्षतम् सिञ्चतम् २१. ८ ॥ सिञ्चेताम् २१. ६ ॥

उक्षन् सेवन्ते ४. १. १० ॥

उक्षन्तम् वीर्यसेचनसमर्थम् १. ११४. ७. (१५१ आर्य) ॥

उक्षन्ति सिञ्चन्ति १. १६६. ३ ॥

उक्षन्ते सिञ्चन्ति २. ३४. ३ ॥ सेवन्ते ५. ५६. १ ॥

उक्षमाणः सिञ्चमानः ५. ४२. १४ ॥ उक्षमाणाः सेवमानाः ४. ४२. ४ ॥

उक्षयन्त सिञ्चन्ति ६. १७. ४ ॥

उक्षा सेचकः १. १४६. २ ॥ सूर्यः ४. ५६. १ ॥ सेचको वृषभः १४. ६ ॥ वीर्यसेचकः १८. २७ ॥ वृष्ट्या सेचकः १८. ६० ॥

उक्षन् महन्नाम । निघ० ३ । ३ ॥ उक्षण एतान्यार्षभिकान् संस्त्यायान् । उक्षतेर्वृद्धिकर्मणः, उक्षन्त्युदकेनेति वा ।

उक्षामि शोधयामि, आर्द्रीकरोमि, सिञ्चामि वा २. १ ॥

उक्षितः सिक्तः १. ३६. १६ ॥ सेवितः २. २१. ३ ॥ उक्षितासः कृषिद्वारा सिक्ताः १. ८५. २ ॥ [उक्षितम्] वीर्यसेचनस्थितं गर्भम् १. ११४. ७. (१५१ आर्य०) ॥ सेवकम् २. १६. १ ॥ विद्यावीर्यसिक्तजनम् ॥

उक्षितः महन्नाम । निघ० ३ । ३ ॥

उक्षिते सिञ्चिते २. ३. ६ ॥

उख॒ऽछित् य उखङ्गमनं छिनत्ति सः ४. १६. ९ ॥

उखा ज्ञातुमर्हा १२. ६१ ॥ पाकस्थाली १. १६२. १५ ॥

उखाम् प्राप्तव्यां कन्याम् ११.६४॥ [उखायाः] प्राप्तायाः प्रजायाः १२. १६ ॥ [उखे] ज्ञानयुक्ते अन्नाधारा स्थालीव विद्याधारे, विज्ञानमिच्छुके, जिज्ञासो वा ११. ६१. ४ ॥

उखा एतद्वै देवा एतेन कर्मणैतयावृतेमांल्लोकानुदखनन् यदुदखनंस्तस्मादुत्खोत्खा ह वै तामुखेत्याचक्षते परोऽक्षम्। श० ६।७।१।२३॥ आत्मैवोखा। श० ६।५।३।४॥६।६।२।१५॥ शिर एतद्यज्ञस्य यदुखा। श०६।५।३।८॥ ६।५।४।१५॥ उदरमुखा। श० ७।५।१। ३८॥ योनिर्वाऽउखा। श० ७।५।२।२॥ इमे वै लोका उखा। श० ६।५।२।१७॥६।७। १।२२॥ ७।५।१।२७॥ प्राजापत्यमेतत्कर्म यदुखा। श० ६।२।२।२३॥ पर्वैतदग्नेर्यदुखा। ६।२।२।२४॥

उख्यम् उखायां संस्कृतं भक्ष्यमोदनादिकम्। (अत्र शूलोखाद्यत् ४. २. १७ अनेन संस्कृतं भक्षा इत्यर्थे यत्) १७. ६५ ॥

अयं वाऽअग्निरुख्यः। श० ८।२।१।४॥

उगणाः उद्यतायुधसमूहाः । (पृषोदरादित्वादभीष्टसिद्धिः) ११. ७७ ॥ [उगणाभ्यः] विविधतर्कयुक्ता गणा यासु ताभ्यः १६. २४ ॥

उग्रः तीव्रः १. १६५. १० । तेजस्वी १. १२७. ११ । तीव्रः प्रभावः ४. २३. ७ । भयंकरः २. २३. १२ । सर्वोत्कृष्टः (ऋज्रेन्द्राग्र० उ० २. २९ निपातनम्) १. ७. ४ । तीक्ष्णस्वभावः सूर्यः १. २३०. ७ । उग्रं दुर्जयम् ५. ३१. ८ । कठिनम्, दृढम् ३. ३६. ४. । दुष्टानां दमयितारम् ३. ४७.५ । प्रचण्डपराक्रमम् ७. ३६ । सर्वैः सह समवेतम् ३. ४६. ४ ॥

वायुर्वाऽउग्रः। श० ६।१।३।१२। एतान्यष्टौ (रुद्रः, सर्वः=शर्वः, पशुपतिः, उग्रः, अशनिः, भवः, महादेवः, ईशानः) अग्निरूपाणि। कुमारो नवमः। श० ६।१।३।१८॥

उग्रऽदेवम् उग्रान् तीव्रस्वभावान् विजिगीषुम् (अत्रान्येषामपीति पूर्वपदस्य दीर्घः) १. ३६. १८ ॥

उग्रधन्वा उग्रं धनुर्यस्य १७. ३५ ॥

उचथ्यम् वक्तुं योग्यम् १. १८२. ८ ॥ उचथानि वेदवचनानि १. ७३. १० ॥ रुचिकराणि ४. २४. ७ ॥ उचथाय प्रवचनायाध्यापनाय १. ११० १ ॥ [उचथस्य] उचितस्य १. १४३.६ ॥

उच्चा ऊर्ध्वस्थिताः १. २४. १० ॥ ऊर्ध्वे स्थितानि २. ३०. ५ ॥ उच्चे ऊर्ध्वस्थिते २. ४०. ४. २ ॥ उच्चम् २६. १६ ॥ उच्चानि सुखानि कर्माणि वा १. २३. ७ । उच्चादुत्कृष्टकर्मसेवमानात् (अत्र सुपांसुलुगिति पञ्चम्यैकवचनस्याकारादेशः) १. ११६. २२ ॥ उच्चानि वस्तूनि १. १२३. २ ॥

उच्चा उच्चैः। नि० १।२६॥

उच्चाऽबुध्नम् उच्चा ऊर्ध्वं बुध्नमन्तरिक्षं यस्मिंस्तम् १. ११६. ६ ॥

उच्चैः उच्चता के साथ ५. ३२. ६ ॥

उच्चैर्घोषाय उच्चैर्घोषो यस्य तस्मै १६. १६ ॥

उच्छ विवासय ६. ६५. ६ ॥ विवस १. ४८

१.॥ विशिष्टतया वासय १. ११३. १७ ॥ उच्छाति विवासयाति १. ६२. १४ ॥ प्राप्ति करा १. १२४. १० ॥

उच्छत् विवासयति १. ४८. ८ ॥

उच्छाति विवसाति १. ४६. १ ॥

उच्छन्ती विवासयन्ती दूरीकुर्वती १. ६२. ६ ॥ निस्सारयन्ती १. १२४. १ ॥ निवसन्ती ५. ७६. १० ॥ [उच्छन्तीः] सेवयन्तीः ४. ३६. १ ॥ सुवासयन्त्यः ४. ५१. ३ ॥

उच्छन्तु विवासयन्तु १.१२४. ६ । सेवन्ताम् ७. ४१. ७ ॥

उच्छसि वास करती है १. ४८. १० ॥

उच्छात् विवसनात् १. ४८. ३ ॥

उच्छात् विवसेत् १. ११३. १३ ॥ प्राप्नुयात् १. १२४. ११ ॥

उच्छान् विवासयेयुः ४. ५५. २ ॥ [उच्छान्] विवासयेत् ५. ३७. १ ॥

उच्यते [उच्यते] उपदिश्यते १. ११४. ६॥ कथ्यते १. ७७. १ ॥

उच्यासि वदसि ५. ८१. ४ ॥

उच्यसे परिभाष्यसे १. ३१. १४ ।

उच्यते कथ्येते ३१. १०. ॥

उच्छन्तु विवसन्तु ३४. ४० ॥

उज्जितिम् जयत्यनया सा जितिरुत्कृष्टा चासौ जितिश्च तामुत्कृष्टं विजयम् । विद्यया सम्यगुत्कर्षं वा २. १५ ॥

उजिहानाः उत्कृष्टतया प्राप्नुवन्तः १५.२४

उज्जेषी उत्कृष्टतया जेतुं शीलः १७. ८५ ॥

उत् उत्कृष्टतया ६. ३१ ॥ उत्कृष्टरीत्या १५ ५४ (३२४ भूमि०) अधिकार्थे ७. ३२ १२ ॥ उत्कर्षे १७. १० ॥ उद्गमने ७ ४२ ॥ अपि ४. २८ ॥ आश्चर्ये ३३. २१ ऊर्ध्वम् १७. ७२ ॥ अत्यन्तार्थे ४. ४५ १ ॥ ऊर्ध्वे उत्कृष्टबोधे व्यवहारे च ११. ५. ५ ॥ अथर्व(२४६ भूमि०)॥ पदार्थे ७. १६. ११ ॥ क्रियायोगे ७. ४१ ॥ चार्थे ६. ७२. २ ॥ धात्वर्थे (उदित्येतयोः प्रातिलोम्यं प्राह, निरु० १ । ३) १. १२ ॥

उत् (न्यवेति विनिग्रहार्थीयौ) इत्येतयोः प्रातिलोम्यम् । नि० १ । ३ ॥ उदिति सोऽसावादित्यः, जै० उ० २ । ६ । ८ ॥

उत अपि ३. २५ ॥

उत अपि । नि० १ । ६ ॥

उत्ऽअश्वनः उत्कृष्टताप्रापकः ५. ४४. १३॥

उत्ऽअजायन्त उत्कृष्टाः भवन्ति ४. १८. १॥

उत्ऽअयनात् उदयात् १. ४८. ७ ॥

उत्ऽअर्के उत्कृष्टतयाप्तौ १. ११३. १८ ॥

उत्ऽअर्वता ऊर्ध्वगमनेन ६. १८. ६ ॥

उत्ऽअसृजः उत्सृजाति, त्यजति २. २३. १८ ॥

उत्ऽआचरत् ऊर्ध्वङ्गच्छाति ७. ५५. ७ ॥

उत्ऽआजत् ऊर्ध्वं क्षिपति २. १२. ३ । विक्षिपेद्धन्यात् २. १४. ३ । ऊर्ध्वमधोगमयति २. २४. १४ ॥

त्ऽआजत ऊर्ध्वं समन्तात् क्षिपतु (अत्र लोडर्थे लङ्) १ ११२. १२ ॥

उत्ऽआरिथ प्राप्त होते हो २. ९. ३ ।

उत्ऽईता उदितौ, प्राप्तोदयौ १. १०८. १२ ॥ उत्कृष्टप्राप्तौ १. ११५. ६ । उदये ५. ६२. ८। उदिते ५. ६६. ३ ॥ [उत्ऽईतिम्] उदयम् ६. १५. ११ ॥

उत्ऽईव उसी के समान १. १६३. ४ ॥

उत्ऽईरत् सन्नुदन् ४. २. ७ ॥

उत्ऽईरते उत्कृष्टतया कंपयन्ति २. १७. १ ॥

उत्ऽईरयन्ति प्रेरते १. १६८. ८ ॥

उत्ऽईरयन्ती प्रवर्त्तयन्ती १. ११३. ८ ॥

उत्ऽईराणाः उत्कृष्टतां प्राप्ताः ४. ३६. ५ । उत्कृष्टं ज्ञानं प्राप्ताः ७. ४४. २ ॥

उत्ऽऋचि उत्कृष्टा ऋचो यस्मिन्नध्ययने तस्मिन् १. ५३. ११ ॥

उतानि सन्ततानि वस्त्राणि १६. ८६ ॥

उतेव यथोत्प्रेक्षणम् २६. १५ ॥

उतो इति अपि १. ११६. १४ । च ७. १. ८ । तर्क वितर्क से १. १६२. १२ । पक्षान्तरे १. २३. १५ ॥

उत अपि । नि० ४ । २४ । च । नि० १० । २७ ॥

उत्ऽओजसः उत्कृष्टमोजः पराक्रमो येषां ते ५. ५४. ३ ॥

उत्कूलनिकूलेभ्यः ऊर्ध्वनीचतरेभ्यः ३०. १४ ॥

उत्क्रमः उदूर्ध्वं क्रमः क्रमणं यस्मात् तस्य १५. ६ ॥

उत्क्रान्तिः उत्क्राम्यन्त्युल्लङ्घयन्ति समान् विषमान् देशान् यया मत्या तद्विधा क्षात्री १५. ९ ॥

उत्क्रमणम् ऊर्ध्वङ्क्रमणं तेज इव ७. २६ ॥

उत्क्रमाय मेघमंडल की गति जानने के लिये १५. ६ ॥

उत्ऽचरन्तम् ऊर्ध्वंविहरन्तम् ४. २५. ४ । ऊर्ध्वम्प्राप्नुवन्तम् ६. ५२. ५ ॥

उत्ऽजिहानाः त्यजन्तः ५. १. १ ॥

उत्तभिता धारण किया है (अ० १४. १. १–सत्य० २३६) ऊर्ध्वमाकाशमध्ये धारितास्ते वायुना सूर्येण च (अ० १४. १. १–भूमि० १४७) ॥

उत्ऽतमः [उत्तमः] श्रेष्ठः ३. ५. १० । उत्तमं सर्वोत्कृष्टं, प्रशस्तं, विजयाख्यं, सर्व दुःखप्रणाशकं वा ६. १० ॥

उत्तम्भनम् उत्कृष्टं प्रतिबन्धनम् (अत्र उदः स्थास्तम्भोः पूर्वस्य । अ० ८. ४. ६१ । अनेन पूर्वस्य सस्य पूर्वसवर्णादेशः) ४. ३६ ॥

उत्ऽतरः [उत्तरः] उत्तरकालीनः ४. १८. ६ । पश्चात् ४. ३०. १ । द्वितीयो नियुक्तः पतिः (१०. ८५. ४० ऋक्० २२४ भूमि०) । उत्कृष्टं तारयति समादधाति सः २३. ५२ । उत्तराः उपरिस्थाः १. ३२. ६ ॥ [उत्तरम्] उत्तरन्ति येन तत् ६. १६. १७ । अन्तावयवम् ५. १८ । उत्तरां दिशाम् २५. ५ । उत्पद्यमानम् १. ९५. ८ । सर्वो-

त्कृष्टं प्रलयादूर्ध्वं वर्तमानं संप्लवकर्तारम् १. ५०. १० । प्रलयादनन्तरं कारणाख्यम् १. १५४. १ ॥ [उत्तरे] सिद्धान्तसिद्धाः १. ७. ७ ॥ [उत्तरात्] बाईं ओर से ६. १६. ६ ॥

उत्तरः उद्धततरो भवति । नि० २ । ११ ।
तेषु ह वा एष एतदध्याहितस्तपति स वा एष (सूर्यः) उत्तरोऽस्मात्सर्वस्मात् भूताद्भविष्यतः सर्वमेवेदमतिरोचते यदिदं किं च । ऐ० ४ । १८ ॥ अयं वै (भू-) लोकोऽद्भ्यः उत्तरः । श० १४ । ३ । १ । २८ ॥

उत्तरणाय अर्वाचीनतटात्परतटं प्राप्नुवते प्रापयते वा १६. ४२॥

उत्तरतः उत्तरकाले २. ३ । उत्तरस्माद्देशात् ५. ११ ॥

उत्तरवेद्याः उत्तरा चासौ वेदी च तस्याः १६. १६ ॥

नासिका ह वाऽएषा यज्ञस्य यदुत्तरवेदिः । अथ यदेनामुत्तरां वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम । श० ३ । ५ । १ । २ । द्यौरुत्तरवेदिः । श० ७ । ३ । १ । २७ । योनिर्वाऽउत्तरवेदिः । श० ७ । ३ । १ । २८ । योषा वाऽउत्तरवेदिः । श० ३ । ५ । १ । ३३ । पशवो वा उत्तरवेदिः । तै० १ । ६ । ४ । ३ । खल उत्तरवेदिः । तां० १४ । १३ । ७ ॥

उत्तराम् उत्कृष्टतया तरन्ति यया सेनया तां प्राप्तविजयाम् १७. ५० । कारणरूपाम् १. ५०. ११ ॥

उत्तरांऽउत्तराम् पुनः पुनर्निर्मिताम् ४. ५७. ७ । आगामिनीमागामिनीम् ३८. २८ ॥

उत्तरासदः ये प्रश्नोत्तराणि समादधाना उत्तरस्यां दिशि सीदन्ति ६. ३६ ॥

उत्तानः ऊर्ध्वं स्थितः ४. १३. ५ ॥ [उत्तानयोः] उपरिस्थयोः ऊर्ध्वं स्थापितयोः पृथ्वीसूर्ययोः १. १६४. ३३ ॥

उत्तानः उत्ततान ऊर्ध्वतानो वा । नि० ४ । २१ ।

उत्तानऽहस्तः उत्तानावुपरिस्थौ हस्तौ यस्य सः ६. १६. ४६. ॥ उत्तानहस्ताः उत्तानावूर्ध्वगतावभयदातारौ हस्तौ येषां ते १८. ७५ ॥

उत्तानाम् ऊर्ध्वगामिनीम् ५. १. ३ ॥ [उत्तानायाः] उत्कृष्टस्तानः शुभलक्षणविस्तारो यस्या राज्यास्तस्याः ११. ३६ ॥ [उत्तानायाम्] उत्कृष्टतया विस्तृतायां जगत्याम् १. १६४. १४ । उत्कृष्टतया विस्तीर्णायां भूमावन्तरिक्षे वा ३४. १४ ॥

उत्ऽतिष्ठन् उद्यमाय प्रवर्तमानः ७. ३३. १ ॥ ऊर्ध्वन्तिष्ठन् ८. ३६. ॥

उत्थाय आलस्यं विहाय ११. ६४ ॥

उत्थिताय कृतोत्थानाय २२. ८ ॥

उत्ऽनिनीथः उत्कर्षम्प्राप्नुथः १. १८१. १ ॥

उत्ऽनीयमानाः उत्कृष्टान्गुणान् प्रापयन्तः ३. ८. ६ ॥

उत्ऽपतन् ऊर्ध्वमुड्डीयमान इव २. ४३. ३ ॥

उत्ऽभिदः [उद्भिदः] उत्कृष्टतया दुःखविदारकाः १. ८९. १ । ये पृथिवीमुद्भिद्य जायन्ते १. १३६. ६ ॥ [उद्भिदम्] पृथिवीं भित्त्वा जातेन काष्ठेन निर्मितम् १. १०२. ६ ॥

उत्ऽभृतम् [उद्भृतम्] उत्कृष्टतया धृतम् ३. २१. ५ । उत्कृष्टतया पोषितम् २१. ४५. ॥

उत्ऽयतः [उद्यतः] उद्योगी ६. ६८. १ ॥ ऊर्ध्वङ्गच्छन् ३९. ५ । प्रयत्नेन प्रेरितः ८. ५८ ॥ [उत्ऽयतम्] उद्वृतम् १. ८०. ९ ॥ [उत्ऽयता] उत्कृष्टतया यतानि गृहीतानि २. ३१. ७ ॥

उत्ऽयतिम् उद्यमम् १. १६०. ३ ॥

उत्ऽयन् [उद्यन्] उदयं प्राप्नुवन्सन् १. ५०. ११. ॥

उत्ऽयन्ता उत्कृष्टतया नियन्ता १. १७८. ३ ॥

उत्ऽवतः उपस्थितान्मार्गान् ३. २. १० । ऊर्ध्वान् देशान् ७. ५०. ४ । ऊर्ध्वदेशस्थाः ५. ८३. ७ ॥ [उत्ऽवता] ऊर्ध्वमार्गेण १. ३५. ३ ॥

प्रवत उद्वतो निवत इत्यवतिकर्मा । नि० १० । २१ ॥

उत्ऽवरीवृजत् भृशं वर्जयति ६. ५८. २ ॥

उत्ऽवृषाणः उत्कृष्टतया भृशं बलकरस्य ४. २०. ७ । उत्कृष्टतया बलिष्ठः सन् ४. २९. ३ ॥

उत्ऽशिष्टात् सर्वमस्मादूर्ध्वं शिष्टात्परमेश्वरात् तत्सामर्थ्याच्च (अ० ११. ७. २७— भूमि० १३८) ॥

उत्सः कूप इव तृप्तिकरः १. १५४. ५ । उन्दन्ति यस्मात्स कूप इव १६. ८७। उत्सं कूपम् १. ६४. ६ । कूपमिव पालकं गवादिकम् १३. ४६ ॥

उत्सः कूपनाम । निघं० ३ । २३ । उत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वा । नि० १० । ८ ॥ आपो वाऽउत्सः । श० ६ । ७ । ४ । ४ ॥

उत्सक्थ्याः उर्ध्वं सक्थिनी यस्यास्तस्याः प्रजायाः २३. २१ ॥

उत्सऽधिम् उत्साः कूपाः धीयन्ते यस्मिन्भूमिभागे तम् १. ८८. ४ ॥

उत्ऽसवे हर्षनिमित्ते व्यवहारे १. १०२. १ ॥

उत्सादतः उत्सादनं कुर्वतः २१. ४३ । त्यागमात्रात् २१. ४५ ॥

उत्सादम् ऊर्ध्वं सीदन्ति यस्मिस्तम् २५. १। [उत्सादेभ्यः] नाशेभ्यः प्रवृत्तम् ३०. १० ॥

उत्ऽसिनाति उत्कृष्टतया बध्नाति १. १२५. २॥

उत्ऽस्नाय स्नानं कृत्वा २. १५. ५ ॥

उत्ऽहर्षयन्ति उत्साहयन्ति ५. २७. ५ ॥

उदक् उत्तरतः ३. ५३. ११ ॥

उदकम् जलम् १. १६१. ८ ॥ [उदकाय] आर्द्रीकारकाय २२. २५ ॥ उदन् (उदनि) उदकमये जलाशये, उदके वा (पद्दन्नोमास इत्युदकस्योदन्नादेशः) १. १०४. ३ । १. ११६. २४ ॥

उदकम् उदकनाम । निघं० १ । १२ ॥ उदन् उदके । नि० १० । १२ ॥

उदञ्चम् ऊर्ध्वम्प्राप्नुवन्तम् २. १५. ६॥

उदक्राः पुनरूर्ध्वङ्गच्छन्त्यः १०. १६ ॥

उदधिः उदकानि धीयन्ते यस्मिँस्तत्समुद्रोऽन्तरिक्षं वा ३८. २२ ॥

उदधीतऽइव उदकानि धीयन्ते येषु तानिव ३. ४५. ३ ॥

उदन् 'उदकम्' इति पश्यत ।

उदनिऽमान् बहूदकः ५. ४२. १४ ॥

उदन्यवः आत्मन उदकमिच्छवः ५. ५४. २॥

उदन्युरुदन्यतेः । नि० ११ । १२ ॥

उदन्याःऽइव उदकसम्बन्धिन्य इव २. ७. ३. ॥

उदन्ऽवता बहूदकसहितेन ५. ८३. ७ ॥

उदन्ऽवतीः उदकयुक्ताः ७. ५०. ४ ॥

उदऽप्रुतः उदकस्य गमयितारः ४. ४५. ४ ॥ उदकं प्राप्ता नद्य इव ७. ४२. १ ॥

उदऽप्रुतम् उदकयुक्तम् ५. ७४. ४ ॥

उदऽमेघे यस्योदकैर्मिह्यते सिच्यते जगत् तस्मिन्समुद्रे १. ११६. ३ ॥

उदरम् उदरम् १६. ८६ ॥[उदरे]मध्ये १. ३०. ३ ॥ [उदरेषु] अन्तर्देशेषु १. २५. १५ ॥

प्रजापतेर्वा एतदुदरं यत्सदः ॥ तां० ६ । ४ । ११ ॥ उदरं वै सदः । कौ० ११ । ८ ॥ उदरमेवास्य (यज्ञस्य) सदः । श० ३ । ५ । ३ । ५ ॥ उदरं मध्यमा चितिः ॥ श० ८ । ७ । २ । १८ ॥ उदर मुखा । श० ७ । ५ । १ । १८ ॥

उदर्येण उदरे भवेन २५. ८ ॥

उदऽवाहासः य उदकं वहन्ति तानिव ५. ५८. ३ ॥

उदऽव्रजे उदकानि व्रजन्ति यस्मिँस्तस्मिन् ६. ४७. २१ ॥

उदहार्यः या उदकं हरन्ति ताः १६. ७ ॥

उदा 'उदकम्' इति पश्यत ॥

उदादाय ऊर्ध्वं समन्ताद् गृहीत्वा १. २८ ॥

उदानः य ऊर्ध्वमनिति ६. २० ॥ उदानिति बलयति येन सः २२. ३३ ॥ [उदानाय] उदान रूप शरीर के वायु के लिये १४. १२॥ उत्कृष्टाय बलाय १३. १६ ॥ स्फूर्ति-हेतव ऊर्ध्वमन्यते चेष्टयते येन तस्मै उत्क्रमणपराक्रमहेतवे १. २० ॥ उत्कृष्टाय जीवनबलसाधनायैव ७. ६ ॥

तद्यदस्यैषो (उदानः) ऽन्तरात्मन्यतो यद्वैने नेमाः प्रजा यतास्तस्मादन्तर्यामो नाम । श० ४ । १ । २ । २ । उदान उदयनीयः । ऐ० १ । ७ । उदस्त इव ह्ययमुदानः । ष० २ । २ । चन्द्रमा उदानः । जै० ३० । ४ । २२ । ६ । उदानो वै त्रिककुप्छन्दः । श० ८ । ५ । २ । ४ । उदानो वै नियुतः । श० ६ । २ । २ । ६ । एति ('आ' इति) उदानः । श० १ । ४ । १ । ५ । उदानो वै बृहच्छोचाः । श० १ । ४ । ३ । ३ । उदाना मासाः । तां० ५ । १० । ३ ॥

उदारः य उत्कृष्टं परीक्ष्य ऋच्छति ददाति १२. २२ ॥

उदाराथिः उद्दीपकः १. १८७. १० ॥

उदारिथ उत्कृष्टैः साधनैः प्राप्नुहि १७. ७५ ॥

उदितः उदयं प्राप्तः ३२. ७ ॥ [उदिता] उदिते ३३. ४२ ॥ उदयसमये ३४. ३७ ॥

उद्दिशः या उद्दिश्यन्ते ताः ६. १६ ॥

उदीची उत्तरा १४. १३ । बांई ओर । अथर्व० ३. २७. ४ (१६ पञ्च०) या उदङुत्तर-देशमञ्चति सा १५. १३ ॥

उदीची हि मनुष्याणां दिक् । श० १ । ७ । १ । १२ । एषा (उदीची) वै देवमनुष्याणां शान्ता दिक् । तै० २ । १ । ३ । ५ । एषा (उदीची) वै रुद्रस्य दिक् । तै० १ । ७ । ८ । ६ । एषा वै वरुण

स्य दिक् । तै० ३ । ८ । २० । ४ । नक्षत्राणां वा एषा दिग्यदुदीची । ष० ३ । १ । साम्नामुदीची महती दिगुच्यते । तै० ३ । १२ । ६ । १ । उदीच्यैव यशः । गो० पू० । ५ । १५ ॥

उद्दचः उत्कृष्टा अधीताः प्रत्यक्षीकृता ऋचो यस्मिँस्तस्य ४. ९ ॥

उदैति उद्गच्छति ३४. १ । व्याप्नोति (१५६ भूमि० ३०३ आर्य०) ॥

उदोजसम् उत्कृष्टं पराक्रमम् १२. ८१ ॥

उद्गाताऽइव यथोद्गाता तथा २. ४३. २ ॥

सूर्य उद्गाता । गो० पू० १ । ३३ । आदित्यो वा उद्गाताऽधिदैवं चक्षुरध्यात्मम् । गो० पू० ४ । २ । पर्जन्यो वाऽउद्गाता । श० १२ । १ । १ । ३ । वर्षा उद्गाता तस्माद्यदा बलवद्वर्षति साम्न इवोपब्दिः क्रियते । श० १२ । २ । ७ । ३२ । प्रजापतिर्वाऽ-उद्गाता । श० ४ । ३ । २ । ३ । उद्गातैव यशः । गो० पू० ५ । १५ । प्राण उद्गाता । कौ० १७ । ७ । गो० उ० ५ । ४ । ते य एवेमे मुख्याः प्राणा एत एवोद्गातारश्चोपगातारश्च । जै० उ० १ । २२ । ५ । देवानां वै षडुद्गातार आसन् वाक् च मनश्च चक्षुश्च श्रोत्रं चाऽपानश्च प्राणश्च । जै० उ० २ । १ । १ ॥

उद्गुरमाणाय य उत्कृष्टतया गुरत उद्यच्छ-त्युद्यमं करोति तस्मै १६. ४६ ॥

उद्गृहीताय ऊर्ध्वं गृहीतं जलं येन तस्मै २२. २६ ॥

उद्गृह्णते यदूर्ध्वं गृह्णाति तस्मै २२. २६ ॥

उद्ग्राभम् उत्कृष्टतया ग्रहणम् १७. ६४ ॥

उद्भिदः 'उत्ऽभिदः' इति पश्यत ॥

उद्भृतम् 'उत्ऽभृतम्' इति पश्यत ॥

उद्भौ उदुत्कृष्टानि वस्तूनि भवन्ति यस्मिँ-स्तस्मिन् १५. १ ॥

उद्यतः 'उत्ऽयतः' इति पश्यत ॥

उद्यतऽस्रुचे उद्यता उत्कृष्टतया गृहीता स्रुग् येन तस्मै यज्ञानुष्ठात्रे १. ३१. ५ ॥

उद्यते कथ्यते ५. ५५. ८ ॥

उद्यते क्रियते १. १६४. ४७ ॥

उद्यन् 'उत्ऽयन्' इति पश्यत ॥

उद्यासाय ऊर्ध्वङ्गमनाय ३६. ११ ॥

उद्रः जलचरः कर्कटाख्यः २४. ३७ ॥

उद्रावाय ऊर्ध्वङ्गताय द्रवीभूताय २२. ८ ॥

उद्रिणम् उदकवन्तम् २. २४. ४ ॥

उद्रुताय उत्कर्षङ्गताय २२. ८ ॥

उद्वत्ऽसु 'उत्ऽवतः' इति पश्यत ॥

उद्वयसम् उत्कृष्टं वयो जीवनं यस्मात्तम् ६. ३ ॥

उद्वृह उद्धर । नि० ६ । २ ॥

उन्नतः उच्छ्रितः २४. ७ ॥

उनत्त सिञ्चत ५. ४२. ३ ॥

उनत्ति आर्द्रीकरोति ५. ८५. ४ ॥

उनप् उम्भति पूरयति २. १३. ९ ॥

उन्नीतः ऊर्ध्वं नीतः ८. ५८ ॥

उन्नेतॄणाम् यथोन्नेतृणाम् उत्कर्षप्रापयितृणां राज्यं तथा एतस्य प्रकृतं राज्यं पालयितुम् ६. २ ॥

उनोति प्रेरयति ५. ३१. १ ॥

उन्दन् आर्द्रीकुर्वन् २. ३. २ ॥

उन्दन्ति क्लेदन्ति १. ८५. ५ ॥

उन्धि उन्दयति क्लेदयति ५. ८३. ८ ॥

उन्मत्तम् उन्मादरोगिणम् ३०. ८ ॥

उन्मा ऊर्ध्वं मिनोति यया तुलया तद्वत् १५. ६५ ॥

उप सामीप्ये १. १. ७। उपगमार्थे १. २१. ४। उपयोगे १. २२. १६। क्रियार्थे १. ५। गतार्थे २. १०। सामीप्ये क्रियायोगे। उपेत्युपजनम्प्राह। निरु० १. ३॥ २. १६। समीपस्थः सन् १२. ७८ ॥

उप इत्युपजनम्। नि० १। ३।
इयं (पृथिवी) वाऽउप। ह्येनयमुप यद्धीदं किं च जायतेऽस्यां तदुपजायतेऽथ यन्नृच्छत्यस्यामेव तदुपोप्यते। श० २। ३। ४। ६। उप वै रथन्तरम्। तां० १६। ५। १४ ॥

उपऽअयने समीपे प्राप्ते २. २८. १० ॥

उपऽआगहि उपागच्छ उपागच्छति वा १. ९१. १० ॥

उपऽआचरत् उपचारिणीव वर्तते १. ४६. १४ ॥

उपऽआभृति उपगतमाभृत्या भूषणञ्च तत् १. १२८. २ ॥

उपऽआसते सेवन करते हैं १. १६२. १२। उपासते १०. १६१. २. (९२ भूमि०) ॥

उपऽइतिः उपैय्यन्ते सुखानि यया सा १. ७६. १ ॥ [उपऽइतौ] प्राप्तौ ३. १८. १ ॥

उपऽईये समीपमागन्तुम् १. १२६. ८ ॥

उपऽउप अति समीपत्वे १. १२६. ७ ॥

उपऽक्षियन्तः उपनिवसन्तः ३. ५९. ३ ॥

उपऽक्षेतारः उपगतान् द्वैधीकुर्वाणः ३. १. १६ ॥

उपऽक्षेति विजानाति निवासयति वा १. ७३. ३ ॥

उपचिताम् वर्धमानानां रोगाणाम् १२. ६७ ॥

उपऽच्यवम् प्रापणम् (च्युङ् गतावित्यस्य प्रयोगः) १. २८. ३ ॥

उपऽजग्मुषः य उप सामीप्यं गतवन्तस्तान् १. ५३. ६ ॥

उपजायते यत्किञ्चिदुत्पद्यते तत्सर्वं त्रयोदशो मासो वा १. २५. ८ ॥

उपजिह्विका उपगताऽनुकूला जिह्वा यस्याः पत्न्याः सा ११. ७४ ॥

उपजिह्विका वम्रीभिरुपजिह्विका इति सीमिकानाम्। उपजिह्विका उपजिघ्र्यः। नि० ३। २० ॥

उपऽजीवन्ति समीप जीवित हैं १. १६०. ५ ॥

उपऽतिष्ठन्त उपतिष्ठन्तु १. १३५. ८ ॥

उपतिष्ठाति उपस्थित होता है। ३०. १८ ॥

उपऽतिष्ठन्ते प्राप्त होते हैं। ३. २२. २ ॥

उपऽद्यमाने उपादीयमाने ६. ४६. १३ ॥

उपदाम् उप समीपे दीयते ताम् ३०. ६ ॥

उपधी इवेत्युपधीऽईव यथोपधिर्मध्यस्थस्य रथावयवस्य धारिका २. ३६. ४ ॥

उपध्वस्ताः उपाधःपतिताः २४ १४ ॥

उपनतिः उपनमन्ति यया सा २०. १३ ॥

उपनयमानः विद्यापठनार्थमुपवीतं दृढव्रतमुपदिशन् (अ० ११. ५. ३ भूमि० २४६)॥

उपऽनिपद्यते प्राप्नोति (अ० १८. ३. ११. भूमि० २२१)॥

उपऽनिपद्यमानम् समीपे प्राप्नुवन्तम् १. १५२. ४ ॥

उपऽनिसेदुः प्राप्त हो कर अनुष्ठान करते हैं। अथर्व १९. ४१. १ (२३० विधि)॥

उपऽनीतम् प्राप्तसमीपम् १. १२१. ६ ॥

उपपतिम् य पत्युः समीपे वर्तते तम् ३०. ६ ॥

उपऽपर्चनम् उप सम्बन्धः ६. २८. ८ ॥

उपऽपृक् उप सामीप्यं पृङ्क्ते स्पृशति यः सः १. ३२. ५ ॥

उपपृक् उपपर्चनः। नि० ६ । १८ ॥

उपऽप्रक्षे सम्पर्के ५. ४७. ६ ॥

उपऽप्रयन् सामीप्यं गच्छन् १०३. ४ ॥ [उपऽप्रयन्तः] प्रयत्नेनोपायङ्कुर्वन्तः ७. ४४. २ ॥ प्राप्नुवन्तः ४. ३६. ५ ॥ उत्कृष्टं निष्पादयन्तो जानन्तः ३. ११ ॥

उपऽबर्बृहत् भृशमुपवर्द्धयति ५. ६१. ५ ॥

उपऽबर्हणीम् सुवर्धिकाम् १. १७४. ७ ॥

उपब्दिः महाशब्दकर्ता १. ७४. ७ ॥ वाक् १. १६६.७ ॥

उपब्दिः वाङ्नाम । निघ० १।११॥

उपऽब्रुवे "समीप कहता हूँ" १. १८५. ११ ॥ उपयोगिवच उपदिशेयम् १. १८८. ८ ॥

उपऽब्रूते उपदिशेत् १. ४०. २ ॥

उपभृत् योपगतं बिभर्त्यनया हस्तक्रियया सा २. ६ ॥

अथेदमन्तरिक्षमुपभृत् । श० १। ३। २। ४। अन्तरिक्षमुपभृत्। तै० ३। ३। १। २ । सावित्र्युपभृत् । तै० ३। ३। ७। ६। उपभृत् सव्यः (हस्तः)। तै० ३। ३। १। ५॥ अत्रैव जुहूराघ उपभृत्। श० १। ३। १। ११॥

उपमन्थितारम् समीपे विलोडितारम् ३०. १२ ॥

उपऽमन्युम् उप समीपे मन्तुं योग्यम् १. १०२. ६ ॥

उपऽमम् दृष्टान्तस्वरूपम् १. ६१. ३। उपमायुक्तम् ५. ३. ३। वस्तुतः उपगतेन स्तुतः १. ११०. ५ ॥

उपमे अन्तिकनाम । निघ० २। १६ ॥

उपमश्रवः तमम् उपमीयते येन तच्छ्रवस्तदतिशयितम् २. २३. १ ॥

उपऽमा उपमीयतेऽनयेति दृष्टान्तः १. ३१. १५ ॥ [उपऽमस्याम्] उपमायाम् (अत्र वाच्छन्दसीति स्याडागमः) १. १४५. ५ ॥

उपऽमातिः उपमानम् ४. ४३. ४ ॥

उपमात्ऽइव उपमा से जैसे वैसे ६. ६७. ६ ॥

उपमातिऽवनिः उपमातेर्विभाजकः ५. ४१. १६ ॥

उपऽमादम् य उपमां ददाति तम् ३. ५. ५ ॥

उपऽमित् य उप समीपे मिनोति प्रक्षिपति सः १. ५६. १ । य उपमिनोति सः ४. ५. १ ॥

उपमिताम् सब प्रकार की उत्तम उपमायुक्त, जिसको देख कर विद्वान् लोग सराहना करें। अथर्व० ९. ३. १ (२०२ विधि०) ॥

उपऽमिमीहि उपमितान्कुरु १. ८४. २० ॥

उपऽयन्तम् समीपम्प्राप्नुवन्तम् २. ३३. १२ ॥

उपऽयान्ति प्राप्नुवन्ति २. २. ११ ॥

उपऽयाति समीपङ्गच्छति ७. १. १२ ॥

उपयामगृहीतः सुनियमैर्निगृहीतात्मा २६. ५ । सुनियमैर्निगृहीतान्तःकरणः २६. ६ । यमानां समूहो याममुपगतश्च तद्यामं चोपयाममुपयामेन गृहीत उपयामगृहीतःपरमेश्वरः ७. २५ । उपात्तैर्यमैर्गृहीत इव ७. ४। उपयामाः शौचादयो नियमा गृहीता येन सः ७. १२ । शास्त्रनियमोपनियमा गृहीता येन सः ८. १ । विद्वानों का ग्रहण किया हुआ ७.३४,३५। उपयामेन विवाहनियमेन गृहीतः ८. ७ । उपयमाय गृहाश्रमाय गृहीतः ८. ११ । उपयामा सामग्री गृहीता येन सः ८. ३३ । राज्यनियमोपनियमैर्गृहीतः ८. ३६, ४० । राज्याङ्गैर्युक्तः ७. १६ । योगाभ्यासेन स्वीकर्तुं योग्यः ७. ३८ । विनयादिराजगुणैर्युक्तः ७. २० । सुनियमैरधीतविद्यः ७. २२ । उपगतयमैर्विदितः २६. ३ । उपयामैर्गृहीतानि जितानि इन्द्रियाणि सः २६. ४ । अध्यापननियमैः स्वीकृतः ७. ३३ । सेनासुनियमस्वीकृतः ७. ३७ । राज्यव्यवहाराय स्वीकृतः ८. ३८ । उपगतैर्यामैर्यमः स्वीकृतः ८. ४१ । साङ्गोपाङ्गसाधनैः स्वीकृतः ८. ४७ । कर्षकादिभिः स्वीकृतः १९. ६ । सेनादिसामग्री संगृहीतः ८. ४४ । उपगतैर्यमनियमैः सेवकैः पुरुषैः स्वीकृतः, उपयामैः प्रजाराजजनैः स्वीकृतः, साधनोपसाधनैः संयुक्तो वा ९. २। यो यामैर्यमसम्बन्धिभिः कर्मभिरुपसमीपे गृहीतः साक्षात्कृतः २३. २ ॥

उपऽयाथः सामीप्यम्प्रापयथः १. ३४. ९ । समीपम्प्राप्नुतः १. १८३. १ ॥

उपयामम् उपगतं नियमम् २५. २ ॥

इयं (पृथिवी) वाऽउपयाम इयं वा इदमन्नाद्यमुपयच्छति पशुभ्यो मनुष्येभ्यो वनस्पतिभ्यः। श० ४।१।२।८॥

उपरऽताति उपराणां मेघानामवकाशवत्यन्तरिक्षे १. १५१. ५ । उपरतातौ पलैः मेघास्त्रादिभिर्योद्धव्ये संग्रामे ७. ४८. ३ ॥

उपरम् मेघमिव ६. २१. ११ । मेघम् १. ६२. ५ ॥ उपराः समीपे रममाणाः ५. २६. ५ । उपरासः उपरताः १६. ६८ । उपरेण उत्कृष्टनियमेन ६. २ ॥

उपर इति मेघनाम। निघ० १।१०। आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः (उपरशब्दो मेघपर्वतयोर्वाचक इत्यर्थः) उपर उपलो मेघो भवति, उपरमन्तेऽस्मिन्न आणि, उपरता आप इति वा। नि० २।२२॥

उपरा उपरिस्था दिक् १. १६७. ३ ।

[उपरासु] श्रेष्ठासु ४. ३७. ३ ॥

उपरा दिङ्नाम। निघ० १।६॥

उपरि ऊर्ध्वम् १. २४. ७। ऊर्ध्वं वर्तमानम् ४. ३१. १५। ऊर्ध्वमुत्कृष्टे व्यवहारे १८. ४४। उत्कर्षे ३३. ८५ ॥

उपरिप्रुता उपरि प्रवते यस्तेन ७. ३ ॥

उपरिष्टात् ऊर्ध्वात् ३७. १२ ॥

उपरिसदः ये उपरि उत्कृष्ट आसने व्यवहारे वा सीदन्ति ते ६. ३६ ॥

उपरिस्पृशम् य उपरि स्पृशति तम् ३४. ४६ ॥

उपलान् [उपलान्] मेघान् २५. ८ ॥

उपल इति (मेघपर्वतयोर्नाम) । आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामाभिः। नि० २।२२ ॥

उपऽवक्ता उपदेशकानामुपदेशकः ४. ६. ५ ॥

उपऽवसुम् उप समीपे वसूनि यस्यां ताम् ६. ५६. ६ ॥

उपऽवाकम् उपगता वाक् यस्मिँस्तम् १. १६४. ८। उपवाकैः उपनयन्ति यैस्तैः १६. ६० ॥ [उपवाकाः] उपगता प्राप्ता १६. २। [उपवाकाभिः] उपदेशक्रियाभिः २१. ३०। उपगताभिर्वाग्भिः २१. ३१ ॥

यच्छूलेष्माणस्ता उपवाकाः (अभवन्) । श० १२।७।१।३॥

उपऽवाच्यः उपवक्तुं योग्यः १. १३२. २। उपदेशनीयः ४. ५४. १ ॥

उपविष्टाय य उपविशति तस्मै २२. ३७ ॥

उपवीतिने प्रशस्तमुपवीतं यज्ञोपवीतं यस्य तस्मै १६. १७ ॥

उपऽवोचन्त उपगतमुपादिशन्तु १. १२७. ७॥

उपऽशाकेभिः उपशक्यन्ते यैः कर्मभिस्तैः। (बहुलं छन्दसीति भिस् ऐस् न) १. ३३. ४ ॥

उपऽशिक्षन् उपगतां विद्यां ग्राहयन् ५. ४०. ८ ॥

उपशिक्षायै उपवेदादिविद्योपादानाय ३०. १० ॥

उपऽशिश्रियाणाः ये उपश्रयन्ति ते ७. ५६. १३ ॥

उपशृण्वन्ति शृण्वन्ति १२. ६४ ॥

उपश्रिताः उपश्लेषतया श्रिताः कण्ठा येषान्ते १६. ५६ ॥

उपऽश्रुतिम् उपयुक्तां श्रुतिं श्रवणम् १. १०. ३। उपगतां श्रूयमाणाम् ८. ३४ ॥

उपऽश्रोता य उपद्रष्टा सञ्शृणोति ७.२३.१ ॥

वायुर्वा उपश्रोता । गो० उ० ४।६। वायुरुपश्रोता। तै० ३।७।५।४॥

उपसत्ता य उपसीदति सः २७. २। उपसीदन् २७. ४ ॥

उपऽसदम् उपसीदन्ति यस्यां तां वेदीम् २. ६. १। यः समीपे सीदति तम् ३०. ६ ॥ [उपसदाम्] य उपसीदन्ति तेषामतिथीनाम् १९. १४ ॥

ते (देवाः) एताभिरुपसद्भिरुपासीदंस्तद्यदुपासीदंस्तस्मादुपसदो नाम। श० ३।४।४।४॥

ऋतव उपसदः । श० १० । २ । ५ । ७ । मासा उपसदः । १० । २ । ५ । ६ ॥ अर्धमासा उपसदः । श० १० । २ । ५ । ५ ॥ अहोरात्राणि वाऽउपसदः । श० । १० । २ । ५ । ४ ॥ इमे लोका उपसदः । श० । १० । २ । ५ । ८ । एतदु यज्ञे तपः । यदुपसदः, तपो वाऽउपसदः । श० १० । २ । ५ । ३ ॥ तपो ह्युपसदः ॥ श० ३ । ६ । २ । ११ ॥ ग्रीवा वै यज्ञस्योपसदः ॥ श० ३ । ४ । ४ । १ ॥ वज्रा वाऽउपसदः । श० १० । २ । ५ । २ ॥ जितयो वै नामैता यदुपसदः । ऐ० १ । २४ । ता (उपसदः) वाऽज्यहविषो भवन्ति । श० ३ । ४ । ४ । ६ । इषुं वा एतां देवाः समस्कुर्वत यदुपसदस्तस्याग्निरनीकमासीत्, सोमः शल्यो विष्णुस्तेजनं वरुणः पर्णानि । ऐ० १ । २५ ॥

उपऽसद्य समीपम्प्राप्य ३. १४. ५ ।

उपऽसद्यः प्राप्तुं योग्यः २. २३. १३ ॥ [उपऽसद्याय] समीपे स्थापयितुं योग्याय ७. १५. १ ॥

उपऽसन्नमन्तु समीप प्राप्त होकर नम्र होवें । अथर्व० १६. ४१. १ (२३० विधि०) ।

उपसि समीपे ५. ४३, ७ ॥
उपसि उपस्थे । नि० ६ । ६ ॥

उपऽसृजन्ति ददते २. १. १६ ॥

उपसृजन् समीपम्प्रापयन्निव ८. ९१ ॥

उपसेक्तारम् उपसेचनकर्तारम् ३०. १२ ॥

उपस्तिः संहतिः १२. १०१ ॥ [उपस्तयः] ये उप समीपे स्त्यायन्ति संघ्नन्ति ते (अत्रोपपूर्वात् संघात इत्यस्मादौणादिकः क्विप् सम्प्रसारणञ्च)१२. १०१ ॥ आस्तरणे ५. ८५. १॥

उपऽस्तिरे आस्तरणे ५. ८५. १॥ उपस्तृणोमि (अत्र वाच्छन्दसीति रेफादेशः) २. ३१. ५॥ स्रस्त्राय ४. ३३. १ ॥

उपऽस्तुतः समीपे प्रशंसितः ७. २७. ३ ॥ उपगतः स्तौति स उपस्तुतो विद्वान् (अत्र स्तुधातोर्बाहुलकादौणादिकः क्तः प्रत्ययः) १. ३६. १० ॥ [उपऽस्तुतम्] य उपगतैर्गुणैः स्तूयते तम् १. ३६. १७ ॥

उपऽस्तुतिः उपगता चासौ स्तुतिः १. १५८. ४ ॥ [उपऽस्तुतिम्] उपगतां प्रशंसाम् १. १४८. २ ॥ उपमितां प्रशंसाम् ४. ५६. ५ ॥ उपस्तुत्या ययोपस्तौति तथा ६. ६१. १३ ॥

उपऽस्तुत्यम् समीपे प्रशंसनीयम् १. १३६. २ ॥ उपगतस्तुतिविषयम् २९. १२ ॥

उपस्तृणन्ति आच्छादयन्ति १. १६२. १६ ॥

उपऽस्तृणीषणि उपाच्छादनीयम् ६. ४४. ६ ॥ उपतिष्ठन्ति यस्मिँस्तम् २. ४१. २१ ॥

उपऽस्थम् समीपस्थम् २. ३५. ९॥[उपऽस्था] उपतिष्ठन्ति यस्मिँस्तत्र । (अत्राङ् याजाराञ्चोपसंख्यानम् इति वार्तिकेन ङेः स्थाने आङादेशः । आङोनुनासिकश्छन्दसि अ० ६ । १ । १२६ ॥ इति प्रकृतिभावादसन्धिः) १. ३५. ६ ॥ क्रोडे तिष्ठति सा १. १२४. ५ ॥ [उपऽस्थे] उत्सङ्गे १२. ३६ ॥ उपतिष्ठन्ति यस्मिँस्तस्मिन् (अत्र घञर्थे कविधानम् । स्थास्नापाव्यधिहनि युध्यर्थम् । अ० ३ । ३ । ५८ अनेनाधिकरणे कः) १. ३१. ९ ॥ उत्सर्गे १. ११७. ५ ॥ ऊपर २. १४. ७ ॥ समीपस्थे देशे १. ६५. ५ ॥ समीपे स्थापयितव्ये

व्यवहारे ॥ १. १०६. ३ ॥ सामीप्ये ११. २१ ॥

उपस्थे उपस्थाने। नि० ७। २६ ॥

उपस्थाये पठित्वा, संसेव्य वा ३२. ११ ॥ सामीप्यस्प्राप्य ३. ४८. ३ ॥

उपऽस्थायम् अभिक्षणमुपस्थातुम् १. १४५. ४ ॥

उपस्थावराभ्यः उपस्थिताभ्योऽवराभ्यो निकृष्टक्रियाभ्यः ३०. १६ ॥ प्राप्तसमीपत्वाय २२. ७ ॥

उपऽहरति स्वीकार करता है। अथर्व० ६. ६. ११ (२५६ विधि०) ॥

उपऽहत्तुम् य उपह्वान्ति तम् २. ३३. ११ ॥

उपहूतः सामीप्यं प्रापिताः ३. ४३ ॥ सम्मानित उपस्थितः ८. १२ । सत्कृत्याहूतः २०. ३५ । उप समीपे कृताऽऽह्वानः ३८. २८ ॥

उपहूता उपहूयते यः २. १० ॥ यथावत्स्पर्द्धिता २६. ८ ॥

उपऽह्वरे उपह्वरन्ति कुटिलयन्ति येन तस्मिन्व्यवहारे । (अत्र कृतो बहुलमिति करणे अच्) १. ६२. ६ ॥

उपह्वरे निकटे २६. १५ ॥ [उपऽह्वरेषु] उपस्थितेषु कुटिलेषु मार्गेषु १. ८७. २ ॥ उपगृहीता १३. ५४ ॥

उपांशुः उपगतांऽशवो यत्र स उपांशुर्जपः १८. १९ ॥ [उपांशोः] उप समीपेऽनिति तस्य । (अत्रानधातोरुः शुगागमश्च) ६. ३८ ॥

अनिरुक्तं वाऽउपांशुः । श० १।३।५।१० ॥ प्रमाणो वाऽअस्य (यज्ञस्य) उपांशुः । श० ४। १।१।१। अथवा उपांशुः प्राण एव। कौ० १२।४। यज्ञमुखं वाऽउपांशुः ॥ ५।२।४।१७॥ इयं (पृथिवी) ह वाऽउपांशुः ॥ श० ४।१।२। २७ ॥

उपाके [उपाके] समीपे १. २७. ६ ॥ परस्परमसन्निहितवर्तमाने १. १४२. ७ । समीपं वर्तमाने ३. ४. ६ ॥ [उपाकयोः] समीपस्थयोः १. ८१. ४ ॥

उपाके उपक्रान्ते। नि० ८। ११। अन्तिकनाम। निघ० २। १६ ॥

उपातसत् उपभूषयेत् २३. २८ ॥

उपावरोह उपवर्तस्व ६. २६ ॥

उपावरोहन्तु समुपाश्रयन्तु ६. २६ ॥

उपावसृज यथावद्देहि २६. ३५ ॥

उपावस्रक्षत् उपावसृजेत् २१. ४६ ॥

उपावह्रियमाणः उपयोज्यमानः ८. ५६ ॥

उपावीः उपागतपालक इव ६. ७ ॥

उपावृतः ये भोगा उपावर्तन्ते १२. ८ ॥

उपासते सेवते २५.१३॥ अभ्यसन्ति ४०.१२॥ उपास्यतया जानन्ति ४०. ६ (३३१ सत्य०)। उपासना करते हैं २५. ३५॥ प्राप्य सेवन्ते (१५४ भूमि० ३३२ आर्य०) ३२. १४ ॥

उपासमहे उपासनङ्कुर्महे (अ०१३. ४. ४७- भूमि० १६६) ॥

उपैति प्राप्त होता है। अथर्व० ९. ६. ४ (२५४ विधि०) ॥

उपो इति सामीप्ये १. ३६. १४ ॥

उपोत्थितः समीपे प्रकाशित इव ८. ५५ ॥

उपोदके उपगतान्युदकानि यस्मिँस्तस्मिन् ३५. ६ ॥

उपोप सामीप्ये (उपर्यध्यवसः सामीप्ये अ० ८ । १ । ७ । इति द्वित्वम्) ८. २ ॥

उप्यते "बोया जाता है" १. १७६. २ ॥

उब्जः हन्याः ४. १६. ५ ॥

उब्जतम् कुटिलमपहतः (अत्र व्यत्ययो लङर्थे लोट् च) १. २१. ५ ॥

उब्जन् आर्जवङ्कुर्वन् अधोनिपातयन्वा १. ५२. २ ॥

उब्जन्तु कुटिलङ्कुर्वन्तु ६. ५२. १ ॥

उब्धम् उन्दकम् ४. १. १५ ॥

उभयतः उभयतः ५. ८१. ४ ॥

उभयतःऽशीर्ष्णी उभयतः शिरोवदुत्तमा गुणा यस्यां सा । (अत्र पञ्चम्या अलुक्) ४. १६ ॥

उभयत्र गमनाऽऽगमनयोः । (अत्र ऋचि तुनुघेति दीर्घः) ३. ५३. ५ ॥

उभयम् दोनों (व्यवहारपरमार्थसिद्धिकरं विज्ञानम्) १. १६०. ७ ॥ [उभया] वर्तमानेन सह पूर्वापराणि २. ६. ७ ॥ [उभयस्य] द्विविधस्य ४. ५३. ६ ॥

उभयादतः उभयोरध ऊर्ध्वभागयोर्दन्ता येषान्ते ३१. ८ ॥

उभयाहस्ति उभये हस्ता प्रवर्तन्ते यस्मिंस्तत् ५. ३६. १ ॥

उभयाहस्ति उभाभ्यां हस्ताभ्याम् । नि० ४ । ५ ॥

उभा उभौ द्वौ १. २२. २ ॥

उभे उभे द्वे ८. ३ ॥

उभे इति द्वे १. १०. ८ ॥

उभौ द्वौ १०. १६ ॥

उभौ समुब्धौ भवतः । नि० ४ । ५ ॥

उभ्नाः प्रपूर्धि (अत्र व्यत्ययेन श्ना)१. ६३. ४॥

उरः वक्षःस्थलम् १. १५८. ५ । हृदयम् २०. ७ । उरसा अन्तः करणेन ११. ३१ ॥

उरस्त्रिष्टुप् । ष० २ । ३ । उरस्त्रिष्टुभः । श० ८ । ६ । २ । ७ ॥

उरणम् आच्छादकम् २. १४. ४ ॥

उरणः ऊर्णावान् भवति । ऊर्णा पुनर्वृणोतेरूर्णोतेर्वा । नि० ५ । २१ ॥

उराणः य उरु बहूनिति स उराणः (अत्र वर्णव्यत्ययेनोकारस्य स्थानेऽकारः) ३. १६. २ । बहुकुर्वन् ४. ६. ४ । उराणम् बहुबलङ्कुर्वन्तम् १. १७३. ७ ॥

उराणः उरु कुर्वाणः । नि० ६ । १७ ॥

उरु बहु १. ३६. ८ । बहुविधम् १. ७ ॥

उरु बहुनाम । निघं० ३ । १ ॥

उरुः बहुशक्तिः २. १३. ७ । सर्वशक्तिमान् (अ० १३. ४. ५२—भूमि०१६८) [उरवः] बहुप्रज्ञाः २. २७. ३ । बहवः ५. ५७. २ । विशालजघनोरस्का २६. ४६ ॥ [उरुम्] बहुविधगुणम् ३. ४६. ४ । बह्वैश्वर्य्यम् ३. ४१. ५ । बहुसुखकरं विस्तीर्णम् ७.

६०. ९ । बहुबलादिगुणविशिष्टम् १. ५९. ६ । बहुविधम् १. ६३. ६ । बहूनाच्छादनं स्वीकरणं वा ४. २७ । उरौ बाहौ ३. १. ११ ॥

उरुऽक्रमः बहवः क्रमाः पराक्रमा यस्य सः १. ६०. ६ । बहुपुरुषार्थः ३ । ५४. १४ ॥

उरुऽक्षया बहुषु जगत्पदार्थेषु क्षयो निवासो ययोस्तौ । (अत्र सुपां सुलुगित्याकारः । उर्वीति बहुनामसु पठितम् । निघं० ३. १ । क्षि निवासगत्योः । अस्य धातोरधिकरणार्थः क्षयशब्दः) १. २. ६ ॥

उरुगायः यो बहूनर्थान् वेदद्वारा गायत्युपदिशति सः ५. १८ । य उरुभिः बहुभिर्मन्त्रैर्गीयते स्तूयते वा १. १५४. १ ॥ [उरुऽगायम्] बहुभिः प्रशंसनीयम् ६ २८. ४ । उरूणि गयाऽपत्यानि धनानि गृहाणि वा यस्मात्तम् ६. ६५. ६ । बहुभिर्गीयमानं विद्याबोधम् ७. ३५. १५ ॥ [उरुऽगायस्य] बहुधा प्रशंसितस्य १. १५४. ६ ॥

उरुऽचक्रिः बहुकर्त्ता २/ २६. ४ । [उरुऽचक्रयः] बहुकर्तारो महापुरुषार्थिनः ५. ६७. ४ ॥

उरुऽचक्षाः उरूणि बहूनि चक्षांसि दर्शनानि यस्मात्सः ७. ३५. ८ ॥ [उरुऽचक्षसम्] उरु बहुविधं वेदद्वारा चक्ष आख्यानं यस्य तम् १. २५. ५ । उरुषु बहुषु चक्षो विज्ञानं प्रकाशनं वा यस्य तं कर्मकर्तारं जीवम् १. २५. १६ ॥ [उरुऽचक्षसः] बहुदर्शनान् ६. ५१. ६ ॥ [उरुचक्षसा] उरु बहु चक्षो व्यक्तं वचनं दर्शनं वा यस्यास्तया ४. २३ ॥

उरुऽज्रयः बहुगन्तारः ७. ३९. ३ ॥ [उरुऽज्रयसम्] बहुवेगवन्तम् ५. ८. ६ ॥

उरुज्रयः बहुजवाः । नि० १२ । ४३ ॥

उरुधारा उर्वी धारा विद्या सुशिक्षा धारणा यस्याः सा ८. ४२ ॥

उरुप्रथाः [उरुप्रथाः] बहुः प्रथः सुखस्य विस्तारो यस्मात्सः १. २२ । बहुविस्तारः २०. ३६ ॥

उरुऽव्यचा बहुव्याप्त्या १. १०८. २ ॥

उरुऽव्यचाः उरु बहुविधं व्यचो विज्ञानं पूजनं सत्करणं वा यस्य सः १. १०४. ६ । बहुशुभगुणव्याप्तः ३. ५०. १ । ५. ४६. ६ । बहुषुव्याप्तः ५. ४६. ६ । उरुव्यचसा बहुव्यापिनौ १. १६०. २ ॥ [उरुऽव्यचम्] बहुव्याप्तिमन्तम् ५. १. १२ । उरुषु बहुषु विशेषेणाञ्चति तम् १५. २५ ॥

उरुशंसः बहुप्रशंसः ४. १६. ८ । [उरुशंस] य उरून् बहून् शंसति तत्सम्बुद्धौ १८. ४६ । बहुभिः शस्यते यत्तत्सम्बुद्धौ पक्षे सूर्यो वा १. २४. ११ ॥

उरुशर्म्मा उरूणि बहूनि सुखानि यस्याः सा १०. ६ ॥

उरुष्य रक्ष । (अत्र कण्ड्वाद्याकृतिगणत्वादुरुषशब्दाद्यक् ततोऽन्येषामपीति

दीर्घः) ३. २६ । बहुना योगाभ्यासेनाविद्यादिक्लेशानन्तं नय (अत्रारूपपदात् षोऽन्त कर्मणीत्यस्मात् क्विप् ततो नामधातुत्वात्क्विप् ततो मध्यमैकवचनप्रयोगः) ७. ४ । सेवस्व ४. २. ११ ॥

उरुष्यत् आत्मन उरुर्बहुरिवाचरति ३. ५. ८ ॥

उरुष्यत सेवध्वम् ५. ८७. ६ ॥

उरुष्यतम् सेवेतम् ४.४३.४। सेवेथाम् ४.४३.७॥

[उरुष्यतम्] प्रेरयेतम् ५. ६५. ६ ॥

उरुष्यति रक्षति २. २६. ४ । सेवते ६.१४.५॥

[उरुष्यति] वर्धयति १. १५५. २ ॥

उरुष्यति रक्षाकर्मा । नि० ५ । २३ ॥

उरुष्यथः सेवेथाम् १. १५५. २ ॥ [उरुष्यथः] रक्षथः १. ११६. ६ ॥

उरुष्या रक्षेत् ६. ४४. ७ ॥

उरुष्याः रक्षेः ७. ३. ८ ॥

उरुष्यात् रक्षेत् ७. १. १५ ॥

उरुष्येत् सेवेत १. १५२. ६ ॥

उरुऽसाम् यो बहून् सनति विभजति तम् ५. ४४. ६ ॥

उरूची या बहूनञ्चति प्राप्नोति सा पृथ्वी ७. ३५. ३। या उर्वीर्बह्वीर्विद्या अञ्चति प्राप्नोति सा ३. ५७. ५ । बह्वर्थज्ञापिका १. २. ३ । योऽरूणि बहून्यञ्चति सा ३. ३१. ११ ॥

उर्वराऽजितं य उर्वरां सर्वफलपुष्पशस्यादिप्रापिकां जयति तस्मै २. २१. १ ॥

उर्वराऽसाम् बहुश्रेष्ठा पदार्थाः सन्ति यस्यां तां भूमिं सनति तम् ४. ३८. १ । बहुश्रेष्ठानां भूमीनाम् ६. २०. १ ॥

उर्वरासु सुन्दरवर्णयुक्तासु १. १२७. ६ । भूमिषु ४. ४१. ६ । पृथिव्यादिनिमित्तेषु ६ २५. ४ ॥

उर्वर्याय उरूणां महतां अर्याय स्वामिने १६. ३३ ॥

उर्वशी ययोरूणि बहूनि सुखान्यश्नुवते सा यज्ञक्रिया (उर्वशीति पदनामसु पठितम् । निघं० ५. ५ । उर्वीति बहुनामसु पठितम् । निघं० ३. १ । तस्मिन्नुपपदे अशूङ् धातोः संपदादिभ्यः क्विप् ततः शार्ङ्गरवाद्यन्तर्गतत्वात् ङीन्) ४. २ । उरु बहुअश्नाति यया सा दीप्तिः १५. ११ । बहुवशकर्त्री प्रज्ञा; उरवो बहवो वशे भवन्ति यया सा वाणी ५. ४१. १९ ॥ [उर्वशीः] बहु व्यापिकाः ४. २. १८ । [उर्वश्याः] विशेषविद्यायाः ७. ३३. ११ ॥

उर्वशी अप्सरा । उर्वभ्यश्नुत, उरुभ्यामश्नुत, उरुर्वा वशोऽस्याः । नि० ५ । १३ ॥

उर्वारुकंऽइव यथोर्वारुकफलम् ७. ५९. १२ ॥

उर्विऽऊतिः उर्व्याः पृथिव्या ऊतिः रक्षा येन सः ६. .४. २ ॥

उर्व्विया बहुत्वेन २६. ३० ॥

उर्विया उरुत्वेन । नि० ८ । १० ॥

उर्वी विस्तीर्णा भूमिः १. २४. ६ । विस्तीर्णा १. १८९. २ । बहुफलाद्युपेता ६. ४७, २० । बहुपदार्थयुक्ता ७. ३६. १ ॥ बहुरूपे द्यावापृथिव्यौ १. ६१. ८ । बहुले ३. ५६. ७ । बहुत्वे ६. ६८. ४ । बहु ७. १८. २४ । महत्योः ७. १२. १ ॥ [उर्वीः] बहुसुखप्रदाः प्रजाः ३. ३३. ६ । षड्विधा भूमिः ३. ४७. ३ । उर्विया बहुरूपया दीप्त्या ५. २८. १ । बहुपुरुषार्थयुक्ता ६. ६४. ३ ।

उर्वी नदीनाम । निघ० १ । १३ । उर्व्यं ऊर्णोतेः, वृणोतेरित्यौर्णवाभः । नि० २ । २६ ॥ पृथिवीनाम । निघं० १ । १ ॥ द्यावापृथिवीनाम । निघं० ३ । ३० ॥ यथेयं पृथिव्युर्व्येवमुरुर्भूयासम् । श० २ । १ । ४ । २८ ॥

उलः क्षुद्रकृमिः २४. ३१ ॥

उलप्याय उलपे उत्क्षेपणे साधवे (अत्रौलधौरादिकाद्धातोरौणादिकोऽपन् प्रत्ययः) १६. ४५ ॥

उलूकः उलूकः २४. ३८ ॥

उलूखलः बहुकार्यकरेण साधनेन (अत्र सुपांसुलुगिति तृतीयैकवचनस्य लुक्) १. २८. ६ ॥

उलूखलम् उरुकरं वोर्ध्वकरं वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभवत् । उरुकरं वैतत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणम् । नि० ६ । २० ॥ (प्रजापतिरब्रवीत्) उरु मे करदिति तस्मादुरुकरमुरुकर ९ ह वै तदुलूखलमित्याचक्षते परोऽक्षम् । श० ७ । ५ । १ । २२ ॥ अन्तरिक्षं वोऽलूखलम् । श० ७ । ५ । १ २६ ॥ योनिरुलूखलम् शिश्नं... मुसलम् । श० ७ । ५ । १ । ३८ ॥

उलूखलक उलूखलं कायति शब्दयति यस्तत्सम्बुद्धौ विद्वन् ! १. २८. ५ ॥

उलूखलऽसुतानाम् उलूखलेन सम्पादितानां । (उलूखलशब्दार्थं यास्कमुनिरेवं समाचष्टे—उलूखलमुरुकरं वोर्करं वोर्ध्वखं वोरुमें कुर्वित्यब्रवीत् तदुलूखलमभवत् उरुकरं वैतदुलूखलमित्याचक्षते । निरु० ६ । २०) १. २८. ४ ॥

उल्काः विद्युत्पाताः १३. १० ॥

उल्वम् आवरणम् १६. ७६ । बलम् १०. ८ ॥

उल्व ऊर्णोतेर्वृणोतेर्वा । नि० ६ । ३५ ॥ उल्वं घृतम् । श० ६ । ६ । २ । १५ ॥ उल्वं वाऽऊषाः । श० ७ । ३ । १ । ११ ॥

उवाच [उवाच] वक्ति २. ३०. २ ॥ उच्यात् ५. २. ८ ॥

उवास वसति १. ४८. ३ ॥

उवास वस १. ११३. १३ ॥

उवाह वहति १. ११६. १८ ॥

उवोच वदति ७. ४. ४. ३ ॥ [उवोच] उच्यात् ७. २०. ४ ॥

उवोचिथ उपदिश ७. ३७. ३ ॥

उशती कामयमाना १. १०६. ४ ॥ [उशतीः] कमनीयाः २. ४. ३ ॥ स्वस्वाधारगुणं प्रकाशयन्तीः १. २२. ६ ॥

उशती उशत्यौ कामयमाने । नि० ६ । ३६ । कामयमाना । नि० १ । १६ ।

उशतीऽइव कामयमाना स्त्रीव १. ३२. १० ॥

उशधक् उशः कमनीयान्दहति येन सः ३. ६. ७ । य उशान् युद्धं कामयमानान्दहति सः ३. ३४. ३ ॥ कामयमानः । ७. ७. २ । य उषन्ति परस्वङ्कामयन्ति तान्दहति सः ३३. २६ ॥

उशन् कामयमानः १. १०१. १०॥ [उशता] कामयमानेन विदुषा सह ६. ४०. ४ ॥ [उशद्भ्यः] सत्पुरुषेभ्यः २५. ३४ ॥

उशतः कामयमानान्। नि० ६। १३॥ उशन्नुशन्तामिति प्रियः प्रियमित्येवैतदाह। श० ३। ३। ३। १० ॥ वायुर्वा उशन्। तां० ७। ५। १६॥

उशना कामयमानः १. ५१. १० ॥ सर्वहितं कामयमानः ४. २६. १ ॥ कान्तियुक्तः १. १३०. ६ ॥ धर्मकामुकः (अत्र डादेशः) १. १२१. १२ ॥

उशनाऽइव यथाकामाः ४. १६. २ ॥

उशन्ति प्रकाशन्ते १. २. ४ ॥ कामयन्ते ७. ८ ॥

उशमानः कामयमानः ४. १६. ४ ॥

उशानः कामयमानः ३. ५. ७ ॥

उशिक् कामयमानः १. ६०. ४ ॥

उशिक् कान्तिमान् ५. ३२ ॥ कामयमानः ८. ५० ॥ उशिजः मेधाविनः १२. २८ ॥

उशिग्वष्टेःकान्तिकर्मणः। नि० ६। १०। मेधावि नाम। निघ० ३। १५॥ कान्तिकर्मणः। निघ०। २। ६॥

उशेन्यः कमनीयः ७. ३. ६ ॥

उश्मसि कामयामहे। (अत्रेदन्तोमसीति मसिरादेशः) १. ३०. १२ ॥

उश्मसि कान्तिकर्मणः। निघ० २। ६ ॥ कामयामहे। नि० २। ७॥

उषःऽबुधः य उषःकाले बोधयन्ति तान्किरणान् १. ६२. १८। रात्रिचतुर्थप्रहरे जागृताः १. १३२. २ ॥ य उषसि स्वयं बुध्यन्ते सुप्तान्बोधयन्ति तान् १. ४५. १ ॥ उषसि बोधयुक्ताः ४.४५. ४ ॥ [उषःबुधम्] य उषसि बुध्यते तम् ४. ६. ८ ॥

उषःऽभुत् उषसि सर्वान्बोधयति सः। (अत्रोपरुपपदाद् बुधधातोः क्विप्। वशोभषिति भत्वञ्च) १. ६५. ५ ॥ य उषसि बुध्यते ६. ४. २ ॥

उषत्ऽभिः कामयमानैः १. ६. ३। य उषन्ति हविर्दहन्ति तैर्यजमानैः २६. ३७ ॥.

उषमाणः दहन् ४. २२. २ ॥

उषसा नक्ता रात्रिदिवसौ ४. ५५. ३ ॥

उषसौ रात्रिदिने १. १८८. ६।

उषस्याः उषोदेवताकाः २४. ४ ॥

उषाः सुशोभाकान्तिः १. ४८. ७। सूर्य्यस्य किरणाः १. ६२. ४। दिनम् १. ६२. ८। प्रबोधदात्री १. ४८. ५। दाहारम्भनिमित्ता १. ११३. ५। सूर्य्याचन्द्रमसोः प्रातः प्रकाशः १. ४६. २४। प्रभावती १. ४८. ३। उषर्वत्सुरूपप्रदा १. ४८. १३। सुप्रभातः १. ११३. ४। उषसम् प्रत्यूषकालम् २. १२. ७। प्रत्यूषकालमिव सत्पुरुषान् ३. ४४. २। [उषे]कामं दहन्त्यौ २१. ३५। प्रताप युक्त २८. ६ ॥

उषे उषसः १. ४८. ४। उषाः (अत्र सुपामिति विभक्तेर्लुक्) १. ५७. ३। उषा इव कमनीये १. ४८. ६। प्रभातवद्बहुगुणयुक्ते १. ४८. ११। उषर्वत्कल्याणनिमित्ते १. ४६. १। उषर्वत्पुरुषार्थनिमित्ते १. ४९. ३। उषर्वत्प्रकाशिके १. ४८. १५। उषर्वद्विद्याप्रकाशयुक्ते १. १२४. १२।

उपर्वेत्स्तोतुं योग्ये १. ४८. १४। सुखे निवासिनि विदुषि (अत्र वस निवास इत्यस्मादौणादिकोऽसुन् स च बाहुलकात्कित्) १. ११३. ७। उपर्वाद्धितसम्पादिके १. ४८. १२॥

उषस् उच्छतीति सत्या रात्रेः परः कालः। नि० २। १८। उषा वष्टेः कान्तिकर्मणः, उच्छतेरितरा माध्यमिका। नि० १२।५॥

रात्रिर्वा उषाः। तै० ३।८।१६।४। योषाः सा एका। ऐ० ३।४८। भूतानां पतिर्गृहपतिरासीदुषा पत्नी। श० ६।१।३।७॥

उषाणः दहन् ४. १६. १४॥

उषासानक्ता उषाश्च नक्तञ्च ते २०.४१। रात्रिदिने २७. १७॥

उषासानक्ता उषाश्च नक्ता चोषा व्याख्याता। नक्तेति रात्रिनामानक्ति भूतान्यवश्यायेनापि वा नक्ताऽव्यक्तवर्णा। नि० ८। ११।

अहोरात्रे वा उषासानक्ता। ऐ० २।४॥

उष्ट्रः उष्ट्रः २४. ३६॥

उष्णन् दहन् २. ४. ७॥

उष्णिक् यद्दुःखानि दहति तम् १४. १०। स्नेहनम् १४. १८। [उष्णिहम्] उष्णिहा प्रतिपादितम् २८. २५। [उष्णिहा] छन्दोविशेषः २१. १३। यया उषः स्निह्यति तया २३. ३३॥

उष्णिक् उष्णिगुत्स्नाता भवति। स्निह्यतेर्वा स्यात् कान्तिकर्मणः। नि० ७। १२॥

उष्णिगुत्स्नातात् स्निह्यतेर्वा कान्तिकर्मणोऽपि वोष्णीषिणो वेत्यौपमिकम्। दे० ३।४। यस्य सप्त ता उष्णिहम्। कौ० ६।२। अष्टाविंशत्यक्षरोष्णिक्। कौ० २६।१। आयुर्वा उष्णिक्। ऐ० १।५। ग्रीवा उष्णिहः। श० ८।६।२।११। चक्षुरुष्णिक्। श० १०।३।१।१। पशवो वा उष्णिक्। तां० ८। १०।४। अजाविकमेवोष्णिक्। कौ० ११।२। औष्णिहो वै पुरुषः। ऐ० ४।३॥

उष्णीषं शिरोवेष्टनमिव ३८. ३॥

उष्णीषम् स्नायतेः। नि० ७। १२॥

उष्णीषिणे प्रशस्तमुष्णीषं शिरोवेष्टनं विद्यते यस्य तस्मै १६. २२॥

उस्रः रश्मिरिव १. ६९. ५। गाः ३. ५८.४.। किरणान् ५. ४६. ३। [उस्रा] रश्मयो विद्यन्ते ययोस्तौ ६. ६२. १। उस्रौ रश्मिमन्तौ निवासहेतू सूर्यवायू ४. ३॥ [उस्राः] किरणाः १. ७१. २। गावः १. १२२. १४। दिनानि ६. ५२. १५.। मूलराज्ये परम्परया निवसन्तः १. १७१. ५॥

उस्रा रश्मिनाम। निघ० १।५। गोनाम। निघ० २।११॥

उस्रयामे उस्रैः किरणैरिव यानेन याति तस्मै ४. ३२. २४॥

उस्रि गवादियुक्तम् ५. ५३. १४॥

उस्रिकम् य उस्राभिर्गोभिश्चरति तम् १. १९०. ५॥

उस्रियः उस्रासु किरणेषु भवः ५. ५८. ६॥

उस्रिया क्षीरादिप्रदा ४. ५. ६॥ [उस्रियाः] किरणाः। (अत्र इयाडियाजिकाराणामुपसंख्यानमित्यनेन शसः स्थाने डियाजादेशः) १. ६. ५। पृथिव्यां वर्तमानाः। ४. ५०. ५। उस्रासु रश्मिषु भवा विद्युतः १. ११२. १२। किरणैः संयुक्ताः ३. १.

१२। [उस्रियायाम्] पृथिव्याम् ३. ३०. १४। गवि १. १८०. ३ ॥

उस्रिया गोनाम। निघ० २। ११। उस्राविणोऽस्यां भोगाः। नि० ४। १६॥

उह्वीत वहेत् ७. ३७. ६॥

उह्वर्वः भाराणां वोढारः ४. ४५. ४॥

उह्यमानः गम्यमानः २. १८. ६॥

ऊ

ऊचिम उच्याम १. १६१. १॥

ऊचिषे उच्याः ३. २२. ३। वक्षि १२. ४६॥

ऊचुः [ऊचुः] वदन्ति ६. ४५. ८। वदन्तु ४. ३३. ६॥

ऊचुषे वक्तुमर्हाय १. १०३. ४॥

ऊतिः रक्षाद्याः क्रियाः ७. ५६. ४। रक्षणादियुक्ता नीतिः १. ११७. १६। [ऊतयः] रक्षादिक्रियावन्तः १. १३४. २। रक्षकाः गुणाः ३. १३. २। रक्षाविज्ञानसुखप्राप्त्यादयः १. ८.६। [ऊतिम्] रक्षाम्प्राप्तिमवगमञ्च १. १०. १०॥ [ऊती] ऊत्या रक्षणादिक्रियया सह २. ११. १३॥ [ऊतिभिः] रक्षाप्राप्तिविज्ञानसुखप्रवेशनैः १. ७. ४॥ रक्षाप्रीतितृप्त्यवगमप्रवेशयुक्ताभिः १. ३६. ८। रक्षणादिकर्त्तृभिः सेनाभिः २. ११. १६। [ऊतये] क्रियासिद्धीच्छायै १. ३५. १। विद्याप्राप्तये (अव्धातोः प्रयोगः, ऊतियूति० अ० ३।३।९७। अस्मिन्सूत्रे निपातितः) १. ४. १। रक्षणाद्याय पुष्ट्ये १. ८. १। प्रीतये १. २२. ५। रक्षणाद्याय विज्ञानाय [illegible] १. ३० ७। अतिशयेन गुणप्राप्तये १. ४८. १४। धनाढ्याय ७. ४४. १॥

ऊतिरवनात्। नि० ५।३॥ ऊती ऊत्या च पथा (च)। नि० १२। २१॥

ऊतयः खलु वै ता नाम याभिर्देवा यजमानस्य हवमायन्ति। ये वै पन्थानो या स्रुतयस्ता वा ऊतयस्त उ एवैतत् स्वर्गयाणा यजमानस्य भवन्ति ऐ० १।२॥

ऊदिम वदेम १. १६१. १॥

ऊधः दुग्धाधिकरणम् १. ६६. २। उषसम् १. ६४. ५। उत्कृष्टम् ४. २३. १। ऊर्ध्वङ्गमयिता ५. ४४. १३। रात्रिः ३. १. ६। प्रभातवेलेव ४. १. १६। जलस्थानम् १. १४६. २। जलाधारङ्घनसमूहम् ५. ३२. २। [ऊध्नः] विस्तीर्णबलान् ४. २२. ६। [ऊधन्] ऊधनि धनाढ्ये ४. १०. ८॥

ऊधस् रात्रिनाम। निघ० १। ७॥ गोरूध उद्धततरं भवति उपोन्नद्धमिति वा। स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते। नि० ६। १६॥

ऊनम् अपर्याप्तम् ३. १७॥

ऊनयीः ऊनयेः (लुङ्प्रयोगोऽयम्) १. ५३. ३॥

ऊपथुः [ऊपथुः] वपेथाम् १. ११६. २१।

वपेतम् १. ११७. ५। वपतः १. ११७. १२॥

ऊपिषे वपसि (अत्र लडर्थे लिट्) १.३१.६॥

ऊम् इति अप्यर्थे १. ३२. १५। अद्भुते १. ११३. २। आश्चर्य्ये ३. ५७. ४। चार्थे १. ३६. १३। जिज्ञासते १. २८. ३। निश्चयार्थे १. ३४. ११। वितर्के १. २६. ९॥

ऊमाः कामनीयाः ३. ६. ८॥ रक्षणादिकर्तारः ४. १६. १॥ [ऊमैः] रक्षणादिभिः १. १६९. ७॥

ऊमा वै पितरः प्रातःसवने, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने (ऊमाः = ऋतुविशेषः। तैत्तरीय ४।४।७।२)। ऐ० ७। ३४॥

ऊरू सक्थिनी २०. ८॥ ऊरू इव वेगादिकर्मकारी ३१. ११॥ [ऊरुम्] वस्त्राच्छादनं स्वीकरणं वा ४. २७॥ [ऊरुभ्याम्] जानुन ऊर्ध्वाभ्यां पादावयवाभ्याम् २५. ६॥

अनुष्टुप्छन्दो विश्वेदेवा देवतोरू। श० १०। ३। २। ६॥

ऊर्क् पराक्रमोऽन्नं वा १७. १। बलवान् १०. २५। रसः १८. ५४। पराक्रमान्नादिप्रदा शिल्पविद्या ४. १०। ऊर्जः वायुरूपात् कारणात् १. ६६. ३॥

ऊर्क् अन्नं च रसं च। नि० ६। ४१। ऊर्गित्यन्ननामार्जयतीति सतः। नि० ३। ८॥ अन्ननाम। निघ० २। ७॥

ऊर्जं दधाथामिति रसं दधाथामित्येवैतदाह। श० ३। ६। ४। १८॥ ऊर्ग्वा आपो रसः। कौ० १२। १। आपो वाऽऊर्जोऽद्भ्यो ह्यूर्ग्जायते। श० ६। ४। १। १० ऊर्ग्वा उदुम्बरः। तै० १। १। ३। १०॥ अन्नं वाऽऊर्गुदुम्बरः। श० ३। २। १। ३३ ऊर्ग्वा अन्नमुदुम्बरः। तै० १। २। ६। ५। ऊर्ग्वा अन्नाद्यमुदुम्बरः। ऐ० ५। २४। कौ० २५। १५। ऊर्ग्वै मुञ्जाः। तै० ३। ८। १। १॥ ऊर्ग्विराट्। तै० १। २। २। २॥ अन्नमूर्जम्। कौ० २८। ५॥

ऊर्जयन्तीम् पराक्रमादिदानेनोन्नयन्तीम् ५. ४१. १८। बलम्प्रापयन्तीम् १८. ८१। [ऊर्जयन्त्याः] ऊर्जवतीषु बलयन्तीषु साध्व्याः २. १३. ८॥

ऊर्जव्यस्य बहुबलप्राप्तस्य ५. ४१. २०॥

ऊर्जऽसने पराक्रमस्य प्रक्षेपणे ६. ४. ४॥

ऊर्जस्वन्तम् उत्तमपराक्रमसम्बन्धिनम् ६. ३०॥

ऊर्जानी पराक्रमयुक्ता नीतिः १. ११९. २॥

ऊर्जः ऊर्जन्ति सर्वे पदार्था यस्मिन्त्सः कार्तिकः १४. १६॥

ऊर्जयन् बलम्प्राप्नुवन् २. ३५. ७॥

ऊर्जयमाने बलङ्कुर्वाणे २८. १६॥

ऊर्ज्जस्वती अन्नवती १. २७। ऊर्जः पराक्रमसम्बन्धो विद्यते यस्याः सा १२. ७०॥

ऊर्जस्वती नदीनाम। निघ० १। १३॥

ऊर्ज्जाहुती अन्नस्याहुती २१. ५२॥ [ऊर्ज्जाहुतयः] ऊर्जा बलप्राणनकारिका आहुतयो ग्रहणानि दानानि वा येषां ते ६. ४॥

ऊर्जाहुती ऊर्जाह्वान्यौ। द्यावापृथिव्याविति वाहोरात्रे इति वा शस्य च सामा चेति कात्थक्यः। नि० ६। ४१॥

ऊर्णम्म्रदाः ऊर्णमाच्छादनं मृद्नन्ति सन्त्वेषन्ति यया सा ४. १०। य ऊर्णानाच्छादकानि मृद्नन्ति ते २१. ३३। य ऊर्णराच्छादकैर्मृद्नन्ति ते २१. ५७ ॥ [ऊर्णम्म्रदसम्] ऊर्णानि धान्याच्छादनानि तुषाणि म्रदयति येन तं पाषाणमयम् २. २। ऊर्णानि सुखाच्छादनानि म्रदयति येन तं यज्ञम् २. ५ ॥

ऊर्णाः रक्षिताः ५. ७२. ९। [ऊर्णाम्] आच्छादिकाम् ४. २२. २ ॥

ऊर्णा पुनर्वृणोतेरूर्णोतेर्वा। नि० ५। २१॥

ऊर्णायुम् अविम् १३. ५० ॥

इममूर्णायुमित्यूर्णावलमित्येतत्। श० ७। ५। २। ३५॥

ऊर्णाऽवन्तम् बहूर्णादिवस्त्रयुक्तम् ६. १५. १६ ॥

ऊर्णासूत्रेण ऊर्णाकम्बलेनेव १६. ८० ॥

ऊर्णु आच्छादय १६. ५३ ॥

ऊर्णुत आच्छादयत २. १४. [illegible] ॥

ऊर्णुते आच्छादयति १. ६२. ४ ॥

ऊर्णुवाथाम् आच्छादयताम् ६. १३॥ प्राप्नुयाथाम् २३. २० ॥

ऊर्णुषे स्वव्याप्त्याऽऽच्छादयसि ४. ५४. २। विस्तारयसि ३३. ५४ ॥

ऊर्णोत् आच्छादयति, स्वीकरोति वा १. ६८. १ ॥

ऊर्णोति निष्पादयति १. १०५. १५ ॥

ऊर्दरम् कुसूलम् २. १४. ११ ॥

ऊर्दरम् कुदरमित्यावपनस्योर्दरमुदीर्णं भवति ऊर्जे दीर्णं वा। नि० ३। २० ॥

ऊर्ध्वः पृथिव्याः सकाशात् किञ्चिदुन्नतः १. २८. १। उन्नतः सन् १. ३६. १३। ऊपर १. १६४. १०। सद्गुणैरुत्कृष्टः ३. ८. १। आकाशस्थः सन् २. ८। ऊर्ध्वे स्थितं ऊर्ध्वे स्थापितो वा ४. १०। पृथग्भूतः (१२१ भूमि०) सर्वेभ्य उत्कृष्टः संसारात्पृथङ्मुक्तिरूपः। ३१. ४॥

ऊर्ध्वः उच्छ्रितो भवति। नि० ८। १५॥

ऊर्ध्वऽग्रावाणः मेघाः ३. ५४. १२ ॥

ऊर्ध्वऽचितः ऊर्ध्वानुत्कृष्टगुणान् चेतयन्ति ते मनुष्याश्रितानि कपालानि वा १. १८। ऊर्ध्वं संचिन्वन्तः १२. ४६ ॥

ऊर्ध्वनभसम् ऊर्ध्वन्नभो जलं यस्मात्तम् ६. १६ ॥

ऊर्ध्वपृश्निः ऊर्ध्वं उत्कृष्टः पृश्निः स्पर्शो यस्य सः २४. ४ ॥

ऊर्ध्वबर्हिभ्यः ऊर्ध्वमुत्कृष्टं बर्हिर्वर्धनं येभ्यस्तेभ्यः ३८. १५ ॥

ऊर्ध्वऽशोचिषम् ऊर्ध्वज्वालम् ६. १५. २॥

ऊर्ध्वऽसानुः ऊर्ध्वं सानवः शिखरा यस्य स १. १५२. ५ ॥

ऊर्ध्वा उत्कृष्टसुखप्रापिका १. ८८. ३। ऊपर की दिशा। अथर्व ३. २७. ६। (१६ पञ्च०) [ऊर्ध्वाः] उत्कृष्टाः ३. ५७. ४। ऊर्ध्वगमयित्र्यः ३. ५८. २। ऊर्ध्वङ्गामिन्यो ज्वालाः १. १८१. ६। उच्च-

अथैतदन्तरिक्षम् (=ऊर्ध्वा दिक्) एषा हि दिग्बृहस्पतेः । श० २ । ३ । ४ । ३६ ॥ पंक्तिः (छन्दः) ऊर्ध्वा दिक् । श० ८ । ३ । १ । १२ ॥ एषा वा ऊर्ध्वा बृहस्पतेर्दिक्रदेव उपरिष्टादर्यम्णः पन्थाः । श० ५ । ५ । १ । १२ ॥ स्वर्ग्यैवोर्ध्वा दिक् । ऐ० १ । १८ ॥

ऊर्मिः तरङ्ग इवोत्साहः ३. ३३. १३ । जलसमूहः ४. ५८. १ । तरङ्गः २. १६. ५ ॥ [ऊर्मिम्] उपलं जलवीचिं वा १. ६५. १०॥ तरङ्गमिवोच्छ्रितम् । ७. ४७. १ ॥ बोधम् १७. ६६ ॥ [ऊर्मिऽभिः] शत्रु भेदनोत्थश्रमस्वेदोदकैः । १७. ९५ ॥ प्रापकैः प्रकारैस्तरङ्गैर्वा (अर्त्तेरुच उ० ४. ४४ अत्र ऋधातोर्मिः प्रत्यय ऊकारादेशश्च) १. ६५. १० ॥

ऊर्मिः ऊर्णोतेः नि० ५ । २४ ॥

ऊर्म्याः रात्रीः २. ४. ३ ॥

ऊर्म्या रात्रिनाम । निघ० १ । ७ ॥

ऊर्म्याय ऊर्मिषु जलतरङ्गेषु भवाय वायुरिव वर्त्तमानाय १६. ३१ ॥

ऊर्वाऽइव प्राप्तेन्धनोऽग्निरिव २. ३०. १६ ॥ [ऊर्वम्] आच्छादकम् ४. २८. ५ ॥ अविद्याहिंसकम् । ५. २२. १२ ॥ दोषहिंसनम १. ७२. ८ ॥ दुःखानां हिंसकम् २. ३५. ३ ॥ निरोधस्थानम् ३. ३२. १६ । हिंस्यम् ६. १७. १॥ [ऊर्वान्] विनश्वरान् पदार्थान् २. १३. ७ ॥ आच्छादकान् पालकान् ७. १६. ७॥ [ऊर्वात्] विस्तीर्णात् ४. १२. ५ ॥ बहुरूपात् ५. ४५. २ ॥ हिंसनात् ६. १७. ६ ॥

ऊमा वै पितरः प्रातःसवने, ऊर्वा माध्यन्दिने, काव्यास्तृतीयसवने । ऐ० ७ । ३४ ॥

ऊर्वष्ठीवे ऊरूचाष्ठिवन्तौ च ते (अत्र अचतुरवि अ० ५. ४. ७७ इति निपातः) १८. २३ ॥

ऊलहाः प्राप्ताः ६. ६०. २ ॥

ऊवध्यम् वधितुं ताडितुमर्हम् १. १६२. १० । उरु वध्यते येन तत् (अत्र छान्दसो वर्णलोपो वेति रुलोपः) १६. ८४ । मलीनम् २५. ३३ ॥

ऊवुः तन्तुवद् विस्तारयेयुः १. ६१. ८ ॥

ऊषु निवासयन्ति ४. ५१. ४ ॥

ऊषतुः वास करते थे १०. ४०. २ (१२० सत्य०) ॥

ऊषुः वसेयुः ३. ७. १० ॥

ऊष्मणः आतपान् ६. १८ ॥ [ऊष्मणा] उष्णतया २५. ६ ॥

ऊष्मण्या [ऊष्मण्या] ऊष्मसु साधूनि २५. ३६ ॥

ऊहति वितर्कयति ५. ३४. ३ ॥

ऊहथुः [ऊहथुः] गमयेतम् १. ११६. ५ । प्राप्नुतम् १. ११६. ४ । प्रापयेतम् १. ११७. १५ । प्रापयथः ६. ३६. ६ । प्रापयतः (अत्र पुरुषव्यत्ययः) ६. ६२. ६ । वहेतम् १. ११६. ३ । वहतम् १. ११६. २० । वाहयतम् १. ११७. ६ । वहतः १. १८२. ७ । वहथः ६. ६२. ३ ॥

ऊहामि तर्कयामि ६. ३ । तर्केण निश्चयामि ५. २५ । योजयामि, तर्केण क्षिपामि,

तर्कैः प्राप्नोमि करोमि वा २. १५। वितर्कयामि ५. २७ ॥

ऊहिरे प्राप्नुवान्ति २. ३४. १२ ॥

ऊहिषे वितर्कयासि १. १२८. ६ ॥

ऊहुः वहन्ति ४. २७. ३ ॥

ऊहे [ऊहे] वितर्कयामि ५. ३. ६ ।

ऊहे उह्यते। नि० १२।३। अभिवहति । नि० ६।३५॥

ऊह्याते देशान्तरं गम्येते १. १२०. ११ ॥

ऊह्याथे वितर्कयथः ४. ५६. ६ ॥

ऋ

ऋक् ऋग्वेदः १८.२६ ॥ [ऋचः] वेदमन्त्राः १.३६.११ । ऋग्वेदश्रुतयः १८. ६७ । प्रशंसितबुद्धयो विद्यार्थिनः ५. ४४. १५। ऋग्वेदस्थ व्यवहार २०. १२ । [ऋचा] प्रशंसितौ २.३ ७ । [ऋचा] प्रशंसया ५. ६. ५ ॥ [ऋग्भिः] मन्त्रैः २. ३५. १२। ऋग्वेदस्थ विद्या और क्रियाओं के साथ २०।१२। [ऋचे] स्तुतये १३. ३६ ॥

ऋक् वाङ्नाम। निघ० १।११। ऋक् अर्चनी। नि० १।७॥

अथेमानि प्रजापतिर्ऋक्पदानि शरीराणि सञ्चित्याऽभ्यर्चत्। यदभ्यर्चत्ता एवर्चोऽभवन्। जै० उ० १।१५।६। प्राणो वा ऋक् प्राणेन ह्यर्चति। श० ७।५।२।१२। ब्रह्म वा ऋक्। कौ० ७। १०। वागृक्। जै० उ० ४।२३।४। वागेवऽर्चश्च सामानि च। मन एव यजूंषि । श० ४।६।७। ५। ऋग्नन्थन्तरम्। तां० ७।६।१७। अमृतं वा ऋक्। कौ० ७।१०। अस्थि वा ऋक्। श० ७। ५।२।२५। ऋक् शतपदी । ष० १।४। तस्य (दक्षिणनेत्रस्य) यच्छुक्लं तदृचां रूपम्। जै० उ० ४।२४।१२। ऋक्सामयेहैते (शुक्लकृष्णे) रूपे। श० ६।७।१।७। उक्थमिति बह्वृचः (उपासते)। श० १०।५।२।२०। एतन्मण्डलं (आदित्यः) तपति । तन्महदुक्थं ता ऋचः स ऋचां लोकः । श० १०।५।२।१। वीर्यं वै देवतऽर्चः। श० १।७।२।२०॥

ऋक्ता बहुप्रशंसायुक्तेन ४. ५०. ५ ॥

ऋक्वा सत्कर्त्ता ७. ३७. ४ । [ऋक्वाणः] प्रशस्ता ऋचः स्तुतयो विद्यन्ते येषां ते १. ८७. ५ । स्तुत्यानां गुणानां स्तावकः ३. १३. ५ ॥ [ऋक्वऽभिः] प्रशस्ता ऋचः स्तुतयो विद्यन्ते येषु कर्मसु तैः १. ८७. ६। प्रशंसितैर्गुणकर्मस्वभावैः १. १५०. ६। सत्कर्त्तव्यैः ५. १०. ८। प्रशंसनीयैः ६. ३२. २। प्रशंसितैः ६. ३२. ३। ऋग्वेदादिभिः ७. १०. ४ ॥

ऋक्षः भल्लूकः २४. ३६ । ऋक्षाः सूर्यचन्द्रनक्षत्रादिलोकाः १. २४. १० ॥

ऋक्षाः ऋक्षाः स्तृभिरिति नक्षत्राणाम्। उदीर्णानीव ख्यायन्ते। नि० ३।२०॥

सप्तर्षीनु ह स्म वै पुरऽक्षाँ इत्याचक्षते । श० २। १।२।४॥

ऋक्षलाभिः गत्यादानैः २५. ३ ॥

ऋक्षीकाभ्यः या ऋक्षा गतीः कुर्वन्ति ताभ्यः ३०. ८ ॥

ऋक्वसमम् ऋचः सान्ति सम्भजान्ति येन तत् साम १३. ५६ ॥ [ऋक्वसमात्] उस विज्ञान से १३. ५६ ॥

ऋक्सामानि ऋक् च सामानि च तानि

१८. ४३ ॥ [ऋक्सामाभ्याम्] ऋचन्ति स्तुवन्ति पदार्थान् येन स ऋग्वेदः, सामयन्ति सान्त्वयन्ति कर्मान्तं फलं प्राप्नुवन्ति येन स सामवेदः, ऋक् च साम च ताभ्याम् (अत्र अचतुर० अ० ५. ४. ७७ इति सूत्रेणायं समासान्तडच् प्रत्यये निपातितः) ४. १ ॥

ऋक्सामे वा इन्द्रस्य हरी । ऐ० २ । २४ । तै० १ । ६ । ३ । ६ । ऋक्सामे वै हरी । श० ४ । ४ । ३ । ६ । ऋक्सामे वै सारस्वतावुत्सौ । तै० १ । ४ । ४ । ६ । ऋक्सामानि वा एष्टयः ऋक्सामैर्ह्याशासत ऽइति नोऽस्त्वित्थं नोऽस्त्विति । श० ६ । ४ । १ । १२ ॥

ऋग्मियम् ऋचां वेदमन्त्राणां निर्मातारम् (ऋगुपपदात् मीञ्धातोः क्विप् । अमीयङादेशश्चेति) १. ६. ६ । स्तुतिभिः स्तवनीयम् ६. ४५. ७ । [ऋग्मियाय] ऋग्भिर्यो मीयते स्तूयते तस्मै (अत्र ऋगुपपदान्माधातोर्बाहुलकादौणादिको डियच्प्रत्ययः) १. ६२. १ । यो ऋचो मिनोत्यधीते तस्मै ३४. १६ ॥

ऋग्मियम् ऋग्मन्तमिति वार्चनीयमिति वा पूजनीयमिति वा । नि० ७ । २६ ॥

ऋग्मी ऋग्वेदी १.१००. ४ ॥ [ऋग्मिभिः] ऋचः ऋग्वेदमन्त्राः सन्ति येषां ते ऋग्मयस्तैः (अत्र मत्वर्थीयो बाहुलकाद् ग्मिनिः प्रत्ययः) १. १००. ४ ॥

ऋघायतः बाधमानान् ४. ३०. ५ । हिंसतः ४. ३८. ८ ॥

ऋघायन्त बाध्यन्ते ४. १७. २ ॥

ऋघायमाणः ऋघो हिंसित इवाचरति (अत्र रदधातोर्बाहुलकादौणादिकोऽन् प्रत्ययः सम्प्रसारणञ्च तत आचारे क्यङ्) १. ६१. १३ । वर्धमानः (अत्र ऋधुधातोः कः प्रत्ययो वर्णव्यत्ययेन घः तत उपमानादाचार इति क्यङ्) १. १३६. १ ॥ [ऋघायमाणम्] परिचरितुमर्हम् (ऋध्यते पूज्यते इति ऋघः बाहुलकात् कः तत आचारे क्यङ्) १. १०. ८ ॥

ऋघावा शत्रूणां हन्ता ४. २४. ८ ॥

ऋघावान् ऋघाः बह्व्यः स्तुतयो सत्यासत्यविवेचिका मतयो विद्यन्ते यस्मिन्सः १. १५२. २ । य ऋन् शत्रून् घ्नन्ति ते वा बहवः शूरा विद्यन्ते यस्य (अत्र हन्धातोर्वर्णव्यत्ययेन हस्य घो नलोपश्च) ३. ३०. ३ ॥

ऋचसे प्रशंसिताय कर्मणे ६. ३६. ५ ॥

ऋचीषमाय ऋच्यन्ते स्तूयन्ते ये ते ऋचीषास्तानतिमान्यान्करोति तस्मै (अत्र ऋचधातोर्बाहुलकादौणादिकः कर्मणीषन्प्रत्ययः) १. ६१. १ ॥ [ऋचीषम] ऋचा तुल्य प्रशंसनीय ६. ४६. ४ ॥

ऋचीषमः ऋचा समः । नि० ६ । २३ ॥

ऋच्छतु प्राप्त होवे १३. ४७ ॥

ऋच्छति गतिकर्मा । निघ० २ । २४ । परिचरणकर्मा । निघ० ३ । ५ ॥

ऋच्यमाना स्तूयमाना ६. ३८. २ ॥

ऋच्यमाने स्तूयमाने ६. ४६. ३ ॥

ऋजिप्यः य ऋजुगामिषु साधुः ४. २७. ४ ॥ [ऋजिप्याः] ऋजीन् सरलान् व्यवहारान् प्यायन्ते वर्धयन्ति ते ३. ३१.

१७ ॥ [ऋजिप्यासः] ये ऋजिं कोमलत्वं वर्धयन्ति ते २. ३४. ४ ॥ [ऋजिप्यम्] ऋजिपेषु सरलानां पालकेषु साधुम् ४. ३८. २ । ऋजूनां पालके भवम् ६. ६७. ११ ॥

ऋजिश्वा ऋजिः सरलश्चासौ श्वा च ५. २९. ११ ॥ [ऋजिश्वानम्] य ऋजीन् ज्ञानादिसरलान् गुणानश्नुते तं धार्मिकं मनुष्यम् (अत्र इक् कृषादिभ्यः इत्यृजधातोरिक् अशूङ्धातोर्ङ्वनिप् अकारलोपश्च) १. ५१. ५ ॥ [ऋजिश्वना] ऋजय ऋजुगुणयुक्ताः सुशिक्षिताः श्वानो येन तेन सह १. ५३. ८ । ऋजवः सरलाः श्वानो वृद्धयो यस्मिन् अध्ययने तेन (अत्र श्वन्शब्दः श्विधातोः कनिन् प्रत्ययान्तो निपातित उणादौ)१.१०१.१ । [ऋजिश्वने] ऋजुगुणैर्वृद्धाय ४. १६. १३ । ऋज्वादिगुणवर्धकाय ६. २०. ७ ॥

ऋजीते ऋजु गच्छति ६. ७५. १२ । सरलव्यवहारे २६. ४९ ॥

ऋजीपी सरलगामी ४. २६. ६ ॥

ऋजीषम् उपार्जकम् (अत्र अर्जेर्ऋज् च उ० ४. २ । इत्यजधातोरीषन् प्रत्यय ऋजादेशश्च) १. ३२. ६ ॥

ऋजीषी सरलस्वभावः ३. ४६. ३ । ऋजुनीतिः ४.१६.१। [ऋजीषिणः] सर्वविद्यायुक्ताः उत्कृष्टेनाङ्गोपार्जकाः १. ८७. १ । कोमलस्वभावाः २. ३४. १ ॥ [ऋजीषिणम्] प्रशस्तमुपार्जनं विद्यते यस्मिँस्तम् १. ६४. १२ । ऋजूनां सरलानां धार्मिकाणां जनानामीषितुं शीलम् ६. ६. ४२. २ ॥ [ऋजीषिन्] शोधक ३. ३२. १ ॥

ऋजीषी सोमः । यत् सोमस्य पूयमानस्यातिरिच्यते तदृजीषम्, अपार्जितं भवति । तेनर्जीषी सोमः । अथाप्यैन्द्रो निगमो भवति 'ऋजीषी वज्री' इति । नि० ५ । १२ ॥

ऋजु सरलं यथा स्यात्तथा २. ३. ७ ॥

ऋजुः सरलः २. २६. १ । [ऋजुना] सरलेन शुद्धेन वा १. ४१. ५ । [ऋजुयाऽइव] ऋजुना मार्गेणेव (अत्र टास्थाने याऽऽदेशः । अत्राऽन्येषामपीति दीर्घः) १. १८३. ५ ॥ [ऋजवे] सरलाय २. २७. ६ ॥

ऋजुः ऋजुरित्यप्यस्य (ऋज्जतेः) भवति । नि० ६ । २१ ॥

असौ वा लोक ऋजुः सत्य ९ ह्यृजुः सत्यमेष य एषः (सूर्यः) तपति । श० १४ । १ । २ । २२ ॥

ऋजुऽअश्वः याभिर्ऋजुमश्नन्ति ४. ६. ६ ॥

ऋजुऽक्रतुः ऋजवः क्रतवः प्रज्ञाः कर्माणि वा यस्य सः १. ८१. ७ ॥

ऋजुऽगाथ य ऋजुं सरलं व्यवहारं गाति स्तौति तत्सम्बुद्धौ ५. ४४. ५ ॥

ऋजुऽनीती ऋजुः सरला शुद्धा चासौ नीतिश्च तया (अत्र सुपां सुलुगिति तृतीयायाः पूर्वसवर्णादेशः) १. ९०. १ ॥

ऋजुऽमुष्काः य ऋजुं मार्गं मुष्णन्ति ते ४. ६. ९ ॥ [ऋजुऽमुष्कान्] य ऋजुना मुष्णन्ति तान् ४. २. २ ॥

ऋजुऽयन्तम् आत्मन ऋजुभावमिच्छन्तम्

१. १३६. ५ ॥ [ऋजुऽयते] ऋजुरिवाचरति तस्मै १. ११६. २३ । ऋजूयन्ते ५. १२. ५ ॥ [ऋजुऽयताम्] सरलीकुर्वताम् २५. १९ ॥

ऋजूयताम् ऋजुगामिनाम् ऋतुगामिनां वा । नि० १२ । ३६ ॥

ऋजुऽयवः कर्मभिरात्मन ऋजुत्वमिच्छन्तस्तच्छीलाः (अत्र क्याच्छन्दसीत्युः प्रत्ययः) १. २४. ४ ॥

ऋजुऽवनिः ऋजूनामकुटिलानां पदार्थानां सम्विभाजिका ५. ४१. १५ ॥

ऋजुऽहस्ता ऋजू सरलौ हस्तौ यस्या यस्यां वा सा ५. ४१. १९ ॥

ऋज्यते उपार्ज्यते १. १४०. २ ॥

ऋज्यन्तः ऋजुरिवाचारन्तः ६. ३७. २, ३ ॥

ऋज्यन्तः ऋजुगामिनः । नि० १० । ३ ॥

ऋज्रऽअश्वः ऋज्रा ऋजवोऽश्वा महत्यो नीतियो यस्य सः १.१००.१७ । ऋजुगतिमदश्वः पुरुषः १. ११७. १८ ॥ [ऋज्रऽअश्वम्] सरलतुरङ्गम् १. ११६. १६ ॥ [ऋज्रऽअश्वस्य] सभाद्यध्यक्षस्य १. १००. १६ ॥ [ऋज्रऽअश्वे] सुशिक्षिततुरङ्गादियुक्ते सैन्ये १. ११७. १७ ॥

ऋज्रा ऋजुगामिनौ १. १७४. ५ । ऋज्राणि ४. १६. ११ ॥ [ऋज्रासः] सरलस्वभावाः ७. १८. २३ ॥

ऋज्रे ऋजुप्रिये ६. ६३. ६ ॥

ऋञ्जते प्रसाध्नुत ५. ८७. ५ ॥

ऋञ्जते प्रसाध्नुवन्ति १. ६. ६ । प्रसाध्नोति १. ३७. ३ । प्रसिद्ध करते हैं १. १२२. १३ । साध्नोति १. १४३. ५ । प्रसाधयन्ति २. २. ५ । भृज्जन्ति १. १४१. ६ ॥

ऋञ्जन् प्राप्नुवन् १. ६५. ७ । प्रसाध्नुवन् ४. ३८. ७ ॥

ऋञ्जन्ति साध्नुवन्ति ३. ४३. ६ ॥

ऋञ्जतिः प्रसाधनकर्मा । निघ० ६ । २१ ॥

ऋञ्जसानः य ऋञ्जति प्रसाध्नोति सः (अत्र ऋञ्जिवृधिमहि० उ० २. ८४ अनेन सानच्प्रत्ययः) १. ५८. ३ । प्रसाध्नुवन् ४. २१. ५ ॥ [ऋञ्जसानम्] विवेकादिसाधनैः प्रसाध्यमानम् १. ६६. ३ ॥

ऋञ्जसे प्रसाध्नोषि ४. ८. १ ॥

ऋञ्जे भर्जयामि ३. ४. ७ । साध्नोमि ४. २६. १ ॥

ऋणः प्रापकः ६. १२. ५ ॥ [ऋणम्] ऋण को ४. ३. १३ । कर रूप धन को ७. २४. १३ ॥ [ऋणा] ऋणानि प्राप्तानि ४. २३. ७ । अन्येभ्यो देयानि विज्ञानानि २. २७. ४ ॥

ऋण ९ ह वै जायते योऽस्ति । स जायमान एव देवेभ्य ऋषिभ्यः पितृभ्यो मनुष्येभ्यः । श० १ । ६ । २ । १ ॥

ऋणऽचित् यः ऋणं चिनोति सः २. २३. १७ ॥ [ऋणम्ऽचयस्य] ऋणं चिनोति येन तस्य ५. ३०. १२ ॥ [ऋणम्ऽचये] ऋणं चिनोति यस्मात्तस्मिन् ५. ३०. १४ ॥

ऋणऽच्युतम् ऋणादयुक्तम् ६. ६१. १ ॥

ऋणधत् समृध्नुयात् १. ८४. १६ ॥

ऋणऽयाः य ऋणं याति प्राप्नोति सः २. २३. ११ ॥

ऋणऽयावा य ऋणं याति प्राप्नोति सः १. ८७. ४ ॥

ऋणवः [ऋणवः] ऋणुहि १. ४८. १५। प्राप्नुयाः १. १३८. २। प्रसाध्नुयाः ७. ८. ३ ॥

ऋणऽवानम् ऋणयुक्तम् १. १६९. ७ ॥

ऋणुत साध्नुत ५. ४५. ६ ॥

ऋणोः प्राप्नोषि (अत्र लडर्थे लङ् बहुलं छन्दसीत्यडभावश्च) १. ३०. १४। प्रापयसि १. ३०. १५। प्राप्नुयाः १. १७४. २। प्रसाध्नुयाः ६. १८. ५ ॥

ऋणोति प्राणयति (अत्रान्तर्गतो णयर्थः) १. ३५. ६ ॥

ऋणोति गतिकर्मा। निघ० २। १४ ॥

ऋण्वति कर्माणि साध्नोति १. ५८. ३। प्राप्नोति १. १२८. ६। गच्छति जानाति वा ३. ११. २ ॥

ऋण्वति गतिकर्मा। निघ० २। १४ ॥

ऋण्वथः प्राप्त कराते हो १ १३६. ४। प्राप्नुथः १. १५१. ५ ॥

ऋण्वन् [ऋण्वन्] हिंसन् १. ६६. ५। प्रसाध्नुवन् ७.१.२। प्रसाध्नुवन्ति ७.५.६॥

ऋतः सत्यज्ञानः १७. ८२ ॥

ऋतऽचित् [ऋतचित्] य ऋतं सत्यं चिनोति सः १.१४५.५। या ऋतं सत्यं चिनोति सा ४. १६. १० ॥

ऋतऽजाः ऋतात् सत्याज्जातः ३. ५८. ८। यः सत्यविद्यामयं वेदं जनयति १२. २४। य ऋतं सत्यं ज्ञानं जनयति सः १२. २४ ॥

ऋतजा इत्येष (सूर्यः) वै सत्यजाः। ऐ० ४। २० ॥

ऋतऽजातः ऋतेन सत्याचरणेन जातः प्रसिद्धः १. ३६. १६ ॥ [ऋतऽजाताः] य ऋते जायन्ते ते ५. ६१. १४ ॥ [ऋतऽजातस्य] ऋतात् सत्यात् कारणाज्जातस्य जगतः ३. ६. १० ॥

ऋतजातऽसत्याः ऋताज्जातेषु व्यवहारेषु सत्सु साध्व्यः ४. ५१. ७ ॥

ऋतजित् य ऋतं विज्ञानमुत्कर्षति सः १७. ८३ ॥

ऋतऽज्ञाः य ऋतं यथार्थं जानन्ति ते ५. ५७. ८। सत्यविदः १. ७२. ८। ब्रह्मविदो वेदविदश्च ते ज्ञानिनः १६. ४६ (२७४ भूमि०)। या ऋतज्ञानन्ति ताः ४. १६. ७ ॥ [ऋतऽज्ञाम्] ऋतं सत्यं जानाति यया ताम् ५. ४३. ६ ॥

ऋतज्ञाः सत्यज्ञा वा, यज्ञज्ञा वा। नि० ११। १८ ॥

ऋतऽज्येन ऋता सत्या ज्या यस्मिँस्तेन २. २४. ८ ॥

ऋतऽद्युम्न सत्यधन सत्य कीर्ति वाले यतिवर ६. ११३. ४ (२३७ विधि०) ॥

ऋतऽधीतयः ऋतस्य सत्यस्य धीतिर्धारणं येषान्ते ५. ५१. २ ॥ [ऋतधीतिभिः] जलधारकैर्गुणैः ६. ३६. २ ॥

ऋतनिऽभ्यः सत्यन्यायकर्त्रीभ्यो राज्ञीभ्यः २. २७. १२ ॥

ऋतऽपाः सत्यपालिका १. ११३. १२। य ऋतं सत्यं पाति ६. ३. १॥

ऋतऽपेशसे सत्यस्वरूपाय ५. ६६. १॥

ऋतऽप्रजातः कारणादुत्पद्य ऋते वायावुदके प्रसिद्धः १. ६५. ५॥ [ऋतऽप्रजात] ऋते सत्याचरणे प्रकट २. २३. १५। ऋतं सत्यं प्रजातं यस्मात्तत्सम्बुद्धौ २६. ३॥

ऋतऽप्रवीतम् ऋतात् सत्यात् कारणात् प्रकृष्टतया जनितमुदकेन चालितं वा १. ७०. ४॥

ऋतप्सू ऋतं जलं प्सातो भक्षयतस्तौ (ऋतमित्युदकनाम निघं १. १२.) १. १८०. ३॥

ऋतम् ब्रह्म सत्यं यज्ञं वा १. ४१. ४। सत्यं विज्ञानम् १. ७१. ३। सत्यं कारणम् १. १०५. ५। वेदसृष्टिक्रमप्रत्यक्षादिप्रमाणविद्धदाचरणानुभवस्वात्मपवित्रतानामनुकूलम् १. १०५. १२। उदकम् २. २८. ४। प्राप्तुं योग्यं कारणम् ३. ५४. ३। सत्यं न्यायम् ४. २. १६। सत्यस्य विज्ञापिकाः ५. १२. २। सत्यं स्वरूपम् ५. ६२. १। सत्यं धर्मम् ७. २१. ५। यथार्थम् ५. ७। यथार्थं सर्वविद्याधिकरणं वेदशास्त्रम् १०.१६.१।(१० पञ्च०) सत्य मानना और सत्य मनवाना १२. ५. १०(१७६विधि०)। [ऋतेन] सत्यस्वरूपेण ब्रह्मणा (ऋतमिति सत्यनामसु पठितम् निघं० ३. १० अनेनेश्वरस्य ग्रहणम्) १. २. ८। कालेन सूर्येण वायुना वा १४. ११. (१४७ भूमि०) [ऋतस्य] सत्यस्य परमाणवादेः ५. २१. ४। [ऋते] ब्रह्मणि पुरुषार्थे च १२. ५. १ (१०१ भूमि०)॥

ऋतम् उदकनाम। निघ० १। १२। प्रत्यृतं भवति। नि० २। २५। सत्यनाम। निघ० ३। १०। ऋतस्य प्रजननयज्ञस्य रेतसो वा। नि० ३। ४। यज्ञस्य। नि० ४। १६।

सत्यं वाऽऋतम्। श० ७। ३। १। २३। तै० ३। ८। ३। ४। ऋतमिति सत्यमित्येतत्। श० ६। ७। ३। ११। ऋतमित्येष (सूर्यः) वै सत्यम्। ए० ४। २०। अग्निर्वा ऋतम्। तै० २। १। ११। १। ऋतमेव परमेष्ठि। तै० १। ५। ५। १। चक्षुर्वा ऋतं तस्माद्यतरो विवदमानयोराहाहमनुष्ठ्या चक्षुपादर्शमिति तस्य श्रद्दधति। ऐ० २। ४०। मनो वा ऋतम्। जै० उ० ३। ३६। ५। ब्रह्म वाऽऋतम्। श० ४। १। ४। १०। ओमित्येतदेवाक्षरमृतम्। जै० उ० ३। ३६। ५। अयं वाऽअग्निर्ऋतमसावादित्यः सत्यं यदिवासावृतमयं (अग्निः) सत्यमुभयम्वेतदयमग्निः। श० ६। ४। ४। १०। ऋतेनेवैन ९ स्वर्गं गमयन्ति। तां० १८। २। ६॥

ऋतयन् सत्यमाचरन् ५. १२. ३। सत्यमिवाचरन् ५. ४३. ७। ऋतं सत्यमात्मन इच्छन् १. ११७. २२॥ [ऋतऽयते] आत्मन ऋतं विज्ञानमिच्छते १. ९१. ७। ऋतमिव करोति ४. ८. ३॥ [ऋतऽयतः] उदकमिवाचरतः २. ३२. १॥

ऋतऽयवः आत्मन ऋतमिच्छवः ५. ५४. १२॥

ऋतऽया सत्यविज्ञानयुक्तया २. ११. १२॥

ऋतऽयुक् य ऋतेन सत्येन युनक्ति ६. ३६. २॥ [ऋतयुक्ऽभिः] जलस्य योजकैः ६. ३६. ४॥

ऋतये हिंसायै ३०. १३॥

ऋतऽवरी ऋतं सत्यं विद्यते यस्यां सा ३. ६१. ६। बहुसत्यप्रकाशिका ४. ५२. २। उषाः ६. ६१. ६॥ [ऋतऽवरी] सत्यकारणयुक्ते १. १६०. १। बहून्नृतादीन्युदकानि विद्यन्ते ययोस्ते ३. ६. १०। बहवृतं सत्यं विद्यते ययोस्ते ४. ५६. २॥ [ऋतऽवरीः] ऋतं पुष्कलमुदकं विद्यते यासु ताः ३. ३३. ५। ऋतं सत्यं विद्यते यासु ताः ३. ५६. ५॥ [ऋतवरीः ऽइव] उषस इव ४. १८. ६॥ [ऋतऽवरीम्] बहुसत्याचरणयुक्ताम् ५. ८०. १॥

ऋतऽवा ऋताः प्रशस्ताः सत्या गुणा विद्यन्ते यस्मिन्त्सः १. ७७. १। सत्यगुणकर्मस्वभाववान् १. ७७. २। ऋतानि सत्यानि कर्माणि गुणाः स्वभावो वा विद्यते यस्य सः १. ७७. ५। य ऋतं वनति सम्भजति सः २. ३५. ८। ऋतं सत्यं वनुते याचते सः ३. १३. २। सत्यप्रकाशकः ३. ५४. १२। सत्यस्वरूपः ४. २. १। ऋतस्य जलस्य विभाजकः ४. ७. ७। सत्यासत्ययोर्विभाजकः ६. १५. १३। ऋतस्य सत्यस्य सम्बन्धो विद्यते यस्य स (अत्रान्येषामपीति दीर्घः, सुपां सुलुगिति डादेशः) १८. ५३॥ [ऋतऽवानम्] सत्यकारणमयम् ३. २. १३। ऋतं बहुसत्यं विद्यते यस्मिँस्तम् (अत्र छन्दसि वनिपाविति वार्त्तिकेन वनिप्) १२. १११. य ऋतं जलं वनति सम्भजति तम् २६.६॥

ऋतऽवाकेन यथार्थ बोलने से ६. ११३. २ (२३७ विधि०)॥

ऋतऽवादिभ्यः ऋतं वदितुं शीलं येषां तेभ्यः सत्यवादिभ्यो विद्वद्भ्यः ५. ७॥

ऋतऽवृधा यावृतेन जलेन यथार्थतया शिल्पक्रियया वा वर्धेते तौ १. ४७. १। यावृतेन यथार्थगुणेन प्राप्तिसाधकेन वर्धयेते तौ १. ४७. ३। यौ ऋतं विज्ञानं वर्धयतस्तौ ७. ९। [ऋतऽवृधौ] ऋतं ब्रह्म तेन वर्धयितारौ ज्ञापकौ जलाकर्षणवृष्टिनिमित्ते वा (अत्रान्येषामपीति दीर्घः) १. २. ८। [ऋतऽवृधः] या ऋतं सत्यं सुखं जलं वा वर्धयन्ति ताः १. १३. ६। ऋतमुदकं सत्यं यज्ञं च वर्धयन्ति तान् १. १४. ७। ऋतेन सत्येनाचरणेन विज्ञानेन च वृद्धाः १. १४२. ६। सत्यव्यवहारवर्धकान् ६. १५. १८। सत्यविद्यावर्धकाः ६. ५२. १०। या ऋतं सत्यं वर्धयन्ति ताः ४. १२। १७. ३। या ऋतेन जलेन नद्य इव सत्येन वर्धन्ते ताः १७. ३। ये ऋतेन सत्येन वर्धन्ते १७. ७८। ये ऋतेन वेदविज्ञानेन वर्धन्ते १६. ६५। सत्यस्य वर्द्धकाः ३४. ५३॥

ऋतावृध् सत्यवृधो वा यज्ञवृधो वा नि० १२। ३३॥

ऋतऽसत् य ऋतेषु सत्येषु प्रकृत्यादिषु सीदति सः १०. २४। य ऋते सत्ये संस्थितः १२. १४॥

ऋतसदित्येष (सूर्यः) वै सत्यसत्। ऐ० ४।२०॥

ऋतसदनम् यदृतानां सत्यानां बोधानां स्थानं तत् ४.३६। ऋतानां यथार्थानां पदार्थानां सादनं स्थानम् ४. २६॥

ऋतसदनी या क्रिया ऋतानां जलानां सदनी गमनागमनकारिणी ४. ३६॥

ऋतऽसापः सत्यसम्बन्धाः ५. ४१. ६। य ऋतेन सत्येन सपन्ति ६. ५०. २। य

ऋतेन सपन्ति प्रतिज्ञां कुर्वन्ति ते ७. ५६. १२ ॥

ऋतऽस्तुभम् यया ऋतं स्तोभते स्तभ्नाति धराति १. ११२. १० ॥

ऋतस्पते सत्यपालक २०. ३४ ॥

ऋतऽस्पृशा ऋतस्य ब्रह्मणो वेदस्य स्पर्शयितारौ प्रापकौ जलस्य च १. २. ८ ॥ [ऋतऽस्पृशः] सत्यस्पर्शस्य ४. ५०. ३ । य ऋतं सत्यं यथार्थं स्पृशन्ति स्वीकुर्वन्ति ते ४. ६७. ४ ॥

ऋतायते ऋतमुदकमिवाचरन्ति (अत्र वचनव्यत्ययेन बहुवचनस्थाने एकवचनम् । न छन्दस्यपुत्रस्येतीत्वाभावः अन्येषामपीति दीर्घः) १३. २७ ॥

ऋतायुभ्याम् आत्मन ऋतमिच्छद्भ्यामिव ७. १० ॥

ऋतायुः यज्ञकामः । निं० १० । ४३ ॥

ऋताषाद् य ऋतं सत्यं व्यवहारं सहते सः १८. ३८ ॥

ऋतिऽसहम् य ऋतिं सत्यं सहते तम् (अत्रान्येषामपीति दीर्घः) १. ६४. १५ । य ऋतीन् परपदार्थप्रापकान् शत्रून्त्सहते (अत्र संहितायामिति दीर्घः) ६. १४. ४ । गातिसहम् २६. ११ ॥

ऋतुः वसन्तादिः १. १६२. १६ ॥ [ऋतू] हेमन्त और शिशिर १०. १४ । सर्वान् प्रापकौ १३. २५ । यावृच्छतस्तौ १४. ६ । वृष्टिप्रापकौ १४. २५ । बलप्रदौ १४. २६ । स्वालिङ्गप्रापकौ १४. २० ॥ [ऋतून्] रसाहरणसाधकान् १. १५. ५ । [ऋतुना] वसन्तादिभिः सह (अत्र जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् अ० १. २.५८ । अनेन जात्यभिप्रायेणैकवचनम्) १. १५. १ । प्राप्तव्येन २१. २३ । औष्ण्यं प्रापकेन २१. २४ । [ऋतुभिः] प्राप्नुवन्ति यैस्तैः(अत्र अर्तेश्चतुः उ०१.७२. इति ऋधातोस्तुप्रत्ययः किच्च) १. १५. १० । मेधाविभिः सह ४. ३४. २ ॥

ऋतुः अर्तेर्गतिकर्मणः । नि० २ । २५ । ऋतुभिः कालैः । नि० ८ । ३ ॥

द्वौ द्वौ हि मासावृतुः । तां० १० । १२ । ८ । द्वौ हि मासावृतुः । श० ७ । ४ । २ । २६ । त्रयो वा ऋतवः संवत्सरस्य । श० ३ । ४ । ४ । १७ । पञ्च वाऽऋतवः । श० २ । २ । ३ । १४ । पञ्चर्तवो हेमन्तशिशिरयोः समासेन । ऐ० १ । १ । षड्वाऋतवः संवत्सरस्य । श० १ । २ । ५ । १२ । वसन्तो ग्रीष्मो वर्षाः, ते देवा ऋतवः । शरद्धेमन्तशिशिरस्ते पितरः (ऋतवः) । श० २ । १ । ३ । १ । यान्यड् विभूतय ऋतवस्ते । जै० उ० १ । २१ । १ । तद्यानि तानि भूतानि ऋतवस्ते । श० ६ । १ । ३ । ८ । सप्त ह्यृतवः । श० ६ । ३ । १ । १६ । अग्नयो वाऽऋतवः । श० ६ । २ । १ । ३६ । ऋतवो हैते यदेताश्चितयः । श० ६ । २ । १ । ३६ । ऋतव उपसदः श० १० । २ । ५ । ७ । ऋतव उद्गीथः । ष० ३ । १ । ऋतवो वा उदु ब्रह्मीयम् (सूक्तम्) । कौ० २६ । ६ । ऋतवो वै देवाः । श० ७ । २ । ४ । २६ । ऋतवो ह वै प्रयाजाः । तस्मात्पञ्च भवन्ति पञ्च ऋतवः । श० १ । ५ । ३ । १ । ऋतवो वै प्रयाजाऽनुयाजाः । कौ० १ । ४ । ऋतवो वै पृष्ठानि । तै० ३ । ६ । ६ । १ । श० १३ । ३ । २ । १ । ऋतवः पितरः । कौ० ५ । ७ । श० २ । ४ । २ । २४ । गो० उ० १ । २४ । ऋतव एव प्रवोवाजः । गो० पू० ५ । १२ । ऋतवो वाव होत्राः । गो० उ० ६ । ६ । ऋतवो होत्राशंसिनः । कौ० २६ । ८ । सदस्या ऋतवोऽभवन् । तै० ३ । १२ । ६ । ४ । ऋतवो वै विश्वेदेवाः । श० ७ । १ । १ । ४३ । ऋतवो वै वाजिनः । कौ० ५ । २ । श० २ । ४ । ४ । २२ । गो० उ० १ । २० । ऋतवः शिक्यमृतुभिर्हि

ंवत्सरः शक्नोति स्थातुं यच्छक्नोति तस्माद्विष्क्यम् । श० ६ । ७ । १ । १८ । ऋषभो वा एष ऋतूनां यत्संवत्सरः । तस्य त्रयोदशो मासो विष्टपम् । तै० ३ । ८ । ३ । ३ । अग्निष्टोम उक्थ्योऽग्निर्ऋतुः प्रजापतिः संवत्सर इति । एतेऽनुवाका यज्ञक्रतूनाञ्चर्तूनाञ्च संवत्सरस्य च नामधेयानि । तै० ३ । १० । १० । ४ । मुखं वा एतदृतूनां यद्वसन्तः । तै० १ । १ । २ । ६ । अन्त ऋतूनां हेमन्तः । श० १ । ५ । ३ । १३ ॥

ऋतुऽथा ऋतावृतौ (अत्र थाच्छन्दसीति थाल्) २. ३. ७ । ऋतौ २६. ३५ । ऋतुप्रकारेण १. १६४. ४४ । ऋतुप्रकारैः २०. ६५ । ऋत्वनुकूलानि १. १७०. ५ । ऋतुषु २. ४३. १ । ऋतोर्ऋतोर्मध्ये ५. ३२. १२ । ऋतुरिव ६. १८. ३ । ऋतुभ्यः २३. ४० । ऋतोः २५. ४२ । ऋतुभिः २६. १६ ॥

ऋतुथा काले काले । नि० १२ । २७ ॥

ऋतुऽपाः य ऋतुं पाति रक्षति सः ३. २०. ४ । य ऋतुं पाति रक्षति सः सूर्य्यः ३. ४७. ३ ॥

ऋतुऽमतः प्रशस्ता वसन्तादयो ऋतवो विद्यन्ते येषां तान् १९. ६१ ॥

ऋतुऽशः बहुषु ऋतुषु १. १६२. ४ । बह्वनृतून् १३. ४३ । ऋतुमृतुं प्रति २३. ५७ । ऋत्वर्हम् २५. २७ । ऋतावृतौ २६. १० ॥

ऋतुऽस्थाः या ऋतुषु वसन्तादिषु तिष्ठन्ति ताः १७. ३ ॥

ऋते विना १. १८. ७ । भिन्न ७. ११. १ ॥

ऋतेऽजाः सत्ये प्रादुर्भूता १. ११३. १२ ॥

ऋत्विक् ऋत्वनुकूलं सङ्गच्छन् २. ५. ७ ॥

[**ऋत्विजः**] य ऋतुषु यजन्ते ते विद्वांसः १. ६०. ३ । समय २ प्राप्त होने वाले ६. ६. ६ । (२५६ विधि०) ॥

[**ऋत्विजम्**] य ऋतूनर्हति तम् । ७. १६. ६ । य ऋतावृतौ प्रत्युत्पत्तिकालं संस्कारं सङ्गतं यजति करोति तथा च शिल्पसाधनानि सङ्गमयति सर्वेषु ऋतुषु यजनीयस्तम् (ऋत्विग्दधृग् अ० ३. २. ५६ । अनेन कर्त्तरि निपातनं तथा कृतो बहुलमिति कर्मणि वा) १. १. १ । ऋतून् यजाति सङ्गच्छते यस्तम् १. ४५. ७ । यज्ञसम्पादकम् १. ४४. ११ ॥

ऋत्विक् ईरणः, ऋग्यष्टा भवतीति शाकपूणिः । ऋतुयाजी भवतीति वा । नि० ३ । १६ ॥

ऋतव ऋत्विजः । श० ११ । २ । ७ । २ । ऋत्विजो हैव देवयजनम् । श० ३ । १ । १ । ५ । एतऽएव सरघो मधुकृतो यदृत्विजः । श० ३ । ४ । ३ । १४ । आत्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजः । श० ६ । ५ । २ । १६ ॥

ऋत्वियः ऋतुः प्राप्तोऽस्य स ऋत्वियः १. १३५. ३ । य ऋतूनर्हति सः १. १४३. १ । ऋतुयाजकः ५. ७५. ६ ॥ [**ऋत्वियाः**] या ऋतुमर्हन्ति ताः १. १६०. २ ॥

[**ऋत्वियम्**] ऋत्विगर्हम् २. १. २ ॥

[**ऋत्विये**] ऋतु समय में १४. २. ३७ (१७० विधि०) ॥

ऋदूदरः मृदूदरः २. ३३. ५ ॥ [**ऋदूदराः**] ऋतसत्यमुदरे येषां ते ३. ५४. १० ॥

ऋदूदरः सोमो - मृदूदरो मृदुरुदरेष्विति वा । नि० ६ । ४ ॥

ऋद्धम् समृद्धम् १८. ११ ॥

ऋद्धिः सम्यग् वृद्धिः ८. ५२ । योगेन प्राप्ता समृद्धिः १८. ११ ॥

अग्निमुखा ह्यृद्धिः। तै० ३।३।८।६॥

ऋद्धयताम् वर्धताम् २६. २॥

ऋद्धयाम वर्धेमहि (अत्रान्येषामपीति दीर्घः) १५. ४४।

ऋद्धयासम् वर्द्धिषीय ८. ९॥

ऋधक् स्वीकारे ३. २९. १। सत्यम् ४. १८. ४। यथार्थम् ६. ४०. ५। समृद्धिवर्धके ८. २०। समृद्धिर्यथास्यात्तथा ८. २०। य समृध्नोति सः ३३. ८७॥

ऋधक् पृथग्भावस्य प्रवचनं भवति। अथाप्यृध्नोत्यर्थे दृश्यते। ऋध्नुवन्। नि० ४।२५॥

ऋधत् ऋध्नुयात् समर्धयेत् ६. २. ४॥

ऋधत्ऽवाराय ऋधत् संवर्धकः सत्यो वारस्स्वीकरणीयो व्यवहारो यस्य तस्मै ६. ३. २॥

ऋधाथे वर्धयतः (अत्र व्यत्ययो बहुलं छन्दसीति विकरणाभावश्च) १. १७. ६॥

ऋधीमहि समृद्धा भवेम ६. ३७. १॥

ऋधेम वर्धेमहि। अथर्व० १९. ५५. ४ (४१ पञ्च०)॥

ऋध्नोति वर्धयति १. १८. ८॥

ऋध्नोति परिचरणकर्मा। निघ० ३।५॥

ऋध्याः साध्नुयाः ३. ५०. १॥

ऋध्याम् वर्धयेयम् ५. ६०. १॥

ऋध्याम वर्धेम १. ३१. ८॥

ऋणद्धि परिचरणकर्मा। निघ० ३।५॥

ऋन्धन् वर्द्धमानः सन् १. १७३. ११। साध्नुवन् [illegible] ११. [illegible]॥

ऋन्धन् अर्द्धयित्वा। नि० ३।७। समर्द्धय। नि० ८।६॥

ऋबीसम् सरलम् ५. ७८. ४॥ [ऋबीसात्] नष्टविद्याप्रकाशादविद्यारूपात् १. ११७. ३॥ [ऋबीसे] दुर्गतभासे व्यवहारे १. ११६. ८॥

ऋबीसम् अपगतभासमपहृतभासमन्तर्हितभासं गतभासं वा। नि० ६।३६॥

ऋभुः बहुविद्याप्रकाशको विद्वान् १. ११०. ७। महान् ३. ५. ६। मेधाव्याऽऽयुः सभ्यताप्रकाशकः १. ११०. ७। धनञ्जयः सूत्रात्मा वायुरिव मेधावी १. १६१. ६॥ ऋभवः किरणाः १. ११०. ६॥

ऋभुः मेधाविनाम। निघ० ३।१५। ऋभवः उरु भान्तीति वा, ऋतेन भान्तीति वा, ऋतेन भवन्तीति वा। आदित्यरश्मयोऽप्यृभव उच्यन्ते। नि० ११।१६॥

प्रजापतिर्वै पित ऋभून्मर्त्यान्त्सतो मर्त्यान् कृत्वा तृतीयसवन आभजत्। ऐ० ६।१२। ऋभवा वा इन्द्रस्य प्रियं धाम। तां० १४।२।५॥

ऋभुक्षाः य ऋभून् मेधाविनः क्षाययति निवासयति स महान् ७.४८.३। महान् १.६३.३। महान्तः २५.२४। मेधावी १.१६२.१। सद्गुणैर्महान्तः ४. ३४. ५॥ [ऋभुक्षणम्] य ऋभून् मेधाविनः क्षाययति वासयति ज्ञापयति वा तम् १. १११. ४॥

ऋभुक्षाः महन्नाम। निघ० ३।३। उरुक्षयणः, ऋभूणां राजेति वा। नि० ६।३॥

ऋभुतः ऋभूणां सकाशात् ४. ३६. ९॥

ऋभुऽमत् प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्मिँस्तत् १. ११२. २॥

ऋभुऽमान् प्रशस्ता ऋभवो मेधाविनो विद्यन्ते यस्य सः १. १११. १॥

ऋभ्वसम् ऋभून् मनुष्यादीन् पदार्थान् वाऽस्यन्ति येन तम् १. ५६. १। ऋभुं मेधाविनमसते गृह्णाति तम् ५. ५२. ८॥

ऋश्यः मृगविशेषः २४. ३७॥

ऋषभः गतिमान् पशुः १४. ६। बलिष्ठः १८. २७। विज्ञानवान् १६. ६१। श्रेष्ठः २१. २२॥ [ऋषभम्] बलीवर्दम् २१. ३८। श्रेष्ठं पुरुषार्थम् २१.४०॥ [ऋषभेण] गन्तुं योग्येन २१. ३२॥ [ऋषभाय] श्रेष्ठाय सभ्याय २४. ३०॥ [ऋषभस्य] प्राप्तुं योग्यस्य २१. ४६॥

ऋषभो वै पशूनामधिपतिः। तां० १६। १२। ३। ऋषभो वै पशूनां प्रजापतिः। श० ५।२।५। १७। वृषा वा ऋषभो योषा सुब्रह्मण्या। ऐ० ६। ३। वीर्यं वा ऋषभः। तां० १८। ६। १४॥

ऋषिः सर्वविद्याविद्वेदोपदेष्टा १. ३१. १। मन्त्रार्थद्रष्टा विद्वान् विद्याप्रकाशकः १. ६६. २। अध्यापकोऽध्येता वा १. १०६. ६। विशापकः पतिः १४. ५। रूपप्रापकः १३. ५६। शब्दप्रापकः १३. ५७॥ [ऋषयः] गन्तारः १. १६४. १५। प्राप्ताः ४. ४२. ८। प्राणादयः पञ्च, देवदत्तधनञ्जयौ च १७. ७६। वेदविद्यापुरस्सराः परमयोगिनः १८.५८॥ [ऋषिम्] कार्यसिद्धिप्राप्तिहेतुम् (अत्रेगुपधात् कित् उ० ४. १२५ अनेन ऋषी गतावित्यस्माद्धातोरिन् प्रत्ययः) ३. १६॥ [ऋषिऽभिः] मन्त्रार्थद्रष्टृभिरध्यापकैस्तर्कैः कारणस्थैः प्राणैर्वा। (ऋषिप्रशंसा चैवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति। निरु० ७. ३। इयमेव ऋषीणां प्रशंसा [illegible] दलणाभिप्रायैर्मन्त्रार्थैर्विदितैः प्रशंसनीया भवन्ति तेषामृषीणां मन्त्रेषु दृष्टयोऽर्थादत्यन्तपुरुषार्थेन मन्त्रार्थानां यथावद्दर्शनानि ज्ञानानि भवन्ति तस्मात्ते पूज्याः सत्कर्तव्या आसन्निति। साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वा। नि० १. २०। कीदृशा ऋषयो भवन्तीत्यत्राह। यतः साक्षात्कृतधर्माणो धार्मिका आप्ता यैः सर्वा विद्या यथावद्विदिता येऽवरेभ्यो ह्यसाक्षात्कृतवेदेभ्यो मनुष्येभ्य उपदेशेन वेदमन्त्रान् मन्त्रार्थांश्च सम्प्रादुः प्रकाशितवन्तस्तस्मात्ते ऋषयो जाताः। तैः कस्मै प्रयोजनाय मन्त्राध्यापनं तदर्थप्रकाशश्च कृत इत्यत्रोच्यते। उत्तरोत्तरं वेदार्थप्रचाराय। येऽवरेऽल्पबुद्धयो मनुष्या अध्ययनायोपदेशाय च ग्लायन्ते तेषां वेदार्थविज्ञानायेमं नैघण्टुकं निरुक्ताख्यं च ग्रन्थं समाम्नासिषुः सम्यगभ्यासार्थं रचितवन्तः। येन सर्वे मनुष्या वेदं वेदाङ्गानि च यथार्थतया विजानीयुरेवं कृपालव ऋषयो गण्यन्ते इति। पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूढम्। नि० १३। १२। अत्र तर्क एव ऋषिरुक्तः। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्वज्ञानार्थमूहस्तर्कः। न्याय १. १. ४०। या तत्वज्ञानार्थोहा सैव तर्कशब्देन गृह्यते। प्राणा ऋषयः। श० ७. २. १. ५। अत्रर्षिशब्देन प्राणा [illegible]) ३. १. ३॥

ऋषिः दर्शनात्, स्तोमान्ददर्शेत्यौपमन्यवः। 'तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्त ऋषयोऽभवँस्तदृषीणामृषित्वम्' इति विज्ञायते। नि० २। ११। ऋषयः आदित्यरश्मयः। इन्द्रियाणि। नि० १२। ३५, ३६॥

ते यत्पुरास्मात्सर्वस्मादिदमिच्छन्तः श्रमेण तपसारिषंस्तस्मादृषयः। श० ६।१।१।१। यो वै ज्ञातोऽनूचानः स ऋषिरार्षेयः। श० ४।३।४।१६। एते वै विप्रा यदृषयः। श० १।४।२।७। अथ यदेवानुब्रवीत। तेनर्षिभ्य ऋणं जायते यद्ध्येभ्य एतत्करोत्यृषीणान्निधिगोप इति ह्यनूचानमाहुः। श० १।७।२।३। प्राणा ऋषयः। श० ७।२।३।५। प्राणावाऽऋषयः। ए० २।२७॥

ऋषिऽकृत् ऋषीन् ज्ञानवतो मन्त्रार्थद्रष्टॄन् कृपया ध्यानोपदेशाभ्यां करोति (अत्र कृतो बहुलमिति करणे क्विप्) १. ३१. १६॥

ऋषिऽद्विषे वेदविदीश्वरविरोधिने दुष्टाय मनुष्याय १. ३६. १०॥

ऋषिऽस्वरम् ऋषीणामुपदेशम् ५. ४४. ८॥

ऋषूणाम् प्राप्तविद्यानां जिज्ञासूनां वा १. १२७. १०। प्राप्तवेद्यकविद्यानाम् १. १२७. १०। मन्त्रार्थविदाम् (अत्र वर्णव्यत्ययेन इकारस्य स्थान उत्वम्) १. १२९. १॥

ऋष्टिः प्रापिका १. १६७. ३। प्राप्तिः १. १६६. ३॥ [ऋष्टयः] गमनागमनशीलाः १. ६४. ४। शस्त्रास्त्राणि १. ९. ५४। ज्ञानवन्तः ५. ५७. ६। प्रापकाः ७. ५५. २। [ऋष्टीः] प्राप्ताः सेनाजनाः ५ ५२. ६॥ [ऋष्टिऽभिः] याभिः कलायन्त्रयष्टिभिर्ऋषन्ति जानन्ति प्राप्नुवन्ति व्यवहारांस्ताभिः १. ३७. २। व्यवहारप्रापकैः १. ६४. ८। यन्त्रचालनार्थैर्गमनागमननिमित्तैर्दण्डैः १. ८५. ४॥

ऋष्टिऽमन्तः यद्वय ऋष्टयो गतयो विद्यन्ते येषान्ते ३. ५४. १३। प्रशस्तविज्ञानवन्तः ५. ६०. ३॥ [ऋष्टिमत्ऽभिः] कलाभ्रामणार्थयष्टिशस्त्रास्त्रादियुक्तैः १. ८८. १॥

ऋष्टिऽविद्युतः [ऋष्टिऽविद्युतः] विद्युति ऋष्टिर्विज्ञानं येषान्ते ५. ५२. १३। ऋष्टिर्विद्युदिव येषान्ते १. १६८. ५॥

ऋष्वः प्राप्तविद्यः १. ८१. ४। गतिमान् १. १४६. २। ज्ञाता २. २१. ४। प्रापकः ३. ९. ५। प्राप्तुं योग्यः ३. ९. ७। महान् ३. ५. १०॥ [ऋष्वासः] ज्ञानहेतवः १. ६४. २॥ [ऋष्वम्] श्रेष्ठम् ४. १६. १॥ [ऋष्वात्] महतः कारणात् ४. २२. ४॥ [ऋष्वे] महागुणयुक्ते ६. ६४. ४॥

ऋष्वः महन्नाम। निघ० ३।३॥

ऋष्वऽवीरस्य ऋष्वा महान्तो गुणा वीरा वा यस्य तस्य १. ५२. १३॥

ऋष्वाः महत्यः २६. ५॥ [ऋष्वया] महत्या ६. १८. १०॥

ए

एक॑ऽआयुः एकं सत्यगुणस्वभावमायुर्यस्य सः १. ३१. ५ ॥

एक॑ः अद्वितीयः १. ७. ६ । अद्वैतः १. १५४. ४ । अनुत्तमोऽसहायः १. ६१. १५ । एकः १. ३३. ४ ॥ [एकम्] स्वयंसिद्धम् १७. ३० ॥

प्रजापतिर्वा एकः । तै० ३ । ८ । १६ । १ ॥

एक॑ःऽएकः प्रत्येकः ३. २६. १५ ॥

एक॑ऽचक्रम् एकं सर्वकलाभ्रमणार्थं चक्रं यस्मिँस्तम् १. १६४. २ ॥

एकचक्रम् एकचारिणम् । नि० ४ । २७ ॥

एक॑ऽजम् एकस्मात् कारणाज्जातम् १. १६४. १५ ॥

एक॑तार्थं एकस्य सुखस्य भावाय १. २३ ॥

एक॑ऽत्रिंशः एकत्रिंशद्धा १४. २३ ॥

एक॑ऽत्रिᳪशत् एकाधिका त्रिंशत् १८. २४ ॥

एक॑त्वम् अद्वितीयत्वम् ४०. ७ ॥

एक॑धनविदे॑ य एकेन धर्मेण विज्ञानेन वा धनं विन्दति तस्मै ५. ७ ॥

एक॑धेनुऽभिः एकैव धेनुर्वाक् सहायभूता येषां तैः सह ७. ३८. ५ ॥

एक॑ऽनीडम् एकस्थानम् ३२. ८ ॥

एक॑ऽपदी॑ एकवेदाभ्यासिनी १. १६४. ४१ ॥ [एकपदीम्] एकमोमिति पदं प्राप्तव्यं यस्यां ताम् ८. ३० ॥

एक॑ऽपात् एकः पादो गमनं प्रापणं यस्य सः २. ३१. ६ । एकः पादो जगति यस्य सः ६. ५०. १४ । सर्वं जगदेकस्मिन् पादे यस्य सः ७. ३५. १३ । एकः पादो बोधो यस्य सः ३४. ५३ ॥

वायुरेकपात्तस्याकाशं पादः । गो० पू० २ । ८ ॥

एक॑विᳪशः षोडश कलाश्चत्वारः पुरुषार्थावयवाः कर्त्ता चेति तेषामेकविंशतेः पूरणः १०. १३ । एकविंशतेर्विद्यानां पूरकः १३. ५७ । एकविंशतिः १४. २३ । एतत्संख्यापूरकः १५. १३ ॥

प्रतिष्ठा वा एकविᳪशः स्तोमानाम् । तां० ३ । ७ । २ । एकविंश एव (स्तोमः) सर्वम् । गो० पू० ५ । १५ । एकविᳪशो वै स्वर्गो लोकः । श० १० । ५ । ४ । ६ । एष एवैकविᳪशो य एष (सूर्य्यः) तपति । श० ५ । ५ । ३ । ४ । एकविᳪशो वा अस्य भुवनस्यादित्यः । तां० ४ । ६ । ३ । असौ वा आदित्य एकविᳪशः । तै० १ । ५ । १० । ६ । एकविंशो वा एष य एष (आदित्यः) तपति । कौ० २५ । १ । द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तांद्विᳪशतिरेषऽएवैकविᳪशो य एष (सूर्यः) तपति । सैषा गतिरेषा प्रतिष्ठा । श० १ । ३ । ५ । ११ । आदित्य एवैकविंशस्यायतनं द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः । तां० १० । १ । १० । एकविंशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः । ऐ० १ । ३० । एकविᳪशो वै पुरुषः । तै० ३ । ३ । ७ । १ । एकविंशोऽयं पुरुषो दश हस्त्या अंगुलयो दश पाद्या आत्मैकविंशः । ऐ० १ । १९ । क्षत्रं वा एकविᳪशः । तां० १८ । १० । ६ । विड्वा एकविंशः । तै० १ । ८ । ८ । ५ । शौद्रो वर्ण एकविंशः । ऐ० ८ । ४ । एकविंशोऽग्निष्टोमः । तां० १६ । १३ । ४ । तं (एकविंशस्तोमं) उ देवतल्प इत्याहुः । तां० १० । १ । १८ ॥

एक॑विᳪशतिः एकविंशतिः १८. २४ ॥

एकवीरः एकश्चासौ वीरश्च १७. २३ ॥

एको ह तु सेन्वीरो वीर्यवान् भवति। जै० ३।२।६।६। एको ह्येवैष वीरो यत्प्राणः। जै० ३।२।५।१॥

एकंशताय असंख्याताय पदार्थाय २२. ३४ ॥

एकंशफम् एकखुरमश्वादिकम् १३. ४८ ॥

पशवो वा एकशफम्। तै० ३।६।११।४। श्रीर्वा एकशफम्। तै० ३।६।८।२॥

एकंशितिपात् एकः शितिः पादोऽस्य २६. ५६ ॥

एकंऽश्नुष्टीन् एक ही धर्म कृत्य में शीघ्र ही प्रवृत्त होने वाले। अथर्व ३. ३०. ७ (१७४ विधि०)॥

एकाऽएका उन में से प्रत्येक १. १२३. ८ ॥

एका इता संख्या। नि०।३।१०॥

एकाकी असहायोऽद्वितीयः २३. ४५ ॥

एकाक्षरेण ओमित्यनेन विज्ञापकेन दैव्या गायत्र्या छन्दसा ६. ३१ ॥

एकादश दश प्राणा जीवात्मा च १. १३६. ११। एकाधिका दश १८. २४। पृथिव्यप्तेजोवाय्वाकाशादित्यचन्द्रनक्षत्राहङ्कारमहत्तत्त्वप्रकृतयः ७. १६। दशेन्द्रियाणि मनश्चेति १. १३६. ११॥ [एकादशभिः] दशप्राणा एकादश आत्मा तैः १४. २६ ॥

एकादशाक्षरेण आसुर्या पङ्क्त्या ६. ३३ ॥

एकादशी एकादशानां पूरणा २५. ४॥

एजत् कम्पयत् १. १६४. ३० । कम्पते ४. १७. १० । चलत् ३. ५४. ८ ॥

एजतः कम्पयतः २३. २८ ॥

एजति [एजति] कम्पते चलति वा ५. ७८. ८। कम्पते वर्धते च ८. २८ ॥

एजतिः गतिकर्मा। निघ० २। १४॥

एजतु [एजतु] कम्पताम् ५. ७८. ७। चेष्टताम् २३. २७। चलतु ८. २८ ॥

एजान् भीरून् कम्पकान् ६. २५. ७ ॥

एज्याः समन्ताद् यष्टुं सङ्गन्तुं योग्याः क्रियाः २१. ४७ ॥

एणी मृगी २४. ३६ ॥

एतग्वाः एतान् प्रत्यक्षान् पदार्थान् गच्छन्तीति १. ११५. ३ ॥

एतग्वः अश्वनाम। निघ० १। १४॥

एतत् इस को १. १००. १७ ॥

एतरि प्राप्नुवन्ति ५. ४१. १०। प्राप्तव्ये ६. १२. ४ ॥

एतवे एतुम् (अत्र तुमर्थे से० इति तवै प्रत्ययः) १. ४६. ११। प्राप्तुम् ५. ४४. ११ ॥

एतवै [एतवै] प्राप्तुम् ४. ५८. ६। गन्तुम् ८. १३ ॥

एतशः साधुरश्वः १. १२१. १३। अश्वोऽश्विकमिव ५. ३१. ११। प्राप्नुवन् २. १९. ५। सर्वत्र प्राप्तः ५. ८१. ३। सर्वजगादितः स्वव्याप्त्या प्राप्तः (इणस्तशतसुनौ उ० ३.१४७)११.६॥ [एतशम्] वेगादिगुणयुक्ताश्ववन्तम् १.५४.६। प्राप्तविद्यमश्ववद् बलिष्ठम् ४. ३०. ६ ॥ [एतशेन] अश्वेनेव व्याप्तिशीलेन वेगवता किरणनिमित्तेन वायुना १२.७४॥ [एतशेभिः]

ज्ञानवेगादिभिरागमकैर्गुणैरश्वैः ४. ३३ ॥

[एतशस्य] अश्वस्य सम्बन्धीनि ब-लानि १७. १० ॥

एतशः अश्वनाम । निघ० १ । १४ ॥

एताः [एताः] शिक्षायां प्राप्ताः १. १६६. १० । ये १. १६६. ६ । गतयः ५. ५४. ५ ॥

एतादृक्षासः एतैः सदृशाः १७. ८४ ॥

एतावत् इतने को ५. ७६. १० ॥

एतावान् एतावान् ३१. ३ (१२१ भूमि०) ॥

एति गच्छति १. ७१. ६ । विजानाति प्राप्नोति वा ५. ४४. १२ । प्रापयति ८. ४ । प्राप्नुयात् १. १२४. ६ । (अधि—) अध्येति ५. ४४. १३ ॥

एतिः गतिकर्मा । निघ० २ । १४ ॥

एतु प्राप्नोतु १. ४०. ३ । गच्छतु ७. ४४ । (वि—) व्याप्नोतु ११. ५ ॥

एतो एते ५. ४५. ५ ॥

एतोः अयनम् २. १५. ५ । एताम् २. ३८. ३ ॥

एत्य सेवां कृत्वा । अथर्व० १५. ११. २ (२८९ भूमि०) ॥

एत्यै गत्यै २७. ४५ ॥

एदिधिषुःऽपतिम् अकृतविवाहायां ज्येष्ठायां पुत्र्यामूढा कनिष्ठा- तस्याः पतिम् ३०. ६ ॥

एधः इन्धनम् १. १५८. ४ । वर्धकः २०. २३ । इन्धते प्रदीपयन्ति येन तद्वत् ३८. २५ ॥

एधताम् वर्धताम् २३. २६ ॥

एधते वर्धते ८. ५ ॥

एधमानऽद्विट् यो वर्धमानान् द्वेष्टि सः ६. ४७. १६ ॥

एधमानद्विट् एधमानान् द्वेष्टि । नि० ६ । २२ ॥

एधि भवसि १. ९१. १५ । वर्धय ७. ४७ । प्राप्त कराइये ७. ४७ । भवतु ४. १६ । भव ५. ६. ७ । प्राप्तो भव ४. १. ५ ॥

एधिषीमहि वर्धिषीमहि २०. २३ ॥

एन एति पुरुषार्थेन सुखानि यस्तत्सम्बुद्धौ १. १७३. ६ । एनेन ५. २. ११ ॥

एनः पापम् १. २४. ६ । पापाचरणम् १. १२५. ७ । अपराधम् ६. ५१. ७ ॥

एनस् एनः एतेः । नि० ११ । २१ ॥

एनसऽएनसः अधर्मस्याधर्मस्य ८. १३ ॥

एनीः एन्यो मृगस्त्रिय इव धावन्त्यः ५. ८५. ६ । एन्यः या यान्ति ता नद्यः ५. ५३. ७ ॥

[एनीम्] प्राप्तुं योग्याम् ५. ३३. ६ ॥

एनी नदीनाम । निघ० १ । १३ ॥

एनोः एनयोः (अत्र छान्दसो वर्णलोप इत्यकारलोपः) १. १३६. १ । अनयोर्मध्ये ६. ६६. ८ ॥

एम प्राप्नुयाम १. ५८. ४ ॥

एमः एति येन स प्रयत्नः १८. १५ ॥

[एमऽभिः] प्रापकैर्गुणैः ५. ५६. २ ॥

[एमन्] प्राप्तव्ये स्थाने (अत्र सप्तम्या लुक् । अत्र एमन्नादिषु छन्दसि पररूपमिति वार्त्तिकेन पररूपम्) १३. १७ । एति गच्छति तस्मिन्मार्गे १३. ५३ ॥

एमि प्राप्नोमि १. ५। प्राप्नुयाम् (अत्र लिङर्थे लट्) ३. ४१। प्राप्तोऽस्मि २३. ५० ॥

एरिरे प्रेरयन्ति प्राप्नुवन्ति वा १. १२८. ८। कम्पयन्ति गमयन्ति वा २. २. ३ ॥

एरिरे इतीर्त्तिरुपसृष्टोऽभ्यस्तः। नि० ४। २३ ॥

एव अवधारणार्थे १. ८. ८ ॥

एव एवम्। नि० २। १६ ॥

एवः ज्ञानम् १५. ४। प्रापणम् १५. ५ ॥ [एवाः] कामयमानाः ५. ४१. ५ ॥ [एवासः] गमनशीलाः १. १६६. ४ ॥ [एवेन] गमनेन १. १२८. ३ ॥ [एवैः] प्रशस्तज्ञानैः कर्मभिर्वा १. १००. १८। प्राप्तैर्वेगादिगुणैः ४. ३३. १। ज्ञापकैः प्रापकैर्गुणैः १. ६८. २। प्राप्तैः १. १००. ११। प्राप्तैः प्रशस्तज्ञानैः १. १००. २ ॥

एवैः कामैरयनैरवनैर्वा। नि० १२। २१ ॥

एवम् अमुना प्रकारेण २१. ४४ ॥

एवया गमनक्रियया ४. ४१. १६ ॥

एवऽयाः एवान् रक्षकान् याति १. १५६. १ ॥ [एवयावः] य एवं धिज्ञानं यान्ति तान् २. ३४. ११ ॥ [एवऽयावः] एति जानाति सर्वव्यवहारं येन स एवो बोधस्तं याति प्राप्नोति वा प्रापयति तत् सम्बुद्धौ (मतुवसोरादेशो वन उपसंख्यानम् अ० ८. ३. १। अनेन वार्त्तिकेनात्र सम्बोधने रुः) १. ९०. ५ ॥

एवयामरुत् य एवान् प्रापकान् यान्ति तेषां यो मरुन्मनुष्यः ५. ८७. १। विज्ञानवान्मनुष्यः ५. ८७ ॥

प्रतिष्ठा वा एवयामरुत्। ए० ६। ३०। गो० उ० ६। ८ ॥

एवऽयावरी दुःखनिवारिका ६. ४८. १२ ॥

एवऽवदस्य एवान् प्राप्तान् गुणान् वदन्ति येन तस्य ५. ४४. १० ॥

एवो एव ४. १२. ६ ॥

एषस्य ऐश्वर्यवतः २. ३४. ११। सर्वत्र प्राप्तव्यस्य ७. ४०. ५ ॥

एषि [एषि] प्राप्नोषि १. १२३. १० ॥

एषे [एषे] एतुं प्राप्तुम् ५. ४१. ५। गन्तुम् ५. ६६. ३। इच्छवे १. १८०. ४ ॥

एषो इयम् १. ४६. १ ॥

एष्टः अच्छे प्रकार इष्ट है २३. ४६ ॥

एष्टयः समन्तादिष्टयो विद्वत्पूजा सत्सङ्गो विद्यादानञ्च याभ्यस्ताः १८. ४३ ॥

ऋक्सामानि वाऽएष्टय ऋक्सामे ह्याशासनऽइति नोऽस्त्वित्यं नोऽस्त्विति। श० ४।४।१। १२ ॥

एष्टा पर्यालोचकः १. १८४. २। सर्वत इष्टकारिणः ५. ७ ॥

एर्हि प्राप्नुहि ३८. २ ॥

एर्हिऽमायासः आ समन्तादीष्टायां प्रज्ञा येषां ते (चेष्टार्थस्याङ्पूर्वस्येहधातोः सर्वधातुभ्य इन्। उ० ४. ११६. इतीन्प्रत्ययान्तं रूपम्। मायेति प्रज्ञानामसु पठितम् निघ० ३. ६) १. ३. ९ ॥

ऐ

ऐक्षेताम् पश्यतः ३२. ७ ॥

ऐजन् एजन्ति १. ६३. १ ॥

ऐट्ट प्रशंसेत ३. ४८. ३ ॥

ऐडम् इडाया वाचो व्याख्यात्री १३. ५७ ॥ [ऐडेन] इडायाऽन्नस्येदं संस्करणं तेन १५. ७ ॥ [ऐडात्] उस मंत्र से १३.५७॥

ऐत् प्राप्नोति ५. ३०. ६ ॥

ऐत प्राप्नुत ४. ३५. ३ ॥

ऐतन [ऐतन] प्राप्नुत १. ११०. २ । विज्ञापयत १. ११०.३। विजानीत १. १६१. ६॥

ऐताम् प्राप्नुतः १४. ३० ॥

ऐधाऽइव एधैः काष्ठैरिव १. १६६. १ ॥

ऐनोः प्रेरयेः ४. १६. ७ ॥

ऐनोत् प्राप्नोति (अत्रेणधातोर्व्यत्ययेन श्नुः) १. ६६. ५ ॥

ऐन्द्रः इन्द्रो जीवो देवताऽस्य स ऐन्द्रः ६. २० । विद्युद्देवताकः ६. २० । इन्द्रदेवताकः २६. ५८ ॥

ऐन्द्रम् इन्द्रस्य परमेश्वरस्येदमाधिकरणम् ५. ३० । इन्द्रस्यैश्वर्य्यस्येदम् १६. १८ । ऐश्वर्य्यकारकम् १९. २६ । इन्द्रस्य विद्युत इदम् १६. ८ । इन्द्रो विद्युद्देवता यस्य तत् विज्ञानम् १६. १५ ॥

ऐन्द्रवायव इन्द्रो विद्युद् वायुश्च तयोरयं सम्बन्धी १८. १९ ॥ वाक् च प्राणश्चैन्द्रवायवः । ऐ० २ । २६ ॥

ऐन्द्राग्नः इन्द्रो वायुरग्निर्विद्युच्च ताभ्यां निर्वृत्तः १८. २० । इन्द्राग्नीदेवत्यः २६. ५८ ॥ [ऐन्द्राग्नाः] वायुविद्युद्देवताकाः २४. ४. १७ । वायुविद्युत्सञ्ज्ञिनः २४. ८ ॥

ऐन्द्राबार्हस्पत्याः वायुसूर्यदेवताकाः २४. ७॥

ऐन्द्रावैष्णवा विद्युत्वायुदेवताकाः २४. ७ ॥

ऐयेः गच्छेः ५. २. ८ ॥

ऐरत् [ऐरत्] प्रापयेत् ४. ४. ६ । प्रेरयति २. १६. ६ । कम्पयति यथाक्रमं चालयति ४. ५६. ३ । प्रेरयेत् ३. ३१. १५ । प्रेरयति ३. ५५. २० । प्राप्नोति २. १५. ८ ॥

ऐरत प्रेरयन्ति ७. २३. १ ॥

ऐरतम् गच्छतम् १. ११८. ६ ॥

ऐरम् प्रेरयेयम् ४. २६. ३ ॥

ऐरयः ईर्ष्व २. १७. ३ ॥

ऐरयत् [ऐरयत्] कम्पयति २. १७. १ । वीरयत् वीरयत्यूर्ध्वमधोगमयति (अत्र लडर्थे लुङ्) १. ७. ३ । गमयति १. ५१. ११ । प्रेरयति २. २०. ७ । प्रेरयेत् ६. ५६. ३ ॥

ऐरयतम् [ऐरयतम्] गमयतम् १. ११२. ५ । प्रापयतम् १. ११७. २२ । प्रेरयतम् १. ११७. २४ ॥

ऐरयन् प्राप्नुवन्ति (अत्र लडर्थे लङ्) १. २८ ॥

ऐरयम् प्रेरयेयम् ४. ४२. २ ॥
ऐरयेथाम् [ऐरयेथाम्] चालयेथाम् १. १५७. ५। प्रेरयेतम् ६. ६६. ८ ॥
ऐलवृदाः इलायाः पृथिव्या इमानि वस्तुजा-तानि ऐलानि तानि ये वर्धयन्ति ते (अत्र वर्णव्यत्ययेन धस्य दः। इगुपधलक्षणः कश्च) १६. ६० ॥
ऐषन्त इच्छेयुः १. १२६. ५ ॥

ओ

ओ आभिमुख्ये १. १०४. २। अवधारणे १. ११३. ११। सम्बोधने १. १३८. ४। प्रेरणेषु २. ३४. १५ ॥
ओकः गृहम् १. ६६. २। स्थानम् १. १०४. ५ ॥ [ओकसः] सर्वनिवासार्थस्याकाशस्य १. ३०. ६ ॥

ओकस् ओक इति निवासनामोच्यते। नि० ३।३॥
गृहा वा ओकाः। ऐ० ८। २६ ॥

ओकिऽवांसौ सङ्गतौ सम्बद्धौ ६. ५६. ३ ॥
ओक्यम् ओकेषु गृहेषु साधु १. १३२. ५ ॥ [ओक्ये] गृहे ३. ४२. ८ ॥
ओजः पराक्रमम् १. १०३. ३। विद्यापराक्रमम् १. ३६. १०। वेगवद्बलम् ४. ७. १०। वीर्यम् ५. ३२. १०। प्राणधारणम् ६. १९. ६। बलकरमन्नादिकम् ६. ४६. ७। पराक्रमकारि ५. ५। पराक्रमयुक्तः १०. १५। शरीरस्थं तेजः १८. ३। सत्यं विद्याबलञ्च (१५३. भूमि०)। जलम् २१. ५६। जलवेगः २८.५। शारीरिकं बलं मानसं बलञ्च ३६. १ ॥ [[illegible]] शरीरात्ममनःपराक्रमान् १. ८०. १५ ॥

ओजः उदकनाम। निघं० १। १२॥ बलनाम। निघ० २। ६। ओजसा बलेन। ओज ओजतेर्वा, उब्जतेर्वा। नि० ६। ८ ॥
ओजः सहः सह ओजः। कौ० ३। ५। वज्रो वाऽ ओजः। श० ८। ४। १। २० ॥

ओजस्वतीः जितेन्द्रियाः १०. ३। विद्याबलपराक्रमयुक्ता राजस्त्रियः १०. ३ ॥
ओजायमानः ओज इवाचरन् १. १४०. ६ ॥ [ओजायमानम्] बलवन्तम् ३. ३२. ११ ॥
ओजिष्ठः अतिशयेन पराक्रमी ८. ३[illegible]। अतिशयेन ओजस्वी ३३. ६४ ॥ [ओजिष्ठम्] अतिशयेन बलप्रदम् ३. २१. ५ ॥ [ओजिष्ठाय] अतिशयेनौजो विद्यते यस्मिन्विद्याव्यवहारे तस्मै ९. ५ ॥
ओजीयः बलिष्ठम् २. ३३. १० ॥
ओजीयान् अतिशयेन पराक्रमी ६. २०. ३ ॥
ओज्मानम् बलकारिणम् ६. ४७. २७। पराक्रमयुक्तं रसम् २६. ५३ ॥
ओणिम् दुःखान्धकारस्यापनयनम् १. ६१. १४ ॥ [ओण्योः] द्यावापृथिव्योः ३. ३० ॥

ओण्यौ द्यावापृथिव्योर्नाम। निघ० ३। ३० ॥

ओतम् सूत्रे मणिगणा इव प्रोतम् ३४. ५ ॥

ओतवै विस्ताराय १. १६४. ५ ॥

ओतुम् रचयितुम् ६. ६. २। रक्षकम् ६. ६. ३ ॥

ओद्मन् ओषधिषु १३. ५३ ॥

ओदती उन्दनं कुर्वन्ती १. ४८. ६ ॥

ओदती उषोनाम। निघ० १।८॥

ओपशम्ऽइव अत्यन्तं सम्बद्धम् १. १७३.६ ॥

ओ३म् ईश्वरवाचको यज्ञो वेदविद्या वा (ओ३म् खं ब्रह्म। यजु० ४०। १७ अत्र अवतेष्टिलोपश्च। उ० १. २४१ अनेन ऽवधातोर्मन्प्रत्ययोऽस्य टिलोपश्च) २. १३। एतन्नामवाच्यमीश्वरम् ४०. १५। योऽवति सकलं जगत्तदाख्या ४०. १७ ॥

तदेतदक्षरं (ओङ्कारं) ब्राह्मणो यं काममिच्छेत् त्रिरात्रोपोषितः प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्व आवर्तयेत् सिद्ध्यन्त्यस्यार्थाः सर्वकर्माणि च। गो० पू० १।२२। (ओङ्कारस्य) को धातुरित्याप्लृधातुरवतिमप्येके रूपसामान्यादर्थसामान्यान्नेदीयस्तस्मादापेरोंकारः सर्वमाप्नोतीत्यर्थः। गो० पू०१। २६। को विकारी च्यवते। प्रसारणमाप्नोतेराकारपकारौविकार्यावादित ओङ्कारो विक्रियते। द्वितीयो मकार एवं द्विवर्ण एकाक्षर ओमित्योङ्कारो निर्वृत्तः। गो० पू० १।२६। ते (देवाः) ओङ्कारं ब्रह्मणः पुत्रं ज्येष्ठं ददृशुः। गो० पू० १। २३। लातव्यो गोत्रो, ब्रह्मणः पुत्रो, गायत्रं छन्दः,- शुक्लो वर्णः, पुंसो वत्सो रुद्रो देवता ओङ्कारो वेदानाम्। गो० पू० १।२५। तासामभिपीडितानां (व्याहृतीनां) रसः प्राणेदत्। तदेतदक्षरमभवदोमिति यदेतत्। जै० उ० १। २३।७। तानि (भूर्भुवः स्वः) शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तदेतदो३मिति। ऐ० ५।३२। ओमिति वै साम। जै० उ० १।१।२। ओमिति मनः। जै० उ० १।१।२। ओमित्यथर्वणां शुक्रम्। गो० पू० २। २४। ओमितीन्द्रः। जै० उ० १।६।२। ओमित्यसौ योऽसौ (सूर्यः) तपति। ऐ० ५।३२। हन्तेति चन्द्रमा ओमित्यादित्यः। जै० उ० ३। ६।२। ओमिति वै स्वर्गो लोकः। ऐ० ५।३२। ओमित्येतदेवाक्षरमृतम्। जै० उ० ३।३६।५। तदेतत्सत्यमक्षरं यदोमिति। तस्मिन्नापः प्रतिष्ठिताः। जै० उ० १।१०।२। तस्मादोऽमित्येव प्रतिगृह्णीयात् तद्धि सत्यं तद्देवा विदुः। श० ४। ३।२।१३। ओमित्यृचः प्रतिगर एवं तथेति गाथाया ओमिति वै दैवं तथेति मानुषम्। ऐ० ७।१८। यद्वै नेत्यृच्योमिति तत्। श० १। ४।१।३०। एतद्ध वा (ओमिति) अक्षरं वेदानां त्रिविष्टपम्। जै० उ० ३।१६।७। एतद् (ओमिति)एवाक्षरं त्रयी विद्या। जै०उ०१।१८।१०। स (ब्रह्मा) ओमित्येतदक्षरमपश्यद् द्विवर्णं चतुर्मात्रं सर्वव्यापि सर्वविभ्वयातयाम ब्रह्म। गो० पू० १।१६। एष (ओमित्यक्षरम्) उ ह वाव रसः। जै० उ० १।८।५। यथा सूच्या पलाशानि सन्तृण्णानि स्युरेवमेतेना (ओमिति) अक्षरेणेमे लोकाः सन्तृण्णाः। जै० उ० १।१०।३। एवमेवैवं विद्वान् ओमित्येतदेवाक्षरं समारुह्य यददोऽमृतं तपति तत्प्रपद्य ततो मृत्युना पाप्मना व्यावर्तते। जै० उ० १।१८।११ ॥

ओमासः रक्षका ज्ञानिनो विद्याकामा उपदेशप्रीतयो विज्ञानतृप्तयो याथातथ्यावगमाः शुभगुणप्रवेशाः सर्वविद्याश्राविणः परमेश्वरप्राप्तौ व्यवहारे च पुरुषार्थिनः शुभविद्यागुणयाचिनः क्रियावन्तः सर्वोपकारमिच्छुका विज्ञाने प्रशस्ता आप्ताः सर्वशुभगुणालिङ्गिनो दुष्टगुणहिंसकाः शुभगुणदातारः सौभाग्यवन्तो ज्ञानवृद्धाः (अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अविसिविसिशुषिभ्यः

कित्। इत्यनेनौणादिकेन सूत्रेणावधातोरोमशब्दः सिध्यति) १. ३. ७॥ [ओमानम्] रक्षन्तं विद्याप्रवेशकं क्रियागमकं व्यवहारं (अत्रावधातोः, अन्येभ्योऽपि दृश्यन्त इति मनिन्) १. ३४. ६। रक्षणादिसत्कर्मपालकम् १. ११८. ७॥ [ओमऽभिः] रक्षणादिकारकैः सह ५. ४३. १३॥

ओमासः अवितारो वाऽवनीया वा। नि० १२। ४०॥

ओम्यावतीम् अवन्ति त ओमास्तेषु भवा प्रशस्ता विद्या तद्वतीम् १. ११२. २०॥

ओम्याऽवन्तम् येऽवन्ति त ओमानस्तान् ये यान्ति प्राप्नुवन्ति त ओम्या एते प्रशस्ता विद्यन्ते यस्य तम् १. ११२. ७॥

ओषं दहसि १. १७५. ३॥

ओषम् क्षिप्रनाम। निघ० २। १५॥

ओषतात् दह १२. १२॥

ओषति दहेत् १. १३०. ८॥

ओषधिः सोमादिः १. १६६. ५॥ [ओषधीभ्यः] रोगनिवारिकाभ्यः ६. ६॥ [ओषधे] ओषधिव्यापिन् १. १८७. १० ओषधिवद्वर्तमान विद्वन् १२. १००॥

ओषधयः ओषद्धयन्तीति वा, ओषत्येना धयन्तीति वा, दोषं धयन्तीति वा। नि० ९। २७॥ (प्रजापतिः) तां (आहुतिं) व्यौक्षत् ओषं धयेति तत ओषधयः समभवंस्तस्मादोषधयो नाम। श० २। २। ४। ५। द्वय्यो वा ओषधयः पुष्पेभ्योऽन्याः फलं गृह्णन्ति। मूलेभ्यो अन्याः। तै० ३। ८। १७। ४। उभय्यो (ओषधयः) ऽस्मै स्वदिताः पच्यन्तेऽकृष्टपच्याश्च कृष्टपच्याश्च। तां० ६। ६। ६। वाग्दैवत्यं साम, वाचो मनो देवता, मनसः पशवः, पशूनामोषधयः, ओषधीनामापः। तदेतदद्भ्यो जातं सामाप्सु प्रतिष्ठितमिति। जै० उ० १। ५६। १४। आपो ह वाऽओषधीनां रसः। श० ३। ६। १। ७। अपामोषधयः (रसः) ओषधीनां पुष्पाणि (रसः) पुष्पाणां फलानि (रसः)। श० १४। ६। ४। १। एष ह वै सर्वासामोषधीनां रसो यत्पयः। कौ० २। १। अग्नेर्वा एषा तनूः यदोषधयः। तै० ३। २। ५। ७। यद्युम्रो देवा ओषधयो वनस्पतयस्तेन। कौ० ६। ५। ओषधयो वै पशुपतिस्तस्माद्यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति। श० ६। १। ३। १२। ओषधयो वै मुदः, ओषधिभिर्हीदं सर्वं मोदते। श० ६। ४। १। ७। ओषधयो बर्हिः। ऐ० ५। २८। श० १। ३। ३। [६]। तै० २। १। ५। १। ओषधयः खलु वै वाजः। तै० १। ३। ७। १। ओषधयो मधुमतीः। तै० ३। २। ८। २। रसो वा एष ओषधिवनस्पतिषु यन्मधुः। ऐ० ८। २०। सौम्या ओषधयः। [illegible]२। ४। १। २। सोम ओषधीनामधिराजः। [illegible] उ० १। १७। सोमो वै राजा ओषधीनाम्। कौ० ४। १२। सोमो वा ओषधीनां राजा। तै० ३। ६। १७। १। ओषधयो वै सोमो राजा। ऐ० ३। ४०। ओषधिलोको वै पितरः। श० १३। ८। १। २०। जगत्य ओषधयः। श० १। २। २। २। ओषधयो वै देवानां पत्न्यः। श० ६। ५। ४। ४। सैनान्यं वा एतदोषधीनां यद्यवाः। ऐ० ८। १६। साम्राज्यं वा एतदोषधीनां यन्महाव्रीहयः। ऐ० ८। १६। (प्रजापतिः) विष्णोरध्योषधीरसृजत। तै० २। ३। २। ४॥

ओष्ठेन ओष्ठ से २५. २॥

ओहते [ओहते] व्यवहारान् वहति (अत्र वाच्छन्दसीति सम्प्रसारणं लघूपधगुणः) १. १७६. ४। प्राप्नोति प्रापयति वा ५. ५२. ११। वितर्कयति ७. १६. ११। वितर्कयुक्ताय २. २३. १६॥

ओहम् ओहति प्राप्नोति येन तम् १. ६१. १॥ [ओहेन] बीजादिस्थापनेन १. १८०.

५ ॥ [ओहैः] अर्दकैः कर्मभिः ४. १०. १। विद्यासुखप्रापकैः १५. ४४। रक्षणादिभिः १७. ७७ ॥

ओहसानम् तर्कगम्यम् ६.१७.६॥ [ओहसा] प्राप्तेन बलेन वेगेन वा ६. ६७. ६ ॥

ओहसे आप्नोसि १. १०. ४ ॥

ओहानः रक्षकः ६. ५२. ९ ॥ [ओहानम्] त्यजन्तम् ५. ३०. ६ ॥

औ

औक्षन् सिञ्चन्ति ३. ६. ६। सिञ्चेरन् ३३. ७ ॥

औचथ्यः प्रशंसितेषु भवः १. १५८. १ ॥ [औचथ्यम्] उचितेषूचितेषु कर्मसु साधुम् १. १५८. ४ ॥

औच्छः निवासितवती वर्तते ५. ७९. ३। विवासयति ५. ७९. २ ॥

औच्छत् निवासयति ५. ३०. १४ ॥

औद्भिदम् उद्भिनत्ति दुःखानि येन तदेव ३४. ५० ॥

औद्भिद्यम् उद्भिदां पृथिवीं भित्वा जातानां भावम् १८. ६ ॥

औपद्रष्ट्राय उपद्रष्टृत्वाय ३०. १३ ॥

औज्जः य उज्जत्यार्जवीकरोति तेन निर्वृत्तः सः १. ५६. ५। आर्जवे भवः २. २३. १८ ॥

औज्जत् उज्जति सरलीकरोति १. ८५. ६ ॥

औभ्नात् मृद्नाति ४. १६. ४ ॥

और्णवाभम् ऊर्णा नाभ्यां यस्य तदपत्यमिव २. ११. १८ ॥

और्णोः आच्छादयतु ६. १७. ६ ॥

और्णोत् [और्णोत्] ऊर्णुत आच्छादयति १७. १८। स्वीकरोति १. ६८. ५ ॥

औशिजः य उशिजि प्रकाशे जातः स उशिक् तस्य विद्यावतः पुत्र इव १. १८. १। कमनीयस्य पुत्रः १. ११९. ६। कामयमानपुत्रः १. १२२. ४। कामयमानस्य पुत्रः ६. ४. ६। विद्याकामस्य पुत्रः १. १२२. ५ ॥ [औशिजाय] मेधाविपुत्राय (उशिज इति मेधाविनाम निघं० ३। १५) १. ११२. ११ ॥
औशिजः उशिजः पुत्रः। नि० ६। १० ॥

औहत ऊहते १. १६४. २६ ॥

औहिष्ट वितर्कयति ६. १७. ८ ॥